मध्यसिद्धान्तकौमुदी प्रश्नोत्तरी

प्रणेता

पण्डितश्रीरामगोविन्दशुक्लः

मोतीलाल बनारसीदास

दिल्ली वाराणसी पटना

बंगलौर मद्रास

मध्यसिद्धान्तकौमुदीतत्त्वप्रकाशः

मध्यसिद्धान्तकौमुदी प्रश्नोत्तरं

लेखकः

पण्डितश्रीरामगोविन्दशुक्लः

न्याय-व्याकरण-साहित्याचार्यः

सम्पादकः

पण्डितश्रीचन्द्रधरशुक्ल, व्याकरणाचार्यः

व्याकरणप्राध्यापकः

राजगोपाल-संस्कृत-महाविद्यालय अयोध्या, फैजाबाद

मोतीलाल बनारसीदास

दिल्ली वाराणसी पटना

बंगलौर मद्रास

पुनर्मुद्रण : दिल्ली, १९८७

©मोतीलाल बनारसीदास

मुख्य कार्यालय : बंगलो रोड, जवाहर नगर, दिल्ली ११० ००७
शाखाएँ : चौक, वाराणसी २२१ ००१
अशोक राजपथ, पटना ८०० ००४
२४, रेसकोर्स रोड, बंगलौर ५६०००१
१२० रायपेट्टा हाई रोड, मैलापुर, मद्रास ६०० ००४

मूल्य : रु० १८

नरेन्द्रप्रकाश जैन, मोतीलाल बनारसीदास, दिल्ली-७
द्वारा प्रकाशित तथा जैनेन्द्रप्रकाश जैन, श्री जैनेन्द्र प्रेस, ए-४५
नारायणा फेज-१, नई दिल्ली-२८ द्वारा मुद्रित।

दो शब्द

मध्यसिद्धान्तकौमुदी का पठन-पाठन में न रहने से किसी भी विद्वान ने इस पर प्रमाणिक टीका नहीं लिखी। अतएव यह परीक्षा में प्रविष्ट होने पर दुरूह सी लगती है। छात्रों को तो कोई सहारा ही नहीं है। कतिपय विद्वानों ने सामान्य टिप्पणी लिखा है वे भी सहायक ही हैं तात्पर्य बोधक नहीं। अतएव मैं मध्यकौमुदी पर एक तत्त्वबोधिनी लिखने का प्रयास कर रहा हूँ। इस कार्य में कुछ विलम्ब देखकर इस तत्त्वप्रकाश की रचना की गई है। यह छात्रों के अधिक सन्तोष के लिए होगी। इसमें प्रायः सब प्रयोगों का साधुत्व है। यद्यपि प्रश्नोत्तरी का विस्तार होने से मूल्य कुछ अधिक हो सकता है किन्तु उपादेयता की ओर जब ध्यान दिया जायगा तब तो सन्तोष ही होगा। यह तृतीय संस्करण इसकी उपादेयता का परिणाम है। मैंने इस संस्करण में उन प्रयोगों के साधुत्व का भी समावेश कर दिया जो बाद के प्रश्नपत्रों में पूछे गये थे। इस प्रकार यह परिवर्धित संस्करण अधिक उपादेय सिद्ध होगा।

अन्त में विश्वेश्वर के चरणों में पुष्परूप से समर्पित करते हुए मङ्गल की कामना करता हूँ।

बसन्तपञ्चमी]
२०३८ विक्रम]

रामगोविन्दशुक्ल

विषय-सूची

विषय	पृष्ठ
संज्ञाप्रकरणम्	१
अचसन्धिप्रकरणम्	८
हल्सन्धिप्रकरणम्	२०
विसर्गसन्धिप्रकरणम्	३०
स्वादिसन्धिप्रकरणम्	३०
अजन्तपुंलिङ्गप्रकरणम्	३९
अजन्तस्त्रीलिङ्गप्रकरणम्	४६
अजन्तनपुंसकलिङ्गप्रकरणम्	५२
हलन्तपुंलिङ्गप्रकरणम्	५६
हलन्तस्त्रीलिङ्गप्रकरणम्	७८
हलन्तनपुंसकलिङ्गप्रकरणम्	८३
अव्ययप्रकरणम्	८७
तिङन्तनवगणप्रकरणम्	१७८
प्रक्रियाप्रकरणम्	१७८–२१७
लकारार्थप्रकरणम्	२१७
कृदन्तप्रकरणम्	२१८–२३७
कारकप्रकरणम्	२३७
समासप्रकरणम्	२४६–२७३
तद्धितप्रकरणम्	२६३–२८५
स्त्रीप्रत्ययप्रकरणम्	२८५
वैदिकप्रकरणम्	२९१
स्वरप्रकरणम्	२७३
प्रश्नपत्राणि	२९४

श्री :

मध्यकौमुदीतत्त्वप्रकाशः

यतो वाचो निवर्तन्त अप्राप्य मनसा सह ।
स सरयूपुलिने खेलन् बालो मेस्तु मुदे सदा ॥
ध्यात्वा विश्वेश्वरं देवं देवीं च भुवनेश्वरीम् ।
मध्यसिद्धान्तकौमुद्याः प्रकाशस्तन्यते मया ॥

अथ संज्ञाप्रकरणम्

अइउण् । १ । ऋलृक् । २ । एओङ् । ३ । ऐऔच् । ४ । हयवरट् । ५ । लण् । ६ । ञमङणनम् । ७ । झभञ् । ८ । घढधष् । ९ । जबगडदश् । १० । खफछठथचटतव् । ११ । कपय् । १२ । शषसर् । १३ । हल् ।

इति माहेश्वराणि सूत्राणि, ।

माहेश्वराणि-(ई० ३०) महेश्वरादागतानि माहेश्वराणि=महेश्वरवरप्रसादलब्धानि । तथाहि—नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् । उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥

अथवा—महेश्वरेण प्रोक्ता उपज्ञाता माहेश्वराः चतुर्दशानुबन्धाः ते सन्ति येषु तानि माहेश्वराणि महेश्वरकृतानुबन्धयुतानि इत्यर्थः ।

अत्र सूत्राणि महेश्वरादागतानि अनुबन्धाः आचार्यपाणिनिकृताः इत्येकः पक्ष. । सूत्राणि अनादिसिद्धानि अनुबन्धाः महेश्वरकृताः इत्यपरः पक्षः ।

अइउण्—इत्यत्र छन्दोवत्सूत्राणि भवन्तीति सिद्धान्तात् न यणादीनि । आनुपूर्वीसम्पादनमात्रप्रयोजनकत्वाच्च न वर्णात्कार इत्यनेन कारप्रत्ययः ।

हयवरट्-हल्—अट्प्रत्याहारे हकारग्रहणाय प्रथमो हकारः। तेन अर्हेणेत्यत्र 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन णत्वं सिद्ध्यति। शल्प्रत्याहारे हकारग्रहणाय च द्वितीयो हकारः। तेन अलिक्षदित्यत्र लिह धातोः शलन्तत्वात् 'शल इगुपधादनिटः क्सः' इत्यनेन क्सश्च सिद्धयति। तदाह मूले।

हकारः द्विरुपात्तोऽयमटि शल्यपि वाञ्छता।
अर्हेणाद्यक्षदित्यत्र द्वयं सिद्धं भविष्यति॥

लण् मध्ये तु इत्संज्ञकः। ४०। लण्सूत्रमध्यस्थाकारस्तु नोच्चारणार्थः किन्तु 'उपदेशेऽजनुनासिक इत्' इत्यनेन इत्संज्ञार्थः। तेन हयवरट् सूत्रस्थेन रेफेण लणसूत्रस्थेन अकारेण एकः र प्रत्याहारः सिद्धयति। ततश्च 'उरण् रपरः', इत्यत्र 'र' इत्यनेन प्रत्याहारस्य ग्रहणे रेफलकारयोः ग्रहणात् तवल्कारः इत्यत्र लपरत्वं सिद्धयति।

हकारादिष्वकार उच्चारणार्थः—(ई० ४९) ननु हयवरट् इत्यादिसूत्रे हकारोत्तरवर्तिनोऽकारस्य किं प्रयोजनमिति चेत् शृणु—'नचान्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति' इति उच्चैरुदात्तः सूत्रस्थभाष्यप्रामाण्येन हल् प्रत्याहारघटकव्यञ्जनेषु अकारः केवलमुच्चारणमात्रप्रयोजनकः। तेन इत्संज्ञालोपाभ्यां विनैव तेषां निवृत्तिः भवति।

आदिरन्त्येन सहेता।५१। अत्र आदिः इति प्रथमान्तं पदम्, अन्त्येन इति तृतीयान्तं पदं, सह इति अव्ययपदं, इता इति तृतीयान्तं पदम्। तेन अन्त्येन इता सह उच्चार्यमाणः आदिः मध्यगानां स्वस्य च संज्ञा इति सूत्रार्थः। यथा अण् इत्यत्र अन्त्येन इता णकारेण सह उच्चार्यमाणः आदिः अकारः स च अण् इति मध्यगानां इकारोकाराणां स्वस्य अकारस्य च संज्ञा। स्वं रूपं इति सूत्रात् स्वं रूपमनुवर्तते। अत्र अण् इति संज्ञा (प्रत्याहारः) इउ इति संज्ञौ। यदि अत्र स्वं रूपं इति न अनुवर्तेत् तर्हि 'संज्ञा संज्ञिनं प्रत्याय्य स्वयं निवर्तते, इति नियमेन अण् संज्ञया केवलं इकारोकारयोः ग्रहणं स्यात् अकारस्य ग्रहणं न स्यात्। अतः स्वं रूपम् इति अनुवर्तते। यद्यपि यः अण् इत्यत्र णकारः स न इत्संज्ञकः हलन्त्यमित्यनेन अइउण् सूत्रस्थस्यैवेत्वबोधनात्। तेन अण् संज्ञया

तेषां बोधो न स्यात्। तथापि अन्त्येत् सदृशेन सह उच्चार्यमाणः यः आदि-सदृशः सः स्वघटकानुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितवर्णनिष्ठचरमावयवतानि-रूपकः एवं स्वघटकानुयोगिकसादृश्यप्रतियोगित्वेन विवक्षितवर्णनिष्ठादितानिरू-पकः,समुदायः तद्घटकस्य बोधकः इति निष्कृष्टार्थः। यथा–अन्त्येन इता अइउण् घटकणकारेण सदृशः यः अण् घटकः णकारः तेन सह उच्चार्यमाणः यः–अथ च आदिः अइउण् घटकः अकारः तत्सदृशः अण् घटकः अकारः, एवं अन्त्येत् सदृशेन सह उच्चार्यमाणः आदिसदृशः अण् इति तद्घटकः णकारः तदनुयो-गिकसादृश्यप्रतियोगी वर्ण अइउण्घटकः णकारः, एवं अण् घटकानुयोगिकसादृ-श्यप्रतियोगी वर्णः अइउण् घटकः अकारः तन्निष्ठादितानिरूपकः यः समुदायः अइउण् रूपः तद्घटकः अकारः तस्य बोधकः अण् शब्दः संज्ञा इति सूत्रार्थः।

ऊकालोज्झ्रस्वदीर्घप्लुतः—(ई० ४५) सूत्रार्थः—उश्च ऊश्च ऊ३श्च वः वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। अनेन उच्चारणकालविशिष्टस्याचः ह्रस्व-दीर्घ-प्लुतसंज्ञा विधीयन्ते।

न च अज्ग्रहणाभावेऽपि एकमात्रिकद्विमात्रिकत्रिमात्रिकोकाराणां ह्रस्वादि-संज्ञासिद्धौ अज्ग्रहणं व्यर्थमिति वाच्यम्, प्रतक्ष्य, प्ररक्ष्येत्यादौ 'व्यञ्जनं चार्ध-मात्रकम्' इत्युक्त्वा द्वयोः क्षव्यञ्जनयोः एकमात्रिकत्वेन ह्रस्वसंज्ञायाम् 'ह्रस्व-स्य पिति कृति तुक्' इत्यनेन तुगागमापत्तेः। अज्ग्रहणे कृते तु एकमात्रिकस्य अच एव ह्रस्वसंज्ञा इति न दोषलेशोपीति दिक्।

ऊकालोज्झ्रस्वदीर्घप्लुतः। उकार ऊकार ऊ३कार के उच्चारणाधिकर-णीभूतकाल के सदृश उच्चारणाधिकरणीभूतकाल है जिस अच् का उसकी क्रम से ह्रस्वदीघप्लुतसंज्ञा होती है।

लृवर्णस्य द्वादश तस्य दीर्घाभावात्—(ई० ३३) यद्यपि 'याज्ञवल्क्य-शिक्षायां दीर्घलृकारस्य पाठो दृश्यते तदनुसारेण 'लृति लृवा' इति वार्तिकेन विहितस्य द्विमात्रिकलृकारस्य ग्रहणं शक्यते वक्तुं तथापि अनतिप्रयोजनकस्य लृकारस्य ह्रस्वप्लुतभेदावेव व्याकरणशास्त्रे गणितौ इति लृकारस्य दीर्घभेदा-नङ्गीकारात्।

तुल्यास्यप्रयत्नं सवर्णम् । (ई० ५७) सूत्रार्थः—तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नम् सवर्णं भवति । अर्थात् आस्ये येषां तुल्यो देशः तुल्यः प्रयत्नश्च ते मिथः सवर्णसंज्ञकाः भवन्ति इत्यर्थः ।

न च तुल्यं च तुल्यश्च तुल्ये इति नपुंसकेन भवितव्यमिति वाच्यम्, तुल्यावित्यत्र तन्त्राङ्गीकारेणादोषात् ।

प्रक्रियादशायां तु विवृतमेव । ननु दण्ड आढकमिति स्थिते संवृतस्य अकारस्य विवृतेनाकारेण सह प्रयत्नभेदात् सावर्ण्यं न स्यादिति चेन्न ? अष्टाध्याय्याः अन्तिमेन 'अ अ' इति सूत्रेण विवृतस्याकारस्य संवृतविधानेऽपि 'पूर्वत्रासिद्धमि'ति शास्त्रेण संवृतस्यासिद्धत्वात् विवृतत्वेन सवर्णसंज्ञायाम् 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे सति दोषाभावात् । अत आह-मूले-प्रक्रियादशायां तु विवृतत्वमस्त्येव इति ।

अचां प्रयत्नाः के । ननु वर्णसमाम्नाये भागत्रयं विद्यते । एकः अचां, अपरः हशां तृतीयः खराम् : तत्र हशां-हशः संवारा नादा घोषाश्चेत्यनेन बाह्यप्रयत्नाः व्याख्याताः । चरां च-खरो विवाराः श्वासा अघोषाश्च इत्यनेन बाह्यप्रयत्नाः व्याख्याताः । किन्तु अचां प्रयत्नाः के इति तु नोक्तं कुत्रापि इति चेन्न । अन्ये तु घोषाः स्युः—इत्यादौ अन्यग्रहणेन अचामपि ग्रहणात् तेषां संवारः, नादः घोषः अल्पप्राणप्रयत्नाः ज्ञेयाः । एवं उदात्तोऽनुदात्तः स्वरितश्चेति । आभ्यन्तरप्रयत्नेषु तु अचां विवृतम् किन्तु ह्रस्वाकारस्य प्रक्रियाकालातिरिक्तकाले संवृतम् इति विवेकः ।

उदात्तः । ४५ । उच्चैरुदात्तः—ताल्वादिषु भागविशिष्टेषु स्थानेषु ऊर्ध्वभागे वायोरभिघातेन अभिव्यक्तः यः अच् स उदात्तः इति उदात्तस्य लक्षणम् ।

अनुदात्तः । ४५ । नीचैरनुदात्तः—ताल्वादिषु भागविशिष्टेषु स्थानेषु अधोभागे वायोरभिघातेन अभिव्यक्तः यः अच् स अनुदात्तः इति अनुदात्तस्य लक्षणम् ।

स्वरितः ।४५। उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच स्वरितसंज्ञः इति स्वरितस्य लक्षणम् ।

अचां भेदाः तद्भेदग्राहकं सूत्रं च । ५१ । ह्रस्वदीर्घप्लुतभेदन पूर्वं अच् त्रिविधः । सूत्रं च ऊकालोऽज्ह्रस्वदीर्घप्लुतः । पुनः उदात्तानुदात्तस्वरितभेदेन प्रत्येकं त्रिविधः इति नव भेदाः । विधायकं सूत्रं च उच्चैरुदात्तः नीचैरनुदात्तः, समाहारः स्वरितः । नवभेदोऽपि प्रत्येकं अच् अनुनासिकनिरनुनासिकभेदेन द्विभेदः । एवम् अचाम् अष्टादशभेदाः । अनुनासिकत्वविधायकं सूत्रं च मुखनासिकावचनोऽनुनासिकः । तत्र दीर्घाभावात् ऌकारस्य द्वादश भेदाः । ह्रस्वाभावाद् एचां चापि द्वादशभेदाः । अन्येषामष्टादशभेदा इति बोध्यम् ।

तद्बोधकं कोष्ठकम्

अक्षराणि	अ इ उ ऋ ऌ	अ इ उ ऋ ए ऐ ओ औ	अ इ उ ऋ ऌ ए ऐ ओ औ
भेदाः	१ ह्रस्वोदात्तानुनासिकः	७ दीर्घोदात्तानुनासिकः	१३ प्लुतोदात्तानुनासिकः
	२ ह्रस्वोदात्ताननुनासिकः	८ दीर्घोदात्ताननुनासिकः	१४ प्लुतोदात्ताननुनासिकः
	३ ह्रस्वानुदात्तानुनासिकः	९ दीर्घानुदात्ताननुनासिकः	१५ प्लुतानुदात्तानुनासिकः
	४ ह्रस्वानुदात्ताननुनासिकः	१० दीर्घानुदात्ताननुनासिकः	१६ प्लुतानुदाताननुनासिकः
	५ ह्रस्वस्वरितानुनासिकः	११ दीर्घस्वरितानुनासिकः	१७ प्लुतस्वरितानुनासिकः
	६ ह्रस्वस्वरिताननुनासिकः	१२ दीर्घस्वरिताननुनासिकः	१८ प्लुतस्वरिताननुनासिकः

एतद्भेदग्राहकं च सूत्रं 'अणुदित् सवर्णस्य चाप्रत्ययः' इति । इत्थं १३२ वर्णभेदाः भवन्ति ।

सवर्णसंज्ञा–सूत्रं (४९) जिस वर्ण का तालु आदि स्थान और आभ्यन्तर प्रयत्न जिस वर्ण के तालु आदि स्थान और आभ्यन्तर प्रयत्न के तुल्य हों वे दोनों परस्पर में सवर्ण-संज्ञक होते हैं । जैसे—क और ख दोनों का कण्ठ स्थान और आभ्यन्तर प्रयत्नों में स्पृष्ट प्रयत्न है इससे दोनों सवर्ण-संज्ञक हुए ।

आभ्यन्तर-बाह्यप्रयत्नबोधकचक्रम् ।

आभ्यन्तर प्रयत्न	स्पृष्टम्					ईषत् स्पृष्टाः	ईषद् विवृताः	विवृता	संवृतः	ईषद्विवृतम्
संज्ञा	स्पर्शाः					अन्तःस्थाः	ऊष्माण	स्वराः		
अक्षराणि	क च ट त प	ख छ ठ थ फ	ग ज ड द ब	घ झ ध भ	ङ ञ ण न म	य र ल व	श ष स	अ इ उ ऋ ऌ ए ऐ ओ औ	अ	ह
बाह्य	अ.प्रा.	म. प्रा.	अ. प्रा.	म. प्रा.	अ. प्रा.	म. प्रा.	अ. प्रा.	म. प्रा.	अ. प्रा.	म. प्रा.
प्रयत्नः	खरः विवारः वासः अवोषः		हशः संवारः नादः घोषः				खरः विवार श्वास अघोष	अन्ये (अचः) संवारः नादः घोषः	उदात्तः अनुदात्तः स्वरितः	हशः संवारः नादः घोषः

ख-च-प-ह वर्गानां आभ्यन्तरप्रयत्नं, बाह्यप्रयत्नं च ॥५१॥

खकारस्य—खरप्रत्याहारपतितत्वात् विवारः, श्वासः अघोषः प्रयत्नः । वर्गस्थ द्वितीयाक्षरत्वात् महाप्राणप्रयत्नः बाह्ये । आभ्यन्तरे तु स्पर्शसंज्ञकत्वात् स्पृष्टः प्रयत्नः । एवमन्येषां योजनीयम् ।

वर्णानाम् स्थानबोधकं चक्रम् ।६१।

अ	इ	ऋ	ऌ	उ	ञ	ए	ओ	व	क	अनु-
क	च	ट	त	प	म	ऐ	औ			स्वार
ख	छ	ठ	थ	फ	ङ					
ग	ज	ड	द	ब	ण					
घ	झ	ढ	ध	भ	न					
ङ	ञ	ण	न	म						
ह	य	र	ल	प						
विसर्गः	श	ष	स		नासि	कण्ठ	कण्ठो	दन्तो	जिह्वा	नासि
कण्ठ	तालुः	मूर्धा	दन्तः	ओष्ठौ	काच	तालु	ष्ठम्	ष्ठम्	मूलम्	का

ख-च-प-ह वर्गानां स्थानम् ।५१। खकारस्य कण्ठस्थानम् । चकारस्य तालुस्थानम् । पकारस्य ओष्ठस्थानम् । हकारस्य कण्ठस्थानम् ।

अणुदित् सवर्णस्य चाप्रत्ययः ।४६। अत्र अण् उदित् सवर्णस्य च अप्रत्ययः इति च्छेदः । चकारः भिन्नक्रमः । ततः अप्रत्ययः अण उदित् च सवर्णस्य इति क्रमो भवति । अत्र प्रत्ययपदेन न प्रत्ययमात्रस्य ग्रहणं किन्तु प्रतीयते विधीयते इति व्युत्पत्त्या आगमादेशानामपि ग्रहणम् । ततः अविधीयमानोऽण् उदिच्च सवर्णस्य संज्ञा इत्यर्थो भवति । अत एव 'अस्य च्वौ' इत्यत्र अष्टादशानां ग्रहणम् । 'त्यदादीनामः' इत्यत्र विधीयमानः केवलः ह्रस्वाकार एव गृह्यते । अविधीयमान अण् और उदित सवर्ण के संज्ञा है । अतः अस्य च्वौ में अ पद से १८ का तथा च ट में चुटु से च वर्ग और ट वर्ग का ग्रहण होता है ।

परः सन्निकर्षः संहिता ।४५। वर्णों के अत्यन्त सामीप्य को संहिता संज्ञा होती है ।

सुप्तिङन्तं पदम्—(ई० ४६) सुप् तिङ् इति च प्रत्याहारग्रहणम् । सुप् च तिङ् च सुप्तिङौ तौ अन्ते यस्य तत् सुप्तिङन्तम् पदम् भवति । द्वन्द्वान्ते श्रूयमाणस्यान्तपदस्य प्रत्येकं सम्बन्धात् । यथा—ब्राह्मणाः पठन्ति ।

न च–अत्र तदन्तविधिनैव सिद्धे अन्तग्रहणं किमर्थमिति वाच्यम्, संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति इति परिभाषायाः ज्ञापनाय अन्तग्रहणस्याऽ-वश्यकत्वात्। तेन ईदूदेद् द्विवचनं प्रगृह्यमित्येनेन न द्विवचनान्तस्य प्रगृह्यसंज्ञा। अन्यथा कुमार्योरगारम् कुमार्यगारम् इत्यत्र प्रगृह्यसंज्ञा स्यात् यण् च निषिद्धं स्यात्।

यद्यपि—संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधः सूत्रमुच्यते॥

इति सूत्रभेदकथनात् संज्ञासूत्राणां प्रकरणं समाप्तमित्यर्थोऽवगम्यते तथापि नात्र सर्वेषां संज्ञासूत्राणां समावेशः किन्तु सन्धिकार्योपयुक्तानामेव। तेन सन्धिकार्योपयुक्तानां संज्ञासूत्राणां प्रकरणं समाप्तम् अयमर्थः सम्पद्यते।

इति संज्ञाप्रकरणम्

अथाच्सन्धिप्रकरणम्

सुद्ध्युपास्यः।३७। सुधी + उपास्य इत्यवस्थायाम् 'तस्मिन्निति निर्दिष्टे पूर्वस्य' 'स्थानेऽन्तरतमः' इति सूत्रद्वयसहकारेण 'इको यणचि' इत्यनेन अजव्यवहितपूर्वत्वविशिष्टस्य तालुस्थानजन्यस्य धकारोत्तरवर्तिनः इकः स्थाने तालु-स्थानजन्यः यकारः यण् तेन सुध् य् उपास्य इति स्थिते 'अनचि च' इत्यनेन धकारस्य विकल्पेन द्वित्वे 'झलां जश् झशि' इत्यनेन पूर्वधकारस्य जश्त्वेन दकारे। 'अलोन्त्यस्य' इति सूत्रसहकारेण 'संयोगान्तस्य लोपः' इत्यनेन यकारस्य-लोपे प्राप्ते 'यणः प्रतिषेधो वाच्यः' इति वार्तिकेन निषेधे सुद्ध्युपास्य इति सिद्धम्।

अलोन्त्यस्य ।४७। षष्ठयन्त जो पद तन्निर्देशेन क्रियमाण जो कार्य वह षष्ठी प्रकृतिबोध्य जो कोई उसके अन्त्य के हो।

जैसे—षष्ठी कौन संयोगान्तस्य में स्य, तदन्तपद संयोगान्तस्य, तन्निर्देशेन क्रियमाण कार्य लोप, यह षष्ठी की प्रकृति संयोगान्त उससे बोध्य सुद्ध्य् उसका लोप प्राप्त हुआ।

मद्ध्वरिः ।६५। मधु+अरिः इत्यवस्थायाम् 'स्थानेऽन्तरतमः' इति सूत्र-सहकारेण 'अनचि च' इति धकारस्य विकल्पेन द्वित्वे 'झलां जश् झशि' इति धकारस्य दकारे 'अलोन्त्यस्य' इति सूत्रसहकारेण 'संयोगान्तस्य लोपः' इत्यनेन वलोपे प्राप्ते 'यणः प्रतिषेधो वाच्यः' इति वार्तिकेन निषेधे मद्ध्वरिः इति सिद्धम् ।

धात्त्रंशः ।४५। धातृ+अंशः इत्यवस्थायाम् 'स्थानेऽन्तरतमः' इति सूत्र-सहकारेण 'इको यणचि' इत्यनेन यणि 'अनचि च' इत्यनेन तकारस्य विकल्पेन द्वित्वे 'अलोन्त्यस्य' सूत्रसहकारेण 'संयोगान्तस्य लोपः' इति रेफस्य लोपे प्राप्ते 'यणः प्रतिषेधो वाच्यः' इति निषेधे धात्त्रंशः इति सिद्धम् ।

हरये ।५१। हरे+ए इत्यवस्थायाम् 'यथासंख्यमनुदेशः समानाम्' इति सूत्र-सहकारेण 'एचोऽयवायावः' इति अयादेशे हरये इति सिद्धम् !

विष्णवे—(ई० ५२) 'विष्णो+ए' इति स्थिते 'यथासंख्यमनुदेशः समानाम्' इतिसूत्रज्ञापकात् 'एचोऽयवायावः'इति ओकारस्य अवादेशे 'विष्णवे' इति जातम् ।

नायकः। नै+अक. इत्यत्र 'एचोऽयवायावः' इत्यायादेशे नायकः इति सिद्धम् ।

पावकः—(ई० ५३)-'पौ+अकः' इति दशायां 'यथासंख्ये' ति नियमात् 'एचोऽयवायावः' इत्यनेन औकारस्य आवादेशे उक्तं रूपं सिद्धम् ।

वान्तो यि प्रत्यये—।५०। वान्तः यि प्रत्यये इति पदच्छेदः यकारादौ प्रत्यये वान्तादेशौ भवतः। वान्तादेशौ च अव् आव् इत्येतौ च स्वभावतः ओदौतोः स्थाने भवतः। अतः अत्र सूत्रे ओदौतोरिति वक्तव्य इति वार्तिकात् ओदौतो इत्यावर्तते। तेन यकारादौ प्रत्यये ओदौतोः स्थाने अव् आव् एतौ वान्तादेशौ भवत इति सूत्रार्थः ।

गव्यम् (ई० ४०, ४७, ४९)—गोर्विकारो गव्यम् (विकारार्थे यत्)। 'गो+यम्' इति स्थिते ओकारस्य अच्परकत्वाभावात् 'एचोऽयवायावः' इत्यप्राप्ते 'वान्तो यि प्रत्यये' इति ओकारस्य अवादेशे उक्तं सिद्धम्।

नाव्यम्। नौ+यम् इत्यत्र 'वान्तो यि प्रत्यये' इत्यादेशे सिद्धम्।

गव्यूतिः—।४३। गो+यूतिः इत्यवस्थायां 'अध्वपरिमाणे चेति' वार्तिकेन अवादेशे गव्यूतिः इति सिद्धम्।

तपरस्तत्कालस्य।२०। तपरः तत्कालस्य (संज्ञा) इति परिच्छेदः। तपरः इत्यत्र तात् परः तपरः, इति तत्पुरुषः। तः परो यस्मात् इति बहुव्रीहिः इति समासद्वयम् ग्राह्यम्। तेन तकारः परो यस्मात्, तकारात् परश्च उच्चार्यमाणः वर्णः ह्रस्वकाले, दीर्घकाले, प्लुतकाले वा यस्मिन् काले उच्चार्यमाणः तत्कालस्य संज्ञा, न तु अष्टादशानाम् इत्यर्थः। तकार हो पर जिसके अथवा तकार से परे उच्चार्यमाण जो वर्ण वह जिस काल में उच्चारित हो उस काल में उच्चार्यमाण वर्णों की संज्ञा है। जैसे अत् ह्रस्व काल के छ अकारों की संज्ञा है। आत् दीर्घकाल के छ आकारों की संज्ञा है। अकार शब्द के पंचमी में भी आत् प्रयोग होता है। अतः यह ध्यान रखना होगा कि दीर्घाकार से कहाँ तपर है कहाँ पंचमी है। विभक्ति के तपर में यह सूत्र नहीं लगता। जैसे आद् गुणः।

उपेन्द्र ।५०। उप+इन्द्र इत्यवस्थायाम् 'स्थानेऽन्तरतमः' इति सूत्रसहकारेण 'आद्गुणः' इत्यनेन पूर्वपरयोः कण्ठस्थानजन्यस्य अकारस्य तालुस्थानजन्यस्य इकारस्य च स्थाने कण्ठतालुस्थानजन्यः एकः एकाररूपो गुणः। ततः उपेन्द्रः इति सिद्धम्!

गङ्गोदकम्। गंगा+उदकम् इत्यवस्थायाम् 'स्थानेऽन्तरतमः' इति सूत्रसहकारेण कण्ठोष्ठस्थानजन्ययोः पूर्वपरयोः आकारोकारयोः स्थाने कण्ठोष्ठस्थानजन्यः ओकारो गुणः ततः गङ्गोदकम् इति सिद्धम्।

क्षय्यम् (ई० ४८)—क्षेतुं शक्यं क्षय्यम् (शक्यार्थे यत्) 'क्षे य' इति स्थिते एकारस्य अच्परकत्वाऽभावाद् 'एचोऽयवायाव:' इत्ययादेशेऽप्राप्ते 'क्षय्य-जय्यौ शक्यार्थे' इति निपातनात्तस्य यान्तादेशे उक्तं रूपं सिद्धम् ।

क्रय्यस्तदर्थे–क्रय्यशब्दे यो क्रीञ्धातु:=यत्प्रत्यय: प्रकृतिभूत:, तस्य योऽर्थ:= अभिधेय:=द्रव्यविनिमयरूप: क्रय: स प्रकृतिभूत: तदर्थशब्देन विवक्षित: । तस्मै इदं=क्रयार्थं वस्तु । तथा च–क्रयार्थे वस्तुनि गम्ये क्रीञ् धातोर्यादौ प्रत्यये परे 'क्रय्य' इतीदं निपात्यते इति फलति ।

क्रय्यम्—(ई० ४३)—क्रेतार: क्रीणीयु: इति बुद्ध्या आपणे प्रसारितं क्रय्यम् (क्रीञ: कर्मणि यत्) 'क्रे य' इति स्थिते एकारस्य अच्परकत्वाभावात् अयादेशेऽप्राप्ते 'कय्यस्तदर्थे' इत्यनेन निपातनात्तस्य वान्तादेशेन स्वादिकार्ये 'क्रय्यम्' इति निष्पन्नं भवति । अन्यत्र तु 'क्रेयम्' इति क्रयणार्हमित्यर्थ: ।

कृष्णर्द्धि: ।६०। कृष्ण + ऋद्धि: इत्यत्र 'स्थानेऽन्तरम:' इति सूत्रसहकारेण कण्ठमूद्र्धास्थानजन्ययो: पूर्वपरयो: अकारस्य ऋकारस्य च स्थाने कण्ठमूर्धास्थान-जन्यस्यादेशस्याभावे 'उरण रपर:' इति सूत्रसहकारेण 'आद्गुण:' इत्यनेन अरि गुणे कृष्णर्द्धि: इति सिद्धम् ।

तवल्कार: ।६१। तव + लृकार: इत्यवस्थाया 'स्थानेऽन्तरतम:' 'उरण् रपर:' इति सूत्रद्वयसहकारेण कण्ठदन्तस्थानजन्ययो: अकारलृकारयो: स्थाने 'आद्गुण:' इत्यनेन अलि गुणे तवल्कार इति सिद्धम् ।

शिवल्कार: ।११। शिव + लृकार: इत्यत्र 'स्थानेऽन्तरतम:', 'उरण् रपर:' इति सूत्रद्वयसहकारेण 'आद्गुण:' इत्यनेन अलि गुणे शिवल्कार: इति सिद्धम् ।

हर इह ।४१। हरे + इह इत्यवस्थायाम् 'एचोऽयवायाव:' इति अयादेशे 'लोप: शाकल्यस्य' इति विकल्पेन यलोपे हर-इह इत्यवस्थायां 'आद्गुण:' इति गुणे प्राप्ते 'पूर्वत्रासिद्धम्' इति सूत्रेण यलोपस्य त्रैपादिकत्वेनासिद्धत्वात् गुणा-भावे हर इह इति । लोपाभावे अयादेशे हरयिह इति सिद्धम् ।

विष्ण-इह ।४०। विष्णो+इह इत्यवस्थायाम् 'एचोयवायाव:' इति अवादेशे 'लोप: शाकल्यस्य' इति वलोपे तत: 'आद्गुण:' इति गुणे प्राप्ते 'पूर्वत्रासिद्धम्'

इति लोपस्यासिद्धत्वात् गुणाभावे विष्ण इह इति। लोपाभावे विष्णविह इति सिद्धम्।

त आगच्छन्ति ।११। ते+आगच्छन्ति इत्यवस्थायाम् 'एचोयवायावः' इति अयादेशे 'लोपः शाकल्यस्ये' ति वलोपे ततः 'अकः सवर्णे दीर्घ' इति दीर्घे प्राप्ते 'पूर्वत्रासिद्धम्' इति लोपस्यासिद्धत्वात् दीर्घाभावे त आगच्छन्ति इतिसिद्धम्।

कृष्णैकत्वम् ।२८। कृष्ण+एकत्वम् इत्यवस्थायाम् 'आद्गुणः' इति प्राप्तं गुणं प्रबाध्य 'स्थानेऽन्तरतमः' इति सूत्रसहकारेण पूर्वपरयोः स्थाने 'वृद्धिरेचि' इति ऐकारे वृद्धौ कृष्णैकत्वमिति सिद्धम्।

गङ्गौघः। गङ्गा+ओघः इत्यवस्थायाम् 'स्थानेऽन्तरमः' इति सूत्रसहकारेण 'वृद्धिरेचि' इति वृद्धौ गङ्गौघः इति सिद्धम्।

देवैश्वर्यम् ।५१। देव+ऐश्वर्यम् इत्यत्र गुणं प्रबाध्य 'स्थानेऽन्तरतम' इति सूत्र सहकारेण 'वृद्धिरेचि' इति वृद्धौ देवैश्वर्यम् इति सिद्धम्।

उपैति ।११। उप+एति इत्यत्र गुण प्रबाध्य 'वृद्धिरेचीति' वृद्धिः प्राप्ता तामपि प्रबाध्य 'एङि पररूपम' इति पररूपे प्राप्ते तमपवाद्य 'एत्येधत्यूठ्सु' इति वृद्धौ उपैति इति सिद्धम्।

उपैधते ।१४। उप+एधते इत्यत्र गुणं वृद्धिं पररूपं च प्रबाध्य 'एत्येधत्यूठ्सु' इति वृद्धौ उपैधते इति सिद्धम्।

प्रष्ठौहः (ई० ४९)—'प्रष्ठ ऊह' इति दशायाम् 'आद्गुणः' इति गुणे प्राप्ते तं प्रबाध्य 'एत्येधत्यूठ्सु' इति वृद्धौ 'प्रष्ठौहः' इति सिद्धम्।

उपेतः। उप+इतः इत्यत्र आद्गुणे सिद्धम्। 'एत्येधत्यूठसु' इति सूत्रवृत्तौ एजाद्योः पदाभावे अत्र वृद्ध्यापत्तिः।

प्रेदिधत् प्र+इदिधत् इत्यत्र आद्गुणे सिद्धम्। एजाद्योः पदाभावे अत्र वृद्ध्यापत्तिः।

स्वैरम् (ई० ४६)—स्वैरम्=यथेच्छम्, क्रियाविशेषणमेतत्। 'स्व+ईरम्' इति स्थिते 'आद्गुणः' इति गुणे प्राप्ते 'स्वादीरेरिणोः' इति वार्तिकेन वृद्धौ उक्तं रूपं सिद्धम्।

प्रार्षभीयति (ई०, ५३) ऋषभमात्मन इच्छति=ऋषभीयति। प्र+ऋषभीयति' स्थिते गुणं प्रबाध्य 'वा सुप्यापिशले' इति वृद्धौ रपरत्वे 'प्रार्षभीयति' इति। वृद्धौ 'अचो रहाभ्यां द्वे' इति द्वित्वं तु न, 'शरोऽचि' इति निषेधात्। वृद्धयभावपक्षे तु 'आद्गुणः' इति गुणे रपरत्वे 'प्रर्षभीयति' इति।

उपोषति (ई० ४३)—'उप ओषति' इति स्थिते वृद्धिं प्रबाध्य 'एङि पररूपम्' इति पररूपे' उक्तं रूपं सिद्धम्।

पतञ्जलिः (ई० ५२)—'पतत् अञ्जलिः' इति स्थिते शकन्ध्वादिषु पररूपं वाच्यम् इत्यनेन 'अत्' इति टेः, अञ्जलिपदाद्यवयवस्य अकारस्य च स्थाने पररूपे अकारे जाते 'पतञ्जलिः' इति सिद्धम्।

अक्षादूहिन्यामुपसंख्यानम्। अक्षशब्दावयव अवर्ण से ऊहिनी शब्दावयव अच् परे रहते पूर्वपरके स्थान में वृद्धि एकादेश होता है।

अक्षौहिणी। अक्ष+ऊहिनी इत्यत्र आद्गुणं प्रबाध्य 'अक्षादूहिन्यामुपसंख्यानाम्' इति वार्तिकेन वृद्धौ अक्षौहिणी इति सिद्धम्।

प्रादूहोढोढ्येषैष्येषु। प्रशब्दावयव अवर्णसे ऊह-ऊढ-ऊढि-एष-एष्य शब्दावयव अच परे रहते पूर्वपरके स्थान में वृद्धि एकादेश होता है।

प्रौहः (ई० ४८)—'प्र ऊहः' इति स्थिते गुणं प्रबाध्य 'प्रादूहोढोढ्येषैष्येषु' इति वृद्धौ 'प्रौहः' इति।

प्रैष्यः (ई० ४१)—'प्र एष्यः' इति स्थिते 'प्रादूहोढोढ्येषैष्येषु' इत्यनेन गुणं प्रबाध्य वृद्धौ 'प्रैष्यः' इति सिद्धम्।

प्रौढः।४०। प्र+ऊढः इत्यत्र गुणं प्रबाध्य 'प्रादूहोढोढ्येषैष्येषु' इति वार्तिकेन वृद्धौ प्रौढः इति सिद्धम्।

ऋते च तृतीया समासे। तृतीयासमासघटकपूर्वपदावयवात् अवर्णात् ऋतशब्दावयवेऽचि परे पूर्वपरयोर्वृद्धिरेकादेशः स्यात् इति वार्तिकार्थः।

सुखार्तः।५७। सुखेन+ऋतः इति विग्रहे तृतीया समासे सुपो लुकि सुख+ऋत इत्यत्र गुणं प्रबाध्य 'ऋते च तृतीया समासे' इति वृद्धौ सुखार्त इति सिद्धम्।

परमर्तः । परमश्चासौ ऋतः इति कर्मधारयसमासे वृद्धेरप्राप्तौ परम ऋत इत्यत्र 'आद्गुणः' इति गुणे परमर्तः इति सिद्धम् ।

प्रार्णम् ।३८। प्र + ऋणम् इत्यत्र 'आद्गुणः' इति गुणं प्रबाध्य 'प्रवत्सरकम्बलवसनार्णदशानामृणे' इति वार्तिकेन वृद्धौ 'उरण् रपरः' इति रपरे प्रार्णम् इति सिद्धम् ।

भूवादयो धातवः ।४१। भू-वा-आदयः धातवः इति च्छेदः । भूवादयः इत्यस्य क्रियावाचिनो भ्वादयः इत्यर्थः । तेन क्रियावाचिनो भ्वादयः धातुसंज्ञाः भवन्ति इति सूत्रार्थः ।

प्रार्च्छति ।६१। प्र + ऋच्छति इत्यत्र प्र इत्यस्य उपसर्गसंज्ञायां ऋच्छ इत्यस्य धातुसंज्ञायाम् 'उपसर्गादृति धातौ' इत्यनेन वृद्धौ 'उरण् रपर' इति रपरे प्रार्च्छति इति सिद्धम् ।

एङि पररूपम् । अवर्णान्त उपसर्ग से एङादि धातु परे रहते पूर्वपर के स्थान में पररूप एकादेश होता है यह सूत्रार्थ है ।

प्रेजते ।५९। प्र + एजते इत्यत्र 'आद्गुणे' इति गुणे प्राप्ते तं प्रबाध्य 'वृद्धिरेचि' इति वृद्धौ प्राप्तायां तं प्रबाध्य 'एङि पररूपम्' इति पररूपे प्रेजते इति सिद्धम ।

अचोन्त्यादि टि । अचों के मध्य में जो अन्त्य वह है आदि में जिस समुदाय के उस समुदाय को टि सज्ञा होती है ।

शकन्ध्वादिषु पररूपं वाच्यम् । शकन्ध्वादिगण पठित जो शब्द तद्घटकपूर्वपद का जो टि तथा उत्तरपदावयव जो अच् उन दोनों के स्थान में पररूप एकादेश होता है ।

शकन्धुः ।९२। शक + अन्धु इत्यत्र 'अचोन्त्यादि टि' इत्यनेन व्यपदेशिवद्भावेन स्वस्यैवावयवस्य ककारोत्तरवर्त्यकारस्य टि संज्ञायाम् 'शकन्ध्वादिषु पररूपं वाच्यम्' इति पररूपे शकन्धुः इति सिद्धम् ।

कर्कन्धुः ।९३। कर्क + अन्धुः इत्यत्र सवर्णदीर्घं प्रबाध्य 'अचोन्त्यादि टि' इति ककारोत्तराकारस्य टिसंज्ञायाम् 'शकन्ध्वादिषु पररूपं वाच्यम्' इति पररूपे कर्कन्धुः इति सिद्धम् ।

मनीषा । मनस् + ईषा इत्यत्र 'अचोन्त्यादि टि' इत्यनेन अस् इति समुदायस्य टि संज्ञायाम् 'शकन्ध्वादिषु पररूपं वाच्यम्' इति पररूपे मनीषा इति सिद्धम् ।

मार्तण्डः ।२१। मार्त + अण्डः इति स्थिते 'अचोन्त्यादि टि' इति टि संज्ञायाम् शकन्ध्वादेराकृतिगणत्वात् 'शकन्ध्वादिषु पररूपं वाच्यम्' इति वार्तिकेन पररूपे मार्तण्डः इति सिद्धम् ।

शिवेहि ।५९। शिव + आ + इहि इत्यत्र 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे प्राप्ते आदगुणः, इत्यनेन गुणे च प्राप्ते धातूपसर्गयोः कार्यमन्तरङ्गम् इति 'असिद्धम्बहिरङ्गमन्तरङ्गे' इत्यनेन दीर्घस्य बहिरङ्गत्वात् निषेधे अन्तरङ्गत्वात् गुणे शिव एहि इत्यत्र 'अन्तादिवच्च' इत्यनेन पूर्वान्तवद्भावेन 'ओमाङोश्च' इत्यनेन पररूपे शिवेहि इति सिद्धम् ।

अन्तादिवच्च ।३६। एकादेशस्य पूर्वस्थानिघटितसमुदाये परस्थानिघटितसमुदाये वा ये ये धर्माः ते एकादेशविशिष्टेऽप्यतिदिश्यन्त इति सूत्रार्थः ।

दैत्यारिः । दैत्य + अरिः इत्यत्र 'अकः सवर्णे दीर्घः' इति दीर्घे दैत्यारिः इति सिद्धम् ।

श्रीशः ।२५। श्री + ईशः इत्यत्र 'इको यणचि' इति प्राप्तं यणं प्रबाध्य 'अकः सवर्णे दीर्घः' इति दीर्घे श्रीशः इति सिद्धम् ।

विष्णूदयः । विष्णु + उदयः इत्यत्र 'अकः सवर्णे दीर्घः' इति दीर्घे सिद्धम् ।

होतॄकारः ।६३। होतृ + ऋकारः इत्यत्र 'अकः सवर्णे दीर्घः' इति दीर्घे होतॄकारः इति सिद्धम् ।

हरेऽव ।४६। हरे + अव इत्यत्र 'एचोऽयवायावः' इति अयादेशे प्राप्ते तं प्रबाध्य 'एङः पदान्तादति' इति पूर्वरूपे हरेऽव इति सिद्धम् ।

विष्णोऽव ।३०। विष्णो + अव इत्यत्र 'एचोऽयवायावः' इति अवादेशे प्राप्ते तं प्रबाध्य 'एङः पदान्तादति' इति पररूपे विष्णोऽव इति सिद्धम् ।

गो अग्रम् ।६०। गो + अग्रम् इत्यत्र 'एचोऽयवायावः' इति अवादेशे

प्राप्ते तं प्रबाध्य 'एङः पदान्तादति' इति पूर्वरूपे प्राप्ते तं पक्षे प्रबाध्य 'सर्वत्र विभाषा गोः' इति प्रकृतिभावे गो—अग्रम् इति। पक्षे पूर्वरूपे गोऽग्रम् इति। पक्षे 'अवङ् स्फोटायनस्य' इति अवङादेशे गव अग्रम् इति स्थिते 'अकः सवर्णे दीर्घः' इति दीर्घे गवाग्रम् इति सिद्धम्।

गोः। गो+अस् इत्यत्र पूर्वरूपे रुत्वे विसर्गे सिद्धम्। 'सर्वत्र विभाषा गोः' सूत्रे पदान्ते पदानुवृत्त्यभावेऽत्र प्रकृतिभावापत्तेः।

चित्रग्वग्रम्। चित्रगु+अग्रम् इत्यत्र 'इको यणचि' इति यणि चित्रग्वग्रम्, इति सिद्धम्। यदि 'सर्वत्र विभाषा गोः' इति सूत्रे 'एङन्त' इति न स्याद् तर्हि चित्रगु इत्यत्रापि गोशब्दस्य सत्त्वात् प्रकृतिभावापत्तिः स्यात्।

गवेन्द्रः।२३। गो+इन्द्रः इत्यत्र 'इन्द्रे च' इत्यनेन अवङादेशे 'आद्गुणः' इति गुणे गवेन्द्रः इति सिद्धम्।

आगच्छ कृष्ण ३ अत्र गौश्चरति।४५। अत्र 'दूराद्धूते च' इति प्लुते कृते 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे आगच्छ कृष्ण ३ अत्र गौश्चरति इति सिद्धम्।

हरी एतौ।६५। हरी+एतौ इत्यत्र 'इको यणचि' इति यणि प्राप्ते तं प्रबाध्य 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रेण द्विवचने व्यपदेशिवद्भावेन ईनन्तत्वम्, परादिवद् भावेन एकादेशपरस्थानिनि औकारे व्यपदेशिवद्भावेन तद्घटितसमुदाये च औकारे यो धर्मः द्विवचनत्वं स कृतेऽपि एकादेशे ई रूपे आगत इति प्रगृह्यसंज्ञायाम् 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे हरी एतौ इति सिद्धम्।

गङ्गे अमू।१८। गङ्गे+अमू इत्यत्र अयादेशं प्रबाध्य 'ईदूदेद्द्विवचनं' प्रगृह्यसंज्ञायाम् 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे गङ्गे अमू इति सिद्धम्।

पचेते इमौ।२२। पचेते+इमौ इत्यत्र 'एचोऽयवायावः' इति अयादेशे प्राप्ते तं प्रबाध्य 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति प्रगृह्यसंज्ञायाम् 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे पचेते इमौ इति सिद्धम्।

कवी अमू ।३४। कवी+अमू इत्यत्र 'इको यणचि' इति यणि प्राप्ते तं प्रबाध्य 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे कवी अमू इति सिद्धम् ।

अमी ईशाः ।५८। अमी + ईशाः इत्यत्र 'एत ईद्बहुवचने' सूत्रं 'पूर्वत्रासिद्धमिति' शास्त्रेण असिद्धिमिति अदे ईशाः इति मत्वा अयादेशे प्राप्ते तं प्रबाध्य 'अदसो मात्' इति प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे अमी ईशाः इति सिद्धम् ।

रामकृष्णावमू आसाते । अमू+आसाते इत्यंत्र 'पूर्वत्रासिद्धमिति' शास्त्रबलेन मुत्वस्यासिद्धत्वात् अदौ आसाते इति मत्वा आवादेशे प्राप्ते 'अदसोमात्' इति प्रगृह्यत्वे 'प्लुतप्रगृह्या अचि नित्यमि' ति प्रकृतिभावे अमू आसाते इति सिद्धम् ।

अमुकेऽत्र ।३६। अमुके+अत्र इत्यत्र 'एङः पदान्तादति' इति पूर्वरूपे अमुकेऽत्र इति सिद्धम् । यदि 'अदसो मात्' इति सूत्रे माद्ग्रहणं न स्यात् तदा 'ईदूदेद्द्विवचनं प्रगृह्यम्' इत्यत एत् पदस्यानुवृत्तौ अदस् शब्दात् परस्य एकारस्यापि प्रगृह्यविधानात् 'अमुके अत्र' इत्यत्र प्रगृह्यसंज्ञापत्तिः स्यात् । कृते तु माद्ग्रहणे एदित्यस्याननुवृत्तौ पूर्वरूपादिकं सिद्ध्यति ।

इ इन्द्रः ।५६। इ+इन्द्रः इत्यत्र 'अकः सवर्णे दीर्घः' इति दीर्घे प्राप्ते 'निपात एकाजनाङ्' इति प्रगृह्यसंज्ञायाम् 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे इ इन्द्रः सिद्धम् ।

उ उमेशः ।३६। उ+उमेशः इत्यत्र 'अकः सवर्णे दीर्घः' इति दीर्घे प्राप्ते तं प्रबाध्य 'निपात एकाजनाङ्' इति प्रगृह्यसंज्ञायाम् प्लुतगृह्या अचि नित्यमिति प्रकृतिभावे उ उमेशः इति सिद्धम् ।

आ एवं नु मन्यसे । आ + एवं नु मन्यसे इत्यत्र वृद्धौ प्राप्तायाम् आतः अङित्वेन 'निपात एकाजनाङ्' इति प्रगृह्यसंज्ञायाम् 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे आ एवं नु मन्यसे इति सिद्धम् ।

ओष्णम् ।४५। आ + उष्णम् इत्यत्र ईषदर्थे आतः ङित्त्वात् अत्र ईषदर्थे च

प्रयोगात् प्रगृह्यसंज्ञाया अप्राप्तौ गुणे ओष्णम् इति सिद्धम् ।

अहो ईशाः ।३७। अहो + ईशाः इत्यत्र एचोऽयवायावः' इति अवादेशं प्रबाध्य 'ओतः' इत्यनेन प्रगृह्यत्वे प्रकृतिभावे च कृते अहो ईशा इति सिद्धम् ।

विष्णो इति ।५७। विष्णो+इति इत्यत्र 'एचोऽयवायावः' इति अवादेशे प्राप्ते तं प्रबाध्य विकल्पेन 'सम्बुद्धौ शाकल्यस्येतावनार्षे' इति प्रगृह्यसंज्ञायाम् 'प्लुतप्रगृह्या अचि नित्यमि' ति प्रकृतिभावे विष्णो इति इति सिद्धम् । पक्षे 'एचोऽयवायावः' इति अवादेशे 'लोपः शाकल्यस्य' इति विकल्पेन वकारस्य लोपे ततः 'आद्गुणः' इति गुणे प्राप्ते 'पूर्वत्रासिद्धमि'ति लोपस्य त्रैपादिकत्वेन असिद्धत्वात् गुणाभावे विष्ण इति ! लोपाभावे विष्णविति इति प्रयोगत्रयं सिद्धयति ।

भानो इति ।३३। भानो+इति इत्यत्र 'सम्बुद्धौ शाकल्यस्येतावनार्षे' इति प्रगृह्यसंज्ञायाम् प्रकृतिभावे भानो इति । पक्षे 'एचोऽयवायावः' इति अवादेशे वलोपे भान इति । वलोपाभावे भानविति इति प्रयोगत्रयं सिद्धम् ।

किम्वुक्तम् ।६१। किमु+उक्तम् इत्यत्र 'अकः सवर्णे दीर्घ' इति दीर्घे प्राप्ते तं प्रबाध्य 'निपात एकाजनाङ्' इति प्रगृह्ये प्राप्ते तं प्रबाध्य 'मय उञो वो वा' इति मकारोत्तरोकारस्य वकारे किम्वुक्तम् इति सिद्धम् । पक्षे 'निपात एकाजनाङ्' इति प्रगृह्यसंज्ञायाम् प्रकृतिभावे किमु उक्तम् इति सिद्धम् ।

इकोसवर्णे शाकल्यस्य ह्रस्वश्च ।२०। पदान्त इक् को विकल्प से ह्रस्वसमुच्चित प्रकृतिभाव होता है असवर्ण अच् परे रहते ।

चक्री अत्र ।६०। चक्री+अत्र इत्यत्र 'इको यणचि' इति यणि प्राप्ते तं प्रबाध्य 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति ईकारस्य विकल्पेन ह्रस्वसमुच्चिते प्रकृतिभावे चक्रि अत्र इति सिद्धम् । पक्षे 'इको यणचि' इति यणि चक्र्यत्र इति सिद्धम् ।

गवाग्रम् (ई० ४५, ४९)—'गो+अग्रम्' इति स्थिते 'एचोऽयवायावः' इत्यवादेशं प्रबाध्य 'सर्वत्र विभाषा गोः' इति प्रकृतिभावे प्राप्ते तमपि प्रबाध्य 'अवङ्स्फोटायनस्य' इत्यनेन अग्रमित्येतद्घटकाऽकारे परे पदान्ते विद्यमानस्य एङन्तगोशब्दस्य 'अनेकाल्शित्सर्वस्ये'ति परिभाषया सम्पूर्णस्थाने अवङि प्राप्ते

'ङिच्चे' त्यनेन गकारोत्तरवर्तिनः ओकारस्य अवङि अनुबन्धलोपे 'गव अग्रम्' इति दशायाम् 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे 'गवाग्रम्' इति ।

अवङादेशाभावपक्षे 'सर्वत्र विभाषा गोः' इति प्रकृतिभावे 'गो अग्रम्' इति । प्रकृतिभावाभावपक्षे 'एङः पदान्तादति' इति पररूपे 'गोऽग्रम' इति ।

गवेन्द्रः (ई० ५१)—'गो+इन्द्र' इति दशायाम् 'इन्द्रे च' इत्यनेन अवङादेशे अनुबन्धलोपे 'आद्गुणः' इति गुणे 'गवेन्द्रः' इति ।

दे३वदत्त (ई० ४५)—अत्र 'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्' इत्यनेन ऋकारभिन्नस्य अनन्त्यस्य गुरोः एकारस्य प्लुते जाते उक्तं रूपं सिद्धम् ।

विष्णू इमौ (ई० ४९)—'विष्णू इमौ' इति स्थिते यणादेशं प्रबाध्य 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे 'विष्णू इमौ' इति ।

अमी ईशाः (ई० ५०)—'अमी ईशाः' इति दशायां सवर्णदीर्घं प्रबाध्य 'अदसो मात्' इति अदःशब्दसम्बन्धिमकारात्परस्य ईकारस्य प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावे 'अमी ईशा' इति ।

निपात एकाजनाङ्—'आङ्' वर्जित एकाच् निपात को प्रगृह्यसंज्ञा हो, अर्थात् 'आङ्' रहित एक स्वरमात्र की सन्धि नहीं हो । ईषत् (अत्यल्प) अर्थ में, क्रिया के योग में, मर्यादा (सीमा) और अभिविधि (मर्यादा का प्रभेद व्याप्ति) अर्थ में जो 'आ' उसे 'ङित्' (आङ्घटकःआ) और वाक्य तथा स्मरण अर्थ में जो 'आ' उसे अङित् (केवल-आ जानना चाहिए । कहा भी है—

'ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः ।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्' इति ।

प्रकृतसूत्र का उदाहरण 'इ इन्द्रः' 'उ उमेशः' इत्यादि है ।

ब्रह्मर्षिः (ई० ५२)—'ब्रह्मा ऋषि' इति दशायाम् 'आद्गुणः' इत्यनेन गुणे प्राप्ते तम्प्रबाध्य 'ऋत्यकः' इति पाक्षिके ह्रस्वे कृते ह्रस्वविधिसामर्थ्यात् पुनः गुणस्याप्रसंगे 'ब्रह्म ऋषिः' इति । ह्रस्वाऽभावपक्षे 'आद्गुणः' इत्यनेन गुणे 'उरण् रपरः' इति रपरत्वे 'ब्रह्मर्षिः' इति सिद्धम् ।

आर्च्छत् (ई० ३२)—'ऋत्यकः' इति सूत्रस्य प्रत्युदाहरणमेतत् । तथाहि अत्र सूत्रे 'पदान्ताः' इत्यस्याऽग्रहणे 'आ ऋच्छत्' इति दशायाम् 'आटश्चे'ति प्राप्तां वृद्धिं प्रबाध्य ह्रस्वत्वमापद्येत तन्माभूदित्येतदर्थं 'पदान्ताः' इति । तेनात्र 'आटश्चे'ति वृद्धौ सत्यां रपरत्वे कृते 'आर्च्छत्' इति सिद्ध्यति ।

गौर्य्यौ । गौरी+औ इत्यत्र 'इको यणचि' इति यणि 'अचोरहाभ्यां द्वे' इति यकारस्य विकल्पेन द्वित्वे गौर्यौ इति रूपद्वयं सिद्धम् । यदि 'इकोऽसवर्णे शाकल्यस्ये' ति सूत्रे पदान्ता इति पदं न स्यात् तर्हि गौरी औ इत्यवस्थायां ह्रस्वसमुच्चितः प्रकृतिभावः स्यात्, पदान्ता इति पदानुवृत्तौ तु गौरी इत्यत्र इकः पदान्तत्वाभावेन प्रकृतिभावाप्रवृत्तेः ।

वाप्यश्वः । वापी + अश्व इत्यत्र 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति प्रकृतिभावे प्राप्ते 'न समासे' इति वार्तिकेन निषेधे 'इको यणचि' इति यणि वाप्यश्वः इति सिद्धम् ।

इति अच्सन्धिप्रकरणम्

अथ हल्सन्धिप्रकरणम्

स्तोः श्चुना श्चुः । सकार और तवर्ग के स्थान में क्रमशः शकार और चवर्ग होते हैं शकार का योग हो या च वर्ग का, सूत्रार्थ ।

रामश्शेते ।६४। रामस्+शेते इत्यत्र 'स्तोः श्चुना श्चुः' इत्यनेन शकारस्य योगे सकारस्य स्थाने शकारे श्चुत्वे रामश्शेते इति सिद्धम् ।

सच्चित् । सत् + चित् इत्यत्र 'स्तोः श्चुना श्चुः' इत्यनेन तकारस्य श्चुत्वेन चकारे सिद्धम् ।

रामश्चिनोति ।७१। रामस् + चिनोति इत्यत्र 'स्तोः श्चुना श्चुः' इति चकारस्य योगे सकारस्य श्चुत्वेन शकारे रामश्चिनोति इति सिद्धम् ।

शार्ङ्गिञ्जयः ।२५। शार्ङ्गिन्+जय इत्यत्र 'स्तोः श्चुना श्चुः' इति जकारस्य योगे नकारस्य श्चुत्वेन ञकारे शार्ङ्गिञ्जय इति सिद्धम् ।

विश्नः । विश्+नः इत्यत्र श्चुत्वे प्राप्ते 'शात्' इति निषेधे सिद्धम् ।

प्रश्नः ।११। प्रश्+नः इत्यत्र 'स्तोः श्चुना श्चुः' इति श्चुत्व प्राप्ते 'शात्' इति सूत्रेण शकारात् परस्य नकारस्य श्चुत्वनिषेधे प्रश्नः इति सिद्धम् ।

रामष्षठः । रामस्+षष्ठः इत्यत्र 'ष्टुना ष्टुः' इति ष्टुत्वेन सकारस्य षकारे रामष्षठः इति सिद्धम् ।

रामष्टीकते (ई० ४९)—'रामस् + टीकते' इति स्थिते 'ष्टुना ष्टुः' इत्यनेन टकारयोगात् सस्य ष्टुत्वेन षत्वे 'रामष्टीकते' इति जातम् ।

पेष्टा—(ई० ४०)—'पेष् + ता' इति स्थिते 'ष्टुना ष्टुः इत्यनेन तकारस्य ष्टुत्वेन टकारे 'पेष्टा' इति सिद्धम् ।

तट्टीका (ई० ४८, ५१)—'तद्+टीका' इति दशायां 'ष्टुना ष्टुः' इत्यनेन दस्य ष्टुत्वेन डकारे 'खरि चे' ति तस्य चर्त्वेन टकारे 'तट्टीका' इति सिद्धम् ।

चक्रिण्ढौकसे (ई० ५०)—'चक्रिन्+ढौकसे' इति स्थिते टवर्गयोगात् नस्य ष्टुत्वेन णत्वे सिद्धम् ।

षण्णाम् (ई० ५३)–'षष् नाम्'+इति स्थिते 'स्वादिष्वि'ति पदत्वात् षस्य जश्त्वेन डकारे 'प्रत्यये भाषायां नित्यम्' इति तस्य णकारे 'षण् नाम्' इति जाते टवर्गयोगात् नकारस्य 'ष्टुना ष्टुः' इति ष्टुत्वेन णकारे 'षण्णाम्' इति सिद्धम् । 'न पदान्तादि'ति ष्टुत्वनिषेधस्तु न, 'अनाम्नवतिनगरीणामिति वाच्यम्' इति वार्तिकेन तत्र अनामिति पर्युदासात् ।

चिद्रूपम् (ई० ५०)—'चित्+रूपम्' इति स्थिते 'झलां जशोन्ते' इात जश्त्वे 'चिद्रूपम्' इति ।

षट् सन्तः । षट्+सन्तः इत्यत्र 'ष्टुना ष्टुः' इति सूत्रेण सकारस्य ष्टुत्वे प्राप्ते 'न पदान्ताट्टोरनाम्' इति ष्टुत्वनिषेधे षट् सन्तः इति सिद्धम् ।

षट् ते । ११ । षट्+ते इत्यत्र 'ष्टुना ष्टुः' इति ष्टुत्वे प्राप्ते 'न पदान्ताट्टोरनाम्' इति ष्टुत्वनिषेधे षट् ते इति सिद्धम् ।

सर्पिष्टमम् । ४३ । सर्पिष्+तमम् इत्यत्र 'ष्टुना ष्टुः' इति ष्टुत्वेन तकारस्य टकारे सर्पिष्टमम् इति सिद्धम् । यदि 'न पदान्ताट्टोरनामि'ति सूत्रे टोः ग्रहणं न स्यात् तर्हि सर्पिष्तमम् इति अवस्थायाम् षकारात्परस्य तस्य ष्टुत्वनिषेधः

स्यात् । अतः टोः ग्रहणं कर्तव्यम् ।

अनाम्नवतिनगरीणामिति वाच्यम् । पदान्ताट्टवर्गात्परस्य नाम् नवति नगरी एतदवयवभिन्नस्य तवर्गस्य ष्टुत्वं न भवति इति वार्त्तिकार्थः । तेन षण्णवतिः, षण्णगर्यः इत्यत्र ष्टुत्वं भवति, 'न पदान्ताट्टोरनाम्' इति ष्टुत्वनिषेधः न प्रवर्तते ।

सन् षष्ठः । सन्+षष्ठ इत्यत्र 'ष्टुना ष्टुः' इति नकारस्य ष्टुत्वेन णकारे प्राप्ते 'तोः षि' इति ष्टुत्वनिषेधे सन् षष्ठः इति सिद्धम् ।

वागीशः । वाक्+ईशः इत्यत्र 'झलां जशोऽन्ते 'इति सूत्रेण ककारस्य स्थाने जश्त्वेन गकारे वागीशः इति सिद्धम् ।

यरोऽनुनासिकेऽनुनासिको वा । ४१ । यरः, अनुनासिके, अनुनासिकः वा इति पदच्छेदः । पदान्तस्येत्यनुवर्तते तेन पदान्तस्य यरः स्थाने अनुनासिके वर्णे परे अनुनासिको वा भवति इति सूत्रार्थः ।

एतन्मुरारिः । ५० । ६५ । एतद्+मुरारिः इत्यत्र 'स्थानेऽन्तरमः' इति सूत्रसहकारेण 'यरोऽनुनासिकेऽनुनासिको वा' इति दकारस्य स्थाने विकल्पेन अनुनासिके नकारे एतन्मुरारिः इति सिद्धम् पक्षे एतद् मुरारिः इति सिद्ध्यति ।

तन्मात्रम् । तद्+मात्रम् इत्यत्र 'प्रत्यये भाषायां नित्यम्' इति वार्तिकसहकारेण 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रेण नित्यम् दकारस्य अनुनासिके नकारे तन्मात्रम् इति सिद्धम् ।

चिन्मयम् । ५६ । चिद्+मयम् इत्यत्र मयटि प्रत्यये परे 'प्रत्यये भाषायां नित्यम्' इति वार्तिकसहकारेण 'यरोऽनुनासिकेऽनुनासिको वा' इति नित्यम् दकारस्य अनुनासिके नकारे चिन्मयम् इति सिद्धम् ।

तल्लयः (ई० ४९)—तस्य लयः 'तल्लयः' । 'तद्+लयः' इति स्थिते 'तोर्लि:' इति सूत्रेण तस्य परसवर्णे लकारे 'तल्लयः' । इति सिद्धम् । (अत्र दस्य परसवर्णः=परनिमित्तभूतलकारस्य सवर्णो भवति, स च लकार एव, अन्यस्य तत्सवर्णस्याऽभावात्)

विद्वांल्लिखति (ई० ४३)—'विद्वान् लिखति' इत्यत्र 'तोर्लि:' इति

नकारस्य स्थानिनोऽनुनासिकस्य परसवर्णो लकारो भवन्नानन्तर्यादनुनासिक एव भवतीति ।

तस्मादित्युत्तरस्य (ई० ४३)—पञ्चमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाऽव्यवहितस्य परस्य ज्ञेयम् इति सूत्रार्थः । भाषार्थ—'पञ्चम्यन्त पद का उच्चारण कर जिस कार्यका विधान किया गया हो, वह कार्य उस पञ्चम्यन्तसे बोधित वर्णान्तर (अन्यवर्ण) से अव्यवहित (व्यवधानरहित) पर वर्णके स्थान में हो । अर्थात् निमित्त और स्थानी के बीच में अन्य वर्ण नहीं आना चाहिये । उदाहरण 'उदः स्थास्तम्भोः पूर्वस्य' इस सूत्रमें 'उदः' इस पञ्चम्यन्त पदका उच्चारण कर पूर्वसवर्ण आदेश का विधान किया गया है । अतः यह सूत्र 'उद्' तथा 'स्था' और 'स्तम्भ' के बीच में जब अन्य कोई वर्ण नहीं होगा तब ही पूर्वसवर्ण कर सकेगा । यथा–'उत्थानम् उत्तम्भनम्' इत्यादि स्थलमें देखें ।

आदेः परस्य–(ई० ३४) 'परस्य यद्विहितं तत्तस्यादेर्बोध्यम्' इति सूत्रार्थः भाषार्थ–'जो कार्य पर के स्थान में विधान किया गया हो, वह कार्य परके आदि वर्णके स्थान में होता है: ऐसा समझना चाहिए । उदाहरण 'उत्थानम्' यहाँ 'उद् स्थानम्' और 'उद् स्तम्भनम्' इस स्थिति में परके आदि वर्ण सकार के स्थान में पूर्व दकारका सवर्ण थकार होता है ।

वाग्घरिः (ई०४९)—'वाक्+हरिः' इति स्थिते 'झलां जशोन्ते' इति जश्त्वे कृते 'वाग् हरिः' इति दशायाम् 'झयो होऽन्यतरस्याम्' इति पूर्वसवर्णविधौ गकारस्य पूर्वनिमित्तत्वात् तत्सवर्णेषु 'क–ख–ग–घ–ङ' इत्येतेषु पञ्चस्वपि प्राप्तेषु घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य स्थाने तादृशे घकारे जाते 'वाग्घरिः' इति सिद्धम् । पूर्वसवर्णाऽभावपक्षे 'वाग्हरिः' इति सिद्धं भवति ।

तच्छिवः (ई० ४३)–'तद्+शिवः' इत्यवस्थायां 'स्तोःश्चुना श्चुः' इत्यनेन दकारस्य श्चुत्वे जकारे कृते 'खरि च' इत्यनेन जकारस्य चर्त्वेन चकारे 'तच् शिवः' इति जाते 'शश्छोऽटि' इत्यनेन झयान्तःपातिनश्चकारात्परस्य शस्य अट्प्रत्याहारान्तःपातिनि शकारोत्तरवर्तिनीकारे परे छत्वे 'तच्छिवः' इति सिद्धम् । छत्वाभावे तु 'तच्शिवः' इति ।

अञ्चितः (ई० ५०)–'अञ्चु गतिपूजनयोः' नोपधः तस्मात् क्तः। अञ्चेः पूजायाम्' इति इट्। 'नाञ्चेः पूजायाम्' इति निषेधात् 'अनिदिताम्—' इति न लोपो न। अत्र 'नश्चापदान्तस्ये' त्यनुस्वारस्य स्थाने 'अनुस्वारस्य ययि परसवर्णः' इति परसवर्णो ञकारः।

षट्त्सन्तः (ई० ४२, ४६ ५२)—'षड् सन्तः' इति स्थिते 'डः सि धुट्' इत्यनेन 'आद्यन्तौ टकितौ' इति सहकारात् डकारात्परस्यादौ धुटि अनुबन्धलोपे 'षड् ध् सन्तः, इति स्थिते 'खरि च' इति धस्य चर्त्वे कृते पुनः डकारस्याप्यनेन चर्त्वे 'षट्त्सन्त': इति। धुडभावपक्षे डकारस्य चर्त्वे 'षट्सन्तः' इति।

उत्थानम् ।६५। उद् + स्थानम् इत्यत्र 'तस्मादित्युत्तरस्य' 'आदेः परस्य' 'स्थानेऽन्तरमः' इति सूत्रत्रयसहकारेण 'उदःस्थास्तम्भोः पूर्वस्य' इति सूत्रेण सकारस्य पूर्वसवर्णे थत्वे उद् थ् थानम् इति जाते 'झरो झरि सवर्णे' इति विकल्पेन थकारस्य लोपे 'खरि च' इति उदो दस्य चर्त्वेन तकारे उत्थानम् इति। थलोपाभावपक्षे उत्थ्थानम् इति सिद्धम्।

उत्तम्भनम् ।१४। उद्+स्तम्भनम् इत्यत्र 'तस्मादित्युत्तरस्य, आदेः परस्य स्थानेऽन्तरतमः' इति सूत्रत्रयस्य सहकारेण, 'उदः स्थास्तम्भोः पूर्वस्य' इत्यनेन सकारस्य पूर्वसवर्णे थत्वे 'झरो झरि सवर्णे' इति विकल्पेन थस्य लोपे 'खरि च' इति दकारस्य चर्त्वेन तकारे उत्तम्भनम् इति थलोपाभावपक्षे उत्थम्भनम् इति सिद्धम्।

तच्छास्त्रम् ४०। तद् + शास्त्रम् इत्यत्र 'स्तोः श्चुना श्चुः' इति श्चुत्वेन दस्य जकारे तस्य 'खरि चे'ति चर्त्वेन चकारे 'शश्छोऽटि' इति। शकारस्य स्थाने विकल्पेन छत्वे तच्छास्त्रम् इति सिद्धम्।

तच्छ्लोकेन ।३९। तद् श्लोकेन इत्यत्र 'स्तोः श्चुना श्चुः' इति श्चुत्वेन दकारस्य जकारे 'खरि चे' ति चर्त्वेन जकारस्य चकारे 'शश्छोऽटि' इति शकारस्य छत्वाप्राप्ते 'छत्वममिति वाच्यम्' इति वार्तिकेन छत्वे तच्छ्लोकेन इति सिद्धम्।

त्वङ्करोषि ।४९। त्वम् + करोषि इत्यत्र 'मोऽनुस्वारः' इति सूत्रेण मकारस्यानुस्वारे ततः 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन अनुस्वारस्य नित्यं पर-

सवर्णे प्राप्ते तं प्रबाध्य 'वा पदान्तस्य' इति सूत्रेण वैकल्पिके ङ्कारे परसवर्णे त्वङ्करोषि इति । परसवर्णाभावे त्वं करोषि इति रूपद्वयं सिद्धम् ।

सम्राट् ।११। सम् + राट् इत्यत्र 'मोऽनुस्वारः' इति सूत्रेणानुस्वारे प्राप्ते तं प्रबाध्य 'मो राजि समः क्वौ' इति सूत्रेण मकारस्य मकारे संयोगे सम्राट् इति सिद्धम् ।

किलँ ह्लादयति । ३६ । किम् + ह्लादयति इत्यत्र 'मोऽनुस्वारः' इत्यनुस्वारम्प्रबाध्य 'यवलपरे यवला वा' इति वार्तिकेन लपरके हकारे परे मकारस्य सानुनासिके लकारे किलँह्लादयति इति । पक्षे अनुस्वारे कृते किंह्लादयति इति रूपद्वयं सिद्धम् ।

प्राख्ङ्षष्ठ । ८ । प्राङ्+षष्ठः इत्यत्र 'यथासंख्यमनुदेशः समानाम्' इति सहकारेण 'ङ्णोः कुक् टुक् शरि' इत्यनेन कुगागमे प्राप्ते किन्तु सः कुत्र स्यादित्याकांक्षायाम् 'आद्यन्तौ टकितौ' इति सूत्रेण कित्त्वात् अन्ते कुकि कृते अनुबन्धलोपे प्राङ्+क्+षष्ठः इति स्थिते 'चयो द्वितीया शरि पौष्करशादेरिति वाच्यम्' इति वार्तिकेन ककारस्य खकारे प्राङ् ख्षष्ठः इति । पक्षे खत्वाभावे क् ष संयोगे क्षकारः प्राङ्क्षष्ठः इति द्वितीयं रूपं । कुगागमाभावपक्षे—प्राङ षष्ठः इति रूपत्रयं सिद्धम् ।

सुगण्षष्ठः । ४० । सुगण्+षष्ठः इति दशायाम् 'ङ्णोः कुक् टुक् शरि' इत्यनेन वैकल्पिके टुगागमेऽनुबन्धलोपे सुगण्+ट्–षष्ठः इति जाते 'चयो द्वितीया शरि पौष्करसादेरिति वाच्यम्' इति वार्तिकेन टकारस्य द्वितीयाक्षरे ठकारे सुगण्ठ् षष्ठः इति । पक्षे ठकाराभावे सुगण्ट् षष्ठ इति, टुगागमाभावे च सुगण्षष्ठः इति रूपत्रयं सिद्धम् ।

षट्त्सन्तः । ४८ । षड् + सन्तः इत्यत्र 'डः सि धुट्' इति सूत्रेण वैकल्पिके धुडागमे प्राप्ते सः कुत्र स्यादिति आशंकायाम् 'आद्यन्तौ टकितौ' इति सूत्रसहकारेण टित्त्वात् षकारस्य (आदौ) अग्रे धुडागमे षट्—ध्—सन्तः इति जाते अनुबन्धलोपे 'खरि चे'ति चर्त्वेन धकारस्य तकारे पुनः डकारस्य चर्त्वेन टकारे कृते षट्त्सन्तः इति रूपं । धुडभावपक्षे डस्य चर्त्वेन ट्कारे षट्सन्तः

इति रूपद्वयं सिद्धम् ।

सन्त्सः । ५० । सन्—सः इत्यवस्थायाम् 'नश्च' इति सूत्रेण वैकल्पिके धुडागमे कृते अनुबन्धलोपे 'खरि च' इत्यनेन चर्त्वेन तकारे सन्त्सः इति । पक्षे धुडभावे सन्सः इति सिद्धम् ।

ङमो ह्रस्वादचि ङमुण् नित्यम् ।४२। अत्र पदस्येति अधिक्रियते । तस्य ङमः इति पञ्चम्यन्तानुरोधात् पञ्चम्यन्तत्वेन विपरिणामः । अचि इत्यस्य च षष्ठी प्रकल्पनम् । ततः ह्रस्वात्परो यो ङम् तदन्तं यत् पदं तस्मात् परस्याचो ङमुट् स्यात् । ङमुट् इति ङम्प्रत्याहारः । संज्ञायां च कृतं टित्वं सामर्थ्यात् संज्ञिभिः सम्बध्यते । तेन ङुट् णुट् नुट् स्यात् इति लभ्यते ।

प्रत्यङ्ङात्मा—।६१। प्रत्यङ् + आत्मा इत्यत्र 'ङमो ह्रस्वादचि ङमुण् नित्यम्' इति सूत्रेण ङमुडागमे अनुबन्धलोपे संयोगे प्रत्यङ्ङात्मा इति सिद्धम् ।

सञ्च्छंभुः (ई० ५०, ५२)—'सन्+शम्भुः' इति 'स्थिते' शितुक् इत्यनेन 'आद्यन्तौ टकितौ' इति सूत्रसहकारात् सकारे परे पदान्तस्य नस्याऽन्तावयवे तुकि अनुबन्धलोपे 'सन् त् शम्भुः' इति स्थिते 'शश्छोऽटि' इति शस्य छत्वे 'स्तोः श्चुना श्चुः' इति तस्य श्चुत्वेन चत्वे 'सन् च् छम्भुः इति जाते पुनः 'स्तो श्चुना श्चुः' इत्यनेन नस्य श्चुत्वेन ञत्वे 'झरो झरि सवर्णे' इति वैकल्पिके चलोपे 'सञ्छम्भुः इति । चलोपाभावपक्षे 'सञ्च्छम्भु' इति । छत्वाऽभावपक्षे 'सञ्च्-शम्भुः' इति । तुगभावपक्षे 'सन् शम्भुः' इति स्थिते नस्य श्चुत्वेन ञकारे 'सञ् शम्भुः' इति । तदुक्तम्—

> 'ञछौ ञचछा ञचशा ञशाविति चतुष्टयम् ।
> रूपाणामिह तुक्-छत्व-चलोपानां विकल्पनात् ॥

सन्नच्युतः (ई० ५०)—'सन् अच्युतः' इति दशायां 'ङमो ह्रस्वादचि ङमुण् नित्यम्' इति ह्रस्वात्परस्य ङम्प्रत्याहारान्तःपातिनो नकारात् परस्य अच्प्रत्याहारान्तर्वर्तिनोऽकारस्य ङमुटि अनुबन्धलोपे 'सन्नच्युत' इति ।

संस्कर्त्ता (४३, ४४, २८, ५२)–'सम् + कर्ता' इति दशायां 'सम्परिभ्यां

करोतौ भूषणे' इति सुटि अनुबन्धलोपे 'सम् स्कर्ता' इति स्थिते 'समः सुटि' इति सूत्रेण सुट्सम्बन्धिसकारे परे समो मस्य रुत्वे अनुबन्धलोपे 'सर् स्कर्ता' इति जाते 'अत्रानुनासिकःपूर्वस्य तु वा' इति रोः पूर्वमनुनासिके 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे प्राप्ते तम्प्रबाध्य 'वा शरि' इति विसर्गस्य विसर्गे प्राप्तौ तमपि प्रबाध्य 'सम्पुंकानां सो वक्तव्यः, इति विसर्गस्य सत्वे 'संस्कर्ता' इति। अनुनासिकाभावपक्षे 'अनुनासिकात्परोऽनुस्वारः' इत्यनुस्वारे 'सँस्स्कर्ता' इति।

पुंस्कोकिलः (ई० ४८, ५०)—'पुम्+कोकिलः' इति दशायां 'पुमः खय्यम्परे' इत्यनेन पुमो मस्य रुत्वे अनुबन्धलोपे 'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रेण अनुनासिके 'पुंर् कोकिलः' इति स्थिते 'खरवसानयोर्विसर्जनीयः' इत्यनेन रेफस्य विसर्गे 'कुप्वोः ≍क ≍पौ च' इत्यनेन जिह्वामूलीये प्राप्ते तम्प्रबाध्य 'संपुंकानां सो वक्तव्यः' इति वार्तिकेन विसर्गस्य सत्वे 'पुंस्कोकिलः' इति। अनुनासिकाभावपक्षे 'अनुनासिकात्परोऽनुस्वारः' इत्यनुस्वारे कृते पुंस्कोकिलः इति।

चक्रिँस्त्रायस्व (ई० ४१, ४९)—चक्रिन् त्रायस्व इत्यवस्थायां 'नश्छव्यप्रशान्' इति सूत्रेण नस्य रुत्वे अनुबन्धलोपे 'अत्रानुसिकः पूर्वस्य तु वा' इत्यनेन अनुनासिके चक्रिँर् त्रायस्व इति जाते 'खरवसानयोर्विसर्जनीयः' इत्यनेन रेफस्य विसर्गे 'विसर्जनीयस्य सः' इत्यनेन विसर्गस्य सत्वे 'चक्रिँस्त्रायस्व इति। अनुनासिकाऽभावपक्षे 'अनुनासिकात्परोऽनुस्वारः' इति अनुस्वारे 'चक्रिंस्त्रायस्व' इति।

राजँश्चित्रम्—राजन्+चित्रम् इत्यवस्थायां 'नश्छव्यप्रशान्' इति सूत्रेण नकारस्य रुत्वेऽनुबन्धलोपे 'अनुनासिकः पूर्वस्य तु वा' इत्यनेन अनुनासिकत्वे राजँर्+चित्रम् इति स्थिते पक्षान्तरे 'अनुनासिकात्परोऽनुस्वारः' इत्यनेनानुस्वारे राजंर्+चित्रम् इति जाते 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे ततः 'विसर्जनीयस्य सः' इति सूत्रेण विसर्गस्य सत्वे कृते पश्चात् 'स्तोः श्चुना श्चुः' इति सूत्रेण सकारस्य श्चुत्वेन शत्वे कृते राजँश्चित्रम् इति रूपम्। पक्षे

राजंश्चित्रम् इति सिद्धम् ।

भगवाँस्तनोति—भगवान् + तनोति इत्यत्र 'नश्छव्यप्रशान्' इति सूत्रेण नस्य रुत्वेऽनुबन्धलोपे भगवान् + तनोति इति जाते 'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रेण रोः पूर्वस्यानुनासिके कृते 'खरवसानयोर्विसर्जनीयः' इत्यनेन रेफस्य विसर्गे 'विसर्जनीयस्य सः' इत्यनेन विसर्गस्य सत्वे भगवाँस्तनोति इति रूपम् । अनुनासिकाभावपक्षे तु 'अनुनासिकात्परोऽनुस्वारः' इत्यनेनाऽनुस्वारे विसर्गे सत्वे च कृते भगवांस्तनोति इति रूपद्वयं सिद्धम् ।

नॄन्पाहि—५९ । नॄन्+पाहि इत्यवस्थायां 'नॄन्पे' इति सूत्रेण वैकल्पिके नकारस्य रुत्वेऽनुबन्धलोपे 'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रेण वैकल्पिकेऽनुनासिके कृते ततः 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे 'विसर्जनीयस्य सः' इति सूत्रेण विसर्गस्य सकारे प्राप्ते तम्प्रबाध्य 'कुप्वो≍क ≍पौ च इत्यनेन विसर्गस्य≍पादेशे कृते नॄँ≍पाहि इति प्रथमं रूपम् । अनुनासिकाभावपक्षे अनुनासिकात्परोऽनुस्वारः' इत्येननानुस्वारे कृते नॄं≍पाहि इति द्वितीयं रूपम् ।≍पादेशाभावे रुत्वाऽनुनासिकविसर्गेषु कृतेषु नॄँः पाहि इति तृतीयं रूपम् । अनुस्वारागमपक्षे—नॄंः पाहि इति चतुर्थम् । रुत्वाभावपक्षे नॄन्पाहि इति पञ्च रूपाणि सिद्धयन्ति ।

काँस्कान्—कान् + कान् इत्यवस्थ: . 'तस्य परमाम्रेडितम्' इत्यनेन द्वितीयस्य कान् शब्दस्य आम्रेडितसंज्ञायाम् ततः 'कानाम्रेडिते' इति सूत्रेण पूर्वस्य कान् शब्दे नकारस्य रुत्वेऽनुबन्धलोपे 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यनेन ककारोत्तरवर्तिनोऽकारस्यानुनासिकत्वे 'खरवसानयोर्विसर्जनीयः' इत्यनेन रेफस्य विसर्गे 'सम्पुङ्कानां सो वक्तव्यः' इति वार्तिकेन विसर्गस्य सत्वे काँस्कान् इति रूपम् भवति । अनुनासिकाभावपक्षे 'अनुनासिकात्परोऽनुस्वारः' इति सूत्रेण अनुस्वारागमे विसर्गे सत्वे च कृते काँस्कान् इति रूपद्वयं सिद्धयति ।

शिवच्छाया—५७ शिव + छाया इत्यत्र 'छे च' इति सूत्रेण तुकि कृते अनुबन्धलोपे 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन दकारे 'स्तोः श्चुना श्चुः' इति सूत्रेण चकारयोगात् दकारस्य श्चुत्वेन जकारे 'खरि च' इति सूत्रेण चर्त्वेन

चकारे शिवच्छाया इति सिद्धम् ।

पयस्पाशम् (ई० ५१)—'याप्ये पाशप्' कुत्सितं पय इत्यर्थः । पयः+पाशम् इति स्थिते 'सोऽपदादौ' इत्यनेन विसर्गस्य सत्वे उक्तं रूपं सिद्धम् ।

सर्पिष्पाशम् (ई० ५४)—'याप्ये पाशप्'+कुत्सितं सर्पिरित्यर्थः । 'सर्पिः पाशम्' इति स्थिते 'सोऽपदादौ' इति विसर्गस्य सत्वे प्राप्ते तं प्रबाध्य 'इणः षः' इति इण उत्तरस्य रुसम्बधिनो विसर्गस्य षत्वे उक्तं रूपं सिद्धम् ।

सर्पिष्कल्पम् (ई० ५०)—'ईषदसमाप्तौ कल्पप्' 'सर्पिः+कल्पम्' इति स्थिते सत्वं प्रबाध्य 'इणः षः' इत्यनेन इण उत्तरस्य रुसम्बन्धिनो विसर्गस्य षत्वे 'सर्पिष्कल्पम्' इति ।

सर्पिष्कम् (ई० २५)—'अज्ञाते' 'कुत्सिते' इति वा कः । अत्र 'सोऽपदादौ' इति प्राप्तं सत्वं प्रबाध्य 'इणः' इत्यनेन षत्वे उक्तं रूक्तं जातम् ।

कष्कः (ई० ४२, ५०)—वीप्सायां द्वित्वे पूर्वखण्डे अकारात् परस्य विसर्गस्य 'कस्कादिषु च' इत्यनेन सत्वे 'कस्कः' इति षत्वन्तु न 'कस्कादिषु च' इत्यनेन इणः परस्यैव विसर्गस्य षत्वविधानात् ।

आविष्कृतम् (ई० ५३)—प्रकाशीकृतमित्यर्थः । आविः+कृतमिति स्थिते 'इदुदुपधस्य चाऽप्रत्ययस्य' इत्यनेन इकारोपधस्य विसर्गस्य षत्वे उक्तं रूपं सिद्धम् ।

स्वच्छाया (ई० ४१)—'स्व+छाया' इति दशायां 'छे च' इति तुकि अनुबन्धलोपे 'स्व त् छाया' इति जाते 'झलां जशोऽन्ते' इति जश्त्वेन तकारस्य दकारे 'स्तोः श्चुना श्चुः' इति दस्य श्चुत्वेन जकारे 'खरि च' इति जस्य चर्त्वेन चकारे 'स्वच्छाया' इति ।

गौश्चरति—गौः+चरति इत्यत्र 'विसर्जनीयस्य सः' इति सूत्रेण विसर्गस्य सकारे 'स्तोः श्चुनाश्चुः' इति सकारस्य श्चुत्वेन शकारे कृते गौश्चरति इति साधुः ।

लक्ष्मीच्छाया (ई० ५०)—'लक्ष्मी+छाया' इति दशायां 'पदान्ताद्वा' इति तुकि अनुबन्धलोपे 'लक्ष्मी त् छाया' इति स्थिते 'झलां जशोऽन्ते' इति

तकारस्य जश्त्वेन दकारे 'स्तोः श्चुना श्चुः' इति दस्य श्चुत्वे जकारे 'खरि च' इति जस्य चर्त्वेन चकारे 'लक्ष्मीच्छाया' इति । तुगभावे 'लक्ष्मीछाया' इत्यपि भवति ।

इति हल्सन्धिप्रकरणम्

अथ विसर्गसन्धिप्रकरणम्

विष्णुस्त्राता—विष्णुः + त्राता इत्यवस्थायाम् 'विसर्जनीयस्य सः' इत्यनेन विसर्गस्य स्थाने सकारे कृते संयोगे विष्णुस्त्राता इति सिद्धम् ।

हरिः शेते (ई० ५०)—'हरिः+शेते' इति स्थिते 'वा शरि' इत्यनेन विसर्गस्य विसर्गे 'हरिःशेते' इति । विसर्गाभावपक्षे तु 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे 'स्तोः श्चुना श्चुः' इति सस्य श्चुत्वेन शकारे 'हरिश्शेते' इति भवति ।

हरि स्फुरति (ई० ५२)—'हरिः स्फुरति' इति स्थिते 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति वार्तिकेन विसर्गस्य लोपे 'हरि स्फुरति' इति । लोपाऽभावे 'वा शरि' इति विसर्गस्य विसर्गे 'हरिः स्फुरति' इति । विसर्गाऽभाव-पक्षे 'विसर्जनीयस्य सः' इति विसर्गस्य सत्वे 'हरिस्स्फुरति' इति च तृतीयं रूपं सिद्धं भवति ।

इति विसर्गसन्धिप्रकरणम्

अथ स्वादिसन्धिप्रकरणम्

शिवोऽर्च्यः (ई० ४९)—'शिवस्+अर्च्यः' इति स्थिते 'ससजुषो रुः' इति रुत्वे 'अतो रोरप्लुतादप्लुते' इति उत्वे 'शिव उ अर्च्यः' इति जाते 'आद्गुणः' इति गुणे 'एङः पदन्तादति' इति पूर्वरूपे 'शिवोऽर्च्यः' इति ।

शिवो वन्द्यः । ५७, ६४ । शिवस्+वन्द्यः इत्यत्र 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे 'हशि च' इत्यनेन रोः उत्वे 'आद्गुणः' इत्यनेन गुणे

शिवो वन्द्यः इति सिद्धम् ।

देवायिह् । ५६ । देवास्+इह् इत्यवस्थायाम् 'ससजुषो रुः' इति सूत्रेण रुत्वेऽनुबन्धलोपे देवार्+इह् इति स्थिते 'भोभगोअघो अपूर्वस्य योऽशि' इति सूत्रेण रेफस्य स्थाने यादेशे कृते 'लोपः शाकल्यस्य' इति सूत्रेण वैकल्पिके यकारस्य लोपे देवा इह् इति रूपम् । यलोपाभावपक्षे देवायिह् इति रूपद्वयं सिद्धम् ।

भो देवाः । ६५ । भोस्+देवा इत्यत्र भोस्, भगोस्, अघोस् इति सकारान्ताः निपाताः । ततः भोस्+देवाः इत्यत्र 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे 'भोभगोअघो अपूर्वस्य योऽशि' इति रेफस्य यत्वे भोय्+देवाः इति स्थिते 'हलि सर्वेषाम्' इत्यनेन यकारस्य लोपे भो देवाः इति सिद्धम् ।

अघोयाहि—अघोस्+याहि इत्यवस्थायाम् अघोस् इति सकारान्तो निपातस्तत्सकारस्य 'ससजुषो रुः' इति सूत्रेण रुत्वेऽनुबन्धलोपे 'भोभगोअघो अपूर्वस्य योऽशि' इति सूत्रेण रोः स्थाने यकारे कृते 'हलि सर्वेषाम्' इत्यनेन यकारस्य लोपे अघो याहि इति सिद्धम् ।

अहर्गणः (ई० ५०)—'अहन्+गणः' इति स्थिते 'रोऽसुपि' इति 'अलोन्त्यस्ये'ति परिभाषया अहन्शब्दान्तस्य नस्य रेफादेशे 'अहर्गणः' इति सिद्धम् ।

भो अच्युत (ई० ५२)—'भोस्' इति सकारान्तनिपातसम्बोधनम् अव्ययपदम् । तत्र 'भोस्+अच्युत' इति स्थिते 'ससजुषो रुः' इति सस्य रुत्वे 'भोभगो–' इति तस्य यत्वे च कृते 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' इत्यनेन यकारस्य विभाषया लघूच्चारणयादेशे 'भोयच्युत' इति । विकल्पपक्षे 'भो य् अच्युत' इति दशायाम् 'ओतो गार्ग्यस्य' इत्यनेन अलघुप्रयत्नस्य यस्य लोपे 'भो अच्युत' इत्युक्तं रूपं सिद्धम् ।

अहो रूपम् (ई० ४५)—अह्नो रूपमिति विग्रहः । 'अहन् रूपम्' इति स्थिते 'रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्' इति रुत्वे 'हशि च' इत्युत्वे 'आद्गुणः' इति गुणे उक्तं रूपं निष्पन्नम् ।

अहो रात्रः (ई० ५३)—अहश्च रात्रिश्चेति द्वन्द्व समासान्ते अचि 'यस्येतिचे'ति इकारलोपे 'अहन् रात्र' इति जाते 'रूपरात्रिरथन्तरेषु रुत्वं

वाच्यम्' इति नस्य रुत्वे 'हशि च' इत्युत्वे 'आद्गुणः' इति गुणे 'रात्राह्नाहाः पुंसि' इति पुंस्त्वे उक्तं रूपं सिद्धम् ।

अत्र नकारस्य रात्रिशब्दपरकत्वाभावात् कथं रुत्वमिति चेन्न, एकदेशविकृतन्यायेन तत्सिद्धेः ।

पुना रमते (ई० ४७, ५०) 'पुनर् रमते' इति दशायां 'रो रि' इति रेफस्य लोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति नकारादकारस्य दीर्घे 'पुना रमते' इति ।

हरी रम्यः (ई० ४४, ४८, ५२)—'हरिस् + रम्यः' इति स्थिते 'ससजुषो रुः' इति सस्य रुत्वे 'रो रि' इति रेफस्य लोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घे 'हरी रम्यः' इति ।

शम्भू राजते (ई० ५१)—'शम्भुस्+राजते' इति दशायां 'ससजुषो रुः इति रुत्वे 'रो रि' इति रुसम्बन्धिरेफस्य लोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घे 'शम्भू राजते' इति ।

तृढः–'ढ्रलोपे' ति सूत्रे अण्ग्रहणाभावे 'ढरेफयोर्लोपनिमित्तयोः पूर्वस्य दीर्घः' इत्यर्थे तृह् धातोर्निष्ठायां क्तप्रत्यये 'तृह् त' इति स्थिते 'हो ढः' इति हस्य ढत्वे 'झषस्तथोः' इति तस्य धत्वे ष्टुत्वे 'ढो ढे लोपः' इति ढलोपे सति 'ढ्रलोपे' इति पूर्वस्य ऋकारस्य दीर्घापत्तिः स्यादिति सूत्रे अण्ग्रहणमावश्यकमिति । कृते त्वण्ग्रहणे तत्सामर्थ्यात् पूर्वणकारेणैव 'अण्' प्रत्याहारग्रहणात् दीर्घाऽप्रवृत्या कृदन्तत्वात् सौ रुत्वे विसर्गे 'तृढः' इति ।

मनोरथः (ई० ४१, ४७, ४९, ५२)–'मनस्+रथः' इति दशायां 'ससजुषो रुः' इति सस्य रुत्वे 'हशि च' इति रोरुत्वे प्राप्ते 'रो रि' इति रेफस्य लोपे च, प्राप्ते 'विप्रतिषेधे पर 'कार्यम्' इति तुल्यबलविरोधे सति परत्वात् 'रो रि' इति लोपे प्राप्ते 'पूर्वत्राऽसिद्धम्' इत्याधिकारसूत्रेण सपादसप्ताध्यायीस्थस्य 'हशि चे' ति सूत्रस्य दृष्टया त्रैपादिकस्य 'रो रि' इति सूत्रस्याऽसिद्धत्वात् 'हशि चे' त्यनेन रोरुत्वे 'मन उ रथः' इति जाते 'आद्गुणः' इति गुणे 'मनोरथः' इति ।

एष विष्णुः (ई० ५०)—'एषस्+विष्णुः' इत्यवस्थायां रुत्वं प्रबाध्य 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' इति सुलोपे 'एष विष्णुः' इति ।

स शम्भुः (ई० ४१)–'सस्+शम्भुः' इति स्थिते रुत्वं प्रबाध्य 'एतत्तदोः सुलोपोऽकोरनञ् समासे हलि' इति सुलोपे 'स शम्भुः' इति ।

सैष :—'सस्+एषः' इति स्थिते 'सोऽचि लोपे चेत्पादपूरणम्' इति सुलोपाऽभावे 'सैष दाशरथी रामः' इत्यत्र पादो न पूर्यते अतोऽत्रानेन सुलोपे 'वृद्धिरेऽचि' इति वृद्धौ 'सैषः' इति भवति । अन्यत्र तु 'स एषः' इति भवति ।

एषको रुद्रः—एतत् शब्दात् 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इति सूत्रेण अकच् प्रत्ययेऽनुबन्धलोपे कृते एषकस् + रुद्रः इत्यवस्थायाम् 'ससजुषो रुः'इत्यनेन सकारस्य रुत्वे 'हशि च' इति सूत्रेण उत्वे 'आद्गुणः' इति सूत्रेण गुणे कृते एषको रुद्रः इति सिद्धयति । 'एतत्तदोः सुलोपोऽकोरनञ् समासे हलि' इति सूत्रे अकोः ग्रहणाभावे एषकस्+रुद्रः इत्यत्र सुलोपे एषक रुद्रः इत्यनिष्टं रूपं प्रसज्येत, कृते तु अकोर्ग्रहणे अस्मिन् प्रयोगे एतद् शब्दस्य सककारकत्वान्न सुलोपः इति दिक्।

असः शिवः—असस् + शिवः इत्यत्र 'ससजुषो रुः' इति सूत्रेण रुत्वेऽनुबन्धलोपे 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण विसर्गे 'वा शरि' इति सत्वे सकारस्य 'स्तोः श्चुना श्चुः' इति श्चुत्वेन शकारे अशश्शिवः इति सिद्धयति । अत्र 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' इतिसूत्रे अनञ्समासग्रहणाभावे असस् शिवः इत्यवस्थायाम् सुलोपेन अस शिव इत्यनिष्टप्रयोग आपद्येत । कृते तु अनञ्समासग्रहणे अत्र नञ्समासान्तान्न सुलोपः इति दिक् ।

सेमामविड्ढिप्रभृतिम्—सस् + इमामविड्ढिप्रभृतिम् इत्यवस्थायाम् 'ससजुषोरुः' इत्यनेन रुत्वे प्राप्ते तं बाधित्वा 'सोऽचि लोपे चेत्पादपूरणम्' ,इति सूत्रेण इकारे अचि परतः सुलोपे 'आद्गुणः' इत्यनेन सेमामविड्ढिप्रभृतिम् इति साधुः ।

इति स्वादिसन्धिप्रकरणम्

---

(१) सैष दाशरथी रामः सैष राजा युधिष्ठिरः ।
सैष कर्णो महात्यागी सैष भीमो महाबलः ॥इति श्लोकः ।

अथ अजन्तपुंल्लिगप्रकरणम्

राम: । रामशब्दात् 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्राति-
पदिकसंज्ञायाम् प्रथमायाः एकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे सस्य 'सस-
जुषो रुः' इत्यनेन रुत्वे रेफस्य 'खरवसानयोर्विसर्जनीयः' इति विसर्गे रामः इति
सिद्धम् । इदम् अव्युत्पत्तिपक्षे रूपम् । व्युत्पत्तिपक्षे तु—रमन्ते योगिनोऽस्मि-
न्निति विग्रहे रमु क्रीडायाम् धातोः 'हलश्च' इत्यधिकरणे घञि प्रत्ययेऽनुबन्धलोपे
'अत उपधायाः इति सूत्रेण वृद्धौ कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इति प्राति-
पदिकसंज्ञायाम् विभक्तिकार्ये रामः इति सिद्धम् ।

रामौ—रामशब्दात् 'कृत्तद्धिसमासाश्च' इति प्रातिपदिकसंज्ञायाम् द्वित्व-
विवक्षायां राम रामेति रूपद्वयोपस्थितौ 'सरूपाणामेकशेष एकविभक्तौ' इत्यनेन
एकशेषे कृते प्रथमाया द्विवचने औ विभक्तौ 'वृद्धिरेचि' इति वृद्धि बाधित्वा 'प्रथ-
मयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवंणदीर्घे प्राप्ते तं प्रबाध्य 'नादिचि' सूत्रेण
पूर्वसवर्णदीर्घनिषेधो ततः 'वृद्धिरेचि' इति वृद्धौ रामौ सिद्धम् ।

रामाः—रामशब्दात् प्रातिपदिकसंज्ञायाम् बहुत्वविवक्षायां अनेकरामशब्दोप-
स्थितौ'सरूपाणामेकशेष एकविभक्तौ' इत्यनेन एकशेषे कृते प्रथमायाः बहुवचने जस्
प्रत्यये 'चुटू' इत्यनेन जकारस्येत्संज्ञायाम् लोपे 'विभक्तिश्च' इति सूत्रेण विभ-
क्तिसंज्ञायाम् सकारस्य 'हलन्त्यम्' इत्यनेन इत्संज्ञाप्राप्तौ 'न विभक्तौ तुस्माः'
इत्यनेन सकारस्येत्संज्ञानिषेधे राम + अस् इति स्थिते 'अकः सवर्णे दीर्घः' इति
दीर्घं बाधित्वा 'अतो गुणे' इति पररूपे प्राप्ते 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण
पूर्वसवर्णदीर्घे 'ससजुषो रुः' इति रुत्वे 'खरवसानयोर्विसर्जनीयः' इति विसर्गे रामाः
इति सिद्धम् ।

हे राम—राम शब्दात् प्रातिपदिकसंज्ञायाम् प्रथमाया एकवचने सुप्रत्यये
'एकवचने सम्बुद्धिः' इति सम्बुद्धिसंज्ञायाम् 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्'
इति सूत्रेण अङ्गसंज्ञायाम् 'एङ्ह्रस्वात्सम्बुद्धेः' इति सूत्रेण सुलोपे हे राम इति
सिद्धम् ।

रामम्—रामशब्दात् प्रातिपदिकसंज्ञायाम् द्वितीयैकवचने अम् प्रत्यये 'न
विभक्तौ तुस्माः' इति सूत्रेण मकारस्येत्संज्ञानिषेधे 'अकः सवर्णे दीर्घः' इति

सूत्रेण दीर्घे प्राप्ते तं प्रबाध्य 'अतो गुणे' पररूपे प्राप्ते 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य 'अमि पूर्वः' इति सूत्रेण पूर्वरूपे रामम् इति सिद्धम् ।

रामान् । ६१। रामशब्दात्प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् द्वितीया-बहुवचने शस् विभक्तौ राम + शस् इति स्थिते 'लशक्वतद्धिते' इति सूत्रेण शकारस्येत्संज्ञायाम् लोपे च कृते राम + अस् इति जाते 'अकः सवर्णे दीर्घः' प्राप्ते तं बाधित्वा 'अतो गुणे' इति पररूपे प्राप्ते तमपि प्रबाध्य 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे रामास् इति भूते 'तस्माच्छसो नः पुंसि' इति सूत्रेण सकारस्य स्थाने नकारे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे प्राप्ते 'पदान्तस्य' इत्यनेन णत्वनिषेधे रामान् इति सिद्धम् ।

रामेण—रामशब्दात् प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् तृतीयैकवचने टा प्रत्यये टकारस्य 'चुटू' इत्यनेन इत्संज्ञालोपे च कृते राम इत्यस्य अङ्गसंज्ञायाम् 'टाङसिङसामिनात्स्याः' इति सूत्रेण इनादेशे कृते 'आद्गुणः' इत्यनेन गुणे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे रामेण इति सिद्धम् ।

रामैः—रामशब्दात् प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् तृतीयाबहुवचने भिस्प्रत्यये राम + भिस् इति जाते 'अतो भिस ऐस्' इत्यनेन भिसः स्थाने ऐसादेशे कृते 'वृद्धिरेचि' इति वृद्धौ सकारस्य रुत्वे, विसर्गे च कृते रामैः इति सिद्धम् ।

स्थानिवदादेशोऽनल्विधौ (ई० ४५)—'आदेशः स्थानिवत् स्यात् न तु स्थान्यलाश्रयविधौ' इति वृत्तिः । येन विधीयमानेन अन्यत्प्रसक्तं निवर्तते स आदेशः, यस्य स्थाने अन्यद्विधीयते तत् स्थानि । स्थानिना तुल्यः स्थानिवत् । 'आदेशः, स्थानिना तुल्यो भवति, स्थानिधर्मको भवतीति यावत् । अलिति वर्ण पर्यायः विधीयत इति विधि'=कार्यम् । अलाश्रयो विधिः अल्विधिः । न अल्विधिः अनल्विधिः । 'अलाश्रयकार्ये कर्तव्ये स्थानिवन्न भवतीति' फलितार्थः । उदाहरणन्तु 'रामाय' इति । अत्र ङेर्यादेशे कृते स्थानिवद्भावेन सुप्त्वमादाय 'सुपि चे'ति दीर्घो भवति ।

रामाय (ई० ५१)—रामशब्दात् चतुर्थ्येकवचने ङेविभक्तौ 'ङेर्यः' इति ङेर्यादेशे 'राम य' इति स्थिते 'स्थानिवदादेशोऽनल्विधौ' इति स्थानिवद्भावेन सुप्त्वमादाय 'सुपि च' इति मकारोत्तरवर्तिनोऽकारस्य दीर्घे 'रामाय' इति सिद्धम् ।

रामेभ्यः (ई० ४८) रामशब्दात् भ्यसि 'बहुवचने झल्येत्' इति एत्वे सस्य रुत्वे विसर्गे 'रामेभ्यः' इति ।

रामाभ्याम् । रामशब्दात् प्रातिपदिकत्वाच्चतुर्थी द्विवचने भ्याम् विभक्तौ 'सुपि च' इति सूत्रेण दीर्घे रामाभ्याम् इति सिद्धम् ।

रामात् रामाद् । रामशब्दात् प्रातिपदिकसंज्ञायाम् प्रतिपदिकत्वात् ङसि प्रत्यये अनुबन्धलोपे 'टाङसिङसामिनात्स्याः' इति सूत्रेण असः स्थाने आत् इत्यादेशे 'अकः सवर्णे दीर्घ इति दीर्घे 'झलां जशोऽन्ते' इति तकारस्य जश्त्वेन दकारे 'वाऽवसाने' इति चर्त्वेन तकारे रामात् इति रूपम् । चर्त्वाभावपक्षे रामाद् इति सिद्धम् ।

रामस्य । रामशब्दात् प्रातिपदिकसंज्ञायाम् षष्ठ्येकवचने ङस् प्रत्यये 'लशक्वतद्धिते' इति सूत्रेण ङकारस्येत्संज्ञायां लोपे 'टाङसिङसामिनात्स्याः' इति सूत्रेण असः स्थाने स्यादेशे रामस्य इति सिद्धम् ।

रामयोः—रामशब्दात् प्रातिपदिकत्वेन ओसि 'ओसि च' इति इत्वे स्यादेशे रुत्वं विसर्गे सिद्धम् ।

रामाणाम् ।५०। रामशब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् षष्ठीबहुवचने आम् प्रत्यये राम आम् इति स्थिते 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमेऽनुबन्धलोपे 'नामि' इत्यनेन दीर्घे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे रामाणाम् इति सिद्धम् ।

रामेषु—रामशब्दात् प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् सप्तमी बहुवचने सुप् प्रत्ययेऽनुबन्धलोपे 'बहुवचने झल्येत्' इत्यनेन एत्वे कृते 'आदेश-प्रत्यययोः' इत्यनेन विवृताघोषप्रयत्नवतः सकारस्य स्थाने विवृताघोषप्रयत्नवति मूर्धन्यादेशे षकारे कृते रामेषु इति सिद्धम् ।

सर्वे—सर्व शब्दात् 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति प्रातिपदिकसंज्ञायाम् 'सर्वादीनि सर्वनामानि' इत्यनेन सर्वनामसंज्ञायाम् प्रथमा बहुबचने जस् प्रत्ययेऽनुबन्धलोपे पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य 'अनेकाल्शित्सर्वस्य' इति सूत्रसहकारेण 'जसःशी' इत्यनेन जसः स्थाने श्यादेशे अनुबन्धलोपे 'आद्गुणः' इति सूत्रेण गुणे सर्वे इति सिद्धन् ।

सर्वस्मै—सर्वशब्दात् प्रातिपदिकत्वेन ङे विभक्तौ सर्वनामसंज्ञायाम् 'सर्वनाम्नः स्मै इति स्मै' आदेशे सिद्धम् ।

सर्वस्मात्—सर्वशब्दात् प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायाम् च प्रातिपदिकत्वात् पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे 'टाङसिङसामिनात्स्याः' इति सूत्रेण प्राप्तं आत् आदेशं प्रबाध्य 'ङसिङ्योः स्मात्स्मिनौ' इति सूत्रेण स्मात् आदेशे 'झलां जशोऽन्ते' इति जश्त्वे कृते 'वाऽवसाने' इति वैकल्पिके चर्त्वे सर्वस्मात् इति । पक्षे चर्त्वाभावे सर्वस्माद् इति सिद्धम् ।

सर्वेषाम् ।६० । सर्वशब्दात् 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यनेन प्रातिपदिकसंज्ञायाम् 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनामसंज्ञायाम् प्रातिपदिकत्वात् षष्ठीबहुवचने आम् विभक्तौ 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमे प्राप्ते तं बाधित्वा 'आमि सर्वनाम्नः सुट्' इति सूत्रेण सुडागमे कृते अनुबन्धलोपे सर्व स्आम् इति जाते 'बहुवचने झल्येत्' इतिसूत्रेण एत्वे 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे च कृते सर्वेषाम् इति सिद्धम् ।

सर्वस्मिन्—सर्वशब्दात् प्रातिपदिकात् ङौ सर्वनामसंज्ञायां ङसिङ्योः स्मात्स्मिनौ' इति स्वमिन्नादेशे सिद्धम् ।

पूर्वे— (ई० ४४, ५१) पूर्वशब्दात् जसि 'पूर्वपरावरदक्षिणोत्तराधराणि व्यवस्थायामसंज्ञायाम्' इति वा सर्वनामसंज्ञायां 'जसः शी' इति जसः श्यादेशे 'आद्गुणः' इति गुणे 'पूर्वे इति । पक्षे पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे च 'पूर्वा' इति भवति ।

पूर्वस्मात्—पूर्वशब्दात् प्रातिपदिकसंज्ञायाम् 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वनामसंज्ञायाम् च प्रातिपदिकत्वात् पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे 'न विभक्तौ तुस्माः' इति सकारस्येत्संज्ञानिषेधे 'टाङसिङसामिनात्स्याः'

इति सूत्रेण आत् आदेशे प्राप्ते तं प्रबाध्य 'ङसिङ्योः स्मात्स्मिनौ' इत्यनेन स्मात् आदेशे कृते झलां जशोऽन्ते इति जश्त्वे 'वावसाने' इत्यनेन वैकल्पिकचर्त्वे पूर्वस्मात् इति रूपम् । चर्त्वाभावपक्षे पूर्वस्माद् इति । स्मादादेशाभावे पूर्व अस् इत्यवस्थायाम् 'टाङसिङसामिनात्स्याः'इत्यनेन आत् आदेशे जश्त्वे वैकल्पिके चर्त्वे पूर्वात् इति । पक्षे चर्त्वाभावे पूर्वाद् इति रूपचतुष्टयम् सिद्धम् ।

प्रथमे—प्रथमशब्दात् प्रातिपदिकसंज्ञायाम् प्रथमाबहुवचने जसि विभक्तौ अनुबन्धलोपे 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' इति सूत्रेण जसि वैकल्पिके सर्वनामसंज्ञायां ततः 'जशः शी' इत्यनेन जसः स्थाने श्यादेशेऽनुबन्धलोपे' 'आद्गुणः' इति सूत्रेण गुणे प्रथमे इति रूपम् । सर्वनामसंज्ञायाः अभावपक्षे प्रथम+अस् इत्यवस्थायाम् 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे सकारस्य रुत्वे विसर्गे च कृते प्रथमाः इति सिद्धम् ।

अतिसर्वाय (ई० ४१)–अतिक्रान्तः सर्वमतिसर्वः तस्मै अतिसर्वाय इति । अत्र 'अन्यविशेषणत्वेन स्वार्थोपस्थापकत्वमुपसर्जनत्वमि' त्युपसर्जनलक्षणसत्त्वेन सर्वशब्दस्य समासे उपसर्जनीभूतत्वात् 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इति निषेधात् सर्वनामसंज्ञाऽभावेन स्मायादेशाऽप्राप्त्या 'ङेर्यः' इति ङेर्यादेशे 'सुपि चे ति दीर्घे 'अतिसर्वाय' इति सिद्धम् ।

ननु प्रतिपदोक्तपरिभाषया अतिसर्वशब्दस्य कथं सर्वनामसंज्ञाप्राप्तिरिति चेन्न, एवं सति 'वर्णाश्रमेतराणाम्' इत्यादौ वर्णाश्रमेतरशब्दस्यापि सर्वनामत्वाऽभावादेव सुटोऽप्राप्त्या 'द्वन्द्वे चे' ति सूत्रं व्यर्थं स्यात्, तदेव व्यर्थीभूय ज्ञापयति 'तदन्तस्यापीयं संज्ञेति' दिक् ।

मासपूर्वाय (ई० ४६)—मासेन पूर्वाय इति विग्रहः । अत्र 'तृतीया समासे' इति सूत्रेण सर्वनामसंज्ञानिषेधात् स्मायादेशाऽप्राप्त्या 'ङेर्यः' इति ङेर्यादेशे 'सुपि चे'ति दीर्घे 'मासपूर्वाय' इति सिद्धम् ।

अत्रापि 'द्वन्द्वे चे'ति ज्ञापकात् तदन्तस्य (मासपूर्वशब्दस्य) सर्वनामसंज्ञा प्राप्तेत्यवसेयम् ।

वर्णाश्रमेतराणाम् । वर्णाश्रमेतरशब्दादमि 'द्वन्द्वे च' इति सर्वनामसंज्ञा

निषेधे सुटोऽभावेन नुटि नामीति दीर्घे णत्वे सिद्धम् ।

निर्जरसौ—निर्जरशब्दात् औविभक्तौ 'जराया जरसन्यतरस्याम्' इति जरसादेशे 'निर्जरसौ' इति । नच जराशब्दस्य विधीयमानो जरसादेशः निर्जरशब्दे कथमिति वाच्यम्, जरसादेशस्य अङ्गाधिकारस्थत्वेन 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति परिभाषया निर्जरशब्दस्याऽपि जरसादेशस्योचितत्वात् । नन्वेवमपि जराशब्दान्तस्य विधीयमानो जरसादेशः अनेकाल्त्वात् निर्जरशब्दस्य कृत्स्नस्यैव स्यादिति वाच्यम् 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषायाः जागरूकत्वात् । न चैवमपि निर्जरशब्दस्य जराशब्दान्तत्वं कथमिति वाच्यम्, 'एकदेशविकृतमनन्यवत्' इति परिभाषया अर्थात् 'छिन्ने पुच्छेऽपि श्वा श्वैव, नाचाश्वो न च गर्दभः' इति न्यायेन निर्जरशब्देऽपि जराशब्दान्तत्वस्य सुलभत्वात् । जरसादेशाभावपक्षे तु 'वृद्धिरेचि' इति वृद्धौ 'निर्जरौ' इति ।

निर्जरशब्दस्य रूपाणि (ई० ३५)

निर्जरः	निर्जसौ, निर्जररौ	नर्जरसः निर्जराः
निर्जरसम्, निर्जरम्	निर्जरसौ, निर्जरौ	निर्जरसः, निर्जरान्
निर्जरसा, निर्जरेण	निर्जराभ्याम्	निर्जरैः
निर्जरसे, निर्जराय	,,	निर्जरेभ्यः
निर्जरसः, निर्जरात्–द्	,,	,,
निर्जरसः, निर्जरस्य	निर्जरसोः, निर्जरयोः	निर्जरसाम्, निर्जराणाम्
निर्जरसि, निर्जरे	,, ,,	निर्जरेषु
हे निर्जर	हे निर्जरसौ, निर्जरौ	हे निर्जरसः, निर्जराः

पदः (ई० ४५)—पादशब्दाच्छसि 'पद्दन्नोमास–' इति पादशब्दस्य विभाषया पदादेशे तस्य रुत्वे विसर्गे 'पदः' इति । पक्षे पूर्वसवर्णदीर्घे 'तस्माच्छसो नः–' इति नत्वे पदान् इति ।

पदा (ई० ४२)—पादशब्दस्य तृतीयैकवचने टाविभक्तौ 'पद्दन्न–' इति पदादेशे पदा इति । पक्षे 'टाङसिङसाम्–' इति इनादेशे 'आद्गुण' इति गुणे 'पादेन इति ।

विश्वपः (ई० ४३, ५१, ५२)—विश्वपाशब्दात् द्वितीयाबहुवचने 'विश्वपा अस्' इति स्थिते 'स्वादिष्वि'ति सर्वनामस्थानभिन्नस्वादिषु परेषु पूर्वस्य विश्वपाशब्दस्य पदसंज्ञायां 'यचि भम्' इत्यनेन सर्वनामस्थानभिन्नयजादिषु स्वादिषु परेषु भसंज्ञायां च प्राप्तायां किमत्र विधेयम् इति शङ्कायाम् 'आकडारादेका संज्ञा' इत्यनेन एकैव संज्ञा भवतीति नियमात् परत्वादनवकाशत्वाच्च भसंज्ञायां सत्याम् 'आतो धातोः' इत्यनेन पूर्वसवर्णदीर्घं प्रबाध्य 'अलोन्त्य' परिभाषया पकारोत्तरवर्त्याकारस्य लोपे सस्य रुत्वे विसर्गे विश्वपः इति ।

बहुगणेति (ई० ४५)—बहुश्च, गणश्च, वतुश्च, डतिश्चेति समाहारद्वन्द्वः। एतत् संख्यासंज्ञं स्यादित्यर्थः। उदाहरणं यथा—बहुकः, गणकः, यावान् कति, इत्यादि। बहुगणशब्दाविह त्रित्वादिपरार्धान्तसंख्याव्यापककर्मविशेषवाचिनौ गृह्येते, नतु वैपुल्यसंघवाचिनौ, संख्यायतेऽनयेति अन्वर्थसंज्ञाविधानात्। वतुडती प्रत्ययौ संज्ञाविधावपि इह तदन्तग्रहणं, केवलयोः प्रयोगानर्हत्वात्।

हरिः—हरिशब्दात् प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् प्रथमाद्विवचने औ प्रत्यये 'प्रथमयोः पूर्वसवर्णः' इत्यनेन रेफोत्तरवर्तिनः इकारादकः प्रथमा सम्बन्धिनि औकारेऽचि परे दीर्घे ईकारे हरी इति सिद्धम्।

हे हरे—हरिशब्दात् प्रातिपदिकत्वात् सम्बोधनैकवचने सु प्रत्ययेऽनुबन्धलोपे 'एकवचनं सम्बुद्धिः' इति सूत्रेण सम्बुद्धिसंज्ञायाम् 'यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्' इत्यनेन अङ्गसंज्ञायाम् हे शब्दस्य प्राक्प्रयोगे 'ह्रस्वस्य गुणः' इत्यनेन गुणे 'एङ्ह्रस्वात् सम्बुद्धेः' इत्यनेन सम्बुद्धिसकारस्य लोपे हे हरे इति सिद्धम्।

हरिणा—हरिशब्दात् प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् तृतियैकवचने टाप्रत्ययेऽनुबन्धलोपे 'शेषो घ्यसखि' इति सूत्रेण घिसंज्ञायां 'आङो नाऽस्त्रियाम्' इत्यनेन टाइत्यस्य स्थाने ना आदेशे हरिना इति जाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे हरिणा इति सिद्धम्।

हरये—हरिशब्दात् प्रातिपदिकात् ङेविभक्तौ घित्वे घेर्ङिति इति गुणे अयादेशे सिद्धम्।

हरेः—हरिशब्दात् प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे 'घेर्ङिति' इति सूत्रेण गुणे कृते हरे+अस् इति स्थिते 'एचोऽयवायावः' इत्यनेन अवादेशे प्राप्ते तं प्रबाध्य 'ङसिङसोश्च' इत्यनेन रेफोत्तरवर्तिन एकाराद् ङसिप्रत्ययाकारे परे पूर्वपरयोः स्थाने पूर्वरूपे सकारस्य रुत्वे विसर्गे हरेः इति सिद्धम् ।

हरौ—हरिशब्दात् प्रातिपदिकसंज्ञायां प्रातिपदिकत्वात् सप्तम्येकवचने ङौ विभक्तौ अनुबन्धलोपे घिसंज्ञायाम् 'अच्च घेः' इत्यनेन ङेः स्थाने औकारादेशे घिसंज्ञकस्य च अकारादेशे हर+औ इति जाते 'वृद्धिरेचि' इत्यनेन वृद्धौ हरौ इति सिद्धम् ।

सखा ।६१। सखिशब्दात् प्रातिपदिकसंज्ञायाम् ततः प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे 'यस्मात् प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्' इत्यनेन अङ्गसंज्ञायां 'अनेकाल्शित्सर्वस्य' 'ङिच्च' इति सूत्रद्वयसहकारेण 'अनङ् सौ' इत्यनेन इकारस्य स्थाने अनङादेशेऽनुबन्धलोपे सखन्+स् इति स्थिते 'अलोन्त्यात्पूर्व उपधा' इत्यनेन सकारोत्तरवर्तिनः अकारस्य उपधासंज्ञायां 'सर्वनामस्थाने चासम्बुद्धौ' इत्यनेन दीर्घे सखान्+स् इति जाते 'अपृक्त एकाल्प्रत्ययः' इति सूत्रेण सकारस्य अपृक्तसंज्ञायां 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण सकारस्य लोपे 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नकारस्य लोपे कृते सखा इति सिद्धम् ।

सख्या—सखिशब्दात् प्रातिपदिकसंज्ञायाम् ततः तृतीयैकवचने टाविभक्तौ 'चुटू' इत्यनेन टकारस्येत्संज्ञायाम् 'तस्य लोपः' इति लोपे कृते 'इको यणचि' इति सूत्रेण इकारस्य स्थाने यकारे यणि कृते सख्या इति सिद्धम् ।

सख्युः ।६०। सखिशब्दात प्रातिपदिकसंज्ञायाम् प्रातिपदिकत्वात् षष्ठ्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे सखि+अस् इति स्थिते 'इको यणचि' इत्यनेन यणि सख्+य्+अस् इति जाते 'ख्यत्यात्परस्य' इति सूत्रेण विभक्तेरकारस्य उत्वे, सकारस्य रुत्वे विसर्गे कृते सख्युः इति सिद्धम् ।

सख्यौ ।५६। सखिशब्दात् प्रातिप्रदिकत्वात् सप्तम्येकवचने ङिप्रत्ययेऽनुबन्धलोपे 'औत्' इति सूत्रेण ङेरौत्वे 'इको यणचि' इति यणि सख्यौ इति सिद्धम् ।

पत्युः—पतिशब्दात् प्रातिपदिकत्वात् पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे यणि 'ख्यत्यात्परस्य' इत्यनेन विभक्तेः अकारस्य उत्वे सकारस्य रुत्वे विसर्गे पत्युः इति सिद्धम् ।

पत्यौ—पतिशब्दात् प्रातिपदिकसंज्ञायाम् ततः सप्तम्येकवचने ङिप्रत्ययेऽनुबन्धलोपे 'पतिःसमास एव' इति सूत्रनिर्देशेन घिसंज्ञाभावात् 'औत्' इत्यनेन ङेरौत्वे 'इको यणचि' इति सूत्रेण यणि पत्यौ इति सिद्धम् ।

कति—'कति शब्दो नित्यं बहुवचनान्तः । कति शब्दात् 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् जसि विभक्तौ अनुबन्धलोपे 'बहुगणवतुडति संख्या' इति सूत्रेण संख्यासंज्ञायां 'डति च' इत्यनेन षट् संज्ञायां ततः 'प्रत्ययस्य लुक्श्लुलुपः' इत्यनेन लुक् संज्ञायां 'षड्भ्यो लुक्' इत्यनेन जसो लुकि 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेण प्रत्ययलक्षणत्वात् 'जसि च' इत्यनेन गुणे प्राप्ते तं प्रबाध्य 'न लुमताङ्गस्य' इति सूत्रेण प्रत्ययलक्षणनिषेधात् गुणाभावे कृते कति इति सिद्धम् ।

कतीनाम्—कतिशब्दात् प्रातिपदिकसंज्ञायाम् ततः षष्ठीबहुवचने आम् प्रत्यये 'ह्रस्वनद्यापो नुट्' इति सूत्रसहकारेण 'षट् चतुर्भ्यश्च' इत्यनेन नुटि अनुबन्धलोपे 'नामि' इति सूत्रेण दीर्घे कतीनाम् इति सिद्धम् ।

त्रयः—त्रिशब्दो नित्यं बहुवचनान्तः । त्रिशब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचने जसि प्रत्ययेऽनुबन्धलोपे त्रि+अस् इति जाते 'जसि च' इति सूत्रेण गुणे 'एचोऽयवायावः' इत्ययादेशे सकारस्य रुत्वे विसर्गे च कृते त्रयः इति सिद्धम् ।

त्रयाणाम्—त्रिशब्दात् प्रातिप्रदिकसंज्ञायां प्रातिपदिकत्वात् षष्ठीबहुवचने आम् विभक्तौ 'त्रेस्त्रयः' इति सूत्रेण त्रिशब्दस्य स्थाने त्रयादेशे कृते 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमेऽनुबन्धलोपे 'नामि' इति दीर्घे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे संयोगे त्रयाणाम् इति सिद्धम् ।

प्रियत्रयाणाम् (ई० ४३)—प्रियत्रिशब्दादामि 'त्रेस्त्रयः' इति 'पदाङ्गाधिकारे' ति परिभाषया त्रिशब्दान्तस्यापि त्रयादेशे 'ह्रस्वनद्यापो नुट्' इति नुटि अनुबन्धलोपे 'नामि' इति दीर्घे 'अट्कुप्वाङ—' इति णत्वे उक्तं रूपं सिद्धम् । न च

'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति न्यायस्य जागरूकत्वेन त्रिशब्दस्यात्र अन्य पदार्थे विशेषणात् गौणत्वेन त्रयादेशः कथमिति वाच्यम्, गौणमुख्यन्यायस्य पद-कार्यविषयत्वात् ।

द्वौ—द्विशब्दात् प्रातिपदिकसंज्ञायां प्रथमा द्विवचने औ प्रत्यये 'त्यदादीनामः' इति सूत्रेण अत्वे 'वृद्धिरेचि' इति सूत्रेण वृद्धौ द्वौ इति सिद्धम् ।

पपी—पपीशब्दात् प्रातिपदिकात् ङौ अकः सवर्णे दीर्घः इति दीर्घे सिद्धम् ।

हे बहुश्रेयसि—बहुश्रेयसी शब्दात् प्रातिपदिकसंज्ञायां सम्बोधनस्य प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे (अस्य शब्दस्य पुंलिगत्वात्) 'प्रथमलिङ्गग्रहणं च' इति वार्तिकसहकारेण 'यूस्त्र्याख्यौ नदी' इत्यनेन नदीसंज्ञायां 'अम्बार्थनद्योः ह्रस्वः' इति सूत्रेण ह्रस्वे 'एङ्ह्रस्वात्सम्बुद्धेः' इति सूत्रेण सम्बुद्धिलोपे हे शब्दस्य प्राक्प्रयोगे हे बहुश्रेयसि इति सिद्धम् ।

बहुश्रेयस्याः—बहुश्रेयसीशब्दात् प्रातिपदिकसंज्ञायां पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे 'प्रथमलिङ्गग्रहणं च' इति वार्तिकेन नदीसंज्ञायाम् 'आण्नद्याः' इति सूत्रेण आडागमेऽनुबन्धलोपे 'आटश्च' इति सूत्रेण वृद्धौ 'इको यणचि' इत्यनेन यणि 'ससजुषो रुः' इत्यनेन सकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इत्यनेन रेफस्य विसर्गे बहुश्रेयस्याः इति सिद्धम् ।

बहुश्रेयसीनाम्—बहुश्रेयसीशब्दात् प्रातिपादिकत्वात् षष्ठीबहुचने आम् विभक्तौ 'प्रथमलिङ्गग्रहणं च' इति वार्तिकसहकारेण 'यूस्त्र्याख्यौ नदी' इत्यनेन नदीसंज्ञायां नद्यन्तत्वात् परत्वात् यणं बाधित्वा 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमेऽनुबन्धलोपे 'नामि' इत्यनेन दीर्घे बहुश्रेयसीनाम् इति सिद्धम् ।

बहुश्रेयस्याम् ।६१। बहुश्रेयसीशब्दात् प्रातिपदिकसंज्ञायां सप्तम्येकवचने ङिविभक्तौ अनुबन्धलोपे नदीसंज्ञायां 'ङेराम्नद्याम्नीभ्यः' इति सूत्रेण ङेःस्थाने आमि कृते 'ह्रस्वनद्यापोनुट्' इति सूत्रप्राप्तं नुटं बाधित्वा 'आण्नद्याः' इति सूत्रेण आडागमेऽनुबन्धलोपे 'आटश्च' इति वृद्धौ 'इको यणचि' इत्यनेन यणि संयोगे बहुश्रेयस्याम् इति सिद्धम् ।

प्रध्यम्—प्रधीशब्दात् प्रातिपदिकसंज्ञायां द्वितीयैकवचने अम् विभक्तौ

प्रधी+अम् इति स्थिते 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेन इयङादेशे प्राप्ते तं प्रबाध्य 'एरनेकाचोऽसंयोगपूर्वस्य' सूत्रेण यणि संयोगे प्रध्यम् इति सिद्धम् ।

प्रध्यि—प्रधीशब्दात् प्रातिपदिकसंज्ञायां सप्तम्येकवचने ङि विभक्तौ अनुबन्धलोपे 'इको यणचि' इत्यनेन यणि प्राप्ते तं बाधित्वा 'अचिश्नुधातुभ्रुवाँ य्वोरियङुवङौ' इत्यनेन इयङ् आदेशे प्राप्ते तं प्रबाध्य 'एरनेकाचोऽसंयोगपूर्वस्य' इति सूत्रेण यणि 'प्रध्यि' इति सिद्धम् ।

ग्रामण्याम्—ग्रामं नयति=नियच्छति, इति ग्रामणीः । ग्रामणीशब्दात् ङौ 'ङेराम्नद्याम्नीभ्यः' इति नीशब्दात् परस्य ङेरामि 'एरनेकाचोऽसंयोगपूर्वस्य इति यणि 'ग्रामण्याम्' इति ।

शुद्धधियौ—(ई० ४२) शुद्धा धीर्यस्येति विग्रहे निष्पन्नात् शुद्धधीशब्दात् ओविभक्तौ 'शुद्धधी औ' इति स्थिते 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इति वार्तिकेन शुद्धशब्दस्य गतिकारकेतरत्वात् तत्पूर्वकस्य धीशब्देकारस्य 'एरनेक–' इति प्राप्तयणो निषेधे 'अचि श्नुधातु–' इति इयङि 'शुद्धधियौ' इति । (शुद्धं ब्रह्म ध्यायतीतिविग्रहे तु कारकपूर्वकत्वात् स्यादनेन यण्—'शुद्धध्यौ' इत्यादि)

सुख्युः—सुखीशब्दात् प्रातिपदिकात् ङसि 'यणि ख्यत्यात् परस्य' इति ङसः उसि रुत्वे विसर्गे सिद्धम् । (एवं सुत्युः)

क्रोष्टा—क्रोष्टुशब्दात् प्रातिपदिकसंज्ञायां सौ प्रत्ययेऽनुबन्धलोपे 'तृज्वत्क्रोष्टुः इति सूत्रेण तृज्वद्भावे 'ऋतो ङि सर्वनामस्थानयोः' इति सूत्रेण गुणे प्राप्ते तं बाधित्वा 'ऋदुशनपुरुदंसोऽनेहसां च' इति सूत्रेण अनङि अनुबन्धलोपे कृते क्रोष्टन्+स् इति जाते 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् इति सूत्रेण दीर्घे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे 'नलोपः प्रातिपादिकान्तस्य' इति सूत्रेण नकारस्य लोपे क्रोष्टा इति सिद्धम् ।

क्रोष्टुः—क्रोष्टुशब्दात् प्रातिपदिकसंज्ञायां पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्धलोपे क्रोष्टु+अस् इति स्थिते 'विभाषा तृतीयादिष्वचि' इत्यनेन पाक्षिके

तृज्वद्भावे 'ऋत उत्' सूत्रेण उदेकादेशे रपरत्वे च कृते 'रात्सस्य' इत्यनेन सकारस्य लोपे रेफस्य विसर्गे क्रोष्टुः इति सिद्धम्। तृज्वद्भावाभावे 'घेर्ङिति' इत्यनेन गुणे 'ङसिङसोश्च' इत्यनेन पूर्वरूपे रुत्वे विसर्गे च कृते क्रोष्टोः इति सिद्धम्।

क्रोष्टूनाम्—क्रोष्टुशब्दात् प्रातिपदिकत्वादामि विभक्तौ 'ह्रस्वनद्यापो नुट्' इति नुटः परत्वात् 'विभाषा तृतीयादिष्वचि' इति तृज्वद्भावे प्राप्ते 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकबलात् नुटि अनुबन्धलोपे 'नामि' इति दीर्घे क्रोष्टूनाम् इति सिद्धम्।

अतिचम्वा—अतिचमू शब्दात् प्रातिपादिकसंज्ञायां षष्ठ्येकवचने ङसि विभक्तौ अनुबन्धलोपे 'आण्नद्याः' इत्यनेन आटि अनुबन्धलोपे 'आटश्च' इत्यनेन वृद्धौ 'इको यणचि' इति यणि सस्य रुत्वे विसर्गे च कृते अतिचम्वाः इति सिद्धम्।

खलप्वौ—खलपूशब्दात् प्रातिपदिकत्वेन औ विभक्तौ 'ओः सुपि' इति यणि सिद्धम्।

धातॄणाम्-(ई० ५२) धातृशब्दादामि 'ह्रस्वनद्यापो नुट्' इति नुटि 'नामि' इति दीर्घे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वं धातॄणाम् इति।

नप्त्रादिग्रहणं नियमार्थम्—ननु 'अप्तृन्तृच्' इत्यादि सूत्रे तृनन्तत्वात् तृजन्तत्वाच्च सर्वत्र दीर्घे सिद्धे सूत्रे नप्त्रादिग्रहणं व्यर्थमिति चेन्न; शास्त्रे पक्षद्वयम् व्युत्पत्तिपक्षः अव्युत्पत्तिपक्षश्च। तत्र व्युत्पत्तिपक्षे नप्त्रादिग्रहणं व्यर्थं सत् नियमार्थ-यत् उणादिप्रत्ययनिष्पन्नानां तृन्तृजन्तानाम् चेद् भवति दीर्घस्तर्हि नप्त्रादीनामेव इति, तेन पितृभ्रातृप्रभृतीनां दीर्घो न भवति।

पितरौ—पितृशब्दादौ विभक्तौ 'ऋतो ङिसर्वनामस्थानयोः' इति गुणे रपरत्वे च कृते पितरौ इति। अत्र व्युत्पत्तिपक्षे नप्त्रादिग्रहणस्य नियमार्थत्वात् 'अप्तृन्निति' दीर्घो न। अव्युत्पत्तिपक्षे तु—तृन्तृजादिष्वनन्तर्भावात् दीर्घशङ्कैव नोदेतीति।

पितॄणाम्—पितृ शब्दात् प्रातिपदिकसंज्ञायां षष्ठीबहुवचने आमि प्रत्यये 'ह्रस्वनद्यापो नुट्' इत्यनेन नुडागमेऽनुबन्धलोपे 'नामि' इति दीर्घे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन णत्वे पितॄणाम् इति सिद्धम् ।

नृणाम्—नृशब्दादामि 'ह्रस्वनद्यापो नुट्' इति नुटि अनुबन्धलोपे 'नृ नाम्' इति स्थिते 'नामि' इति सूत्रं प्रबाध्य 'नृ च' इति विभाषया दीर्घे 'ऋवर्णान्नस्ये' ति णत्वे नॄणाम् इति । पक्षे नृणाम् इति । अत्र 'नामी' ति दीर्घस्तु न 'सकृद्गतौ यद्बाधितं तद्बाधितमेवे' ति न्यायस्य जागरूकत्वात् ।

गौः (ई० ४५)—गो शब्दात् सौ 'गोतो णित्' इति ओकारात्परस्य सर्वनामस्थानस्य सु इत्यस्य णिद्वद्भावे 'अचोऽञ्णिति' इति वृद्धौ सस्य रुत्वे विसर्गे गौः इति सिद्धम् ।

गाः(ई० ४२)—गोशब्दात् शसि अनुबन्धलोपे 'औतोऽम्शसोः' इति गोशब्दस्य ओकारस्य विभक्तेरकारस्य च आकारैकादेशे सस्य रुत्वे विसर्गे 'गाः' इति सिद्धम् ।

गाम् । ६४ । गो शब्दात् प्रातिपदिकसंज्ञायां द्वितीयैकवचने अम् प्रत्यये 'गोतो णित्' इति सूत्रेण णिद्वद्भावे 'अचोञ्णिति' इत्यनेन वृद्धौ प्राप्ते तं प्रबाध्य 'औतोऽम्शसोः' इति सूत्रेण ओकारस्य स्थाने आकार एकादेशे कृते गाम् इति सिद्धम् ।

राः (ई० ४९)—रैशब्दात् सौ विभक्तौ 'रायो हलि' इति रैशब्दस्य ऐकारस्य आकारादेशे सस्य रुत्वे विसर्गे 'राः' इति निष्पन्नम् ।

राभ्याम्—रैशब्दात् प्रातिपदिकत्वात् भ्यामि विभक्तौ 'रायो हलि' इति आत्वे राभ्यामिति सिद्धम् ।

अथाजन्तस्त्रीलिंगप्रकरणम्

रमे—रमा शब्दात् प्रतिपादिकसंज्ञायां प्रथमाद्विवचने औ प्रत्यये 'औङ आपः' इतिसूत्रेण ओ इत्यस्य स्थाने श्यादेशेऽनुबन्धलोपे 'आद्गुणः' इति सूत्रेण गुणे रमे इतिसिद्धम् ।

रमया—रमाशब्दात् प्रातिपदिकत्वेन टाविभक्तौ 'आङि चापः इति एत्वे अयादेशे सिद्धम् ।

रमायै—रमाशब्दात् प्रातिपदिकत्वेन ङेविभक्तौ 'याडापः' इति याटि 'वृद्धिरेचि' इति वृद्धौ सिद्धम् ।

रमायाः—रमाशब्दात् प्रतिपदिकसंज्ञायां पञ्चम्यैकवचने ङसि विभक्तौ, अनुबन्धलोपे रमा + अस् इति जाते 'याडापः' इति सूत्रेण याडागमेऽनुबन्धलोपे 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे सकारस्य रुत्वे विसर्गे कृते रमायाः इति सिद्धम् ।

रमायाम्—रमाशब्दात् प्रातिपदिकसंज्ञायां सम्तम्यैकवचने ङि विभक्तौ अनुबन्धलोपे 'ङेराम्नद्याम्नीभ्यः' इति सूत्रेण ङेरामि कृते 'याडापः' इति सूत्रेण याडागमेऽनुबन्धलोपे सवर्णदीर्घे च कृते रमायाम् इति सिद्धम् ।

सर्वस्यै—सर्वाशब्दात् प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायां च प्रातिपदिकत्वात् चतुर्थ्येकवचने ङे विभक्तौ अनुबन्धलोपे 'याडापः' इति सूत्रेण याडागमे प्राप्ते तं प्रबाध्य 'सर्वनाम्नः स्याड्ह्रस्वश्च' इति स्याडागमेऽनुबन्धलोपे अकारस्य ह्रस्वे च कृते 'वृद्धिरेचि' इत्यनेन वृद्धौ सर्वस्यै इति सिद्धम् ।

सर्वस्याः–सर्वाशब्दात् प्रातिपदिकसंज्ञायाम् सर्वनामसंज्ञायां च कृतायां प्रातिपदिकत्वात् ङसि प्रत्ययेऽनुबन्धलोपे 'याडापः' इति सूत्रेण याडागमे प्राप्ते तं प्रबाध्य 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति सूत्रेण स्याडागमेऽनुबन्धलोपे आपो ह्रस्वे च कृते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे सकारस्य रुत्वे विसर्गे च कृते सर्वस्याः इति सिद्धम् ।

सर्वस्याम्—सर्वाशब्दात् प्रातिपदिकसंज्ञायां सर्वनामसंज्ञायां च कृते ततः सप्तम्येकवचने ङि प्रत्ययेऽनुबन्धलोपे 'ङेराम्नद्याम्नीभ्यः' इत्यनेन ङेरामि कृते सर्वनाम्नः स्याड्ढ्रस्वश्च' इत्यनेन स्याडागमेऽनुबन्धलोपे आपे ह्रस्वे सवर्णदीर्घे च कृते सर्वस्याम् इति सिद्धम् ।

उत्तरपूर्वस्यै—उत्तरस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालमिति विग्रहे 'दिङ्नामान्यन्तराले' इति समासनिष्पन्नात् उत्तरपूर्वाशब्दात् ङेविभक्तौ 'विभाषा दिक्समासे बहुव्रीहौ' इति विभाषया सर्वनामसंज्ञायां 'सर्वनाम्नः स्याड्'—इति ह्रस्वे 'वृद्धिरेचि' इति वृद्धौ 'उत्तरपूर्वस्यै' इति। पक्षे सर्वनामसंज्ञाऽभावे 'याडापः' इति याटि वृद्धौ उत्तरपूर्वायै इति।

उत्तरपूर्वायै—(ई० ४५) 'विभाषा दिक्समासे बहुव्रीहौ' इति सूत्रेण लक्षणप्रतिपदोक्तपरिभाषया 'दिङ्नामान्यन्तराले' इति दिक्छब्दमुच्चार्य निष्पन्नप्रतिपदोक्तदिक्समास एव सर्वनामसंज्ञाविधानात् योत्तरा सा पूर्वा यस्याः उन्मुग्धायाः इति विग्रहे 'अनेकमन्यपदार्थे' इति बहुव्रीहिसमासनिष्पन्नात् उत्तरपूर्वाशब्दात् ङे विभक्तौ 'याडापः' इति याटि 'वृद्धिरेचि' इति वृद्धौ उत्तरपूर्वायै इति।

हे अम्ब (ई० ४०)—अम्बाशब्दाद् सम्बोधनविवक्षाया सौ 'अम्बार्थनद्योः ह्रस्वः' इति ह्रस्वत्वे सुलोपे हे अम्ब इति।

ङिति ह्रस्वश्च—अत्र सूत्रे ङिति इत्येकं वाक्यम्। इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ङिति नदीसंज्ञौ वा स्तः इति तस्यार्थः। 'ह्रस्वश्च' इत्यपरं वाक्यम्। ह्रस्वौ इवर्णोवर्णौ ङिति स्त्रियां नदीसंज्ञौ वा स्तः इति तस्यार्थः। अत्र 'नेयङुवङ्स्थानावस्त्री' इत्यतोऽनुवृत्तम् अस्त्रीति तु इयङुवङ्स्थानावित्यादि प्रथमवाक्यविहितनदीत्वस्यैव पर्युदासः, न तु ह्रस्वावित्यादिद्वितीयवाक्यविहितनदीत्वस्यापि, तत्सम्बद्धस्यैवानुवृत्तेरिति दिक्।

मत्यै—(ई० ५२)—मतिशब्दात् ङेविभक्तौ अनुबन्धलोपे 'मति ए' इति जाते 'ङिति ह्रस्वश्च' इति नदीसंज्ञायाम् 'आण्नद्याः' इत्यादि 'आटश्च' इति वृद्धौ 'इकोयणचि' इति यणि मत्यै इति। नदीत्वाभावे 'शेषो घ्यसखि' इति घिसंज्ञायां 'घेर्ङिति इति गुणे 'एचोऽयवायावः' इत्ययादेशे मतये इति सिद्धम्।

जरसौ—जरा—शब्दात् प्रातिपदिकसंज्ञायां प्रथमाद्विवचने औ विभक्तौ 'जराया जरसन्यतरस्याम्' इत्यनेन वैकल्पिके जरास्थाने जरसादेशे कृते जरसौ इति रूपम्। जरसादेशाभावपक्षे तु 'औङ-आपः' इति सूत्रेण औ इत्यस्य

आयादेशे कृते अनुबन्धलोपे 'आद्गुणः' इति गुणे जरे इति सिद्धम् ।

जरसः—जराशब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ अनुबन्धलोपे 'जरायाः जरसन्यतरस्याम्' इत्यनेन वैकल्पिके जरास्थाने जरसादेशे कृते जरस्+अस् इति जाते संयोगे सकारस्य रुत्वे विसर्गे च कृते जरसः इति रूपम् । पक्षे जरा–अस् इत्यवस्थायां 'याडापः' इत्यनेन याडागमेऽनुबन्धलोपे सवर्णदीर्घे सकारस्य रुत्वे विसर्गे च जरायाः इति सिद्धम् ।

मत्याम्, मतौ—। ६० । मतिशब्दात् प्रातिपदिकसंज्ञायां ङिप्रत्ययेऽनुबन्ध लोपे 'ङिति ह्रस्वश्च' इति सूत्रेण वैकल्पिकनदीसंज्ञायां 'ङेराम्नद्याम्नीभ्यः' इत्यनेन ङेरामि प्राप्ते तं प्रबाध्य 'औत्' इति सूत्रेण ङः औत्वे प्राप्ते तं बाधित्वा 'इदुद्भ्याम्' इत्यनेन ङेरामि कृते 'आण्नद्याः' इति सूत्रेण आडागमेऽनुबन्धलोपे 'आटश्च' इति वृद्धौ यणि च कृते मत्याम् इति रूपम् । नदीसंज्ञाभावपक्षे—'शेषो घ्यसखि' इत्यनेन घि संज्ञायां 'घेर्ङिति' इति गुणं बाधित्वा 'अच्च घेः' इति सूत्रेण ङेरौत्वे इकारस्य अकारे कृते मत+औ इति जाते वृद्धौ मतौ इति सिद्धम् ।

तिस्रः—त्रिशब्दात् प्रातिपदिकसंज्ञायां जसि प्रत्ययेऽनुबन्धलोपे 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति सूत्रेण त्रिशब्दस्य स्थाने तिस्रादेशे तिसृ–अस् इति स्थिते 'इको यणचि' इत्यनेन यणि प्राप्ते तं बाधित्वा 'ऋतो ङि सर्वनामस्थानयोः' इत्यनेन गुणे प्राप्ते तं प्रबाध्य 'अचि र ऋतः' इत्यनेन ऋकारस्य रेफादेशे रुत्वे विसर्गे च कृते तिस्रः इति सिद्धम् । शसि विभक्तौ तु पूर्वसवर्णदीर्घं बाधित्वा रेफादेशो भवति इति ।

तिसृणाम्—। ६४ । त्रिशब्दात् प्रातिपदिकसंज्ञायां आमि विभक्तौ 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इत्यनेन तिस्रादेशे तिसृ—आम् इति जाते 'ह्रस्वनद्यापो नुट्' इत्यनेन नुडागमे प्राप्ते तं बाधित्वा 'अचि र ऋतः' इति सूत्रेण ऋकारस्य रेफादेशे प्राप्ते 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकेन रेफादेशं बाधित्वा नुडागमेऽनुबन्धलोपे 'नामि' इत्यनेन दीर्घे प्राप्ते त प्रबाध्य 'न तिसृचतसृ' इति सूत्रेण निषेधे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति

वार्तिकेन नकारस्य णत्वे तिसृणाम् इति सिद्धम् ।

त्रिशब्दस्य रूपाणि (ई० ३७)

(त्रिशब्दो नित्यं बहुवचनान्तः)

पुंसि	स्त्रियाम्	नपुंसके
त्रयः	तिस्रः	त्रीणि
त्रीन्	तिस्रः	त्रीणि
त्रिभिः	तिसृभिः	त्रिभिः
त्रिभ्यः	तिसृभ्यः	त्रिभ्यः
त्रिभ्यः	तिसृभ्यः	त्रिभ्यः
त्रयाणाम्	तिसृणाम्	त्रयाणाम्
त्रिषु	तिसृषु	त्रिषु
हे त्रयः	हे तिस्रः	हे त्रीणि

स्त्रीः (ई० ४३, ४४)—स्त्रीशब्दात् शसि 'स्त्री-अस्' इति स्थिते 'वाऽम्-शसोः' इति इयङि सस्य रुत्वे विसर्गे 'स्त्रियः' इति । पक्षे पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे 'स्त्रीः' इति रूपं सिद्धम् ।

स्त्रियम्— स्त्रीशब्दात् प्रातिपदिकसंज्ञायां अम् विभक्तौ 'वाम्शसोः' इति सूत्रेण वैकल्पिके इयङादेशेऽनुबन्धलोपे संयोगे स्त्रियम् इति रूपम् । इयङादेशा-भावपक्षे तु स्त्री + अम् इत्यवस्थायां 'अमि पूर्वः' इत्यनेन पूर्वरूपे स्त्रीम् इति रूपद्वयं सिद्धम् ।

स्त्रियै—स्त्रीशब्दात् प्रातिपदिकसंज्ञायां ङे विभक्तौ अनुबन्धलोपे 'यूस्त्र्याख्यौ नदी' इत्यनेन नदीसंज्ञायां 'आण्नद्याः' इति सूत्रेण आडागमेऽनुबन्धलोपे कृते 'आटश्चे' ति वृद्धौ 'स्त्रियाः' इति सूत्रेण इयङादेशे अनुबन्धलोपे च कृते पक्षे स्त्रियै इति सिद्धम् ।

स्त्रीणाम्—स्त्रीशब्दात् प्रातिपदिकसंज्ञायां आम् विभक्तौ 'यूस्त्र्याख्यौ नदी' इति सूत्रेण नदीसंज्ञायां 'स्त्रियाः' इति सूत्रेण इयङ्प्राप्ते तं बाधित्वा परत्वात् ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमेऽनुबन्धलोपे नकारस्य 'अट्कुप्वा-

ङ्नुम्व्यवायेऽपि' इत्यनेन णत्वे स्त्रीणाम् इति सिद्धम् ।

श्रियै—श्रीशब्दात् प्रातिपदिकसंज्ञायां ङे विभक्तौ अनुबन्धलोपे 'ङितिह्रस्वश्च' इत्यनेन वैकल्पिके नदीसंज्ञायां 'आण्नद्याः' इत्यनेन आडागमेऽनुबन्धलोपे 'आटश्च' इत्यनेन वृद्धौ श्री—ऐ इति स्थिते 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण इकारस्य इयङादेशेऽनुबन्धलोपे संयोगे श्रियै इति रूपम् । नदीसंज्ञाभावपक्षे इयङि अनुबन्धलोपे संयोगे श्रिये इति सिद्धम् ।

श्रीणाम्—श्रीशब्दात् प्रातिपदिकसंज्ञायां षष्ठीबहुवचने आमि विभक्तौ 'वामि' इत्यनेन वैकल्पिके नदीसंज्ञायाम् 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमेऽनुबन्धलोपे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे श्रीणाम् इति रूपम् । नदीसंज्ञाभावपक्षे–'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ इत्यनेन इयङि श्रियाम् इति सिद्धम् ।

श्रियाम्—श्रीशब्दात् प्रातिपदिकसंज्ञायां सप्तम्येकवचने ङि प्रत्ययेऽनुबन्धलोपे 'ङिति ह्रस्वश्च' इति सूत्रेण वैकल्पिकनदीसंज्ञायां 'ङेराम्नद्याम्नीभ्यः' इत्यनेन ङेरामि आडागमे 'आटश्च' इति वृद्धौ 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङि श्रियाम् इति रूपम् । पक्षे नदीसंज्ञाभावे इयङि अनुबन्धलोपे श्रियि सिद्धम् ।

हे श्रीः—श्रीशब्दाद् प्रातिपदिकसंज्ञायां प्रथमासम्बोधने सुप्रत्ययेऽनुबन्धलोपे सकारस्य रुत्वे विसर्गे हे शब्दस्य प्राक्प्रयोगे हे श्रीः इति सिद्धम् ।

स्वसा—। ६५ । स्वसृशब्दात् प्रातिपदिकसंज्ञायां 'ऋन्नेभ्यो ङीप्' इति सूत्रेण ङीप् प्राप्ते 'न षट्स्वस्रादिभ्यः' इत्यनेन निषेधे ततः सु प्रत्ययेऽनुबन्धलोपे 'ऋदुशनपुरुदंसोऽनेहसां च इत्यनेन ऋकारस्य स्थाने अनङादेशेऽनुबन्धलोपे 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्' इत्यनेन दीर्घे 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे स्वसा इति सिद्धम् ।

स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।
याता मातेति सप्तैते स्वस्रादय उदाहृताः ।

भ्रुवाम्—भ्रूशब्दात् प्रातिपदिकसंज्ञायाम् विभक्तौ अनुबन्धलोपे 'ङिति-

ह्रस्वश्च' इति वैकल्पिकनदीसंज्ञायां 'ङेराम्नद्याम्नीभ्यः'इत्यनेन ङेरामि 'आण्नद्याः' इत्याडागमेऽनुबन्धलोपे 'आट्श्च' इति वृद्धौ 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेनोवङि अनुबन्धलोपे च कृते भ्रुवाम् इति रूपम् । नदीसंज्ञाभावपक्षे उवङि कृते भ्रुवि इति रूपद्वयं सिद्धम् ।

॥ इति अजन्तस्त्रीलिंगप्रकरणम् ॥

अथाजन्तनपुंसकलिङ्गप्रकरणम्

ज्ञाने—ज्ञानशब्दात् प्रातिपदिकत्वादौ प्रत्यये 'नपुंसकाच्च' इति श्यादेशे ज्ञानेत्यस्य 'यचि भमि'ति भत्वे 'यस्येति चे' त्यकारलोपे प्राप्ते 'औङः श्यां प्रतिषेधो वाच्यः' इति निषेधे आद्गुणे ज्ञाने इति सिद्धम् ।

ज्ञानानि । ६१ । ज्ञानशब्दात् प्रातिपदिकसंज्ञायां प्रथमाबहुवचने जसि प्रत्ययेऽनुबन्धलोपे 'जश्शसोः शि' इत्यनेन जसः स्थाने श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सूत्रेण सर्वनामस्थासंज्ञायाम् 'मिदचोऽन्त्यात्परः' इति सूत्र-सहकारेण 'नपुंसकस्य झलचः' इत्यनेन अन्तावयवे नुमागमेऽनुबन्धलोपे ज्ञान+न+इ इति स्थिते ततः 'सर्वनामस्थाने चाऽसम्बुद्धौ' इत्यनेनोपधादीर्घे च कृते ज्ञानानि इति सिद्धम् ।

कतरद्, कतरत्—कतर् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्यये सोरमादेशे प्राप्ते तं बाधित्वा 'अद्ड्डतरादिभ्यः पञ्चभ्यः' इत्यनेन सोःस्थाने अदडादेशेऽनुबन्धलोपे 'कतर्+अद' इति जाते 'यचि भम्' इति सूत्रेण भसंज्ञायाम् भत्वात् 'टेः' इत्यनेन टिलोपे ततः प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घाभावे 'वाऽवसाने' इत्यनेन वैकल्पिके दकारस्य चर्त्वेन तकारे कतरत् इति रूपम् । चर्त्वाभावपक्षे कतरद् इति सिद्धम् ।

एकतरम्—एकतरशब्दात् सौ तस्य लोपे तं प्रबाध्य अमादेशे प्राप्ते तं प्रबाध्य 'अदड्डरादिभ्यः पञ्चभ्यः' सोरद्डादेशे प्राप्ते 'एकतरात् प्रतिषेधो वक्तव्यः' इति वार्तिकेन निषेधे 'अतोऽम्' इति सोरमादेशे 'अमि पूर्वः' इति

पूर्वरूपे एकतरम् इति सिद्धम् ।

श्रीपम्—।५७। श्रीपाशब्दात् प्रातिपदिकसंज्ञायां 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्वे ततः प्रथमैकवचने सु प्रत्ययेऽनुबन्धलोपे 'अतोऽम्' इति सोरमादेशे कृते 'अमि पूर्वः' इति पूर्वरूपे श्रीपम् इति सिद्धम् ।

श्रीपाय (ई० ५२)–श्रीपाशब्दात् ङेविभक्तौ 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वे 'ङेर्यः' इति ङेर्यादेशे 'सुपि च' इति दीर्घे 'श्रीपाय' इति सिद्धम् ।

हे वारे (ई० ५२, ५३)—वारिशब्दात् सम्बोधनैकवचने सौ 'स्वमोर्नपुंसकात्' इति सोर्लुकि 'न लुमताङ्गस्य' इत्यस्यानित्यत्वपक्षे 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति प्रत्ययलक्षणेन 'ह्रस्वस्य गुणः' इति सम्बुद्धिनिमित्तके गुणे हे वारे इति । 'न लुमते' त्यस्य नित्यत्वपक्षे तु 'हे वारि' इति । अत एव 'हे त्रपो—हे त्रपु' इति भाष्योदाहरणं सङ्गच्छते ।

'न लुमते' त्यस्याऽनित्यत्वे किं मानम् ? इति चेच्छृणु—'इकोऽचि विभक्तौ' इत्यत्र अज्ग्रहणं किमर्थम्, हलादिषु भ्यामादिषु हि सत्यपि नुमि 'नलोपः प्रातिपदिकान्तस्ये' ति नस्य लोपसम्भवात् । न च सम्बुद्धिव्यावृत्त्यर्थमज्ग्रहणम्, अन्यथा तत्र नुमि 'न ङिसम्बुद्धयोः' इति निषेधे सति नकारश्रवणप्रसंग इति वाच्यम्, सम्बुद्धेर्लुका लुप्ततया प्रत्ययलक्षणेन प्राप्तं नुमं वारयितुम् अज्ग्रहणं सफलमित्यज्ग्रहणं 'न लुमते' त्यस्यानित्यत्वे लिङ्गमिति तत्त्वविदः ।

वारिणे—। ६३ । वारिशब्दात् प्रातिपदिकसंज्ञायां ङेविभक्तौ अनुबन्धलोपे वारि+ए इति स्थिते 'शेषो घ्यसखि' इत्यनेन घिसंज्ञायां 'इकोऽचि विभक्तौ' इति सूत्रेण नुमं बाधित्वा परत्वात् 'घेर्ङिति' इत्यनेन गुणे प्राप्ते वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन' इति वार्तिकेन नुमागमेऽनुबन्धलोपे नकारस्य 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन णत्वे वारिणे इति सिद्धम् ।

वारीणाम्—वारि शब्दात् प्रातिपदिकसंज्ञायां आम् विभक्तौ परत्वात् 'ह्रस्वनद्यापो नुट्' इत्यनेन नुडागमे प्राप्ते पूर्वविप्रतिषेधात् तृज्वद्भावं बाधित्वा 'इकोऽचि विभक्तौ' इति सूत्रेण नुमः प्राप्तौ 'नुमचिरतृज्वद्भावगुणेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकेन नुडागमेऽनुबन्धलोपे च वारि + नाम् इति जाते

'नामि' इति सूत्रेण दीर्घे नकारस्य णत्वे च कृते वारीणाम् इति सिद्धम् ।

दध्ना । ६४ । दधिशब्दात प्रातिपदिकसंज्ञायां टा विभक्तौ अनुबन्धलोपे दधि + आ इति स्थिते 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इत्यनेन अनङादेशेऽनुबन्धलोपे 'अल्लोपोऽनः' इति अनोऽकारस्य लोपे दध्ना इति सिद्धम् ।

दध्ने—दधिशब्दात् प्रातिपदिकसंज्ञायां ङे विभक्तौ अनुबन्धलोपे दधि+ए इति जाते 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इत्यनेन अनङादेशे अनुबन्धलोपे दधन्+ए इति स्थिते 'अल्लोपोऽनः' इत्यनेन अनोऽकारस्य लोपे दध्ने इति सिद्धम् ।

दध्नः—।६५। दधिशब्दात् प्रातिपदिकसंज्ञायां ङसि प्रत्ययेऽनुबन्धलोपे दधि + अस् इति जाते 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इत्यनेन अनङादेशे 'अल्लोपोऽनः' इत्यनेन अनोऽकारस्य लोपे सकारस्य रुत्वे विसर्गे दध्नः इति सिद्धम् ।

दधनि—दधिशब्दात् प्रातिपदिकसंज्ञायाम् सप्तम्येकवचने ङिविभक्तौ अनुबन्धलोपे अनङादेशे च कृते 'विभाषाङिश्योः' इति सूत्रेण वैकल्पिके अकारस्य लोपे दध्नि इति रूपम् । पक्षे अल्लोपाभावे दधनि इति सिद्धम् ।

अनादये (ई० ४६)—न आदिः + अनादिः, तस्मै 'अनादये–अनादिने' इति अनादिशब्दात् ङविभक्तौ 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति विभाषया पुंवत्त्वे सति 'इकोऽचि विभक्तौ' इति नुमोऽप्रवृत्तेः 'शेषो घ्यसखि' इति घिसंज्ञायां 'घेर्ङिति' इति गुणे अयादेशे 'अनादये' इति । पुंवत्त्वाऽभावपक्षे नुमि 'अनादिने' इति ।

अनादिशब्दस्य कथं भाषितपुंस्कत्वमिति चेच्छृणु—भाषितः पुमान् येन प्रवृत्तिनिमित्तेन तत् भाषितपुंस्कम् । अर्थात् नपुंसकत्वे लिङ्गान्तरे च यस्य एकमेव वाच्यतावच्छेदकं तत् शब्दस्वरूपं भाषितपुंस्कशब्देन विवक्षितम् । अनादिशब्दश्च उत्पत्त्यभावात्मकमनादित्वं पुरस्कृत्य स्त्रीपुन्नपुंसकतत्तद्व्यक्तिप्रत्यायक इति भवति तस्य प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कतेति तत्त्वविदः । उक्तं च मूले—

यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्तते ।
क्लीबवृत्ति तदेव स्यादुक्तपुंस्कं तदुच्यते ॥ इति ॥

शब्दः पुंस्त्वे यमर्थं भजते, यच्च शब्दस्वरूपं भजते, तमेवार्थं प्रधानीकृत्य शब्दस्वरूपमपि पुंवदेव भवेच्चेत् स शब्दः भाषितपुंस्कसंज्ञां लभते इति तात्पर्यार्थः ।

पीलुने (इ० ४०)–पीलुवृक्षः, तत्फलं पीलु, तस्मै 'पीलुने' इति । 'इकोऽचि विभक्तौ' इति नुम् । अत्र 'तृतीयादिष्वि' ति न पुंवत्, प्रवृत्तिनिमित्तभेदात् । तथा हि–वृक्षत्वव्याप्यजातिविशेषात्मकं पीलुत्वं वृक्षविशेषे वाच्ये प्रवृत्तिनिमित्तम् फलविशेषे वाच्ये तु फलत्वव्याप्यजातिविशेषात्मकं पीलुत्वं प्रवृत्तिनिमित्तम्, इति प्रवृत्तिनिमित्तभेदेन भाषितपुंस्कत्वाभावान्न पुंवदित्युक्तिः सङ्गतेति । तदुक्तं मूले—

'पीलुर्वृक्षः फलं पीलु (तस्मै) पीलुने न तु पीलवे ।
वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुनः' ॥ इति ॥

सुधिया—सुधीशब्दात् प्रातिपदिकसंज्ञायां टाविभक्तौ अनुबन्धलोपे 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति सूत्रेण वैकल्पिकपुंवद्भावेन ह्रस्वनुमोरभावे'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ'इत्यमेन इयङि अनुबन्धलोपे संयोगे सुधिया इति रूपम् । पुंवद्भावाऽभावपक्षे 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्वे 'इकोऽचि विभक्तौ' इति सूत्रेण नुमि उमि च गते सुधिना इति सिद्धम् ।

हे मधु–मधुशब्दात् प्रातिपदिकसंज्ञायां सम्बोधनैकवचने सुप्रत्यये अनुबन्धलोपे स्वमोर्नपुंसकात्' इति सूत्रेण सोर्लुकि 'न लुमताङ्गस्य' अनित्यत्वात् 'प्रत्ययलोपे प्रत्ययलक्षणम्' इत्यनेन प्रत्ययलक्षणेन पाक्षिके 'ह्रस्वस्य गुणः' इति सूत्रेण गुणे हे मधो इति रूपम् । गुणाभावपक्षे हे मधु इति सिद्धम् ।

हे धातः—धातृशब्दात् सम्बोधने सौ तस्य लुकि 'न लुमताङ्गस्य' इत्यस्य अनित्यत्वपक्षे प्रत्ययलक्षणेन 'ह्रस्वस्य गुणः' इति गुणे परे विसर्गे हे धातः इति । 'न लुमताङ्गस्य' इत्यस्य अनित्यत्वाभावपक्षे प्रत्ययलक्षणस्य तेन बाधात् गुणाभावे हे धातृ इति सिद्धम् ।

धातॄणाम्—धातृशब्दात् प्रातिपदिकसंज्ञायां आम् विभक्तौ 'तृतीयादिषु भाषितपुस्कं पुंवद्गालवस्य' इत्यनेन पाक्षिके पुंवद्भावेन नुमोऽभावे 'ह्रस्वनद्यापोनुट्' इति सूत्रेण नुडागमेऽनुबन्धलोपे 'नामि' इति दीर्घे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन नकारस्य णत्वे धातॄणाम् इति रूपम् । पुंवद्भावाभावपक्षेऽपि 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकेन नुमागमं बाधित्वा नुडागमेऽनुबन्धलोपे दीर्घे णत्वे धातॄणाम् इत्येव सिद्ध्यति इति दिक् ।

प्रीणि—प्रै शब्दात् प्रातिपदिकसंज्ञायां जसि प्रत्ययेऽनुबन्धलोपे 'एच इग्घ्रस्वादेशे' इति सूत्रसहकारेण 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति सूत्रेण ह्रस्वे प्रि+अस् इति स्थिते 'जश्शसोःशि' इत्यनेन श्यादेशे अनुबन्धलोपे 'शि सर्वनामस्थानम्' इत्यनेन सर्वनामस्थानसंज्ञायाम् 'इकोऽचि विभक्तौ' इत्यनेन नुमागमेऽनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण दीर्घे णत्वे प्रीणि इति सिद्धम् ।

प्राभ्याम्—प्रै शब्दात् प्रातिपदिकसंज्ञाम् भ्यामि विभक्तौ 'एचइग्घ्रस्वादेशे' इति सूत्रसहकारेण 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन ह्रस्वे प्रि+भ्याम् इति जाते 'एकदेशविकृतमनन्यवत्' इति परिभाषाबलात् 'रायो हलि' इत्यनेन आत्वे कृते प्राभ्याम् इति सिद्धम्

प्रीणाम्–प्रैशब्दात् प्रातिपदिकसंज्ञायाम् षष्ठी बहुवचने आमि विभक्तौ 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकेन नुटि, अनुबन्धलोपे एकादेशविकृतस्यानन्यत्वात् 'रायो हलि' इत्यनेन आत्वे नकारस्य णत्वे प्राणाम् इति रूपम् माधवमते । वस्तुतस्तु 'सन्निपातपरिभाषया नुटि आत्वं न भवति तत्पक्षे 'एच इग्घ्रस्वादेशे' इति सूत्रेण ह्रस्वे प्रि+आम् इति स्थिते 'नामि' इत्यनेन दीर्घे नस्य णत्वे प्रीणाम् इति सिद्धम् ।

इति अजन्तनपुंसकलिङ्गप्रकरणम्

अथ हलन्तपुंलिंगप्रकरणम्

लिट्त्सु—लिह् शब्दात् प्रातिपदिकसंज्ञायां सप्तमीबहुवचने सुपि विभक्तौ

अनुबन्धलोपे 'हो ढ:' इत्यनेन हकारस्य ढत्वे 'स्वादिष्वसर्वनामस्थाने' इति सूत्रेण पदसंज्ञायां पदत्वात् 'झलां जशोऽन्ते' इत्यनेन जश्त्वे डकारे कृते 'ड:सि धुट्' इति सूत्रेण वैकल्पिके धुडागमेऽनुबन्धलोपे ततः 'खरि च' इत्यनेन धकारस्य चर्त्वे तकारे डकारस्य चर्त्वेन टकारे च कृते लिट्त्सु इति रूपम् । धुडागमाभावपक्षे—डकारस्य चर्त्वेन टकारे लिट्सु इति सिद्धम् ।

धुक्—(ई० ४८) 'दुह' इति क्विबन्तप्रातिपदिकात् शौ 'हल्ङ्याब्भ्य:–' इति सुलोपे 'हो ढ:' इति ढत्वं प्रबाध्य 'दादेर्धातोर्घः' इति हस्य घत्वे कृते झषन्तत्वात्-'एकाचो वशो भष् झषन्तस्य स्ध्वो:' इति भष्भावे धस्य जश्त्वे 'वाऽवसाने' इति गस्य चर्त्वे 'धुक्' इति । पक्षे 'धुग्' इति ।

ननु घत्वे कृते 'दुघ' इति झषन्तमेकाच्कम्, तस्य धातुत्वात् धात्ववयवत्वाऽभावात् कथमहि दकारस्य भष्भावेन धकारः स्यादिति चेन्न 'राहोश्शिर:' इतिवत् व्यपदेशिवद्भावेन धात्ववयवत्वात्तत्सिद्धेः ।

धुक्षु ।६३। दुहशब्दात् प्रातिपदिकसंज्ञायां सप्तमीबहुवचने सुपि विभक्तौ अनुबन्धलोपे 'दादेर्धातोर्घ:' इत्यनेन हकारस्य घत्वे 'एकाचो वशो भष् झषन्तस्य स्ध्वो:' इति सूत्रेण दकारस्य भष्भावेन धकारे कृते 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन गकारे कृते 'खरि च' इति सूत्रेण चर्त्वस्यासिद्धत्वाद् पूर्वम् 'आदेशप्रत्यययो:' इति सूत्रेण सस्य षत्वे ततः चर्त्वे क्ष संयोगे क्षत्वे च कृते धुक्षु इति सिद्धम् ।

ध्रुक्—द्रुह् शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्ययेऽनुबन्धलोपे 'हल्ङ्याभ्यो दीर्घात्सुतिस्यपृक्तं हल्' इत्यनेन सुलोपे 'वा द्रुहमुहष्णुहष्णिहाम्' इति सूत्रेण वैकल्पिके हस्य घत्वे 'एकाचो वशो भष् झषन्तस्य स्ध्वो:' इति सूत्रेण भष्भावेन दकारस्य धकारे जश्त्वे वैकल्पिके चर्त्वे च कृते ध्रुक्, ध्रुग् इति रूपद्वयं सिद्धम् धत्वाभावपक्षे 'हो ढ:' इत्यनेन हकारस्य ढत्वे भष्भावे चर्त्वे च कृते ध्रुट्, ध्रुड् इति रूपद्वयं सिद्धम् ।

ध्रुक्षु—द्रुह् शब्दात् प्रातिपादिकसंज्ञायां सुपि प्रत्यये अनुबन्धलोपे 'वा द्रुह मुहष्णुहष्णिहाम्' इत्यनेन वैकल्पिके हकारस्य घत्वे द्रुघ्+सु इति स्थिते भष्भा-

वेन दकारस्य धकारे 'झलां जशोऽन्ते' इत्यनेन जश्त्वे 'आदेशप्रत्यययोः' इति षत्वे 'खरि च' इति चर्त्वे कष—संयोगे क्षत्वे ध्रुक्षु इति रूपम्। घत्वाभावपक्षे 'हो ढः' इत्यनेन ढत्वे भष्भावे जश्त्वे डःसि धुट् इत्यनेन वैकल्पिके धुडागमेऽनुबन्धलोपे 'खरि च' इति चर्त्वे धकारस्य तकारे डकारस्य टकारे कृते ध्रुट्त्सु इति रूपम्। धुडभावपक्षे डस्य चर्त्वेन टकारे ध्रुट्सु इति सिद्धम्।

न चात्र 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वं कुतो नेति वाच्यम्? 'न पदान्ताट्टोरनाम्' इति सूत्रनिषेधात्। चर्त्वस्याऽसिद्धत्वाच्च, ट-तयोः ट-थौ न भवतः इति दिक्।

विश्वौहः।६५। विश्ववाह् शब्दात् प्रातिपदिकसंज्ञायां शसि विभक्तावनुबन्धलोपे 'यचि भम्' इत्यनेन भसंज्ञायां 'वाह ऊठ्' इति सूत्रेण यणःस्थाने प्रयुज्यमानस्य इकः सम्प्रसारणसंज्ञायां वाह् इत्यत्र वकारस्य ऊठि सम्प्रसारणेऽनुबन्धलोपे विश्व+ऊ+आह्+अस् इति स्थिते 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे 'एत्येधत्यूठ्सु' इति सूत्रेण वृद्धौ सकारस्य रुत्वे विसर्गे कृते विश्वौहः इति सिद्धम्।

अनड्वान्।५८। अनडुह् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'चतुरनडुहोरामुदात्तः' इति सूत्रेण मित्वादन्त्यादचः परे आमागमेऽनुबन्धलोपे 'अनडु+आ+ह्+स् इति स्थिते 'सावनडुहः' इति सूत्रेण नुमागमेऽनुबन्धलोपे 'इको यणचि' इत्यनेन यणि 'हल्ङ्याब्भ्यो' इत्यादिना सुलोपे हकारस्य 'संयोगान्तस्य लोपः' इत्यनेन लोपे च कृते अनड्वान् इति सिद्धम्।

हे अनड्वन्—अनडुह शब्दात् प्रातिपदिकसंज्ञायां सम्बोधने सौ विभक्तौ अनुबन्धलोपे 'चतुरनडुहोरामुदात्तः' इत्यनेन आमागमे प्राप्ते तं प्रबाध्य 'अम् सम्बुद्धौ' इत्यनेन मित्वादन्त्यादचः परे अमागमेऽनुबन्धलोपे यणि 'सावनडुहः' इत्यनेन नुमागमेऽनुबन्धलोपे सुलोपे संयोगान्तलोपे हे शब्दस्य प्राक्प्रयोगे हे अनड्वन् इति सिद्धम्।

अनडुद्भ्याम्—अनडुह् शब्दात् प्रातिपदिकसंज्ञायां भ्यामि विभक्तौ अनुबन्धलोपे 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यनेन हकारस्य दकारे कृते संयोगे अनडुद्भ्याम् इति सिद्धम्।

चत्वार:—चतुर शब्दात् प्रातिपदिकसंज्ञायां प्रथमा बहुवचने जस् विभक्तावनुबन्धलोपे 'चतुरनडुहोरामुदात्त:' इत्यनेन आमागमेऽनुबन्धलोपे 'इको यणचि' इत्यनेन यणि सकारस्य रुत्वे विसर्गे च कृते चत्वार: इति सिद्धम्

चतुर्णाम् । ६० । चतुर् शब्दात् प्रातिपदिकसंज्ञायां षष्ठी बहुवचने आम् विभक्तौ 'षट्चतुर्भ्यश्च' इति सूत्रेण नुडागमेऽनुबन्धलोपे चतुर्+न+आम् इति जाते 'रषाभ्यां नो ण: समानपदे' इत्यनेन नकारस्य णत्वे 'अचो रहाभ्यां द्वे' इत्यनेन वैकल्पिके णकारस्य द्वित्वे चतुर्ण्णाम् इति रूपम् । द्वित्वाभावपक्षे चतुर्णाम् इति सिद्धम् ।

चतुर्षु—चतुर् शब्दात् प्रातिपदिकसंज्ञायां सप्तमी बहुवचने सुपि विभक्तौ अनुबन्धलोपे 'खरवसानयोर्विसर्जनीय:' इति रेफस्य विसर्गे प्राप्ते तं प्रबाध्य 'रो: सुपि इति सूत्रेण सकारस्य षत्वे 'अचो रहाभ्यां द्वे' इत्यनेन षस्य द्वित्वे प्राप्ते 'शरोऽचि' इति सूत्रेण निषेधे चतुर्षु इति सिद्धम् ।

क:—किम् शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्ययेऽनुबन्धलोपे 'किम: क:' इत्यनेन किम: स्थाने कादेशे हलन्तात्परत्वाभावेन सुलोपाभावे सकारस्य रुत्वे विसर्गे क: इति सिद्धम् ।

अयम्—इदम् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे'त्यदादीनाम:' इत्यनेन अकारेऽन्तादेशे प्राप्ते तं बाधित्वा 'इदमो म:' इति सूत्रेण इदमो मकारस्य मादेशे 'इदोऽय् पुंसि सूत्रेण इद: अयादेशे 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इत्यनेन सुलोपे च कृते 'अयम्' इति सिद्धम् ।

इमौ—इदम् शब्दात् प्रातिपदित्वेन औ विभक्तौ त्यदाद्यत्वे पदरूपत्वे 'दश्च' इति दस्य मत्वे वद्धिरेचि इति वृद्धौ सिद्धम् ।

इमे । ६४ । इदम् शब्दात् प्रातिपदिकसंज्ञायाम् जसि प्रत्ययेऽनुबन्धलोपे 'त्यदादीनाम:' इत्यत्वे 'अतो गुणे' इत्यनेन पररूपत्वे 'दश्च इति' सूत्रेण दकारस्य मकारे सर्वादित्वेन सर्वनामत्वात् जस:शी इत्यनेन जस: स्थाने श्यादेशे अनुबन्धलोपे 'आद् गुण:' इति सूत्रेण इमे इति सिद्धम् ।

अनेन—इदम् शब्दात् प्रातिपदिकसंज्ञायां तृतीयैकवचने टाविभक्तौ

अनुबन्धलोपे 'त्यदादीनामः' इत्यनेन इदमो मकारस्यात्वे 'अतो गुणे' इति सूत्रेण पररूपे 'अनाप्यकः' इति सूत्रेण इदः स्थानेऽनादेशे अन+टा इति स्थिते 'टाङसिङसामिनात्स्याः' इति सूत्रेण इनादेशे 'आद्गुणः' इति सूत्रेण गुणे अनेन इति सिद्धम् ।

आभ्याम्—इदम् शब्दात् प्रातिपदिकसंज्ञायां भ्याम् विभक्तौ 'त्यदादीनामः' इत्यनेनात्वे पररूपे च कृते 'अनाप्यकः' इत्यनेन अनादेशे प्राप्ते तं बाधित्वा 'हलि लोपः' इत्यनेन इद् भागस्य लोपे 'अलोऽन्त्यस्य' इति सूत्रेण दकारमात्रस्य लोपस्तु न भवति 'नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे' इति परिभाषया निषेधात् अ+भ्याम् इति जाते 'आद्यन्तवदेकस्मिन्' इति सूत्रेण अकारेऽदन्तत्वमाश्रित्य अकारस्यैव 'सुपि च' इत्यनेन दीर्घे आभ्याम् इति सिद्धम् ।

अस्मै–इदम् शब्दात् प्रातिपदिकसंज्ञायां ङे विभक्तौ अनुबन्धलोपे 'त्यदादीनामः' इत्यनेन अत्वे 'अतो गुणे' इति पररूपे 'इद्+ए इति जाते 'अनाप्यकः' इति अनादेशे प्राप्ते तं बाधित्वा नित्यत्वात्ततः पूर्वं 'सर्वनाम्नः स्मै' इत्यनेन ङे स्थाने स्मै आदेशे ततः अनादेशं बाधित्वा 'हलि लोपः' इत्यनेन इदो लोपे संयोगे अस्मै इति सिद्धम् ।

एभिः—(ई० ४९, ४९) इदम् शब्दात् भिसि अत्वे पररूपत्वे इद भिस् जाते 'अतो भिस ऐस्' इति भिसः ऐसि प्राप्ते 'नेदमदसोरकोः' इति निषेधे 'हलि लोपः' इत्यनेन इद्भागस्य लोपे 'बहुवचने झल्येत्' इति झल्येत्त्वे सस्य रुत्वे विसर्गे 'एभिः' इति ।

एषाम्—इदम् शब्दात् प्रातिपदिकसंज्ञायां षष्ठीबहुवचने आम् विभक्तौ त्यदाद्यत्वे पररूपत्वे च कृते नित्यत्वात् अनादेशात्पूर्वं 'आमि सर्वनाम्नः सुट्' इति सूत्रेण सुडागमेऽनुबन्धलोपे ततः हलि लोपः इत्यनेन इद् भागस्य लोपे 'आद्यन्तवदेकस्मिन् इत्यनेन अदन्तत्वमाश्रित्य 'बहुवचने झल्येत्' इति सूत्रेण एत्वे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य षत्वे एषाम् इति सिद्धम् ।

'इदम् शब्दस्य त्रिषु लिङ्गेषु रूपाणि (ई० ३३)—

पुंलिङ्गे			स्त्रीलिङ्गे		
अयम्	इमौ	इमे	इयम्	इमे	इमाः
इमम्(एनम्)	इमौ (एनौ)	इमान् (एनान्)	इमाम् (एनाम्)	इमे (एने)	इमाः (एनाः)
अनेन (एनेन)	आभ्याम्	एभिः	अनया (एनया)	आभ्याम्	आभिः
अस्मै	आभ्याम्	एभ्यः	अस्यै	आभ्याम्	आभ्यः
अस्मात्	आभ्याम्	एभ्यः	अस्याः	आभ्याम्	आभ्यः
अस्य	अनयोः (एनयोः)	एषाम्	अस्याः	अनयोः(एनयोः)	आसाम्
अस्मिन्	अनयोः ,,	एषु	अस्याम्	अनयोः ,,	आसु

नपुंसके—

इदम्	इमे	इमानि
इदम् (एनत्-द्)	इमे (एने)	इमानि(एनानि)
अनेन (एनेन)	आभ्याम्	एभिः
अस्मै	आभ्याम्	एभ्यः
अस्मात्	आभ्याम्	एभ्यः
अस्य	अनयोः (एनयोः)	एषाम्
अस्मिन्	अनयोः ,,	एषु

(त्यदादेः सम्बोधनं नास्ति)

राजा—राजन् शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्ययेऽनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण उपधादीर्घे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नकारस्य लोपे राजा इति सिद्धम् ।

राज्ञः ।५३। राजन् शब्दात् प्रातिपदिकसंज्ञायाम् शसि विभक्तौ अनुबन्धलोपे राजन्+अस् इति जाते 'यचि भम्' इत्यनेन भसंज्ञायाम् 'अल्लोपोऽनः' इति सूत्रेण जकारोत्तरवर्तिनः अकारस्य लोपे 'स्तोः श्चुना श्चुः' इति सूत्रेण नकारस्य श्चुत्वेन जकारे जञोः संयोगे ज्ञकारे सकारस्य रुत्वे विसर्गे कृते राज्ञः इति सिद्धम् ।

राजभ्याम् (ई० ४१, ४७,)–'राजन् भ्याम्' इति स्थिते 'स्वादिष्वसर्वनामस्थाने' इति पदत्वात् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे 'राज भ्याम्' इति स्थिते 'सुपि चे' ति दीर्घे प्राप्ते 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति' इति नलोपस्याऽसिद्धत्वात् दीर्घाऽभावे 'राजभ्याम्' इति ।

राजभिः—राजन् शब्दात् प्रातिपदिकसंज्ञायां भिस् विभक्तौ 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नलोपे नलोपस्यासिद्धत्वेन 'अतो भिस् ऐस्' इत्यनेन भिसः ऐसोऽभावे सकारस्य रुत्वे विसर्गे च कृते राजभिः इति सिद्धम् ।

यज्वनः—यज्वन् शब्दात् प्रातिपदिकसंज्ञायां शसि विभक्तावनुबन्धलोपे यज्वन्+अस् इति स्थिते 'यचि भम्' इत्यनेन भसंज्ञायां 'अल्लोपोऽनः' इत्यनेन अल्लोपे प्राप्ते न संयोगाद्वमन्तात्' इति सूत्रेण अल्लोपस्य निषेधे सकारस्य रुत्वे विसर्गे च कृते यज्वनः इति सिद्धम् ।

ब्रह्मणः—ब्रह्मन् शब्दात् प्रातिपदिकसंज्ञायां शसि प्रत्ययेऽनुबन्धलोपे भसंज्ञायां 'अल्लोपोऽनः' इत्यनेन अल्लोपे प्राप्ते 'न संयोगाद्वमन्तात्' इत्यनेन निषेधे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे सस्य रुत्वे विसर्गे च कृते ब्रह्मणः इति सिद्धम् ।

वृत्रहा—वृत्रहन् शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्ययेऽनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण दीर्घे प्राप्ते 'इन्हन्पूषार्यम्णां सौ' इत्यनेन निषेधे प्राप्ते तं प्रबाध्य 'सौ च' इति सूत्रेण दीर्घे सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नकारस्य लोपे वृत्रहा इति सिद्धम् ।

वृत्रघ्नः (ई० ४०, ४१, ५०) वृत्रो नाम असुरः तं हतवानित्यर्थे क्विबन्तनिष्पन्नात् वृत्रहन् शब्दाच्छसि भसंज्ञायाम् 'अल्लोपोऽनः' इत्यल्लोपे 'हो हन्तेर्ञ्णिन्नेषु' इति हकारस्य कुत्वेनान्तरतम्यात् घकारादेशे सस्य रुत्वे विसर्गे वृत्रघ्नः इति ।

नन्वत्र कृतेप्यल्लोपे तस्य पूर्वस्माद्विधौ स्थानिवत्त्वादुत्तरपदस्य एकाच्त्वात् 'एकाजुत्तरपदे णः' इत्यनेन स्थानित्वाऽभावेऽपि प्रातिपदिकान्तनुम्विभक्तिषु च'

इत्यनेन,'कुमति च' इत्यनेन वा णत्वं कुतो नेति चेन्न, 'अत्पूर्वस्य' इत्यनेन ह्रस्वाकारपूर्वकस्येव हन्तेर्नस्य णत्वनियमादत्र नकारपूर्वकत्वाऽभावात् णत्वाऽप्रवृत्तेः। न च 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायेन 'अत्पूर्वस्ये' ति सूत्र' 'हन्तेः' इत्यस्यैव नियामकं, न तु 'एकाजुत्तरपदे णः' इत्यादेरिति वाच्यम्, तथा सति 'हन्तेरत्पूर्वस्य' इत्येकयोगेनैव 'हन्तेः' इत्यस्य अत्पूर्वेतरत्र निवृत्तौ सिद्धायां योगविभागस्य वैयर्थ्येन तत्सामर्थ्यादत्र उक्तन्यायाऽप्रवृत्तेर्बोधनेन विप्रकृष्टस्यापि 'एकाजुत्तरपदे णः' प्रातिपदिकान्तनुम्विभक्तिषु च' इत्यादेस्तेन नियमादप्रवृत्तेः।

'मघवन् शब्दस्य रूपाणि (ई० ३३)—

तृत्वपक्षे—

मघवान्	मघवन्तौ	मघवन्तः
मघवन्तम्	मघवन्तौ	मघवतः
मघवता	मघवद्भ्याम्	मघवद्भिः
मघवते	मघवद्भ्याम्	मघवद्भ्यः
मघवतः	मघवद्भ्याम्	मघवद्भ्यः
मघवतः	मघवतोः	मघवताम्
मघवति	मघवतोः	मघवत्सु

तृत्वाऽभावपक्षे—

मघवा	मघवानौ	मघवानः
मघवानम्	मघवानौ	मघोनः
मघोना	मघवभ्याम्	मघवभिः
मघोने	मघवभ्याम्	मघवभ्यः
मघोनः	,,	,,
मघोनः	मघोनोः	मघोनाम्
मघोनि	मघोनोः	मघवत्सु
हे मघवन्	हे मघवानौ	हे मघवानः

मघवान्—।६१। मघवन् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे

'मघवा बहुलम्' इति सूत्रेण वैकल्पिक तृज्वद्भावेऽनुबन्धलोपे 'उगिदचां सर्वनामस्थाने धातोः' इति सूत्रेण नुमागमेऽनुबन्धलोपे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सूत्रेण सुलोपे 'संयोगान्तस्य लोपः' इत्यनेन तलोपे प्रत्ययलक्षणेन सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण दीर्घे मघवान् इति सिद्धम् । तृज्वद्भावाऽभावपक्षे मघवद् + सु इति जाते सकारस्य लोपे दीर्घे न लोपे मघवा इति भवति ।

मघोनः—।५७। मघवन् शब्दात् प्रातिपदिकसंज्ञायां शसि विभक्तौ, अनुबन्धलोपे मघवन् + अस् इति जाते भसंज्ञायां तृत्वाभावपक्षे 'श्वयुवमघोनामतद्धिते' इति सूत्रेण गुणे सस्य रुत्वे विसर्गे च कृते मघोनः इति सिद्धम् । तृज्वद्भावपक्षे तु मघवत्+अस् इति स्थिते संयोगे सकारस्य रुत्वे विसर्गे मघवतः इति सिद्धम भवति ।

यूनः—युवन् शब्दात् प्रातिपदिकसंज्ञायां शसि विभक्तौ, अनुबन्धलोपे भसंज्ञायां 'श्वयुवमघोनामतद्धिते' इत्यनेन वकारस्योकारे सम्प्रसारणे 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे 'अकः सवर्णे दीर्घः' इति सूत्रेण दीर्घे यून्+अस् इति जाते यकारस्य पुनः सम्प्रसारणे प्राप्ते 'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रेण तन्निषेधे सस्य रुत्वे विसर्गे च कृते यूनः, इति सिद्धम् ।

पन्थाः—पथिन् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'पथिमथ्यृभुक्षामात्' इत्यनेन नकारस्य अकारेन्तादेशे पथि + आ+सु इति स्थिते 'इतोत्सर्वनामस्थाने' इति सूत्रेण थकारोत्तरवर्तिनः इकारस्य अकारे 'थोन्थः' इत्यनेन थकारस्य न्थादेशे सवर्णदीर्घे सकारस्य रुत्वे विसर्गे पन्थाः इति सिद्धम् ।

पथः—पथिन् शब्दात् प्रातिपदिकत्वेन 'शसि । 'भस्य टेर्लोपः इति टिलोपे रुत्वे विसर्गे सिद्धम् ।

पञ्च—पञ्चन् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ, अनुबन्धलोपे 'ष्णान्ता षट्' इत्यनेन षट् संज्ञायां 'षड्भ्यो लुक्' इति सूत्रेण जसो लुकि 'नलोपः प्रातिपकिदान्तस्य' इति सूत्रेण नलोपे पञ्च इति सिद्धम् ।

पञ्चानाम्—पञ्चन् शब्दात् प्रातिपदिकसंज्ञायां आमि विभक्तौ 'ष्णान्ता षट्' इत्यनेन षट् संज्ञायाम् 'षट्चतुर्भ्यश्च' इत्यनेन नुडागमेऽनुबन्धलोपे

नलोपस्यासिद्धत्वात् पूर्वं 'नोपधायाः' इति सूत्रेण दीर्घे ततो नकारस्य लोपे पञ्चानाम् इति सिद्धम् ।

अष्टौ—। ५९। अष्टन् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ अष्टभ्य इति वक्तव्ये अष्टाभ्य इति कृतात्वनिर्देशात् हलादिपरत्वाभावेऽपि जश्शसोर्विषये आत्वं ज्ञापयति इति तेन 'अष्टन् आ विभक्तौ' इति सूत्रेण वैकल्पिके आत्वे 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे 'अष्टा + जस्' इति जाते 'अष्टाभ्य औश्' इति सूत्रेण जसः औशादेशेऽनुबन्धलोपे 'वृद्धिरेचि' इत्यनेन वृद्धौ अष्टौ इति रूपम् । आत्वाभावपक्षे—अष्टन्शब्दस्य नान्तत्वेन 'ष्णान्ता षट्' इत्यनेन षट् संज्ञायां 'षड्भ्यो लुक्' इत्यनेन जश्शसोर्लुकि नलोपे अष्ट इति सिद्धम् ।

अष्टानाम्—अष्टन् शब्दात् प्रातिपदिकसंज्ञायां आमि विभक्तौ षट्संज्ञायाम् 'षट्चतुर्भ्यश्च' इति सूत्रेण नुडागमेऽनुबन्धलोपे 'अष्टन् आ विभक्तौ' इत्यनेन पाक्षिके आत्वे 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णदीर्घे अष्टानाम् इति रूपम् । आत्वाभावपक्षे—नुटि अष्टन् + नाम् इति स्थिते 'नोपधाया' इति सूत्रेण दीर्घे नलोपे अष्टानाम् इति सिद्धम् ।

ऋत्विक् (ई० ३१) ऋतावुपपदे 'यज्' धातोः 'ऋत्विग्दधृक्' इत्यादिना क्विनि 'लशक्वतद्धिते' इत्यनेन ककारस्य, 'हलन्त्यम्' इत्यनेन नकारस्य च इत्संज्ञायां लोपे च कृते इकारस्योच्चारणार्थत्वेन तन्निवृत्तौ क्विनो वकारस्य 'अपृक्त एकाल्प्रत्ययः' इत्यपृक्तसंज्ञकस्य वस्य च लोपे विहिते क्विनः सर्वापहारे 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'ऋतु इज्' इति स्थिते 'इको यणचि' इति यणि 'ऋत्विज्' इति स्थिते 'कृदतिङ्' इति सूत्रेण कृत्संज्ञायां 'कृत्तद्धितसमासाश्च' इति कृदन्तत्वात् प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे 'ऋत्विज् स्' इति स्थिते हल्ङ्यादिना सलोपे 'क्विन्प्रत्ययस्य कुः' इत्यनेन जकारस्य कुत्वेन घकारे 'वाऽवसाने' इति तस्य चर्त्वेन ककारे 'ऋत्विक्' इति । चर्त्वाऽभावपक्षे 'ऋत्विग्' इति ।

युङ् (ई० ३३)—'युजिर् योगे' अस्माद्धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इत्यनेन क्विनि 'लशक्वतद्धिते' इति ककारस्य, 'हलन्त्यम्'

इति नकारस्य, इत्संज्ञायाम् 'अपृक्त एकाल् प्रत्ययः' इत्यनेन अपृक्तसंज्ञायां 'वेरपृक्तस्य' इत्यनेन वकारस्य च इत्संज्ञायां लोपे च विहिते इकारस्योच्चारणार्थत्वेन तन्निवृत्तौ प्रत्ययलक्षणेन 'कृदतिङ्' इति कृत्संज्ञायां 'कृत्तद्धितसमासाश्चेति' कृदन्तत्वात् प्रातिपदिकसंज्ञायां सो अनुबन्धलोपे 'युजेरसमासे' इति नुमि अनुबन्धलोपे हल्ङ्यादिना सलोपे 'संयोगान्तस्य लोपः' इति जलोपे 'क्विन्प्रत्ययस्य कुः' इति नस्य कुत्वेन ङकारे 'युङ्' इति सिद्धम् ।

सुयुक्—सुपूर्वाद् युज् धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' इत्यनेन क्विप्प्रत्यये तस्य लोपे सुयुज् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे सु लोपे 'क्विन्प्रत्ययस्य कुः' इति सूत्रेण कुत्वे प्राप्ते तं प्रबाध्य 'चोः कुः' इति सूत्रेण कुत्वे वैकल्पिके चर्त्वे सुयुक्-सुयुग् इति सिद्धम् ।

राट्—राजशब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'हल्ङ्याब्भ्य' इत्यादिना सुलोपो 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छषां षः' इति सूत्रेण जकारस्य षत्वे तस्य 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन डकारे 'वाऽवसाने' इत्यनेन वैकल्पिके चर्त्वे राट्-राड् इति रूपद्वयं इति सिद्धम् ।

परिव्राट्—परिपूर्वकाद्व्रज्धातोः 'परौ व्रजेः सः पदान्ते' इति सूत्रेण क्विप् प्रत्यये दीर्घे षत्वे च कृते क्विपो लोपो प्रातिपदिकत्वात् सुप्रत्यये 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे जश्त्वे चर्त्वे परिव्राट् इति सिद्धम् ।

विश्वराट्—(ई० ३४)– विश्वोपपदात् राज्धातोः 'सत्सूद्विष्' इति क्विपि क्विपः सर्वापहारे 'विश्वराज्' इति, तस्मात् कृदन्तत्वात् प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे विश्वराज् स् इति दशायां 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यनेन जकारस्य षत्वे 'झलां जशोन्ते' इत्यनेन षकारस्य जश्त्वेन ठकारे 'वावसाने' इति ठस्य चर्त्वे 'विश्वस्य बसुराटोः' इति विश्वशब्दस्य दीर्घे हल्ङ्यादिना सलोपे 'विश्वाराट्' इति । चर्त्वाऽभावपक्षे विश्वराड् इति ।

भृट्—भ्रस्ज्शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'हल्ङ्याब्भ्यो' इत्यादिना सुलोपे 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सलोपे व्रश्चेत्यादिना जकारस्य षत्वे तस्य जश्त्वेन डकारे वैकल्पिके चर्त्वे भृट्, इति सिद्धम् ।

स्यः—त्यद् शब्दात् प्रातिपदिकसंज्ञायाम् सुप्रत्ययेऽनुबन्धलोपे 'त्यदादीनामः' इत्यनेन अकारेऽन्तादेशे 'अतो गुणे' इति सूत्रेण पररूपे 'तदो सः सावनन्त्ययोः' इति सूत्रेण तकारस्य सकारे सस्य विसर्गे स्यः इति सिद्धम्।

त्वम्—युष्मद्शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्यये 'ङेप्रथमयोरम्' इत्यनेन सोरमादेशे 'न विभक्तौ तुस्माः' इति सूत्रेण मकारस्येत्संज्ञानिषेधे 'त्वाहौ सौ' इत्यनेन मपर्यन्तस्य युष्म इत्यस्य त्व इत्यादेशे अन्तरङ्गत्वात् प्रथमम् 'अतो गुणे' इति पररूपे 'साम्प्रतिकभावे भूतपूर्वगतिराश्रीयते' इति न्यायेन पूर्वकालिकम-पर्यन्तशेषत्वमादाय 'शेषे लोपः' इति सूत्रेण अद्भागस्य लोपे संयोगे त्वम् इति सिद्धम् भवति। एवं अस्मद्शब्दस्य अहम् इति रूपम् भवति।

आवाम्—अस्मद्शब्दात् प्रातिपदिकसंज्ञाया औविभक्तौ 'ङेःप्रथमयोरम्' इति सूत्रेण औकारस्य अमादेशे 'युवावौ द्विवचने' इत्यनेन मपर्यन्तस्य अस्म् इत्यस्य आवादेशे आव+अद्+अम् इति जाते 'अतो गुणे' इति पररूपे 'शेषे लोपः' इत्यनेन टिलोपे प्राप्ते तं बाधित्वा 'प्रथमायाश्च द्विवचने भाषायाम्' इति सूत्रेण दकारस्याऽत्वे आव+आ+अम् इति स्थिते 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे 'अमि पूर्वः' इत्यनेन पूर्वरूपे च कृते संयोगे आवाम् इति सिद्धम्। एवं युष्मदः युवाम् इति भवति।

यूयम्—।६४। युष्मद् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ 'ङेप्रथम-योरम्' इत्यनेन जसोऽमादेशे 'यूयवयौ जसि' इति सूत्रेण अद्भागस्य लोपे यूयम् इति सिद्धम्।

त्वाम्—युष्मद् शब्दात् प्रातिपदिकसंज्ञायां अमि विभक्तौ 'ङेप्रथमयोरम्' इत्यनेन अम् इत्यस्य अमादेशे 'त्वमावेकवचने' मपर्यन्तस्य युष्म इत्यस्य त्वादेशे पररूपे 'शेषे लोपः' इत्यनेन प्राप्तं टिलोपम्प्रबाध्य 'द्वितीयायां च' इत्यनेन दकारस्य आकारे सवर्णदीर्घे 'अमि पूर्वः इति पूर्वरूपे त्वाम् इति। एवं अस्मद् शब्दस्य माम् इति भवति।

युष्मान्—।६३। युष्मद् शब्दात् प्रातिपदिकसंज्ञायां शसि विभक्तौ, अनुबन्ध लोपे 'द्वितीयायां च' इत्यनेनात्वे 'ङेप्रथमयोरम्' इति सूत्रेण अमादेशे प्राप्ते

तं बाधित्वा 'आदेः परस्य' इति सूत्रबलात् 'शसो न' इत्यनेन अकारस्य नकारे 'युष्मा + न्स् इति जाते 'संयोगान्तस्य' इति सूत्रेण सलोपे दीर्घे युष्मान् इति सिद्धम् ।

त्वया मया—।६४। युष्मद्-अस्मद् शब्दात् प्रातिपदिकसंज्ञायां टाविभक्ता-वनुबन्धलोपे 'त्वमावेकवचने' इति सूत्रेण मपर्यन्तस्य युष्म् इत्यस्य त्वादेशे अस्म् इत्यस्य मादेशे कृते 'अतो गुणे' इति पररूपे 'योऽचि' इत्यनेन दकारस्य यकारे च कृते त्वया, मया इति सिद्धम् ।

तुभ्यम्—युष्मद् शब्दात् प्रातिपदिकसंज्ञायां ङे विभक्तौ 'ङे प्रथमयोरम्' इत्यनेन ङेरमादेशे 'त्वमावेकवचने' इति सूत्रं बाधित्वा 'तुभ्यमह्यौ ङयि' इत्यनेन मपर्यन्तस्य युष्म इत्यस्य तुभ्यादेशे पररूपे 'शेषे लोपः' इत्यनेन अदो लोपे तुभ्यम् इति सिद्धम् ।

एवं अस्मद् शब्दात् प्रातिपदिकसंज्ञायां ङे विभक्तौ ङेरमादेशे तुभ्यमह्यो ङयि' इत्यनेन मपर्यन्तस्य मह्यादेशे पररूपे टिलोपे मह्यम् इति सिद्धम् ।

युष्मभ्यम्—युष्मद् शब्दात् प्रातिपदिकसंज्ञायां भ्यसि विभक्तौ 'भ्यसोऽभ्यम्' इति सूत्रेण भ्यसोऽभ्यमादेशे कृते 'शेषे लोपः' इति टिलोपे युष्मभ्यम् इति सिद्धम् !

तव मम—युष्मद् अस्मद् शब्दात् प्रातिपदिकसंज्ञायां ङसि विभक्तौ अनुबन्ध-लोपे 'त्वमावेकवचने' इत्यनेन त्व, म इति प्राप्ते तं प्रबाध्य 'तवममौ ङसि' इति सूत्रेण मपर्यन्तस्य युष्म अस्म इत्यस्य तव ममादेशे 'युष्मदस्मद्भ्यां 'ङसोऽश्' इति सूत्रेण ङसः अशादेशेऽनुबन्धलोपे पररूपे 'शेषे लोपः' इति टिलोपे तव मम इति सिद्धम् ।

युष्माकम्—युष्मत् शब्दात् प्रातिपदिकात् आम शेषेलोपः इति लोपे 'सामाऽकम् इति आकमादेशे सवर्णदीर्घे सिद्धम् । एवमस्मत् शब्दात् अस्माकम् इति ।

युष्मदस्मदोः षष्ठी—पद से पर तथा किसी भी श्लोक के पादकी आदि में न रहने बाले युष्मद् और अस्मद् शब्दों के षष्ठी चतुर्थी द्वितीया विभक्ति

में परिनिष्ठित रूप के स्थान में क्रमशः वाम् और नौ आदेश होता है ।

बहुवचनस्य वस्नसौ—पद से परे अपादादि में स्थित युष्मद्, अस्मद् शब्द के षष्ठी, चतुर्थी और द्वितीया विभक्ति के बहुवचन में परिनिष्ठित रूप के स्थान में क्रमशः वस् और नस् आदेश होते हैं ।

ते मयावेकवचनस्य—पद से परे अपादादि में स्थित युष्मद्, अष्मद् शब्द के षष्ठी तथा चतुर्थी विभक्ति के एकवचन में परिनिष्ठित रूप के स्थान में क्रमशः ते मे आदेश होते हैं ।

त्वामौ द्वितीयायाः—पद से परे अपादादि में स्थित युष्मद् और अस्मद् के द्वितीया विभक्ति के एक वचन में परिनिष्ठित रूप के स्थान में क्रमशः त्वा और मा आदेश होते हैं ।

क्रमशः उदाहरणानि

एक वचनम्	द्विवचनम्	बहुवचनम्	
स्थानी–त्वाम्–माम् आदेशः–त्वा–मा	युवाम्–आवाम् वाम् नौ	युष्मान्–अस्मान् वः नः	द्वितीया
स्थानी-तुभ्यम्-मह्यम् आदेशः–ते–मे	युवाभ्याम् आवाभ्याम् वाम् नौ	युष्मभ्यम् अस्मभ्यम् वः नः	चतुर्थी
स्थानी–तव मम आदेशः–ते मे	युवयोः आवयोः वाम् नौ	युस्माकम् अस्माकम् वः नः	षष्ठी

श्रीशल्त्वावतु इति श्लोकार्थ :—श्रीशः त्वा + त्वाम् मा + माम् अपि इह संसारे अवतु रक्षतु। अत्र द्वितीयाया एकवचने 'त्वामौ द्वितीयाया' इति त्वा मा आदेशे क्रमशः कृते त्वा मा इति रूपे भवतः। सः ते + तुभ्यम् मे + मह्यम् शर्म + कल्याणम् दत्तात्। अत्र चतुर्थ्येकवचने तेमयावेकवचनस्य' इत्यनेन क्रमशः ते मे आदेशे उभे रूपे भवतः। स हरिः ते=तव मे=मम अपि स्वामी प्रभुः। अत्र षष्ठयेकवचने 'तेमयावेकवचनस्य' इत्यनेन तव मम इत्यस्य स्थाने क्रमशः

ते-मे आदेशौ भवतः। विभुः सः वाम्=युवाम् नः=आवाम् अपि पातु। अत्र द्वितीयायाः द्विवचने 'युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वांनौ' इत्यनेन युवाम् आवाम् इत्यनयोः स्थाने क्रमशः वाम् नौ आदेशौ भवतः। ईशः वाम्=युवाभ्याम् नौ=आवाभ्याम् च सुखं ददातु। अत्रापि चतुर्थी द्विवचने 'युस्मदस्मदोः-' इत्यादिना युवाभ्याम् आवाभ्याम् इत्यनयोः स्थाने क्रमशः वां नौ आदेशौ भवतः। हरिः वाम्,=युवयोः नौ=आवयोः अपि पतिः पालकः अस्ति। अत्र षष्ठीद्विवचने युवयोः आवयोः इत्यनयोः स्थाने वां नौ आदेशौ क्रमशः भवतः। सः वः=युष्मान् नः=अस्मान् अव्यात् पालयेत्। अत्र द्वितीया बहुवचने यूष्मान् अस्मान् इत्यनयोः स्थाने वः, नः आदेशौ क्रमशः भवतः। वः=युष्मभ्यम् नः=अस्मभ्यम् शिवं दद्यात्। अत्र चतुर्थी बहुवचने युष्मभ्यम् अस्मभ्यम् इत्यनयोः स्थाने वः, नः आदेशौ क्रमशः भवतः। सः वः=युष्माकम् नः अस्माकम् अत्र लोके सेव्यः। अत्र षष्ठी बहुवचने युष्माकम् अस्माकम् इत्यनयोः स्थाने वः नः आदेशौ भवतः।

एकवाक्ये युष्मदस्मदादेशा वक्तव्याः—युष्मद् और अस्मद् शब्द के स्थान में एक वाक्य में ही त्वा, मा, ते, मे, वाम् नौ और वस् नस् आदेश होते हैं एक तिङन्त पद घटित पदसमूह वाक्य कहा जाता है। जैसे 'शालीनां ते ओदनं दास्यामि' यहाँ एक तिङन्तपद 'दास्यामि' है अतः तुभ्यं के स्थान में ते आदेश हुआ। 'ओदनं पच, तव भविष्यति' यहाँ दो वाक्य हैं क्योंकि पच, और भविष्यति दो तिङन्त पद हैं: द्वितीय वाक्य के आदि में होने से पद से परे 'तव' नहीं है अतः 'ते' आदेश नहीं होता।

एते वान्नावादेशादयोऽनन्वादेशे वा वक्तव्या—ये सब वां नौ आदि आदेश अन्वादेश में नित्य और अनन्वादेश में विकल्प से होते हैं।

धाता ते भक्तोस्ति, तस्मै ते नमः—अत्र धाता 'तव भक्तोऽस्ति' इत्यपि रूपं भवति। यतः अत्र अन्वादेशाभावेन 'एते वान्नावादयोऽनन्वादेशे वा वक्तव्याः' इति वार्तिकेन विकल्पेन ते आदेशः। तस्मै ते नमः इत्यत्र अन्वादेशे तु नित्यं ते आदेशः भवति।

सुपदः—।५६। सुपाद् शब्दात् प्रातिपदिकसंज्ञायां शस् विभक्तौ, अनु-

बन्धलोपे सुपाद्+अस् इति जाते 'यचि भम्' इत्यनेन भसंज्ञायां 'यस्मात्प्रत्यय-विधिस्तदादि प्रत्ययेऽङ्गम्' इति सूत्रेण अङ्गसंज्ञायां च कृते 'पादः पत्' इति सूत्रेण पाद शब्दस्य स्थाने पदादेशे सकारस्य रुत्वे विसर्गे च कृते सुपदः इति सिद्धम् ।

देवाऽस्मान् पाहि (ई० ४३) अत्र 'सामन्त्रितम्' इत्यनेन सम्बोधन-बहुवचनान्तस्य देवा' इत्यस्य आमन्त्रितसंज्ञायाम् आमन्त्रितं पूर्वमविद्यमानवत्' इति तस्याऽविद्यमानवद्भावे 'अस्मान्' इत्यस्य 'बहुवचनस्य वस्नसौ' इति अस्मदो नसादेशो न भवति । अस्मानित्यस्य पदात् परत्वाऽभावाद्, पदादौ स्थितत्वाच्चेति ।

प्राचः (ई० ५०)—प्रपूर्वात् अञ्च धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चु-युजिक्रुञ्चां च' इति सूत्रेण क्विपि 'लशक्वतद्धिते'इति क्विनः ककारस्य,'हलन्त्यम् इति नकारस्यच इत्संज्ञायां लोपे च कृते इकारस्योच्चारणार्थत्वेन तस्मिन्नपि गते 'वेरपृक्तस्य' इति वकारस्यापि लोपे कृते क्विनः सर्वापहारे 'प्र अञ्च्' इति स्थिते 'अनिदितां हल उपाधायाः क्ङिति' इत्युपधानकारलोपे 'कृदतिङ्' इति क्विनः कृत्संज्ञकत्वात् 'प्र अच्'इत्यस्य 'कृत्तद्धितसमासाश्च' इति कृदन्तत्वात् प्रातिपदिक संज्ञाया शसि अनुबन्धलोपे 'प्र अच्अस्' इति स्थिते 'यचि भम्' इति भसंज्ञायाम् 'अचः' इत्यनेनाकारस्य लोपे ''चौ इति दीर्घे सकारस्य रुत्वे विसर्गे 'प्राचः' इति सिद्धम् ।

प्रतीचः-प्रतिपूर्वाद् अञ्च धातोः 'ऋत्विगि' त्यादिना क्विनि 'लशक्वतद्धिते' इति क्विनः ककारस्य 'हलन्त्यम्' इति नकारस्य चेत्संज्ञायाम् लोपे च कृते इकारस्योच्चारणार्थत्वेन तस्मिन्नपि गते 'वेरपृक्तस्य' इति वकारस्यापि लोपे क्विनः सर्वापहारे जाते 'अनिदितां हल उपधायाः क्ङिति' इत्यञ्चेरुपधानकारस्य लोपे 'कृदतिङ्' इति क्विनः कृत्संज्ञकत्वात् ,प्रति अच्' इत्यस्य 'कृत्तद्धिते'ति प्रातिपदिकसंज्ञायाँ शसि अनुबन्धलोपे 'प्रति अच् अस्' इति स्थिते 'यचि भम्' इति भसंज्ञायाम् 'अचः' इत्यलोपे 'चौ' इति दीर्घे सकारस्य रुत्वे विसर्गे 'प्रतीचः' इति सिद्धम् ।

उदीचः (ई० ३२)...उत्पूर्वाद् 'अञ्च्' धातोः 'ऋत्विग्' इत्यादिना

क्विनि क्विनः सर्वापहारे 'अनिदिताम्' इत्युपधानकारस्य लोपे 'कृदतिङ्' इति क्विनः कृत्संज्ञकत्वात् 'उत् अच्' इत्यस्य 'कृत्तद्धिते'ति प्रातिपदिकसंज्ञायां शसि अनुबन्धलोपे 'उत् अच् अस्' इति स्थिते तकारस्य जश्त्वेन दकारे 'यचि भम्' इति भसंज्ञायां 'अचः' इत्यलोपं प्रबाध्य 'उद ईत्' इति अचोऽकारस्य ईत्वे सस्य रुत्वे विसर्गे 'उदीचः' इति ।

समीचः (ई० ३०)—सम् पूर्वाद् 'अञ्च्' धातोः 'ऋत्विगि' त्यादिना क्विनि क्विनः सर्वापहारे जाते 'अनिदितां हल उपधायाः क्ङिति' इत्युपधानकारस्य लोपे 'कृदतिङ्' इति क्विनः कृत्संज्ञकत्वात् 'सम् अच्' इत्यस्य कृत्तद्धिते'ति प्रातिपदिकसंज्ञायां शसि अनुबन्धलोपे 'अम् अच् अस' इति दशायां 'समः समि' इति समः सम्यादेशे 'समि अच् अस्' इति स्थिते 'यचि भम्' इतिभसंज्ञायाम् 'अचः' इत्यलोपे 'चौ' इति दीर्घे सस्य रुत्वे विसर्गे 'समीचः' इति सिद्धम् ।

तिरश्चः (ई० ६४)—तिरस्पूर्वकाद्'अञ्च्' धातोः 'ऋत्विगि' इत्यादिना क्विनि क्विनः सर्वापहारे 'अनिदिताम्'इति नलोपे 'कृदतिङ' इति क्विनः कृत्संज्ञकत्वात् 'तिरस् अच्' इत्यस्य 'कृत्तद्धिते'ति प्रातिपदिकसंज्ञायां शसि अनुबन्धलोपे 'तिरस् अच् अस्' इति स्थिते भसंज्ञायाम् 'अचः' इत्यनेन अल्लोपे 'तिरसस्तिर्य-लोपे' इत्यस्य अप्राप्त्या 'स्तोः श्चुना श्चुः'इति सस्य श्चुत्वेन शकारे सस्य रुत्वे विसर्गे तिरश्च इति ।

महान्—महत् शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्ययेऽनुबन्धलोपे, 'उगिदचां सर्वनामस्थाने' इति सूत्रेण नुमागमेऽनुबन्धलोपे 'सान्तमहतः संयोगस्य' इति सूत्रेण दीर्घे 'संयोगान्तस्य लोपः' इति तकारस्य लोपे तस्यासिद्धत्वात् नकारस्य लोपाभावे सुलोपे महान् इति सिद्धम् ।

धीमान्—।६३। धीमत् शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्ययेऽनुबन्धलोपे 'उगिदचां' इत्यादिना प्राप्तं नुमागमं प्रबाध्य पूर्वम् 'अत्वसन्तस्य चाधातोः' इत्यनेन दीर्घे ततो नुमागमेऽनुबन्धलोपे सुलोपे संयोगान्तलोपे धीमान् इति सिद्धम् ।

भवान्—भाधातोः' 'भातेर्डवतुः' इत्यनेन डवतुप्रत्ययेऽनुबन्धलोपे डित्वसामर्थ्यादभस्यापि टेर्लोपे निष्पन्नभवत्-शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्ययेऽनुबन्धलोपे

'अत्वसन्तस्य चाधातोः' इत्यनेन दीर्घे 'उगिदचां सर्वनामस्थाने' इति सूत्रेण नुमागमेऽनुबन्धलोपे सुलोपे संयोगान्तलोपे तस्यासिद्धत्वान्नलोपाभावे भवान् इति सिद्धम् । यद्वा 'लटः शतृशानचावप्रथमासमानाधिकरणे' इत्यनेन शतृ प्रत्यये शपि अनुबन्धलोपे गुणे अवादेशे पररूपे अत्वसन्तत्वाभावेन दीर्घाभावे नुमि सुलोपे संयोगान्तस्येति तलोपे भवन् इति भवति ।

तादृक्—तद् शब्दोपदात् दृशधातोः 'त्यदादिषु दृशोनालोचने कञ्च' इति सूत्रेण क्विन् प्रत्यये तस्य सर्वापहारलोपे 'आ सर्वनाम्नः' इति दकारस्याकारे सवर्णदीर्घे ततः कृदन्तत्वात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'हल्ङ्यादि' लोपे 'क्विन् प्रत्ययस्य कुः' इत्यनेन कुत्वस्यासिद्धत्वात् 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यनेन शकारस्य षत्वे तस्य जश्त्वेन डकारे कुत्वेन गकारे 'वावसाने' इति चर्त्वेन ककारे तादृक् इति । चर्त्वाभावपक्षे तादृग् इति सिद्धम् ।

षण्णाम्—षष् शब्दात् प्रातिपदिकसंज्ञायां आमि विभक्तौ 'ष्णान्ता षट्' इति सूत्रेण षट्संज्ञायाम् 'षट्चतुर्भ्यश्च' इत्यनेन नुटि उकारटकारयोर्लोपे 'झलां जशोऽन्ते' षकारस्य जश्त्वेन डकारे अनाम् इति पर्युदासात् ष्टुत्वनिषेधो न भवति तेनात्र 'ष्टुना ष्टुः' इत्यनेन ष्टुत्वेन नकारस्य णकारे षष्+णाम् इति स्थिते 'यरोऽनुनासिकेऽनुनासिको वा' इत्यनेन वैकल्पिकमनुनासिकं बाधित्वा 'प्रत्यये भाषायां नित्यम्' इति वार्तिकेन नित्येऽनुनासिके णकारे षण्णाम् इति सिद्धम् ।

नचात्र 'न पदान्ताट्टोरनाम्' इत्यनेन ष्टुत्वनिषेधः कुतो नेति वाच्यम् ? 'अनाम्नवतिनगरीणामिति वाच्यम्' इति वार्तिके अनाम्ग्रहणेन तन्निषेधात् ।

षट्त्सु – षष्शब्दात् प्रातिपदिकसंज्ञायां सप्तमी बहुवचने सुप् विभक्तौ अनुबन्धलोपे 'स्वादिष्वसर्वनामस्थाने' इति सूत्रेण पदत्वात् षकारस्य जश्त्वेन डकारे 'डः सि धुट्' इति सूत्रेण वैकल्पिके धुडागमेऽनुबन्धलोपे षड्+ध+सु इति जाते 'खरि च' इत्यनेन चर्त्वेन धकारस्य तकारे डकारस्य टकारे च कृते षट्त्सु इति रूपम् । पक्षे धुडभावे षट्सु इति सिद्धम् ।

पिपठीः—।५७। पिपठिष् शब्दात् प्रातिपदिकसंज्ञायाम् सुप्रत्ययेऽनुबन्धलोपे 'हल्ङ्यादिना' सुलोपे रुत्वं प्रति षत्वस्याऽसिद्धत्वात् 'ससजुषो रुः' इत्यनेन रुत्वे

'र्वोरुपधाया दीर्घ इकः' इति सूत्रेण दीर्घे सकारस्य विसर्गे पिपठीः इति सिद्धम् ।

पिपठीःषु—पिपठिष् शब्दात् प्रातिपदिकसंज्ञायाम् सुपि प्रत्ययेऽनुबन्धलोपे रुत्वम्प्रति षत्वस्यासिद्धत्वात् 'ससजुषो रुः' इत्यनेन रुत्वे 'र्वोरुपधाया दीर्घ इकः' इति सूत्रेण दीर्घे रेफस्य विसर्गे 'वा शरि' इत्यनेन वैकल्पिके विसर्गस्य स्थाने विसर्गे कृते 'नुम्विसर्जनीयशर्व्यवायेऽपि' इत्यनेन सकारस्य षत्वे पिपठीःषु इति । विसर्गस्य विसर्गाभावपक्षे—'विसर्जनीयस्य सः' इति विसर्गस्य सकारे 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति विभक्तिसकारस्य षत्वे 'ष्टुना ष्टुः' इति सूत्रेण पूर्वसकारस्य ष्टुत्वे पिपठीष्षु इति सिद्धम् ।

चिकीर्षुः—चिकीर्ष् शब्दात् प्रातिपदिकसंज्ञायां सुप्यनुबन्धलोपे ,स्वादिष्वसर्वनामस्थाने' इत्यनेन पदसंज्ञायां पदत्वेन षत्वस्यासिद्धत्वात्सकारस्य 'रात्सस्य' इत्यनेन लोपे चिकीर्ष्+सु इति जाते 'रोःसुपि' इति सूत्रेण नियमात् रेफस्य विसर्गाभावे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य षत्वे 'अचो रहाभ्यां द्वे' इति सूत्रेण षकारस्य द्वित्वे प्राप्ते 'शरोऽचि इति सूत्रेण द्वित्वनिषेधे चिकीर्षु इति सिद्धम् ।

विद्वान्—विद्वस् शब्दात् प्रातिपदिकसंज्ञायां शसि प्रत्ययेऽनुबन्धलोपे 'उगिदचांसर्वनामस्थानेऽधातोः' इत्यनेन नुमि अनुबन्धलोपे 'सान्तमहतः संयोगस्य' इति सूत्रेण दीर्घे 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' -इत्यनेन सुलोपे विद्वान् स् इति जाते सकारस्य संयोगान्तलोपे सलोपस्यासिद्धत्वात् नलोपाभावे विद्वान् इति सिद्धम् ।

विदुषः—विद्वस् शब्दात् प्रातिपदिकसंज्ञायां शसि प्रत्ययेऽनुबन्धलोपे 'यचि भम्' इत्यनेन भसंज्ञायां 'वसोः सम्प्रसारणम्' इति सूत्रेण वकारस्य सम्प्रसारणे उकारे 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे विदुष्+अस् इति जाते 'आदेशप्रत्यययोः' इत्यनेन सकारस्य षत्वे विभक्तिसकारस्य रुत्वे विसर्गे च कृते संयोगे विदुषः इति सिद्धम् ।

विद्वद्भ्याम्—।६४। विद्वस् शब्दात् प्रातिपदिकसंज्ञायां भ्यामि विभक्तौ 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यनेन सकारस्थ दकारे विद्वद्भ्याम् इति सिद्धम् ।

पुमान्—।६१। पुंस् शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्यये विवक्षिते 'पुंसोऽसुङ्' इति सूत्रेण ङित्वात् सकारस्य स्थाने असुङादेशेऽनुबन्धलोपे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन अनुस्वारनिवृत्तौ ततः सुप्रत्ययेऽनुबन्धलोपे 'उगिदचां' इत्यादिना नुमागमेऽनुबन्धलोपे 'सान्तमहतः संयोगस्य' इत्यनेन दीर्घे सुलोपे सकारस्य संयोगान्तलोपे तस्यासिद्धत्वान्नलोपाभावे पुमान् इति सिद्धम् ।

पुंसु—(ई० ४४)—पुम्स्शब्दात् सुपि 'स्वादिष्वि' ति पदत्वात् संयोगान्तलोपे निमित्ताऽपायादनुस्वारस्याऽपि निवृत्तौ 'नश्च' इत्यनुस्वारे 'पुंसु' इति सिद्धम् ।

हे उशनन् (ई० ४६)—'उशनस्' शब्दात् सम्बोधनैकवचने 'उशनस् सु' इति दशायां 'हल्ङ्याब्भ्यः'—इति सोर्लोपे 'अस्य सम्बुद्धौ वानङ् नलोपश्च वा वाच्यः' इति वार्तिकेन अनङि नलोपे च कृते 'हे उशन' इति । वाग्रहणान्नलोपाभावे सोर्लोपे अनङि 'हे उशनन्' इति ! अनङाभावे सोर्लोपे सकारस्य रुत्वे विसर्गे 'हे उशनः' इति रूपत्रयं भवति ।

असकौ (ई० ५०)—अदस् शब्दाद् 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यकचि 'अदकस्' इति, तस्मात् सौ 'अदस औ सुलोपश्च' इत्यनेन 'तन्मध्यन्यायेन अदस्शब्देन अदकस्शब्दस्यापि ग्रहणात् नित्यमौत्वे प्राप्ते 'औत्वप्रतिषेधे साकच्कस्य वा वक्तव्यः' इति वार्तिकेन तन्निषेधे 'तदोः सः सौ' इति दस्य सत्वे सकारात्परस्याकारस्य 'सादुत्वं च' इत्यनेन उत्वे 'असुकस् स्' इति स्थिते त्यदाद्यत्वे पररूपे सस्य रुत्वे विसर्गे 'असुकः' इति । औत्वप्रतिषेधाऽभावे 'अदकस् स्' इति दशायां सस्य ओत्वे सुलोपे च विहिते दस्य सत्वे 'असकौ' इति उक्तं रूपं सिद्धम् । अत्र पक्षे 'सादुत्वं चे'ति न प्रवर्तते, प्रतिषेधसंनियोगसिद्धत्वात् ।

उशना । ६५ । उशनस् शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्ययेऽनुबन्धलोपे 'ऋदुशनपुरुदंसोऽनेहसां च' इति सूत्रेण ङित्वात् सकारस्य अनङादेशेऽनुबन्धलोपे 'सर्वनामस्थाने चासंबुद्धौ' इत्यनेन दीर्घे 'हल्ङ्यादिना' सुलोपे 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रेण नलोपे उशना इति सिद्धम् ।

उशनोभ्याम्—उशनस् शब्दात् प्रातिपदिकात् भ्याम् विभक्तौ पदत्वात्सकारस्य रुत्वे 'हशि च' इत्यनेन उत्वे 'आद्गुणः' इति गुणे उशनोभ्याम् इति सिद्धम् ।

असौ—अदस् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'अदस् औ सुलोपश्च' इति सूत्रेण सकारस्य स्थाने औकारादेशे सुलोपे च कृते अद+औ इति जाते 'तदोः सः सावनन्त्ययोः' इत्यनेन दकारस्य सकारे 'वृद्धिरेचि' इति सूत्रेण संयोगे असौ सिद्धम् ।

अमू—अदस् शब्दात् प्रातिपदिकसंज्ञायां औ विभक्तौ 'त्यदादीनामः' इत्यनेन अकारेऽन्तादेशे 'अतो गुणे' इति पररूपे मुत्वस्यासिद्धत्वात् पूर्वम् वृद्धौ ततः 'अदसोसेर्दादुदो मः' इति सूत्रेण आन्तरतम्यात् औकारस्य अकारे दकारस्य मकारे च कृते संयोगे अमू इति सिद्धम् ।

अमी । ३० । अदस् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तावनुबन्धलोपे 'त्यदादीनामः' इत्यनेनात्वे पररूपत्वे 'जसः शी' इति सूत्रेण जसः श्यादेशेऽनुबन्धलोपे 'आद्गुणः' इति गुणे 'एत ईद् बहुवचने' इति सूत्रेण एकारस्य ईकारे दस्य मकारे च कृते संयोगे अमी इति सिद्धम् ।

अमुना—अदस् शब्दात् प्रातिपदिकसंज्ञायां टाविभक्तावनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे 'अदसोऽसेर्दादुदो मः' इति सूत्रेण उत्वे दकारस्य मकारे कृते अमु+आ इति जाते 'पूर्वत्रासिद्धम्' इति सूत्रेण मुत्वस्यासिद्धत्वे प्राप्ते 'नमुने' इत्यनेन तन्निषेधे 'शेषो घ्यसखि' इत्यनेन घिसंज्ञायां 'आङो नाऽस्त्रियाम्' इति सूत्रेण ना भावे अमुना इति रूपम् ।

अमीभिः—अदस् शब्दात् प्रातिपदिकसंज्ञायां भिस्विभक्तौ त्यदाद्यत्वे पररूपत्वे च कृते 'अतो भिस ऐस्' इति सूत्रेण भिसः स्थाने ऐसादेशे प्राप्ते 'नेदमदसोरकोः' इति सूत्रेण निषेधे 'बहुवचने झल्येत्' इत्यनेन एत्वे 'एत ईद् बहुवचने' इत्यनेन एकारस्य ईकारे दकारस्य मकारे च कृते सकारस्य रुत्वे विसर्गे संयोगे अमीभिः इति सिद्धम्

अमुष्मै—अदस् शब्दात् प्रातिपदिकत्वात् ङे विभक्तौ अनुबन्धलोपे त्यदा-

द्यत्वे पररूपत्वे सर्वादित्वेन सर्वनामत्वात् 'सर्वनाम्नः स्मै' इति स्मै 'आदेशे अदसोऽसेर्दादुदो मः' इति मुत्वे षत्वे अमुष्मै इति सिद्धम् ।

अमुष्य—अदस् शब्दात् प्रातिपदिकत्वात् ङस् विभक्तौ अनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे 'टाङसिङसामिनात्स्याः' इति ङसः स्यादेशे मुत्वे षत्वे अमुष्य इति सिद्धम् ।

अमीषाम्—अदस् शब्दात् प्रातिपदिकसंज्ञायां षष्ठी बहुवचने आमि विभक्तौ त्यदाद्यत्वे पररूपत्वे च 'आमि सर्वनाम्नः सुट्' इति सूत्रेण सुडागमेऽनुबन्धलोपे 'बहुवचने झल्येत्' इति सूत्रेण एत्वे 'आदेशप्रत्यययोः' इति सकारस्य षत्वे 'एत ईद् बहुवचने' इत्यनेन वकारस्य ईकारे दकारस्य मकारे च कृते अमीषाम् इति सिद्धम् ।

अमीषु—। ५७ । अदस् शब्दात्प्रातिपदिकसंज्ञायां सुपि विभक्तावनुबन्धलोपे 'त्यदादीनामः' इत्यत्वे 'अतोगुणे' इति पररूपे 'बहुवचने झल्येत्' इतिसूत्रेण एत्वे अदे+सु इति जाते 'एत ईद् बहुवचने' इत्यनेन एकारस्य इकारे दकारस्य मकारे सकारस्य 'आदेशप्रत्यययोः' इति सूत्रेण षत्वे अमीषु इति सिद्धम् ।

'अदस्' शब्दस्य त्रिषु लिङ्गेषु रूपाणि (ई० ३४)—

पुल्लिङ्ग

असौ	अमू	अमी
अमुम्	अमू	अमून्
अमुना	अमूभ्यान्	अमीभिः
अमुष्मै	अमूभ्याम्	अमीभ्यः
अमुष्मात्	अमूभ्याम्	अमीभ्यः
अमुष्य	अमुयोः	अमीषाम्
अमुष्मिन्	अमुयोः	अमीषु

(त्यदादेः सम्बोधनं नास्ति)

स्त्रीलिङ्ग—

असौ	अमू	अमू

अमुम्	अमू	अमूः
अमुया	अमूभ्याम्	अमूभिः
अमुष्यै	अमूभ्याम्	अमूभ्यः
अमुष्याः	अमूभ्याम्	अमूभ्यः
अमुष्याः	अमुयोः	अमूषाम्
अमुष्याम्	अमुयोः	अमूषु

नपुंसके—

अदः	अमू	अमूनि
अदः	अमू	अमूनि

(शेषं पुंवत्)

इति हलन्तपुंल्लिंगप्रकरम् ।

अथ हलन्तस्त्रीलिंगप्रकरणम्

उपानत्—। ४७। उपपूर्वात् नह्धातोः सम्पदादित्वात् क्विपि 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' इत्यनेन पूर्वपदस्य दीर्घे क्विपो लोपे निष्पन्नाद् उपानह् शब्दात् प्रातिपदिकसंज्ञायां सु प्रत्ययेऽनुबन्धलोपे 'हो ढः' इति सूत्रेण हकारस्य ढकारे प्राप्ते तं बाधित्वा 'नहो धः' इत्यनेन हकारस्य धकारे तस्य जश्त्वे दकारे 'वावसाने' इति वैकल्पिके चर्त्वे 'हल्ङ्यादिना' सुलोपे उपानत् इति रूपम् । चर्त्वाभावपक्षे उपानद् इति सिद्धम् ।

उष्णिक्—उत्पूर्वात् स्निह्धातोः 'ऋत्विग्' इत्यादिना क्विन् प्रत्यये निपातनाद् उदो दकारस्य लोपे क्विनः सर्वापहारलोपे सस्य षत्वे नकारस्य णत्वे उष्णिह् इति जाते ततः कृदन्तत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां सुप्रत्यये तस्य लोपे 'क्विन् प्रत्ययस्य कुः' इत्यनेन कुत्वेन हकारस्य घकारे घकारस्य जश्त्वे चर्त्वे च कृते उष्णिक् । चर्त्वाभावपक्षे उष्णिग् इति सिद्धम् ।

द्यौः—दिव् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'दिव औत्' इत्यनेन वकारस्य औकारे 'इको यणचि' इत्यनेन यणि हलन्तात्परत्वाभावेन सुलोपाभावे सकारलोपे विसर्गे द्यौः इति सिद्धम् ।

गीः—गिर् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'हल्ङ्यादिना' सुलोपे 'र्वोरुपधाया दीर्घ इकः' इति सूत्रेण दीर्घे 'खरवसानयोर्विसर्जनीयः' इत्यनेन रेफस्य विसर्गे गीः इति सिद्धम् ।

चतसृणाम्—चतुर् शब्दात् प्रातिपदिकसंज्ञायां आमि विभक्तौ 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इत्यनेन चतसृ आदेशे 'ह्रस्वनद्यापो नुट्' इत्यनेन नुडागमेऽनुबन्धलोपे संयोगे चतसृ+नाम् इति जाते 'नामि' इत्यनेन दीर्घे प्राप्ते तं प्रबाध्य 'न तिसृचतसृ' इत्यनेन दीर्घनिषेधे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन नकारस्य णत्वे चतसृणाम् इति सिद्धम् ।

'चतुर्' शब्दस्य त्रिलिङ्गेषु रूपाणि (ई० ३१)—

('चतुर्' शब्दो नित्यं बहुवचनान्तः)

पुंल्लिङ्गे—

चत्वारः	चतुरः	चतुर्भिः
चतुर्भ्यः	चतुर्भ्यः	चतुर्णाम्
चतुर्षु	हे चत्वारः	

स्त्रीलिङ्गे—

चतस्रः	चतस्रः	चतसृभिः
चतसृभ्यः	चतसृभ्यः	चतसृणाम्
चतसृषु	हे चतस्रः	

नपुंसके—

चत्वारि	चत्वारि	चतुर्भिः
चतुर्भ्यः	चतुर्भ्यः	चतुर्णाम्
चतुर्षु	हे चत्वारि	

इयम् । ६५ । इदम् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'त्यदादीनामः' इत्येत्वे प्राप्ते तं बाधित्वा 'इदमो मः' इत्यनेन मकारस्य मकारे कृते 'यः सौ' इति सूत्रेण दकारस्य यकारे सुलोपे इयम् इति सिद्धम् ।

इमे—इदम् शब्दात् प्रातिपदिकत्वात् जसि विभक्तौ त्यदाद्यत्वे पररूपत्वे टापि सवर्णदीर्घे 'दश्च' इति दकारस्य मकारे सर्वादित्वात् 'जसः शी' इति श्यादेशे गुणे इमे इति सिद्धम् ।

अनया—इदम् शब्दात् प्रातिपदिकसंज्ञायां तृतीयैकवचने टा विभक्तौ अनुबन्धलोपे 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति सूत्रेण पररूपे 'अजाद्यतष्टाप्' इति टापि सवर्ण दीर्घे 'आङि चापः' इत्यनेन आपो एकारे 'एचोऽयवायावः' इति सूत्रेण अयादेशे 'अनाप्यकः' इत्यनेन इद्स्थाने अनादेशे च कृते अनया इति सिद्धम् ।

अस्याः—इदम् शब्दात् प्रातिपदिकसंज्ञायां ङसि विभक्तौ, अनुबन्धलोपे 'त्यदादीनामः' इत्यनेनात्वे 'अतो गुणे' इत्यनेन पररूपे 'अजाद्यतष्टाप्' इति सूत्रेण टापि प्रत्ययेऽनुबन्धलोपे 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति सूत्रेण स्याडागमेऽनुबन्धलोपे आपो ह्रस्वे च कृते इद+स्या+अस् इति जाते 'हलि लोपः' इति सूत्रेण इद्भागस्य लोपे सवर्णदीर्घे सकारस्य रुत्वे विसर्गे कृते अस्याः इति सिद्धम् ।

आसु—इदम् शब्दात् प्रातिपदिकसंज्ञायां सुप्यनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे च कृते 'अजाद्यतष्टाप्' इत्यनेन टापि अनुबन्धलोपे सवर्णदीर्घे 'इद+आ+सु इति जाते 'हलि लोपः' इत्यनेन इद्भागस्य लोपे आसु इति सिद्धम् ।

इदम् शब्दः त्यदादिगणपठितः । अतः स्वभावत एव त्यदादेः सम्बोधनं न भवति ।

स्या—त्यद् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे टापि अनुबन्धलोपे सवर्णदीर्घे 'तदोः सः सावनन्त्ययोः' इत्यनेन तकारस्य सकारे सुलोपे स्या इति सिद्धम् ।

अद्भिः—।६४। अप्शब्दात् प्रातिपदिकसंज्ञायां भिस् विभक्तौ 'अपो भिः' इति सूत्रेण पकारस्य स्थाने तकारे अत्+भिस् इति स्थिते 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन तकारस्य दकारे भिसः सकारस्य रुत्वे विसर्गे च कृते संयोगे अद्भिः इति सिद्धम् ।

अद्भ्यः—अप् शब्दात् प्रातिपदिकसंज्ञायां भ्यसि विभक्तौ अप्+भ्यस् इति जाते 'अपो भिः' इत्यनेन पकारस्य तकारे तस्य जश्त्वेन दकारे भ्यसः सकारस्य रुत्वे विसर्गे च कृते अद्भ्यः इति सिद्धम् ।

दृक्—दृश् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्यये तस्य लोपे 'व्रश्चभ्रस्ज' इत्यादिना शकारस्य षत्वे 'झलां जशोऽन्ते' इत्यनेन जश्त्वे डकारे 'त्यदादिषु दृशोऽनालोचने कञ्च' इति सूत्रेण दृशेः क्विनो विधानात् अत्र क्विनोऽभावेऽपि डकारस्य 'क्विन्प्रत्ययस्य कुः' इत्यनेन कुत्वेन गकारे 'वावसाने' इत्यनेन वैकल्पिके चर्त्वे दृक् इति रूपम् । चर्त्वाभावपक्षे दृग् इति सिद्धम् ।

दिक्—दिश्धातोः क्विन् प्रत्यये तस्य सर्वापहारलोपे प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे सकारस्य 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इत्यनेन लोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रेण शकारस्य षत्वे तस्य जश्त्वेन डकारे 'क्विन्प्रत्ययस्य. कुः' इत्यनेन कुत्वेन डकारस्य गकारे 'वावसाने' इति चर्त्वे दिक् इति । चर्त्वाभावपक्षे दिग् इति सिद्धम् ।

आशीः—आशिष् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्ययेऽनुबन्धलोपे सकारस्य 'हल्ङ्यादिना' लोपे षत्वस्यासिद्धत्वात् 'ससजुषो रुः'–इत्यनेन रुत्वे 'र्वोरुपधाया दीर्घ इकः' इति सूत्रेण दीर्घे रेफस्य विसर्गे आशीः इति सिद्धम् ।

अमू—अदस् शब्दात् प्रातिपदिकसंज्ञायां औ विभक्तौ 'त्यदादीनामः' इत्यनेनात्वे 'अतो गुणे' इति पररूपे 'अजाद्यतष्टाप्' इत्यनेन टापि अनुबन्धलोपे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे 'औङ आपः' इति सूत्रेण औस्थाने शी

आदेशेऽनुबन्धलोपे 'आद् गुणः' इति गुणे अदे + औ इति स्थिते 'अदसोऽसेर्दादुदो मः' इति सूत्रेण ऊत्वे मकारे च कृते अमू इति सिद्धम् ।

अमुया—अदस् शब्दात् प्रातिपदिकसंज्ञायां टाविभक्तावनुबन्धलोपे 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे 'अजाद्यतष्टाप्' इति सूत्रेण टापि अनुबन्धलोपे 'अकः सवर्णे दीर्घः' इति दीर्घे 'आङि चापः' इत्यनेन एकारे अयादेशे 'अदसोऽसेर्दादुदो मः' इति सूत्रेण उत्वे दकारस्य मकारे च कृते अमुया इति सिद्धम् ।

अमुष्यै—अदस् शब्दात् प्रातिपदिकसंज्ञायां ङे विभक्तावनुबन्धलोपे 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे 'अजाद्यतष्टाप्' इति टाप्यनुबन्धलोपे दीर्घे 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति सूत्रेण स्याडागमेऽनुबन्धलोपे आपो ह्रस्वे च कृते अद + स्या + ए इति जाते 'वृद्धिरेचि' इत्यनेन वृद्धौ अद + स्यै इति जाते 'अदसोऽसेर्दादुदो मः' इति सूत्रेण उत्वे दकारस्य ककारे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य षत्वे अमुष्यै इति सिद्धम् ।

अमूषाम्—अदस् शब्दात् प्रातिपदिकसंज्ञायां आमि विभक्तौ 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इति पररूपे टापि दीर्घे 'आमि सर्वनाम्नः सुट्' इति सूत्रेण सुडागमेऽनुबन्धलोपे अदा + स + आम् इति जाते 'अदसोऽसेर्दादुदो मः' इति सूत्रेण आन्तरतम्यात् आकारस्य ऊत्वे दकारस्य मकारे च कृते अमू + स + आम् इति जाते सकारस्य 'आदेशप्रत्यययोः' इत्यनेन षत्वे संयोगे अमूषाम् इति सिद्धम् ।

अदश्शब्दस्य रूपाणि ।६१।

असौ	अमू	अमूः
अमुम्	अमू	अमूः
अमुया	अमूभ्याम्	अमूभिः
अमुष्यै	,,	अमूभ्यः
अमुष्याः	,,	,,
,,	अमुयोः	अमूषाम्
अमुष्याम्	,,	अमूषु

इति हलन्तस्त्रीलिंगप्रकरणम्

अथ हलन्तनपुंसकलिंगप्रकरणम्

स्वनडुत्—स्वनडुह् शब्दात् प्रातिपदिकसंज्ञायां सुप्रत्यये 'स्वमोर्नपुंसकात्' इति सूत्रेण सोर्लुकि 'वसुस्रंसुध्वंस्वनडुहां दः' इति सूत्रेण हकारस्य दकारे 'वावसाने' इत्यनेन वैकल्पिके चर्त्वे स्वनडुत् इति। पक्षे चर्त्वाभावे-स्वनडुद् इति सिद्धम्।

स्वनड्वांहि—स्वनडुह् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ 'जश्शसोः शि' इत्यनेन जसः श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सूत्रेण सर्वनामस्थानसंज्ञायां 'चतुरनडुहोरामुदात्तः' इति आमागमेऽनुबन्धलोपे 'इको यणचि' इत्यनेन उकारस्य यणि हकारस्य 'नपुंसकस्य झलचः' इत्यनेन नुमागमेऽनुबन्धलोपे 'नश्चापदान्तस्य झलि' इति सूत्रेण नकारस्यानुस्वारे स्वनड्वांहि इति सिद्धम्।

चत्वारि—चतुर् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ 'जश्शसोः शि' इत्यनेन जसः श्यादेशे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'चतुरनडुहोरामुदात्तः' इत्यनेन आमागमेऽनुबन्धलोपे यणि झलन्तत्वाभावात् नुमोऽभावे चत्वारि इति सिद्धम्।

इमानि—इदम् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ 'जश्शसोः शि' इत्यनेन जसः श्यादेशे 'त्यदादीनामः' इत्यत्वे 'अतो गुणे' इत्यनेन पररूपे 'दश्च' इति सूत्रेण दकारस्य मकारे 'नपुंसकस्य झलचः' इत्यनेन नुमागमेऽनुबन्धलोपे 'सर्वनामस्थाने चासम्बुद्धौ' इत्यनेन दीर्घे इमानि इति सिद्धम्।

एनत्—(ई० ४०) इदम्शब्दात् सौ 'अन्वादेशे नपुंसके एनद् वक्तव्यः' इति वार्तिकेन इदम्शब्दस्य एनदादेशे 'स्वमोर्नपुंसकात्' इति सोर्लुकि जश्त्वे चर्त्वे 'एनत्' इति। चर्त्वाऽभावे 'एनद्' इति।

एनयोः—इदम् शब्दात् प्रातिपदिकसंज्ञायां ओसि विभक्तौ 'द्वितीयाटौस्वेन' इति सूत्रेण इदमो एनादेशे 'ओसि च' इति सूत्रेण एत्वे अयादेशे विभक्तिसकारस्य रुत्वे विसर्गे एनयोः इति सिद्धम्।

अह्नी—अहन् शब्दात् प्रातिपदिकसंज्ञायां औविभक्तौ 'औङ आपः' इति

सूत्रेण औकारस्य स्थाने श्यादेशेऽनुबन्धलोपे 'यचि भम्' इति भसंज्ञायां 'विभाषा ङिश्योः' इत्यनेन पाक्षिके अल्लोपे अह्नी इति रूपम् । अल्लोपाभावपक्षे अहनी इति सिद्धम् ।

अहानि—अहन् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ 'जश्शसोः शि' इत्यनेन जसः श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थान-संज्ञायां 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण दीर्घे अहानि इति सिद्धम् ।

अहोभ्याम् ।६१। अहन् शब्दात् प्रातिपदिकसंज्ञायां भ्यामि विभक्तौ 'स्वादिष्वसर्वनामस्थाने' इति सूत्रेण पदसंज्ञायां पदत्वात् 'अहन्' इति सूत्रेण नकारस्य रुत्वे 'हशि च' इति उत्वे "आद् गुणः' इत्यनेन गुणे अहोभ्याम् इति ।

अहःसु—अहन् शब्दात् प्रातिपदिकसंज्ञायां सुपि विभक्तावनुबन्धलोपे 'अहन्' इत्यनेन नकारस्य रुत्वे 'खरवसानयोर्विसर्जनीयः' इत्यनेन विसर्गे अहःसु इति सिद्धम् ।

सुपन्थानि—सुपथिन् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ 'जश्शसोः शि' इत्यनेन जसः श्यादेशे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'इतोऽत् सर्वनामस्थाने' इति सूत्रेण इकारस्य अकारे 'थोन्थः' इत्यनेन थस्य न्थादेशे 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण दीर्घे सुपन्थानि इति सिद्धम् ।

ऊर्न्जि—ऊर्जशब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ जसः श्यादेशेऽनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति सूत्रेण मित्वादन्त्यादचः ऊकारात्परे नुमागमेऽनुबन्धलोपे नरजानां संयोगे श्चुत्वाभावे ऊर्न्जि इति सिद्धम् ।

गवाक्—गोपूर्वादञ्चधातोः 'ऋत्विग्' इत्यादिना क्विन् प्रत्यये क्विनः सर्वापहारलोपे प्रातिपदिकसंज्ञायां सुप्रत्यये तस्य 'लुकि अनिदितां हल उपधायाः क्ङिति' इत्यनेन नकारस्य लोपे 'अवङ् स्फोटायनस्य' इत्यनेन वैकल्पिके अवङादेशे दीर्घे 'क्विनप्रत्ययस्य कुः' इत्यनेन कुत्वे 'झलां जशोऽन्ते' इति जश्त्वे पाक्षिके 'वावसाने' इति चर्त्वे गवाक् इति । चर्त्वाभावपक्षे गवाग् इति रूपद्वयम् ।

अवङभावपक्षे 'सर्वत्र विभाषा गोः' इत्यनेन पाक्षिके प्रकृतिभावे गो अक्,

गो अग् इति रूपद्वयम् । प्रकृतिभावपक्षे 'एङः पदान्तादति' इति सूत्रेण पूर्वरूपे गोऽक् गोऽग् इति रूपद्वयम् सिद्धम् । पूजायां तु 'नाञ्चेः पूजायाम्' इति सूत्रेण नलोपस्य निषेधात् चकारस्य 'संयोगान्तस्य लोपः' इति लोपे नकारस्य 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन ङकारे अवङि गवाङ् इतिरूपम् । प्रकृतिभावे गो अङ् इति । पूर्वरूपे गोऽङ् इति रूपं सिद्धम् ।

गोचा–गोपूर्वादञ्चधातोः क्विनि प्रत्यये तस्य सर्वापहारलोपे ततः प्रातिपदिकसंज्ञायां तृतीयैकवचने टाविभक्तावनुबन्धलोपे 'अनिदितां हल उपाधायाः क्ङिति' इत्यनेन नलोपे 'अचः' इति सूत्रेण अकारस्य लोपे संयोगे गोचा इति रूपम् ।

पूजायां तु 'नाञ्चेः पूजायाम्' इत्यनेन नलोपस्य निषेधे 'अवङ्स्फोटायनस्य' इति 'सर्वत्र विभाषा गोः' इति सूत्रद्वयाभ्यां अवङादेशे गवाञ्चा । प्रकृतिभावपक्षे गो अञ्चा । पररूपपक्षे गोऽञ्चा इति त्रीणि सिद्धयन्ति ।

ददन्ति ।५९। ददत् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ 'जश्शसोः शि' इत्यनेन जसः श्यादेशेऽनुबन्धलोपे 'वा नपुंसकस्य' इति सूत्रेण वैकल्पिके नुमागमेऽनुबन्धलोपे नकारस्यानुस्वारे परसवर्णे च कृते ददन्ति इति रूपम् ।नुमोऽभावपक्षे ददति इति सिद्धम् ।

तुदन्ती—।५७। तुदत् शब्दात् प्रातिपदिकिसंज्ञायां औ विभक्तौ 'औङ आपः' इत्यनेन औङः श्यादेशेऽनुबन्धलोपे 'आच्छीनद्योर्नुम्' इति सूत्रेण वैकल्पिके नुमागमेऽनुबन्धलोपे तुदन्ती इति रूपम् । नुमोऽभावे तुदती इति सिद्धम् ।

दीव्यन्ती—दीव्यत् शब्दात् प्रातिपदिकसंज्ञायां औविभक्तौ 'औङ आपः' इत्यनेन औङः श्यादेशेनुबन्धलोपे 'शप्श्यनोर्नित्यम्' इति सूत्रेण नित्यं नुमागमेऽनुबन्धलोपे दीव्यन्ती इति सिद्धम् ।

पचन्ती—।६४। पचत् शब्दात् प्रातिपदिकसंज्ञायां औविभक्तौ 'औङ आपः' इत्यनेन औङः श्यादेशेऽनुबन्धलोपे 'शप्श्यनोर्नित्यम्' इति सूत्रेण नित्यं नुमागमेऽनुबन्धलोपे नकारस्यानुस्वारे परसवर्णे च कृते पचन्ती इति सिद्धम् ।

धनूंषि—धनुष् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ 'जश्शसोः शि' इति सूत्रेण जसः श्यादेशेऽनुबन्धलोपे 'नपुंसकस्य झलचः' इत्यनेन नुम्यनुबन्धलोपे

षत्वस्यासिद्धत्वात् सान्तत्वेन 'सान्तमहतःसंयोगस्य' इत्यनेन दीर्घे 'नश्चापदान्तस्य झलि' इत्यनेन नकारस्य अनुस्वारे 'नुम्विसर्जनीयस्य शर्व्यवायेऽपि' इत्यनेन षत्वे धनूंषि इति सिद्धम् ।

पयांसि ।६५। पयस् शब्दात् प्रातिपदिकसंज्ञायां जसि विभक्तौ 'जश्शसोः शिः' इत्यनेन जसः श्यादेशेऽनुबन्धलोपे 'नपुंसकस्य झलचः' इत्यनेन नुमागमेऽनुबन्धलोपे 'सान्तमहतः संयोगस्य' इति सूत्रेण दीर्घे नकारस्य अनुस्वारे संयोगे पयांसि इति सिद्धम् ।

सुपुमांसि—सुपुंस् शब्दात् प्रातिपदिकसंज्ञायां प्रथमाबहुवचने जसि विभक्तौ 'जश्शसोः शि' इत्यनेन जसः श्यादेशेऽनुबन्धलोपे सुपुंस्+इ इति जाते 'शि सर्वनामस्थानम्' इत्यनेन सर्वनामस्थानसंज्ञायां ततः 'पुंसोऽसुङ्' इति सूत्रेण असुङादेशेऽनुबन्धलोपे 'नपुंसकस्य झलचः' इत्यनेन नुमागमेऽनुबन्धलोपे 'सान्तमहतः संयोगस्य' इत्यनेन दीर्घे 'नश्चापदान्तस्य झलि' इति सूत्रेणानुस्वारे कृते सुपुमांसि इति सिद्धम् ।

गवाक्शब्दस्य रूपाणि—गवाक्शब्दस्य क्लीबे अर्चायां गतौ च, असन्धि प्रकृतिभाव, अवङादेशपक्षे पूर्वरूपपक्षे च नवाधिकशतं (१०९) रूपाणि भवन्ति इति विदुषां मतम् । तत्र सौ, अमि, सुपि च प्रत्येकं नव-भादौ षट्के भ्यामि, भिसि, भ्यसि प्रत्येकं षड्, जसि शसि च प्रत्येकं त्रीणि, शेषे दशके वचने प्रत्येकं चत्वारि रूपाणि भवन्ति इति विभावय जानीहि इत्यर्थिका गवाक्शब्दस्य रूपसंख्याबोधिका कारिका कौमुद्यामुक्ता संक्षेपाय इहोच्यते ।

गवाक्शब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम् ॥
स्वम्सुप्सु नव, षड् भादौ षट्के, स्युस्त्रीणि जश्शसोः ।
चत्वारि शेषे दशके रूपाणीति विभावय ।

'गवाक्' शब्दस्य रूपाणि—

प्रथमायां (१६) गवाक्-गवाक् गोअक्-गोअग्-गोऽक् गोऽग्, गवाङ्-गोअङ् गोऽङ् (९) गोची–गवाञ्ची-गोअञ्ची-गोऽञ्ची (४) गवाञ्चि-गोअञ्चि

गोञ्चि-(३)

द्वितीयायां (१६)—पूर्ववत् ।

तृतीयायां (१६)–गोचा-गवाञ्चा-गोअञ्चा-गोञ्चा (४)। गवाग्भ्याम्–गोअग्भ्याम् गोऽग्भ्याम्, गवाङ्भ्याम–गोअङ्भ्याम्–गोङ्भ्याम् (६)। गवाग्भिः-गोअग्भिः–गोऽग्भिः, गवाङ्भिः–गोअङ्भिः गोऽङ्भिः (६)।

चतुर्थ्याम् (१६)–गोचे-गवाञ्चे-गोअञ्चे-गोऽञ्चे (४)। गवाग्भ्याम्-गोअग्भ्याम्-गोऽग्भ्याम्, गवाङ्भ्याम्-गोअङ्भ्याम्-गोऽङ्भ्याम् (६) गवाग्भ्यः-गोअग्भ्यः–गोऽग्भ्यः, गवाङ्भ्यः गोअङ्भ्यः गोऽङ्भ्यः (६)।

पञ्चम्यां (१६)—गोचः–गवाञ्चः–गोअञ्चः–गोऽञ्चः (४)। गवाग्भ्याम्-गोअग्भ्याम्-गोऽग्भ्याम्, गवाङ्भ्याम्–गोअङ्भ्याम्–गोऽङ्भ्याम् (६)। गवाग्भ्यः–गोअग्भ्यः, गोऽग्भ्यः, गवाङ्भ्यः–गोअङ्भ्यः–गोऽङ्भ्यः (६)।

षष्ठ्यां—(१२)—गोचः-गवाञ्चः–गोअञ्चः–गोऽञ्चः (४)। गोचोः-गवाञ्चोः-गोअञ्चोः-गोऽञ्चोः (४)। गोचाम्-गवाचाम्-गोअञ्चाम्-गोऽञ्चाम् (४)।

सप्तम्यां (१७)—गोचि-गवाञ्चि-गोअञ्चि-गोऽञ्चि (४)। गोचोः-गवाञ्चोः गोअञ्चोः–गोऽञ्चोः (४)। गवाक्षु–गोअक्षु–गोऽक्षु, गवाङ्क्षु–गोअङ्क्षु–गोऽङ्क्षु, गवाङ्षु–गोअङ्षु (९)। (सर्वं मिलित्वा १०९ रूपाणि भवन्ति ।)

इति हलन्तनपुंसकलिंगप्रकरणम् ।

अथाऽव्ययप्रकरणम्

स्वरादिनिपातमव्ययम्—स्वर् आदि गणपठितशब्द और निपात शब्दों की अव्यय संज्ञा होती है। उदाहरण–जैसे स्वर् अन्तर् आदि ।

स्मारं स्मारम्—स्मृधातोः 'आभीक्ष्ण्ये णमुल् च' इत्यनेन णमुलि, अनुबन्धलोपे 'अचोञ्णिति' इति सूत्रेण वृद्धौ रपरे 'नित्यवीप्सयोः' इत्यनेन द्वित्वे कृदन्तत्वात् प्रातिपदिकसंज्ञायाम् सुविभक्तौ मान्तकृदन्तत्वात् 'कृन्मेजन्तः'

इत्यनेन अव्ययसंज्ञायाम् 'अव्ययादाप् सुप:' इत्यनेन सुलोपे संयोगे स्मारं स्मारम् इति सिद्धम् ।

जीवसे—जीवप्राणधारणे इत्यस्मात् 'तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैङ्तवेन:' इति सूत्रेण असे प्रत्यये प्रातिपदिकत्वात् सु विभक्तौ तस्य 'कृन्मेजन्त:' इति सूत्रेण अव्ययसंज्ञायाम् 'अव्ययादाप् सुप:' इत्यनेन सुलोपे संयोगे जीवसे इति सिद्धम् ।

पिबध्यै—पाधातो: 'तुमर्थे सेसेनसेअ' इत्यादिना शध्यै प्रत्ययेऽनुबन्धलोपे शित्वात् 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायाम् 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदा:' इति सूत्रेण पास्थाने पिबादेशे कृदन्तत्वात् प्रातिपदिकसंज्ञायाम् सुविभक्तौ 'कृन्मेजन्त:' इत्यनेन अव्ययसंज्ञायाम् सुलोपे संयोगे पिबध्यै इति सिद्धम् ।

उदेतो:—उत्पूर्वात् इण् धातो: 'भावलक्षणे स्थेण्कृञ्वादिचरिहुतमिजनिभ्यस्तोसुन्' इति तोसुन् प्रत्ययेऽनुबन्धलोपे गुणे कृदन्त्वात्प्रातिपदिकत्वेन सुपि तस्य 'क्त्वातोसुन्कसुन:' इत्यनेन लोपे सस्य रुत्वे विसर्गे संयोगे उदेतो: इति सिद्धम् ।

अधिहरि—हरि ङि अधि इति विग्रहे 'अव्ययं विभक्ति' इत्यादिना समासे समासत्वात् प्रातिपदिकसंज्ञायां 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन अधि इत्यस्य उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन अधे: पूर्वप्रयोगे 'सुपो धातुप्रातिपदिकयो:' इत्यनेन सुपो लुकि 'एकदेशविकृतमनन्यवत्' इति परिभाषया सुबुत्पत्तौ 'अव्ययीभावश्च' इत्यव्ययत्वम् सुपो लुकि अधिहरि इति सिद्धम् ।

तत्र शालायाम् (ई० ५२)—तत्र त्यस्य अव्ययत्वात् 'अव्ययादाप् सुप:' इति आपो सुपश्च लुकि । स्त्रीत्वबोधनाय प्रकृते 'शालायाम्' इति योजितम् ।

अत्युच्चैसौ (ई० ४६)—उच्चैरतिक्रान्त: इति विग्रहे 'अत्यादय: क्रान्ताद्यर्थे द्वितीयया' इति समास: । अत्र समासाद्विहितस्य सुप: अव्ययभूतादुच्चैश्शब्दात् परत्वेऽपि ततो विहितत्वाऽभावात् 'अव्ययादाप् सुप:' इति न लुक् । अत्युच्चैरिति समुदायस्य तु नाव्ययत्वम्, स्वरादिगणे उच्चैश्शब्दस्य केवलस्य पाठात् ।

ननु स्वरादिगणे केवलोच्चैश्शब्दस्य पाठेऽपि तदन्तविधिना 'स्वरादिनिपातान्मन

व्ययम् इत्यनेन अत्युच्चैश्शब्दस्याऽपि अव्ययसंज्ञा कुतो नेति चेन्न, 'गौणमुख्ययो-र्मुख्ये कार्यं सम्प्रत्ययः' इति न्यायस्य जागरूकत्वात् ।

अव्ययलक्षणम् (ई० २५)—

'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।'

त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु, सर्वेषु वचनेषु, च यत् न व्येति=विकारं न प्राप्नोति, किन्तु सदृशम्=एकप्रकारकम् एव भवति, तद् 'अव्ययम्' इत्यर्थः ।

पिधानम्—पिधानम् इत्यव्ययपदम् । अत्र 'भागुरि' नामकाचार्यमते अपी-त्युपसर्गस्याऽकारस्य लोपे 'अव्ययादाप्सुपः' इति सुलोपे च कृते 'पिधानम्' इति सिद्धं भवति । अन्यमते तु अपिधानम् इति । तदाह शूले—

'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ।।' इति

।। इति अव्ययप्रकरणम् ।।

अथ तिङन्ते भ्वादिप्रकरणम्

लः कर्मणि चभावे चाकर्मकेभ्यः । वाक्यद्वयात्मकमिदं सूत्रम् । तत्र 'लः कर्मणि च' इत्येकं वाक्यम्, 'भावे चाकर्मकेभ्यः' इति द्वितीयं वाक्यम् । चकारेण 'कर्तरि कृत्' इत्यतः कर्तरीत्यनुवर्तते । तत्र उभयवाक्ये चकारेण बोध्यते । पूर्वो योगः सकर्मकविषयकः, द्वितीयो योगः अकर्मकविषयकः ।

तेन लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युः, इति प्रथमवाक्यार्थः ।
लकाराः अकर्मकेभ्यो भावे कर्तरि च स्युः इति द्वितीयवाक्यार्थः ।।

क्रियापदं कर्तृपदेन युक्तं व्यपेक्षते यत्र किमित्यपेक्षाम् ।
सकर्मकं तं सुधियो वदन्ति शेषास्ततो धातुरकर्मकः स्यात् ।।

लः कर्मणि च—सकर्मक धातु से कर्म और कर्ता में लकार हो और अकर्मक धातु से भाव और कर्ता में लकार हो।

वर्तमाने लट्—वर्तमान कालिक जो क्रिया तद्वाचकत्वेन विवक्षित जो धातु उससे लट्लकार होता है। ऐसा अर्थ करने से उन लोगों की शङ्काओं का निराश हो गया जो लोग कहते थे कि वर्तमान काल तो एक क्षण होगा जिसमें कोई क्रिया हो ही नहीं सकती; होगी भी तो उस क्रिया का प्रत्यक्ष नहीं होगा, अतः वर्तमान काल अव्यवहार्य है।

युष्मद्युपपदे—लकार का वाच्य जो कारक (कर्त्ता या कर्म) तद्वाचक युष्मद् शब्द के अप्रयुज्यमान या प्रयुज्यमान रहते मध्यम पुरुष होता है।

भवति—सत्तायां भू इत्यस्य 'भूवादयो धातवः' इत्यनेन धातुसंज्ञायां धातुत्वात् 'वर्त्तमाने लट्' इति सूत्रेण लटि लकारेऽनुबन्धलोपे लकारस्य स्थाने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताऽऽतांझथासाथान्ध्वमिड्वहिमहिङ्'इति सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्ययेऽनुबन्धलोपे 'तिङ् शित्सार्वधातुकम्' इति सूत्रेण तिपः सार्वधातुकसंज्ञायां 'भूसुवोस्तिङि' इत्यनेन गुणनिषेधे 'कर्त्तरि शप्' इति सूत्रेण शपि अनुबन्धलोपे शपः सार्वधातुकत्वेन 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे 'एचोऽयवायावः' इत्यनेन अयादेशे संयोगे भवति इति सिद्धम्।

भवन्ति—भू धातोः लटि झौ 'झोन्तः' इति अन्तादेशे शपि गुणे अवादेशे अतो गुणे' पररूपे सिद्धम्।

भवामि—भूधातोर्लटि मिपि शपि गुणे अवादेशे 'अतो दीर्घो यञि' इति दीर्घे भवामि इति सिद्धम्।

परोक्षे लिट्—भूत अनद्यतन परोक्ष अर्थ में विद्यमान धातु से लिट्लकार होता है। अर्थात् परोक्षक्रियाविशिष्ट जो कर्ता तद्वृत्ति जो भूतानद्यतनकालिक क्रिया तद्वाचकत्वेन विवक्षित जो धातु उससे लिट् लकार हो।

बभूव। ६५। भू धातोः 'परोक्षे लिट्' इति सूत्रेण लिटचनुबन्धलोपे लस्य स्थाने 'तिप्तस्झिसिप्थस्थमिप्वस्मस्' इति सूत्रेण प्रथमपुरुषैकवचने तिप्प्रत्यये 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण तिपो णलादेशेऽनुबन्धलोपे

'नित्यत्वाद्गुणवृद्धी बाधित्वा 'भुवो वुग् लुङ्लिटोः' इति सूत्रेण वुगागमेऽनुबन्धलोपे भूव्+अ इति स्थिते 'वृक्षःप्रचलन् सहावयवैः प्रचलति' इति न्यायेन 'व्यपदेशिवदेकस्मिन्' इति परिभाषया भूव् इत्यस्य एकाचः प्रथमत्वेन धात्ववयवत्वेन च भूव् इत्यस्य 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वे 'पूर्वोभ्यासः' इति सूत्रेण प्रथमस्य भूव इत्यस्याभ्याससंज्ञायां 'हलादिःशेषः' इति सूत्रेण वकारस्य लोपे भू+भूव्+अ इति जाते 'ह्रस्वः' इत्यनेन अभ्यासस्य ह्रस्वे 'भवतेरः' इति सूत्रेण अभ्यासोकारस्य अकारे 'अभ्यासे चर्च' इत्यनेन पूर्वभकारस्य जश्त्वेन वकारे कृते संयोगे बभूव इति सिद्धम् ।

बभूविथ—भूधातोः 'परोक्षे लिट्' इत्यनेन लिटि, अनुबन्धलोपे लस्य स्थाने मध्यमपुरुषैकवचने सिपि तस्य 'लिट् च' इति सूत्रेण आर्धधातुकसंज्ञायां 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन सिपः थलादेशेऽनुबन्धलोपे 'आर्धधातुकस्येड्वलादे' इति सूत्रेण थकारस्य इडागमेऽनुबन्धलोपे भू+इ+थ इति जाते 'भुवो वुग्लुङ्लिटोः' इत्यनेन वुगागमेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे भूव्+इ+थ इति भूते 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'हलादिःशेषः इति वकारलोपे 'ह्रस्वः' इत्यनेन अभ्यासस्य ह्रस्वे 'भवतेरः इति सूत्रेण उकारस्य अकारे 'अभ्यासे चर्च' इति सूत्रेण अभ्यासभकारस्य जश्त्वेन बकारे संयोगे बभूविथ इति सिद्धम् ।

भविता । ६० । भूधातोः 'अनद्यतने लुट्' इत्यनेन लुटि अनुबन्धलोपे लस्यस्थाने 'तिप्तिस्झि' इत्यादिना प्रथमपुरुषैकवचने तिप् प्रत्ययेऽनुबन्धलोपे 'कर्तरि शप्' इत्यनेन शपि प्राप्ते तं प्रबाध्य 'स्यतासी लृलुटोः' इत्यनेन तासि 'आर्धधातुकं शेषः' इत्यनेन तासः आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे भू+इ+तास्+ति इति जाते 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण तिपो डादेशेऽनुबन्धलोपे डित्वसामर्थ्याद् अभस्यापि टेर्लोपे भविता इति सिद्धम् ।

भवानि । भूधातोः 'लोट च' इति सूत्रेण 'आशिषि लिङ्लोटौ' इत्यनेन लोट् लकारेऽनुबन्धलोपे लकारस्य 'स्थाने तिप्तस्झि' इत्यादिना उत्तमपुरुषैकवचने

मिप्प्रत्यये 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शप्यनुबन्धलोपे शपः सार्वधातुकत्वेन 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इति सूत्रेण अवादेशे 'लोटो लङ्वत्' इत्यनेन लङ्कार्यातिदेशेन 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन मिपः स्थानेऽमादेशे प्राप्ते तं प्रबाध्य 'मेर्निः' इत्यनेन मेर्न्यादशे कृते इकारोच्चारणसामर्थ्यात् एकारस्योत्वाभावे 'आडुत्तमस्य पिच्च' इति सूत्रेण आडागमेऽनुबन्धलोपे 'अतो दीर्घो यञि' इति सूत्रेण दीर्घे च कृते भवानि इति सिद्धम् ।

प्रभवाणि—'ते प्राग्धातोः' इति नियमादत्र प्रपूर्वकात् भूधातोर्लोटि तस्य स्थाने मिपि, शपि, 'शकारपकारयोर्लोपे' शपः सार्वधातुकसंज्ञायां सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अवादेशे प्रभव+मि इति स्थिते 'मेर्निः' इत्यनेन मेर्न्यादेशे कृते आडागमेऽनुबन्धलोपे 'अतो दीर्घो यञि' इति दीर्घे 'आनि लोट्' इत्यनेन नकारस्य णत्वे प्रभवाणि इति सिद्धम् ।

अभवन्—भूधातोः 'अनद्यतने लङ्' इति सूत्रेण लङि तत्स्थाने प्रथमपुरुषबहुवचने झिप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे अ+भू+झि इति जाते 'कर्तरि शप्' इति शपि, अनुबन्धलोपे शपः सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणेऽवादेशे, पररूपे ततः 'झोऽन्तः' इति झस्यान्तादेशे 'इतश्च' इति इकारलोपे 'संयोगान्तस्य लोपः' इत्यनेन तकारस्य लोपेः संयोगे अभवन् इति सिद्धम् ।

भवेत् । ५६ । भूधातोः 'विधिनिमन्त्रणाऽमन्त्रणाऽधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इत्यनेन लिङि अनुबन्धलोपे लकारस्य स्थाने प्रथमपुरुषैकवचने तिपि 'कर्त्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणेऽवादेशे 'इतश्च' इति इकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुटि अनुबन्धलोपे 'सुट् तिथोः' इति सुटि अनुबन्धलोपे 'लिङः सलोपोऽनन्त्यस्य' इति सकारस्य लोपे 'अतो येयः' इत्यनेन यास् इत्यस्य इयादेशे 'आद्गुणः' इत्यनेन गुणे 'लोपो व्योर्वलि' इत्यनेन यकारस्य लोपे भवेत् इति सिद्धम् ।

भवेयुः—भूधातोः लिङि तत्स्थाने झिप्रत्यये 'कर्तरि शप्' इति शपि, अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणेऽवादेशे 'झोन्तः' इत्यनेन झस्यान्तादेशे प्राप्ते तं बाधित्वा 'झेर्जुस्' इति सूत्रेण जुसादेशेऽनुबन्धलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुटि, अनुबन्धलोपे लिङःसलोपोऽनन्त्यस्य' इत्यनेन यासः सकारस्य लोपे प्राप्ते 'अतो येयः' इति यास्इत्यस्य इयादेशे ततः 'आद् गुणः' इत्यनेन गुणे सकारस्य रुत्वे विसर्गे च कृते भवेयुः इति सिद्धम् ।

भूयात्—भूधातोः 'आशिषि लिङ्लोटौ' इति सूत्रेण आशीर्लिङ अनुबन्धलोपे तस्य स्थाने 'तिप्तस्झि' इत्यादिना तिप्प्रत्ययेऽनुबन्धलोपे 'लिङाशिषि' इत्यनेन तिपः आर्धधातुकसंज्ञायां तेन 'कर्तरि शप्' इति शपोऽभावे 'इतश्च' इति सूत्रेण तिपः इकारस्य लोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुटि 'सुट्तिथोः' इति सुटि च अनुबन्धलोपे 'किदाशिषि' इत्यनेन यासुटः कित्वे 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सकारयोः लोपे 'सार्वधातुकार्धधातुकयोः इत्यनेन गुणे प्राप्ते 'क्ङिति च' इति सूत्रेण तस्य निषेधे भूयात् इति सिद्धम् ।

भूयास्ताम्—भूधातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशिषि लिङि अनुबन्धलोपे लकारस्य स्थाने तस् प्रत्यये 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तसः स्थाने तामादेशे 'लिङाशिषि' इत्यनेन आर्धधातुकसंज्ञायां ततः शपोऽभावे 'यासुट् परस्मैपदेषूदात्तोङिच्च' इत्यनेन यासुडागमेऽनुबन्धलोपे 'सुट् तिथोः' इत्यनेन सुटचनुबन्धलोपे भू+यास्+स्+ताम् इति जाते 'किदाशिषि' इत्यनेन यासुटः कित्त्वेन गुणनिषेधे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन यासुटः सकारस्य लोपे संयोगे भूयास्ताम् इति सिद्धम् ।

अभूत्—भूधातोः 'लुङ्' इति सूत्रेण लुङि तस्य स्थाने तिप्तस्झिसिप्थस्थमिब्वस्मस् ताऽतांझथासाथांध्वमिड्वहिमहिङ्' इत्यनेन तिपि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'इतश्च' इति तिपः इकारस्य लोपे 'कर्तरि शप्' इति सूत्रेण च्लेः स्थाने सिचि प्रत्यये अ+भू स +त् इति जाते, 'गातिस्थाघूपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचो लुकि

'तिङ्शित्सार्वधातुकम्' इत्यनेन तिपः सर्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे प्राप्ते 'भूसुवोस्तिङि' इति सूत्रेण निषेधे अभूत् इति सिद्धम् ।

अभूवन्—।५७। भूधातोः 'लुङ्' इति लुङि अनुबन्धलोपे लकारस्य स्थाने 'तिप्तस्झि' इत्यादिना झिप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे अ+भू+झि इति जाते शपं बाधित्वा 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'च्लेः सिच्' इति सूत्रेण च्लेः सिजादेशे सिचः 'गतिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सूत्रेण सिचो लुकि 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे प्राप्ते लस्य 'भूसुवोस्तिङि' इति गुणनिषेधे 'झोऽन्तः' इत्यनेन झस्यान्तादेशे 'इतश्च' इति इकारस्य लोपे 'भुवो वुग् लुङ्लिटोः' इत्यनेन वुगागमेऽनुबन्धलोपे 'संयोगान्तस्य लोपः' इत्यनेन तकारस्य लोपे संयोगे अभूवन् इति सिद्धम् ।

अभूवम्—भूधातोः लुङि मिपि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन मिपः स्थाने आमादेशे शपं प्रबाध्य 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशे अनुबन्धलोपे अ+भू+स्+अम् इति जाते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुकि 'भुवो वुग्लुङ्लिटोः' इत्यनेन वुगागमेऽनुबन्धलोपे च कृते संयोगे अभूवम् इति सिद्धम्

मास्म भूः—मास्मपूर्वाद् भूधातोः 'स्मोत्तरे लङ् च' इति सूत्रेण लुङि सिपि च्लौ च्लेः सिजादेशेऽनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति अडागमेऽनुबन्धलोपे प्राप्ते 'न माङ्योगे' इत्यनेन अटः निषेधे 'इतश्च' इति इकारलोपे सिचो लुकि सकारस्य रुत्वे विसर्गे च कृते मास्म भूः इति सिद्धम् ।

लिङ्निमित्ते—हेतुहेतुमद्भावादिक जो लिङ्का निमित्त उसके रहते भविष्यत्कालिक क्रियाबोधकत्वेन विवक्षित धातु से लकार हो क्रिया की असिद्धि गम्यमान रहते।

अभविष्यत्—भू धातोः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङि अनुबन्धलोपे लकारस्य स्थाने 'तिप्तस्झि' इत्यादिना तिपि अनुबन्धलोपे 'इतश्च' इतीकारलोपे 'कर्तरि शप्' इत्यनेन शपि प्राप्ते तं प्रबाध्य 'स्यतासी

लृलुटोः' इति सूत्रेण स्यप्रत्यये 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमेऽनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणेऽवादेशे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे सकारस्य 'आदेशप्रत्यययोः' इत्यनेन षत्वे संयोगे अभविष्यत् इति सिद्धम्।

आत–अत्धातोः 'परोक्षे लिट्' इत्यनेन लिटि तत्स्थाने तिपि 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण णलादेशेऽनुबन्धलोपे 'अत्+अ' इति जाते 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे 'पूर्वोऽभ्यासः' इति अभ्यासंज्ञायां 'हलादिः शेषः' इत्यनेन तकारस्य लोपे अ+अत्+अ इति स्थिते 'अतो गुणे' इति पररूपे प्राप्ते तं प्रबाध्य 'अत आदेः' इति सूत्रेण अभ्यासस्य दीर्घे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे च कृते संयोगे आत सिद्धम्।

लिङ्निमित्ते (ई० ४६)—'हेतुहेतुमतोर्लिङ्' 'इच्छार्थेषु लिङ्लोटौ' इत्यादि लिङो निमित्तं, तस्मिन् 'लिङ्निमित्ते' क्रियाया अतिपत्तिः=अनिष्पत्तिः, 'क्रियातिपत्तिः' तस्यां क्रियातिपत्तौ। 'भविष्यति मर्यादावचनेऽवरस्मिन्' इत्यतो भविष्यतीत्यनुवर्तते। ततश्च ..'हेतुहेतुमद्भावादिलिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम्' इत्यर्थः पर्यवस्यति। उदाहरणं तु 'सुवृष्टिश्चेद् अभविष्यत् (सुविष्टिर्भवेच्चेत) तदा सुभिक्षम (अपि) अभविष्यत्' इत्यादि ज्ञेयम्। अत्र हेतुहेतुमद्भावे गम्यमाने सति लिङर्थे भूधातोर्लृङ् निष्पद्यते।

संहितैकपदे नित्या (ई० ४३, ४९)—१. एकपदे संहिता (सन्धिः) नित्या, २. धातूपसर्गयोः संहिता नित्या, ३. समासे संहिता नित्या, ४. (किन्तु) वाक्ये सा (संहिता) (वक्तुः इच्छा विवक्षा ताम्) विवक्षाम् अपेक्षते। उदाहरणानि यथा—१. ने+अनम्=नयनम्, २. अधि+आस्ते=अध्यास्ते, ३. शिवस्य+अर्चनम्=शिवार्चनम्, ४. देवी=उवाच, देव्युवाच।

आतीत् ।५९। अत् धातोः 'लुङ्' इत्यनेन लुङ् तस्य स्थाने 'तिप्तस्झि' इत्यादिना तिपि अनुबन्धलोपे 'कर्तरि शप्' इति शपि प्राप्ते तं बाधित्वा 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'च्लेः सिच्' इति सूत्रेण च्लेः सिचादेशेऽनुबन्धलोपे अत्+स+ति इति जाते 'आडजादीनाम्' इत्यनेनाडागमेऽनुबन्धलोपे 'आटश्च'

इति सूत्रेण वृद्धौ 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमे अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन इडागमे 'इट ईटि' इति सूत्रेण सकारस्य लोपे 'इतश्च' इति तिपः इकारस्य लोपे 'सिज्लोप एकादेश सिद्धो वाच्यः' इति वार्तिकेन सिज्लोपस्यासिद्धत्वाभावेन 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे संयोगे आतीत् इति सिद्धम् ।

आतिष्ट—अत्धातोर्लुङि तस्य स्थाने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्' इत्यनेन थप्रत्यये अत्+थ इति स्थिते 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थस्य स्थाने तादेशे 'आडजादीनाम्' इत्यनेनाडागमेऽनुबन्धलोपे 'आटश्च' इति सूत्रेण वृद्धौ आत्+त् इति जाते शपं बाधित्वा 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेःसिच्' इति च्लेः स्थाने सिचादेशे कृते, अनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे अनुबन्धलोपे 'आदेशप्रत्यययोः' इत्यनेन सकारस्य षत्वे 'ष्टुना ष्टुः' इति सूत्रेण ष्टुत्वे संयोगे आतिष्ट इति सिद्धम् ।

आतत् (ई ४९)—अत्धातोर्लङि तत्स्थाने तिपि सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'लुङ् लङ्'–इति प्राप्तमटं बाधित्वा 'आडजादीनाम्' इत्याडागमे 'आटश्च' इति वृद्धौ 'इतश्च' इति तिपः इकारस्य लोपे 'आतत्' इति ।

सिषेध—षिध् धातोः 'परोक्षे लिट्' इत्यनेन लिटि सिपि अनुबन्धलोपे 'धात्वादेः षः सः' इति सूत्रेण षकारस्य सकारे 'लिट् च' इति सिपः आर्धधातुकसंज्ञायां शपोऽभावे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तिपो णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे 'पूर्वोभ्यासः' इति सूत्रेण अभ्याससंज्ञायां 'हलादिःशेषः' इत्यनेन धकारस्य लोपे 'पुगन्तलघूपधस्य च' इति सूत्रेण गुणे षत्वे संयोगे सिषेध इति सिद्धम् ।

सिषेधित—षिध्धातोर्लिटः सिपिः 'धात्वादेः षः सः' इति सत्वे 'परस्मैपदानाम्–' इति सिपस्थलि द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति अभ्यासावयवधकारस्य लोपे 'सिसिध् थ' इति जाते 'आदेशप्रत्यययोः' इति सस्य षत्वे 'लिट् च' इति थलः आर्धधातुकत्वात् तस्मिन् परे 'आर्धधातुकस्येड्वलादेः' इति थलः इटि अनुबन्धलोपे 'पुगन्त—' इति गुणे 'सषेधिथ' इति ।

निषेधति (ई० ४८, ५१, ५२)—'नि' इत्युपसर्गपूर्वकात् षिध्धातोर्लटि 'धात्वादेः षः सः' इति सस्य षत्वे लटः स्थाने तिपि सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'पुगन्तलघूपधस्य च' इति गुणे निसेधति इति स्थिते 'उपसर्गात्सुनोति'–इति सस्य षत्वे उक्तं रूपं सिद्धम् ।

न्यषेधत् (ई० ५०, ५३)—'नि' इत्युपसर्गात् षिध्धातोर्लङि तिपि अडागमे अनुबन्धलोपे यणि सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'पुगन्तलघूपधस्य च' इति गुणे 'प्राक्सितादड्व्यवायेऽपि' इति सस्य षत्वे 'इतश्च' इति तिप इकारलोपे उक्तं रूपं सिद्धम् ।

प्रणिगदति (ई० ४८,४९)—'प्र' 'नि' इत्युपसर्गात् गद्धातोर्लटि तिपि सार्वधातुकसंज्ञायाम् शपि अनुबन्धलोपे 'नेर्गदनद–'इति णत्वे 'प्रणिगदति' इति ।

अगादीत् (ई० २२, ५०)—गद्धातोर्लुङस्तिपि 'इतश्च' इतीकारलोपे 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे 'च्लि लुङि' इति च्लौ 'च्लेः सिच्' इति सिचि अनुबन्धलोपे 'आर्धधातुकं शेषः' इत्यनेन सस्यार्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इत्यनेन सस्य इटि अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन तकारस्य ईडागमे 'इट ईटि' इति सलोपे 'सिज्लोप एकादेशे सिद्धो वाच्य.' इति सिज्लोपस्याऽसिद्धत्वाभावेन सवर्णदीर्घे 'अतो हलादेर्लघोः' इति वृद्धौ 'अगादीत्' इति । वृद्ध्यभावे 'अगदीत्' इति ।

प्रणदति (ई० ४९)—प्रोपसर्गात् णद्धातोर्लटि 'णो नः' इति णस्य नत्वे लटस्तिपि शपि 'उपसर्गादसमासेऽपि णोपदेशस्य' इति णत्वे तत्सिद्धिः ।

नेदिथ (ई० ४७)—णद्धातोर्लिटि 'णो नः' इति धातोर्णस्य णत्वे लिटः सिपि थलि 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां हलादिशेषे 'आर्धधातुकस्येड्वलादेः' इतीटि 'थलि च सेटि' एत्वाऽभ्यासलोपे नेदिथ इति ।

चुश्च्योत (ई० ५८)—'इर इत्संज्ञावाच्ये'ति इरित्संज्ञकश्च्युत्धातोर्लिटि तिपि णलि द्वित्वे पूर्वस्याऽभ्याससंज्ञायां 'हलादिःशेषः' इति सूत्रं प्रबाध्य 'शर्पूर्वाः खयः' इत्यनेन अभ्यासस्य शर्पूर्वस्य खयः ('च्' इत्यस्य) शेषे अन्यस्य हलः

('श्·य् इत्यनयोः) लोपे 'पुगन्तलघूपधस्य च' इति गुणे उक्तं रूपं सिद्धम् ।

ववनतुः (ई० ४३, ४९)—वनधातोर्लिटि तसि 'परस्मैपदानाम्—'इति तसोऽतुसि 'लिटि धातोरि'ति द्वित्वे अभ्याससंज्ञायां हलादि शेषे 'अत एकहल-मध्येऽनादेशादेर्लिटि' इति एत्वाऽभ्यासलोपे प्राप्ते 'न शसददवादिगुणानाम्' इति निषेधे सस्य रुत्वे विसर्गे 'ववनतुः' इति सिद्धम् ।

क्रमिता (ई० ४९)—क्रम्धातोर्लुटि तिपि 'स्यतासी लृलुटोः' इति तासि प्रत्यये स्नुक्रमोः सेट्त्वात् 'आर्धधातुकस्येड्वलादेः' इति इट्सिद्धेः 'स्नुक्रमोरि'ति पुनरिड् विधानं नियमार्थमिति 'स्नुक्रमोरनात्मनेपदनिमित्ते' इति इटि अनुबन्धलोपे'लुटः प्रथमस्ये'ति तिपो डादेशे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे उक्तं च सिद्धम् ।

जगाद ।६४। गद् धातो लिटि सिपि अनुबन्धलोपे 'परस्मैपदानामित्यादिना' तिपो णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति सूत्रेण धातोः द्वित्वे गद+गद्+अ इति जाते 'पूर्वोऽभ्यासः' इति अभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन लोपे 'कुहोश्चुः' इत्यनेन अभ्यासगकारस्य श्चुत्वेन जकारे जगद्–अ इति भूते 'अत उपधायाः' इति सूत्रेण उपधाभूताकारस्य वृद्धौ जगाद इति सिद्धम् ।

नेदतुः—णद् अव्यक्ते शब्दे धातोः लिटि तत्स्थाने तसि णकारस्य 'णो नः' इति सूत्रेण नत्वे नद्=तस् इति स्थिते तस स्थाने 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन अतुसादेशे 'लिटि धातोरनभ्यासस्य' इति सूत्रेण धातोः द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इति सूत्रेण दकारस्य लोपे न+नद्=अतुस् इति जाते 'अत एकहल्मध्येऽनादेशादेर्लिटि' इत्यनेन एत्वेऽभ्यासलोपे च सकारस्य रुत्वे विसर्गे च कृते संयोगे नेदतुः इति सिद्धम् ।

आनर्च ।६५। अर्च पूजायाम् इत्यस्माद् धातोः 'परोक्षे लिट्' इति लिटि, अनुबन्धलोपे लस्य स्थाने तिपि तिपो णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति सूत्रेण धातोः द्वित्वे 'पूर्वोऽभ्यासः' इति अभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन र्च इत्यस्य लोपे अ+अर्च+अ इति स्थिते 'अकः सवर्णे दीर्घ' इति दीर्घे प्राप्ते तं प्रबाध्य 'अतो गुणे' इति सूत्रेण पररूपे प्राप्ते तमपि बाधित्वा

'अत आदेः' इत्यनेन अभ्यासाकारस्य दीर्घे 'तस्मान्नुड्द्विहलः' इति सूत्रेण नुडागमेऽनुबन्धलोपे आनर्च इति सिद्धम् ।

अकटीत्—।५९। कटे वर्षावरणयोः इति कट् धातोः 'लुङ्' इति सूत्रेण लुङि अनुबन्धलोपे लस्य स्थाने 'तिप्तस्झि' इत्यादिना तिप्प्रत्ययेऽनुबन्धलोपे 'इतश्च' इतीकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे शपं बाधित्वा 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'च्लेः सिच्' इति च्लेः सिजादेशेऽनुबन्धलोपे 'आर्धधातुकं शेषः' इति आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे 'अस्तिसिचोऽपृक्ते' इति सूत्रेण ईडागमेऽनुबन्धलोपे 'अतो हलादेर्लघोः' इति सूत्रेण निषेधे 'इट ईटि' सूत्रेण सिचः सकारस्य लोपे सलोपस्य सिद्धत्वात् 'अकः सवर्णे दीर्घः' इति दीर्घे संयोगे अकटीत् इति सिद्धम् ।

गोपायाञ्चकार—। १। 'गुपूरक्षणे' इति गुपुधातोः 'गुपूधूपविच्छिपणिपनिभ्यः आयः' इत्यनेन आयप्रत्यये तस्य 'आर्धधातुकं शेषः' इति आर्धधातुकसंज्ञायां 'पुगन्तलघूपधस्य च' इति सूत्रेण गुणे कृते गोपाय इति जाते ततः 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां ततः 'परोक्षे लिट्' इति लिटि'कृदतिङ्' इति कृत्संज्ञायां ततो गोपाय इत्यस्यानेकाच्त्वात् कास्यनेकाच् आम्वक्तव्यः' इति वार्तिकेन आमि गोपाय+आम्+लिट्' इति जाते 'अतो लोपः' इत्यनेन अकारस्य लोपे 'हलन्त्यम्' इत्यनेन आमो मकारस्येत्संज्ञायां लोपे च प्राप्ते लिटि आस्कासोराम्विधानान्मकारस्येत्वाभावेन लोपाभावे 'आमः' इत्यनेन लिटो लुकि गोपायाम् इति स्थिते लिटः कृत्वात् प्रातिपदिकत्वेन सुप्रत्यये तस्यापि 'आमः' इति लुकि ततः कृञ्चानुप्रयुज्यते लिटि' इति सूत्रेण लिट्परककृप्रयोगे लस्य स्थाने तिप्तसझि' इत्यादिना तिपप्रत्यये तिपः 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति सूत्रेण कृइत्यस्य द्वित्वे पूर्वोऽभ्यासः' इति अभ्याससंज्ञायां 'उरत' इत्यनेन अभ्यासभूतस्य ऋकारस्य अकारे 'उरण् रपरः' इति रपरे गोपायाम्+कर्+कृ+अ इति जाते 'हलादिः शेषः' इत्यनेन रेफस्य लोपे 'कुहोश्चुः' इति अभ्यासककारस्य चुत्वेन चकारे 'मोऽनुस्वारः' इति मकारस्यानुस्वारे 'वा पदान्तस्य' इति वैकल्पिके अनुस्वारस्य पर

सवर्णे अकारे'अचो ञ्णिति'इति बृद्धौ रपरे च कृते गोपायाञ्चकार । पक्षे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे 'अत उपधायाः' इति वृद्धौ गोपायांचकार इति सिद्धम् ।

जुगोप्थ—गुप्धातोः आयप्रत्ययाभावपक्षे लिटि सिपि 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सिपः थलादेशे गुप्+थ इति स्थिते ततः 'लिटि धातोरनभ्यासस्य' इति धातोः द्वित्वे पूर्वोऽभ्यासः इति अभ्याससंज्ञायां 'हलादिः शेषः' इति लोपे कुहोश्चुः' इति सूत्रेण चुत्वे 'पुगन्तलघूपधस्य च' इत्यनेन गुणे 'स्वरतिसूतिसूयतिधूञू दितो वा' इत्यनेन वैकल्पिके इडागमेऽनुबन्धलोपे संयोगे जुगोपिथ इति रूपम् । पक्षे इडागभाभावे जुगोप्थ सिद्धम् ।

अपोगीत्—।४४। गुप्धातोः आयप्रत्यये गुण गोपाय इति जाते 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लुङि तस्य स्थाने तिपि अनुबन्धलोपे 'लुङ् लङ् लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे 'च्लिलुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः स्थाने सिजादेशे 'इतश्च' इति तिपो इकारस्य लोपे 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिके इडागमेऽनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इति सूत्रेण ईडागमेऽनुबन्धलोपे 'इट ईटि' इत्यनेन सकारस्य लोपे 'अतो लोपे' इत्यल्लोपे 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे अगोपायीत् इति ।

आयप्रत्ययाभावपक्षे गुपो लुङि तिपि इकारलोपे च्लि प्रत्यये च्लेःसिचि अटि स्वरतिसूतिसूयतिधूञूदितो वा' पाक्षिके इडागमे 'अस्तिसिचोऽपृक्ते' इति ईटि अनुबन्धलोपे नित्यत्वाद् गुणं बाधित्वा 'वदव्रजहलन्तस्याचः' इति सूत्रेण वृद्धौ प्राप्तायां 'नेटि' सूत्रेण वृद्धिनिषेधे गुणे सलोपे सवर्णदीर्घे अगोपीत् इति । इडागमाभावपक्षे 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ अगोप्सीत् इति सिद्धम् ।

अगौप्ताम्—गुप्धातोः लुङि तस्य स्थाने तसिप्रत्यये 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तसः तमादेशे 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशेनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे अ+गुप्+स+ताम् इति जाते 'वदव्रजहलन्तस्याचः' इति सूत्रेण वृद्धौ 'झलो झलि' इत्यनेन सकारस्य लोपे अगौप्ताम् इति सिद्धम् ।

कृसृभृवृ—कृसृभृस्तुद्रुसुश्रु इन धातुओं से ही परे लिट् न हो। इनसे भिन्न अनिट् से भी लिट् को इट् हो।

अचस्तास्वत्थल्यनिटो नित्यम्—तास प्रत्यय के परे रहते नित्य अनिट् तथा उपदेश काल में अजन्त जो धातु उससे पर थल को इट् न हो।

उपदेशेऽत्वतः—तास परे रहते नित्य अनिट् तथा उपदेश काल में अकावान् जो धातु उससे परे थलको इट् न हो।

ऋतो भारद्वाजस्य—तास पर रहते नित्य अनिट् जो ऋकारान्तधातु उसीसे पर थल को भारद्वाज के मतमें इट् न हो, अन्यके मत में इट् हो।

अजन्तोऽकारवान्वा–(ई० ४३, ४५)—१. 'कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि' २. 'अचस्तास्वत्थल्यनिटो नित्यम्' ३. उपदेशेऽत्वतः' ४. 'ऋतो भारद्वाजस्य' इति सूत्रचतुष्टयानां प्रवृत्तिः संक्षेपेण कथयति—अजन्ते' ति। यो धातुः ऋदन्त भिन्नोऽजन्तः (पा, या, वादि) ह्रस्वाकारवान् वा (पचादि) तासौ नित्यानिट्, सोऽयं थलि बिकल्पितेट्कः स्यात्। तेन 'पपिथ-पपाथ, पेचिथ-पपक्थ इत्यादि रूपाणि सिद्धयन्ति। ऋदन्त ईदृक्—'ईदृक्' इत्यस्य तासौ नित्यानिट इत्यर्थः यः ऋदन्तस्तासौ नित्यानिट् स थलि नित्यानिट् इत्यर्थः। (अचस्तास्वत्थल्यनिटो नित्यम्' इति पाणिनिमते, 'ऋतो भारद्वाजस्य' इति भारद्वाजमतेऽपि तस्य अनिट्कत्वादिति भावः। तेन चकर्थ, जहर्थ, इत्यादि रूपाणि भवन्ति। क्रादन्यः :—कृसृभृत्वादतिरिक्तो धातुः लिटि नित्यं सेडित्यर्थः। (क्राद्यष्टभ्य एव परस्य लिटि नेडिति 'कृसृभृवृ' इति सूत्रेण नियमितत्वादिति भावः) तेन पेचिव, पेचिम। जह्रिव, जह्रिम, इत्यादि रूपाणि भवन्ति।

चिक्षाय। क्षिधातोर्लिटि तिपि णलि द्वित्वे अभ्यासत्वे हलादिदशेषे'कुहोश्चुः इति चुत्वे अचोऽञ्णिति इति वृद्धावायादेशे सिद्धम्।

चिक्षयिथ--(४०, ५२) क्षि क्षये इत्यस्मात् धातोः लिटि तस्य स्थाने सिपि 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इत्यनेन सिपः थलादेशे कृतेऽनुबन्ध लोपे 'लिटि धातोरनभ्यासस्य'इति धातोर्द्वित्वे 'पूर्वोऽभ्यासः' इति अभ्याससंज्ञायां-'हलादि शेषः'इति अन्यो हललोपे 'कुहोश्चुः' इत्यनेन चत्वे 'एकाच उपदेशेऽनु-

दात्तात् इति सूत्रेण इटो निषेधे प्राप्ते 'ऋतो भारद्वाजस्य' इति सूत्रेण वैकल्पिके इडागमेऽनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'एचोऽयवायावः' इत्यनेन अयादेशे संयोगे चिक्षयिथ इति रूपम्। इडागमाभावपक्षे गुण चिक्षेथ इति सिद्धम्।

क्षीयात्—क्षिधातोः 'आशिषि लिङ्लोटौ' इत्यनेन लिङि तस्य तिपि अनुबन्धलोपे 'इतश्च' इति इकारस्य लोपे 'यासुट् परस्मैपदेषुदात्तो ङिच्च' इत्यनेन यासुडागमेऽनुबन्धलोपे 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सकारस्य लोपे 'अकृत्सार्वधातुकयोः दीर्घः' इति सूत्रेण दीर्घे संयोगे क्षीयात् सिद्धम्।

अक्षैषीत्—क्षिधातोः लुङि तिपि अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'लुङ् लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे अ + क्षि + त इति स्थिते 'च्लिलुङि' इत्यनेन च्लिप्रत्यये 'च्लेः सिच्' इति च्लेः सिजादेशेऽनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमेऽनुबन्धलोपे अ + क्षि + स् + ई + त् इति जाते 'सिचि वृद्धिः परस्मैपदेषु' इति सूत्रेण वृद्धौ सकारस्य षत्वे संयोगे अक्षैषीत् इति सिद्धम्।

अक्षैषीः—क्षि-धातोः लुङि सिपि अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति अडागमेऽनुबन्धलोपे च कृते 'च्लि लुङि' इति च्लि प्रत्यये 'च्लेः सिच्' इति च्लेः सिजादेशेनुबन्धलोपे अ + क्षि + स् + सि इति जाते 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमेऽनुबन्धलोपे 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ 'इतश्च' इति सूत्रेण सिपः इकारस्य लोपे सिचःसकारस्य 'आदेशप्रत्यययोः' इत्यनेन षत्वे सकारस्य विसर्गे च कृते संयोगे अक्षैषीः इति सिद्धम्।

तेपिथ—तप धातोर्लिटि सिपि थलि द्वित्वे अभ्यासत्वे हलादिशेषे प्राप्ते एत्वाभ्यासलोपयोः कृतयोः भारद्वाजमते इटि तेपिथ अन्यमते इडभावे ततप्थ इति सिद्धम्।

क्राम्यति—पादविक्षेपेर्थे क्रमु इत्यस्मात् धातोः वर्तमाने लट् इति लटि 'तिप्तस्झि' इत्यादिना लस्य स्थाने तिप्रत्यये 'कर्त्तरि शप्' इति सूत्रेण शपि

प्राप्ते तं प्रबाध्य 'वा भ्राशभ्लाशभ्रमुक्रमुत्रसित्रुटिलषः' इति सूत्रेण वैकल्पिके श्यन् प्रत्ययेऽनुबन्धलोपे क्रम+य+ति इति स्थिते 'क्रमः परस्मैपदेषु' इत्यनेन दीर्घे संयोगे क्राम्यति इति रूपम् । 'कर्त्तरि शप्' इत्यनेन शपि दीर्घे क्रामति इति सिद्धम् ।

अक्रमीत्–क्रम धातोः लुङि, तिपि, अनुबन्धलोपे 'इतश्च इति इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेनाडागमेऽनुबन्धलोपे 'च्लि लुङि इत्यनेन च्लिप्रत्यये 'च्लेःसिच्' इति सूत्रेण च्लेः सिजादेशेऽनुबन्धलोपे 'आर्धधातुकं शेषः' इति आर्धधातुकसंज्ञायां ततः 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमेऽनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इति ईडागमेऽनुबन्धलोपे अ+क्रम्+इ+स+ई+त् इति जाते 'इट ईटि' इत्यनेन सकारस्य लोपे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे संयोगे अक्रमीत् इति सिद्धम् ।

आचामति—(ई० ५३)—आङुपसर्गात् चम्धातोर्लटि तिपि शपि अनुबन्धलोपे 'आङि चम इति वक्तव्यम्' इति वार्तिकेन दीर्घे आचामति इति ।

अस्खालीत्—(ई० ४०) स्खल्धातोर्लुङि तिपि अडागमे मध्ये च्लौ सिचि अनुबन्धलोपे 'इतश्च' इति तिपि इकारलोपे ,अतोल्रान्तस्य इति दीर्घे 'आर्धधातु कस्येड्वलादेः' इति सस्य इटि 'अस्तिसिचोऽपृक्ते' इति ईटि तस्य च 'इट ईटि' इति सलोपे सवर्णदीर्घे उक्तं रूपं सिद्धम् ।

पिबति (ई० ५१)—पाधातोर्लटि तिपि शपि अनुबन्धलोपे 'पाघ्राध्मा' इत्यादिसूत्रेण 'पा' इत्यस्य पिबादेशे उक्तं रूपं सिद्धम् ।

पपतुः (ई० ५०)—पाधातोर्लिटस्तसि तसोऽतुसि द्वित्वे अभ्यासत्वे ह्रस्वत्वे च विहिते 'प पा अतुस्' इति स्थिते 'असंयोगाल्लिट् कित्' इति अतुसः कित्त्वे 'आतो लोप इटि च' इति अकारलोपे सस्य रुत्वे विसर्गे 'पपतुः' इति ।

पपिथ (ई० ४५)—पाधातोर्लिटः सिपि थलि अनुबन्धलोपे द्वित्वे अभ्यासत्वे च कृते 'ऋतो भारद्वाजस्य' इति भारद्वाजमते इटि 'आतो लोप इटि च' इति आकारलोपे 'पपिथ' इति । इडभावे 'पपाथ' इति च भवति ।

अपात्—पानार्थकात् पाधातोः 'लुङ्' इति लुङि 'तिप्तस्झि' इत्यादिना

तस्य स्थाने तिप्प्रत्ययेऽनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अटि 'इतश्च' इति तिपो इकारस्य लोपे च्लिप्रत्यये च्लेः सिजादेशे कृते ततः 'गातिस्थाघुपा-भूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुकि संयोगे अपात् इति सिद्धम् ।

अपुः । ५८ ।--पाधातोर्लङि तस्य स्थाने प्रथमपुरुषे बहुवचने झिप्रत्यये 'लुङ् लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लि-प्रत्यये च्लेः सिजादेशोऽनुबन्धलोपे 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुकि 'आतः' इति सूत्रेण झेर्जुसादशेऽनुबन्धलोपे 'उस्यपदान्तात्' इत्यनेन पररूपे सकारस्य रुत्वे विसर्गे च कृते संयोगे अपुः इति सिद्धम् ।

ग्लेयात् (ई० ४३)—ग्लैधातोराशीर्लिङि तिपि अनुबन्धलोपे 'लिङाशिषि' इत्यार्धधातुकत्वात् शबभावे यासुटि अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे तिप इकारलोपे 'ग्ला यास् त्' इति स्थिते 'स्कोः संयोगाद्योरन्ते च' इति सलोपे 'वाऽन्यस्य संयोगादेः' इत्येत्वे 'ग्लेयात्' इति । एत्वाऽभावे 'ग्लायात्' इति बोध्यम् ।

अग्लासीत् (ई० ४८)—ग्लैधातोर्लङि तिपि अनुबन्धलोपे 'लुङ्लङ्०' इत्यडागमे अनुबन्धलोपे 'इतश्च' इति तिपि इकारलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे मध्ये च्लौ तस्य सिचि इचि गते 'अग्ला स्त्' इतिस्थिते 'यमरमनमातां सक् च' इति सकि सिचः तकारस्य इटि च कृते अनुबन्धलोपे 'अग्ला स् इ त्' इति दशायाम् 'अस्तिसिचोऽपृक्ते' इति अपृक्तसंज्ञकस्य तस्य ईटि अनुबन्धलोपे 'इटि ईटि' इति सलोपे 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे तत्सिद्धिः ।

अदधत्, अधात्, अधासीत् (ई० ४९, ५०)—'धेट् पाने' अस्मा-द्धातोर्लुङि तिप्यनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे मध्ये च्लौ तस्य सिजादेशे प्राप्ते तं प्रबाध्य 'विभाषा धेट्श्व्योः' इति चङि अनुबन्धलोपे 'चङि' इति द्वित्वे अभ्याससंज्ञायां ह्रस्वे 'अभ्यासे चर्च' इति जश्त्वे 'आतो लोप इटि च' इत्यालोपे 'इतश्च' इति तिप इकारलोपे 'अदधत्' इति । चङ्भावे च्लेः सिजादेशे 'विभाषा घ्राधेट्शाच्छासः' इति सिचो लुकि 'अधात्' इति । लुगभावपक्षे 'यमर-

मनमातां सक् च' इति च्लेः सकि सिचः सस्य 'आर्धधातुकस्येड् वलादेः' इति इटि 'अस्तिसिचोऽपृक्ते' इति तस्य च ईटि 'इट ईटि' इति सलोपे 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे 'अधासीत्' इति च सिद्ध भवति ।

दायात् (ई० ४०)—'दैप् शोधने' अस्माद्धातोराशीर्लिङि तिपि अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे 'इतश्च' इति तिप इकारलोपे 'लिङाशिषि' इत्यार्धधातुकत्वात् 'लिङः सलोपोऽनन्त्यस्य' इत्यस्याऽप्राप्त्या 'किदाशिष' इति यासुटः कित्वात् 'स्को: संयोगाद्यो:—' इति सलोपे 'दाधाध्वदाप्' इत्यत्र अदाप् इति पर्युदासेन घुत्वाऽभावात् 'एर्लिङि' इति एत्वाभावे 'दायात्' इति ।

स्थेयात् (ई० ४२)—'ष्ठा गतिनिवृत्तौ' अस्माद्धातोर्लिङि तिपि 'धात्वादेः षः सः' इति सत्वे ष्टुत्वनिवृत्तौ 'स्था ति' इति स्थिते यासुटि अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे 'स्को: संयोगाद्यो:' इति सलोपे 'एर्लिङि' इत्येत्वे 'स्थेयात्' इति ।

जह्वार । ५९ ।—कौटिल्यार्थकात् ह्वृ धातोः 'परोक्षे लिट्' इति लिटि, तिपि, णलि, अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे 'पूर्वोऽभ्यासः, इति अभ्याससंज्ञायां 'उरत्' इति अत्वे रपरे 'हलादिः शेषः' इति हलो लोपे 'कुहोश्चुः' इति चुत्वे जश्त्वे 'अचोञ्णिति' इत्यनेन प्राप्तां वृद्धि प्रबाध्य 'ऋतश्च संयोगादेर्गुणः' इत्यनेन गुणे पुनः रपरे 'अत उपधायाः' इत्यनेन वृद्धौ संयोगे जह्वार इति सिद्धम् ।

ह्वरिष्यति । ५७ । ह्वधातोः 'लृट् शेषे च' इति सूत्रेण लृटि, अनुबन्धलोपे 'तिप्तस्झि' इत्यादिना तिपि अनुबन्धलोपे 'कर्तरिशप्' इति प्राप्ते तं बाधित्वा 'स्यतासीलृलुटोः' इत्यनेन स्यप्रत्यये 'आर्धधातुकं शेषः' इति आर्धधातुकसंज्ञायां 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रेण इण्निषेधे प्राप्ते 'ऋद्धनोःस्ये:' इत्यनेन इडागमे अनुबन्धलोपे सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे रपरे सकारस्य षत्वे संयोगे ह्वरिष्यति इति सिद्धम् ।

ह्वर्यात् = ह्वधातोः 'आशिषि लिङ्लोटौ' इत्यनेन लिङि तिपि, अनुबन्धलोपे 'लिङाशिषि' इत्यनेन तिपः आर्धधातुकसंज्ञायां 'कर्त्तरि शप्' इति प्राप्तशपोऽभावे 'इतश्च' इतीकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुटि तस्य 'किदाशिषि' इत्यनेन आर्धधातुकत्वे च कृते अनुबन्धलोपे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारस्य लोपे यासुटः कित्वात् गुणाभावे प्राप्ते 'गुणोऽर्तिसंयोगाद्योः' इति सूत्रेण गुणे रपरे च कृते ह्वर्यात् इति सिद्धम् ।

नकारजावनुस्वा० (ई० ४४)—'ष्ठा गतिनिवृत्तौ' इत्यत्र धात्वादेः— इति षस्य सत्वे कृतेऽपि ष्टुत्वेन जातस्य टकारस्य निवृत्तिः कथं स्यादित्यत आह— 'नकारजौ' इति । धातुषु मध्ये झलि परतः यौ नकाराज्जातौ अनुस्वारपञ्चमौ, तथा च सकाराज्जातः शकार, एवं षकारात् परो विद्यमानः तवर्गाज्जातः टवर्गोऽपि प्रकृतस्थितिं लभत इत्यर्थः । तेन 'ष्ठा' इत्यत्र षकारात् परः तवर्गस्थकारः मूलस्थितिं भजते, ठकारस्य थकाराज्जायमानत्वादिति भावः ।

गुणोऽर्तिसंयोगाद्योः (ई० ५२)—अत्र सूत्रे 'अङ्गस्य' इत्यधिकृतम् 'रीङ् ऋतः' इत्यतः 'ऋत' इत्यनुवर्तते, 'अकृत्सार्वधातुकयोः' इत्यतः 'असार्वधातुक' ग्रहणमनुवर्तते–'आर्धधातुके' इति लभ्यते, 'रिङ्शयग्लिङ्क्षु' इत्यतः 'यकि' 'लिङि' इति च लभ्यते, 'अयङ्यि क्ङिति' इत्यतो 'यि' इति सप्तम्यन्तमनुवर्तते, आर्धधातुकविशेषणात् तदादिविधि. । ततश्च—'अर्तेः, संयोगादेरिदन्तस्य च गुणो यकि, यादावार्धधातुके लिङि च' इत्यर्थः सम्पद्यते । उदाहरणं तु 'ह्वर्यात्' इति ।

सस्वरिव (ई० ४२)—शब्दोपतापार्थक'स्वृ'धातोर्लिटि तत्स्थाने वसि 'परस्मैपदानाम्—' इति वसो वादेशे 'लिटि धातो–' इति द्वित्वे अभ्याससंज्ञायां 'उरत्' इत्यत्वे रपरत्वे हलादिः शेषं प्रबाध्य 'शर्पूर्वाः खयः' इति सस्य शेषे सति परमपि स्वरत्यादि-विकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात् 'श्र्युकः किति' इतीण्निषेधे प्राप्ते क्रादिनियमात् नित्यमिटि गुणे रपरत्वे उक्तं रूपं सिद्धम् ।

स्त्रियात् (ई० ४९, ५३)—गत्यर्थकसृधातोराशीर्लिङि तिपि 'इतश्च' इति तिप इकारलोपे 'यासुट् परस्मैपदे' इति यासुटि अनुबन्धलोपे 'स्कोः—'इति सलोपे 'रिङ्शयग्लिङ्क्षु' इति ऋतो रिङादेशे 'स्त्रियात्' इति सिद्धम् । अत्र

रिगादेशविधानसामर्थ्यात् 'अकृत्सार्वधातुकयोः—' इति दीर्घो न भवति ।

द्रक्ष्यति (ई० ४९)—दृश्धातोर्लृटि तिपि 'स्यतासी लृलुटोः' इति स्यप्रत्यये 'व्रश्चभ्रस्ज—' इति शस्य मूर्धन्यादेशे 'सृजिदृशोर्झल्यमकिति' इत्यमागमे यणि 'षढोः कः सि' इति सकारस्य कत्वे 'आदेशप्रत्यययोः' इति स्यप्रत्ययस्थ सकारस्य षत्वे 'द्रक्ष्यति' इति ।

अदर्शत्, (अद्राक्षीत्) (ई० ४३)—इरित्संज्ञकप्रेक्षणार्थक 'दृश्' धातोर्लुङि तिपि अडागमे अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे मध्ये च्लौ 'इरितो वा' इति च्लेरङि अनुबन्धलोपे 'ऋदृशोऽङि गुणः इति' गुणे रपरत्वे 'अदर्शत्' इति । अङभावपक्षे 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे प्राप्ते 'न दृशः' इति निषेधे च्लेः सिचि इचि गते 'अदृश् स् त्' इति स्थिते 'वदव्रज–' इति वृद्धौ 'व्रश्चभ्रस्ज–' इति शस्य षत्वे 'षढोः कः सि' इति षस्य कत्वे 'आदेशप्रत्यययोः' इति सिचः सस्य षत्वे 'अस्तिसिचोऽपृक्ते' इति ईटि 'अद्राक्षीत् इति सिद्धम् ।

शृण्वन्ति । ६१ । श्रवणार्थकश्रुधातोः लटि तस्य स्थाने झि प्रत्यये 'कर्तरि-शप्' इत्यनेन शपि प्राप्ते तं प्रबाध्य 'श्रुवः शृ च' इति सूत्रेण श्नुप्रत्ययेऽनुबन्धलोपे श्रु इत्यस्य शृइत्यादेशे नकारस्य णत्वे झकारस्य 'झोऽन्तः' इत्यनेन अन्तादेशे कृते शृ+णु+अन्ति इति जाते ङित्वात् गुणाभावे 'अचिश्नुधातुभ्रुवांय्वोरियङुवङौ' इति सूत्रेण उवङादेशे प्राप्ते तं बाधित्वा 'हुश्नुवोः सार्वधातुके' इत्यनेन यणि संयोगे शृण्वन्ति इति सिद्धम् ।

शृण्मः—श्रुधातोर्लटि तत्स्थाने 'तिप्तस्झि' इत्यादिना मसि 'श्रुवः शृ च' इति श्रुवः 'शृ' आदेशे चकारात् 'नु' प्रत्यये च कृते शकारस्येत्संज्ञायां लोपे च विहिते शित्त्वात् सार्वधातुकत्वे 'सार्वधातुकमपित्' इति श्नोर्ङित्वे 'क्ङिति च' इति गुणनिषेधे 'शृ नु मस्' इति स्थिते णत्वे 'लोपश्चास्यान्यतरस्यां म्वोः' इति उकारलोपे सस्य रुत्वे विसर्गे 'शृण्मः' इति । लोपाऽभावे 'शृणुमः' इति च सिद्धं रूपं भवति ।

शृणु (ई० ४८, ४९)—श्रुधातोर्लोटि सिपि 'श्रुवः शृ च' इत्यनेन श्नुप्रत्यये चकारात् 'शृ' आदेशे च कृते श्नुप्रत्ययस्य शस्य 'लशक्वतद्धिते' इतोत्सं-

ज्ञायां लोपे च जाते शित्त्वात्सार्वधातुकत्वे 'सार्वधातुकमपित्' इति ङित्त्वेन गुणाऽभावे 'सेर्ह्यपिच्च' इत्यनेन सेर्ह्यादेशे 'शृ नु हि' इत्यवस्थायां 'सार्वधातुकमपित्' इति हेर्ङित्त्वात् उकारस्य च गुणाभावे 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुकि 'शृणु' इति सिद्धम् तातङ्पक्षे 'शृणुतात्' इति भवति।

शृणुयुः (ई० ५०, ५३)—श्रुधातोराशीर्लिङि तत्स्थाने झौ झेर्जुसि अनुबन्धलोपे 'श्रुवः शृ च' इति 'शृ' इत्यादेशे चकारात् श्नुप्रत्यये च कृते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे 'यासुट्परस्मैपदेषू०—' इति यासुटि अनुबन्धलोपे 'लिङःसलोपोऽनन्त्यस्य' इति सलोपे 'उस्यपदान्तात्' इति पररूपे सस्य रुत्वे विसर्गे 'शृणुयुः' इति सिद्धम्।

अशृणवम्—श्रुधातोः लङि लस्य स्थाने उत्तमपुरुषैकवचने मिप् प्रत्ययेऽनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे शपं प्रबाध्य 'श्रुवः शृ च' इत्यनेन श्नुप्रत्यये श्रुवः स्थाने शृ इत्यादेशे च कृते अ+शृ=नु—मि इति जाते 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन मिपः स्थाने अमादेशे कृते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन नकारस्य णत्वे गुणेऽयादेशे संयोगे अशृणवम् इति सिद्धम्।

जगाम—गम्धातोर्लिटि तिपि णलि द्वित्वे अभ्यासत्वे हलादिः शेषे 'कुहोश्चुः' इति चुत्वे। अत उपधाया इति वृद्धौ सिद्धम्।

जग्मतुः—गमनार्थकात् गम्धातोः लिटि तसि तसः 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन अतुसादेशे 'लिटि धातोरनभ्यासस्य', इति धातोः द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इपि लोपे 'कुहोश्चुः' इत्यनेन गकारस्य चुत्वेन जकारे 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्यनेन उपधालोपे सकारस्य रुत्वे विसर्गे च कृते संयोगे च जग्मतुः इति सिद्धम्।

जगन्थ—गम्धातोः लिटि, सिपि, अनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन सिपः स्थाने थलि प्रत्ययेऽनुबन्धलोपे धातोः द्वित्वे अभ्यासकार्ये अ-गम्-थ इति जाते 'कुहोश्चुः' इत्यनेन चुत्वेन गकारस्य जकारे 'ऋतो भारद्वाजस्य' इति सूत्रेण पाक्षिके इडागमाभावपक्षे मकारस्य अनुस्वारे परसवर्णे

कृते जगन्थ इति सिद्धम् । इडागमपक्षे जगमिथ इति ।

अगमत्—गमधातोः 'लङ्' इत्यनेन लुङि, अनुबन्धलोपे लकारस्य स्थाने 'तिप्तस्झि' इत्यदिना तिप्प्रत्ययेऽनुबन्धलोपे 'इतश्च' इति इकारस्य लोपे 'लुङ्लङ् लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लि प्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशे प्राप्ते तं प्रबाध्य 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इति सूत्रेण च्लेः अङादेशेऽनुबन्धलोपे संयोगे अगमत् इति सिद्धम् ।

गम्धातोर्लुङि मध्यमपुरुषे रूपाणि (ई० ५१)

अगमः	अगमतम्	अगमत । इति

स्रप्ता (ई० ५२)--ऌकारेत्संज्ञक—गत्यर्थकसृपधातोर्लुटि 'स्यतासीॢलुटोः' इति तासि प्रत्यये तिपो डादेशे डित्वसामर्थ्यादभस्यापि टेर्लोपे 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति विभाषया अमागमे 'स्रप्ता' इति । अमागमाऽभावपक्षे 'पुगन्ते'ति गुणे 'सर्प्ता' इति च भवति ।

आनष्ठ (ई० ४०)—'अक्षूव्याप्तौ' इत्यस्माद्धातोर्लिटि सिपि थलि द्वित्वे अभ्यासत्वे हलादिशेषे 'अत आदेः' इति दीर्घे 'तस्मान्नुड् द्विहलः' इति नुटि अनुबन्धलोपे 'ऋतो भारद्वाजस्य' इति इडभावपक्षे 'आनक्ष् थ' इति स्थिते 'स्कोः संयोगाद्योरन्ते च' इति कलोपे ष्टुत्वे 'आनष्ठ' इति । इट पक्षे आनक्षिथ इति ।

अताक्षीत्—तक्षधातोः लुङि तिपि च्लौ सिचि 'स्वनतिसूति' इति विकल्पेनेटि वृद्धौ 'स्कोः' इतिकलोपे 'षढोः कः सि' इति षस्य कत्वे षत्वे सिद्धम् ।

मूर्वति (ई० ५३)—मूर्वधातोर्लटि तिपि शपि अनुबन्धलोपे 'उपधायां च' दीर्घे 'मूर्वति' इति ।

एधसे (ई० ४९)—एधधातोर्लटि थासि 'थासः से' इति थासः 'से' इत्यादेशे सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'एधसे' इति ।

एधाञ्चक्रे (ई० ४७, ५२)—एध्धातोर्लिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामि 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परककृञोऽनुप्रयोगे एध् आम् कृ लिट् इति जाते 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' इत्यात्मने-

पदत्वात् लिट: स्थाने तप्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन तस्येशादेशे अनुबन्ध लोपे 'एधाम् कृ ए' इति स्थिते 'लिटि धातोरनभ्यासस्य' इति द्वित्वे प्राप्ते तं परत्वाद् बाधित्वा 'इको यणचि' इति यणि प्राप्ते तं 'द्विर्वचनेऽचि' इति निषेधे पुनः प्रसङ्गविज्ञानात् 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायाम् 'उरत्' इत्यभ्यासऋवर्णस्य अत्वे रपरत्वे च कृते 'एधाम् कर् कृ ए' इति जाते 'हलादिः शेषः' इत्यनेन अभ्यासस्यान्त्यहलो लोपे 'कुहोश्चुः' इत्यनेन कस्य चुत्वे 'एधाम् च कृ ए' इति दशायां 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते 'असंयोगाल्लिट् कित्' इति कित्त्वेन गुणनिषेधे 'इको यणचि' इति यणि मकारस्यानुस्वारे परसवर्णे च कृते 'एधाञ्चक्रे इति सिद्धम् !

एधाञ्चकृषे—एधधातोः, लिटि आमि 'आमः' इत्यनेन लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परकृञोऽनुप्रयोगे लिटः स्थाने थासि 'थासः से' इत्यनेन थासः स्थाने से इत्यादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन कृ इत्यस्य द्वित्वे अभ्यासकार्ये चुत्वे सकारस्य षत्वे अनुस्वारे परसवर्णे च कृते संयोगे एधाञ्चकृषे इति सिद्धम् ।

एधाञ्चकृढ्वे—एधधातोः लिटि 'इजादेश्च गुरुमतोनृच्छः' इत्यनेन आमि 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परकृञोऽनुप्रयोगे लस्य स्थाने ध्वमि कृ इत्यस्य द्वित्वे 'पूर्वोभ्यासः' इत्यभ्याससंज्ञायां 'उरत्' इत्यनेनात्वे रपरे एधाम् कर् कृ ध्वम् इति जाते 'हलादिःशेषः' इत्यनेन हलो लोपे 'कुहोश्चुः' इति चुत्वेन अभ्यासककारस्य चकारे 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेः एत्वे 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' इत्यनेन धकारस्य ढत्वे मकारस्य 'मोऽनुस्वारः' इति अनुस्वारे परसवर्णे संयोगे एधाञ्चकृढ्वे इति सिद्धम् ।

एधस्व—एधधातोः लोटि लस्य स्थाने 'तिप्तिस्झि' इत्यादिना थासि प्रत्यये 'कर्त्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'थासः से' इत्यनेन थासः स्थाने से इत्यादेशे कृते 'आमेतः' इत्यनेन एकारस्यामादेशे प्राप्ते तं बाधित्वा 'सवाभ्यां वामौ' इति सूत्रेण एकारस्य वादेशे कृते संयोगे एधस्व इति सिद्धम् ।

एधै—एधधातोः 'लोट् च' इति लोटि, अनुबन्धलोपे लस्य स्थाने उत्तमपुरुषैकवचने इटिप्रत्यये 'कर्त्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेः एत्वे एध अ ए इति भूते 'एत ऐ' इत्यनेन एकारस्य ऐकारे 'आडुत्तमस्य पिच्च' इत्यनेन आटि 'आटश्च' इत्यनेन, 'वृद्धिरेचि इत्यनेन च वृद्धौ कृते एधै इति सिद्धम् ।

एधेत—(ई० ४८, ५१) एधधातोः 'विधिनिमन्त्रणे' ति लिङि गते लः स्थाने प्रथमपुरुषैकवचने तादेशे सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'एध् अ तः इति स्थिते 'लिङः सीयुट्' इति तकारस्य सीयुडागमे अनुबन्धलोपे 'लिङः सलोपेऽनन्त्यस्य' इति सलोपे 'लोपो व्योर्वलि' इति यलोपे 'आद्‌गुणः' इति गुणे 'एधेत' इति सिद्धम् ।

एधिषीष्ट—एधधातोः आशीर्लिङ् तस्य स्थाने तिपि, अनुबन्धलोपे 'लिङाशिषि' इत्यनेन तिङः आर्धधातुकसंज्ञायां 'लिङःसीयुट्' इति सूत्रेण सीयुटि सीयुटः आर्धधातुकत्वात् 'लिङःसलोपोऽनन्त्यस्य' इति सलोपाभावे 'सुट् तिथोः' इति सूत्रेण सुटि 'आर्धधातुकस्येड्वलादेः' इति इडागमेऽनुबन्धलोपे ,लोपो व्योर्वलि इति सूत्रेण मकारस्य लोपे यायुट्सुटोः सस्य षत्वे तकारस्य ष्टुत्वेन टकारे कृते संयोगे एधिषीष्ट इति सिद्धम् ।

एधेरन्—। ६१ । एधधातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इत्यनेन लिङि अनुबन्धलोपें लस्य 'तिप्तस्झि' इत्यादिना झप्रत्यये 'झस्यरन्' इत्यनेन झकारस्य रनादेशे 'कर्त्तरि शप्' इति शपि 'लिङः सीयुट्' इति सीयुटि 'लिङः सलोपोऽनन्त्यस्य' इति सलोपे गुणे 'लोपो व्योर्वलि' इत्यनेन यकारस्य लोपे एधेरन् सिद्धम् !

ऐधिषत्—। ५७-५९ । एधधातोः 'लुङ्' इति लुङ् लस्य स्थाने झप्रत्यये 'आत्मनपदेष्वनतः' इत्यनेन झस्य अत् आदेशे 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति च्लेः सिजादेशे 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण वृद्धौ सकारस्य षत्वे संयोगे ऐधिषत् इति सिद्धम् ।

सन्वल्लघुनि—चङ् परक णि पर रहते जो अङ्ग उसका जो लघुपरक अभ्यास उसको सन पर रहते होने वाले कार्य होते हैं, यदि चङ् पर णि पर रहते अक का लोप न हुआ हो।

कामयाञ्चक्रे—कम्धातोः 'कमेर्णिङ्' इति णिङि अनुबन्धलोपे ,अत उपधायाः' इति वृद्धौ 'कामि' इति भूते 'सनाद्यन्ता धातवः' इति धातुत्वाल्लिटि 'कास्यनेकाच आम्वक्तव्यः' इत्यामि 'णेरनिटि' इति णिलोपे प्राप्ते तं प्रबाध्य 'अयस्मन्तात्वाय्येत्न्विष्णुषु' इति णिङ इकारस्य अयादेशे 'कामय् आम् लिट्' इति 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति 'लिट्परककृञोऽनुप्रयोगे लिटो लः स्थाने प्रथमपुरुषैकवचने तादेशे 'लिटस्तझयोरेशिरेच्' इति तस्य स्थाने एसि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायाम् 'उरत्' इत्यभ्यासऋवर्णस्य' अत्वे रपरत्वे च कृते 'कामयाम् कर् कृ ए' एति स्थिते 'हलादिः शेषः' इति अभ्याससम्बन्धिनो रेफस्य लोपे 'कुहोश्चुः' इति अभ्यासककारस्य चुत्वे 'इको यणचि' इति अणि मस्यानुस्वारे परसवर्णे 'कामयाञ्चक्रे' इति। णिङोऽभावे तु लिटः स्थाने आत्मनेपदे तप्रत्यये एसि द्वित्वे अभ्यासादिकार्ये 'चकमे' इति च सिद्धं भवति।

अचीकमत्।१८। कम्धातोः 'आयादय आर्धधातुके वा, इत्यनेन णिङि अनुबन्धलोपे 'अत उपधायाः' इति उपधावृद्धौ कामि तस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लुङि लस्य स्थाने त प्रत्यये 'लुङ् लङ् लृङ् क्ष्वडुदात्तः' इति अडाऽगमेऽनुबन्धलोपे च्लि प्रत्यये च्लेः सिजादेशे प्राप्ते तं बाधित्वा 'णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्' इत्यनेन च्लेः चङि कृते अकामि +अ+त इति जाते 'णेरनिटि' इति सूत्रेण णिलोपे 'णौ चङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वे 'चङि' इत्यनेन द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इति हलो लोपे 'कुहोश्चुः' इत्यनेन चुत्वे 'सन्वल्लघुनि चङ् परेऽनग्लोपे' इति सूत्रेण सन्वद्भावे 'सन्यतः इत्यनेन अभ्यासाकारस्य इकारे अ + चि + कम् +अ +त इति जाते 'दीर्घो लघोः' इति सूत्रेण दीर्घे च कृते संयोगे अचीकमत् इति रूपं सिद्धम् भवति।

णिङ्प्रत्ययाभावपक्षे लुङि त प्रत्यये अडागमेऽनुबन्धलोपे च्लि प्रत्यये च्लेः

सिचं प्रबाध्य 'कमेश्च्लेश्चङ्वाच्यः' इति वार्तिकेन च्लेः 'चङि' अनुबन्धलोपे द्वित्वे अभ्यासकार्ये कस्य चुत्वे चकारे कृते संयोगे अचकमत इति सिद्धम्।

अद्युतत् ।६२। द्युतधातोः लुङि 'द्युद्भ्यो लुङि' इत्यनेन वैकल्पिके लुङिः परस्मैपदसंज्ञायां लस्य स्थाने तिप् प्रत्ययेऽनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लि प्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशे प्राप्ते 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' इति सूत्रेण च्लेरङि अनुबन्धलोपे अद्युत+अ+ति इति जाते 'इतश्च' इत्यनेन इकारलोपे ङित्वात् 'क्ङिति च' इत्यनेन गुणाभावे च कृते संयोगे अद्युतत् इति रूपम्। परस्मैपदाभावपक्षे —त प्रत्यये च्लौ, च्लेः सिचि, इडागमे, गुणे सकारस्य तकारस्य च ष्टुत्वे कृते अद्योतिष्ट इति सिद्धम्।

चक्षण्वहे—(ई० ५३)—'क्षमूष् सहने' इत्यस्माद् धातोर्लिटि उत्तमपुरुषद्विवचने 'क्षम् वहि' इति स्थिते द्वित्वे अभ्यासत्वे हलादिशेषे टेरेत्वे 'स्वरतिसूति' इति ऊदित्त्वात् वेटि 'चक्षमिवहे' इति। इडभावपक्षे 'चक्षम्वहे' इति स्थितौ 'म्वोश्च' इत्यनेन धातोर्मस्य नत्वे 'रषाभ्याम्-' णत्वे 'चक्षण्वहे' इति सिद्धम्।

दिद्युते—(ई० ५३)—द्युत्धातोर्लिटि तत्स्थाने प्रथमपुरुषैकवचने तादेशे 'लिटि धातोः' – द्वित्वे अभ्यासत्वे 'द्युतिस्वाप्योः सम्प्रसारणम्' इति अभ्यासयकारस्य सम्प्रसारणे इकारे जाते 'सम्प्रसारणाच्च' इति पूर्वरूपे 'दित् द्युत् ए' इति स्थिते 'हलादि शेषः' इति अभ्यासतकारस्य लोपे 'दिद्युते' इति।

अद्योतिष्ट (ई० २३) –द्युत्धातोर्लुङि द्युद्भ्यो लुङि' इति विकल्पपक्षे लङः स्थाने तङि 'लुङ्लङ्--' इत्यडागमे अनुबन्धलोपे 'च्लि लुङि' इति च्लौ च्लेः सिच्' इति सिचि इचि गते 'आर्धधातुकस्येड्वलादेः' इति इटि 'पुगन्तलघूपधस्य च' इति गुणे 'आदेशप्रत्यययोः' इति षत्वे ष्टुत्वे 'अद्योतिष्ट' इति।

ववृते (ई० २०)– वृत्धातोर्लिटस्ते कृते 'लिटि धातोः–'इति द्वित्वे अभ्यासत्वे 'उरत्' इत्यभ्यासऋवर्णस्य अत्वे रपरत्वे हलादिशेषे 'ऋदुपधेभ्यो लिटः कित्वाद् गुणविप्रतिषेधेन' इति लिटः कित्वाद् गुणनिषधे 'लिटस्तझयोः–' इति

सिचं प्रबाध्य 'कमेश्च्लेश्चङ्वाच्य:' इति वार्तिकेन च्ले: 'चङि' अनुबन्धलोपे द्वित्वे अभ्यासकार्ये कस्य चुत्वे चकारे कृते संयोगे अचकमत इति सिद्धम्।

अद्युतत्।६२। द्युतधातो: लुङि 'द्युद्भ्यो लुङि' इत्यनेन वैकल्पिके लुङि: परस्मैपदसंज्ञायां लस्य स्थाने तिप् प्रत्ययेऽनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्त:' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लि प्रत्यये 'च्ले: सिच्' इत्यनेन च्ले: सिजादेशे प्राप्ते 'पुषादिद्युताद्यॢदित: परस्मैपदेषु' इति सूत्रेण च्लेरङि अनुबन्धलोपे अद्युत+अ+ति इति जाते 'इतश्च' इत्यनेन इकारलोपे ङित्वात् 'क्ङिति च' इत्यनेन गुणाभावे च कृते संयोगे अद्युतत् इति रूपम्। परस्मैपदाभावपक्षे —त प्रत्यये च्लौ, च्ले: सिचि, इडागमे, गुणे सकारस्य तकारस्य च ष्टुत्वे कृते अद्योतिष्ट इति सिद्धम्।

चक्षण्वहे—(ई० ५३)—'क्षमूष् सहने' इत्यस्माद् धातोर्लिटि उत्तमपुरुषद्विवचने 'क्षम् वहि' इति स्थिते द्वित्वे अभ्यासत्वे हलादिशेषे टेरेत्वे 'स्वरतिसूति' इति ऊदित्त्वात् वेटि 'चक्षमिवहे' इति। इडभावपक्षे 'चक्षम्वहे' इति स्थितौ 'म्वोश्च' इत्यनेन धातोर्मस्य नत्वे 'रषाभ्याम्-' णत्वे 'चक्षण्वहे'इति सिद्धम्।

दिद्युते—(ई० ५३)—द्युत्धातोर्लिटि तत्स्थाने प्रथमपुरुषैकवचने तादेशे 'लिटि धातो:' – द्वित्वे अभ्यासत्वे 'द्युतिस्वाप्यो: सम्प्रसारणम्' इति अभ्यासयकारस्य सम्प्रसारणे इकारे जाते 'सम्प्रसारणाच्च' इति पूर्वरूपे 'दित् द्युत् ए' इति स्थिते 'हलादि शेष:' इति अभ्यासतकारस्य लोपे 'दिद्युते' इति।

अद्योतिष्ट (ई० २३) –द्युत्धातोर्लुङि द्युद्भ्यो लुङि' इति विकल्पपक्षे लङ: स्थाने तङि 'लुङ्लङ्--' इत्यडागमे अनुबन्धलोपे 'च्लि लुङि' इति च्लौ च्ले: सिच्' इति सिचि इचि गते 'आर्धधातुकस्येड् वलादे:' इति इटि 'पुगन्तलघूपधस्य च' इति गुणे 'आदेशप्रत्यययो:' इति षत्वे ष्टुत्वे 'अद्योतिष्ट' इति।

ववृते (ई० २०)– वृत्धातोर्लिटस्ते कृते 'लिटि धातो:–'इति द्वित्वे अभ्यासत्वे 'उरत्' इत्यभ्यासऋवर्णस्य अत्वे रपरत्वे हलादिशेषे 'ऋदुपधेभ्यो लिट: कित्त्वाद् गुणविप्रतिषेधेन' इति लिट: कित्त्वाद् गुणनिषधे 'लिटस्तझयो:–' इति

तस्य एशि अनुबन्धलोपे 'ववृते' इति ।

अनुष्यन्दते (ई० २२, ५२) 'अनु' इत्युपसर्गपूर्वकात् 'स्यन्दू प्रस्रवणे इत्यस्माद्धातोर्लटि आत्मनेपदे तप्रत्यये सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इत्येत्वे 'अनुविपर्यभिनिविभ्यः स्यन्दतेरप्राणिषु' इति विभाषया सस्य षत्वे 'अनुष्यन्दते' इति । पक्षे 'अनुस्यन्दते' इति च भवति । जलन् इति शेषः । 'अनुस्यन्दते हस्ती' इत्यत्र तु न षत्वं प्राणिनो हस्तिनःकर्त्तुर्वर्त्तमानत्वात् ।

लिङ्सिचाविति (ई० ५२)—इक्समीपादिति, झलादीति, किदिति चानुवर्तते ततश्च—'इक्समीपाद्धलः, परौ झलादी लिङ्, आत्मनेपदपरः सिच्चेत्येतौ कितौ स्तः, इति सूत्रार्थः सम्पद्यते । उदाहरणं तु 'क्लृप्सीष्ट' इति । अत्र कित्त्वाद् 'पुगन्ते' ति गुणो नेति ।

क्लृप्सीष्ट (ई० ५३)—'कृपू सामर्थ्ये' इत्यस्माद्धातोराशीर्लिङि तत्स्थाने आत्मनेपदे तप्रत्यये 'लिङः सीयुट्' इति 'सुट् तिथोः' इति सुटि अनुबन्धलोपे 'कृप् सी स् त' इति स्थिते 'स्वरतिसूति'—इति ऊदित्वात् वेटि 'पुगन्त—इति गुणे रपरत्वे 'कृपो रो लः' इति रेफस्य लत्वे उभयोः सकारयोः पर्यायेण षत्वे ष्टुत्वे 'कल्पिषीष्ट' इति । इडभावे तु 'कृप् सी स् त' इत्यवस्थायां 'कृपो रो लः' इति लत्वे कृते 'पुगन्त'—इति गुणे प्राप्ते 'लिङसिचावात्मनेपदेषु' इति लिङः कित्वेन 'क्ङिति च' इति गुणनिषेधे सस्य षत्वे ष्टुत्वे 'क्लृप्सीष्ट' इति ।

अक्लृप्त (ई० ४२)—कृप्धातोर्लुङि तत्स्थाने 'द्युद्भ्यो लुङि' इति विकल्पपक्षे आत्मनेपदे तप्रत्यये 'लुङ्लङ्—' इत्यडागमे मध्ये च्लौ सिचि अनुबन्धलोपे 'स्वरतिसूति' इति ऊदित्वाद् वेटि 'अ कृ प् स् इ त' इति स्थिते 'पुगन्तलघूपधस्य च' इति गुणे रपरत्वे 'कृपो रोलः' इति रेफस्य लत्वे षत्वे ष्टुत्वे 'अकल्पिष्ट' इति । इडभावे तु 'कृपो रो लः' इति लत्वे 'अक्लृप् स् त' इति स्थिते 'झलो झलि' इति सलोपे 'अक्लृप्त' इति सिद्धं भवति ।

भ्रेशे (ई० ४४)—'टुभ्राशृ दीप्तौ' इत्यस्माद्धातोरनुबन्धलोपे सति लिटि

तङि 'लिटस्तझयो:—इति तस्य एशादेशे अनुबन्धलोपे 'लिटि धातो:—' इति द्वित्वे अभ्यासत्वे हलादिशेषे 'फणां च सप्तानाम्' इति एत्वाभ्यासलोपे 'भ्रेशे' इति । असति एत्वाभ्यासलोपे ह्रस्वत्वे हलादिशेषे 'अभ्यासे चर्च' इति भस्य बत्वे 'बभ्राशे' इति च भवति ।

त्रेपे—लज्जार्थकत्रप्धातो: परोक्षे लिट्' इति लिटि तस्य तप्रत्यये तकारस्य 'लिटस्तझयोरेशिरेच्' इति सूत्रेण एशि कृते 'लिटि धातोरनभ्यासस्य' इति धातो: द्वित्वे 'पूर्वोऽभ्यास:' इति अभ्याससंज्ञायां 'हलादि: शेष:' इति हलो लोपे 'तृफलभजत्रपश्च' इति सूत्रेण एत्वेऽभ्यासलोपे कृते सयोगे त्रेपे इति सिद्धम् ।

अत्रपिष्ट—त्रप्धातो: लुङि त प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्त:' इति अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लि प्रत्यये च्ले: सिजादेशेऽनुबन्धलोपे अ+त्रप्+स्त इति जाते 'स्वरतिसूतिसूयतिधूञूदितो वा' इति सूत्रेण वैकल्पिके इडागमेऽनुबन्धलोपे सकारस्य षत्वे तस्य ष्टुत्वे अत्रपिष्ट इति रूपम् । इडागमाभावपक्षे सिचो लुकि अत्रप्त इति सिद्धम् ।

अशिश्रियत्—सेवार्थकश्रिधातोर्लुङि, तिपि, अनुबन्धलोपे च्लि प्रत्यये च्ले: सिजादेशे प्राप्ते 'णिश्रिद्रुस्रुभ्य: कर्तरि चङ्' इत्यनेन च्ले: चङि अनुबन्धलोपे 'चङि' इत्यनेन द्वित्वे 'पूर्वोऽभ्यास:' इत्यभ्याससंज्ञायां हलादि शेषे 'लुङ्लङ्लृङ्क्ष्वडुदात्त:' इत्यनेन अडागमेऽनुबन्धलोपे 'अचिश्नुधातुभ्रुवांय्वोरियङुवङौ' इत्यनेन इयङि 'इतश्च' इति इकारलोपे अशिश्रियत् इति रूपम् । आत्मनेपदे तु तप्रत्यये पूर्वोक्तकार्ये अशिश्रियत इति सिद्धम् ।

वर्त्स्यति–(४९, ५१, ५३)—वृत्धातोर्लिटि 'वृद्भ्य: स्यसनो:' इति विभाषया परस्मैपदे सति लिट: स्थाने तिपि अनुबन्धलोपे 'स्यतासीलृलुटो:' इति स्यप्रत्यये स्यस्यार्धधातुकत्वात् 'आर्धधातुकस्येड् वलादे:' इति इटि प्राप्ते 'न वृद्भ्यश्चतुर्भ्य:' इति निषेधो 'पुगन्तलघूपधस्य च' इति गुणे रपरत्वे 'वर्त्स्यति' इति । पक्षे आत्मनेपदे 'वर्तिष्यते' ।

भ्रियात् (ई० ३८)—भृधातोराशीर्लिङि तिपि यासुटि अनुबन्धलोपे यासुट: कित्त्वात गुणाऽभावे 'रिङ्शयग्लिङक्षु' इति ऋतो रिङादेशे अनुबन्धलोपे

'इतश्च' इति तिप इकारलोपे 'स्कोः संयोगाद्योरन्ते च' इति सलोपे 'भ्रियात्' इति ।

नन्वत्र ऋतो रिङि कृते 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घः कुतो नेति चेन्न 'रीङ् ऋतः' इत्यनेनैव दीर्घे सिद्धे 'रिङ्' इति ह्रस्वविधानस्य वैयर्थ्यापत्तेः, तस्मादत्र रिङि कृते न दीर्घः इत्यवसेयम् ।

अभृत । ५८ । भरणार्थक् भृञ्धातोः लुङि तप्रत्यये अडागमऽनुबन्धलोपे च्लि प्रत्यये 'च्लेः सिच्' इति च्लेः सिजादेशेऽनुबन्धलोपे 'उश्च' इत्यनेन कित्वे 'ह्रस्वादङ्गात्' इति सूत्रेण सिचो लुकि कित्त्वाद् गुणाभावे संयोगे अभृत इति सिद्धम् ।

जहार—हरणार्थकहृधातोः लिटि अनुबन्धलोपे लस्य स्थाने तिपि तिपः 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण णलि अनुबन्धलोपे धातोः द्वित्वे अभ्यासत्वे 'उरत्' इत्यत्वे रपरत्वे हलादिशेषे ह+हृ+अ इति जाते 'कुहोश्चुः' इत्यनेन चुत्वेन हकारस्य झकारे 'अभ्यासे चर्च' इति चर्त्वेन झकारस्य जकारे 'अचो ञ्णिति' इत्यनेन वृद्धौ रपरे संयोगे जहार इति सिद्धम् ।

भेजे—सेवार्थकभजधातोः 'परोक्षे लिट्' इत्यनेन लिटि अनुबन्धलोपे लस्य स्थाने 'तिप्तस्झिसिप्थस्थमिब्वस्मस्ताऽऽतांझथासाथांध्वमिड्वहिमहिङ्' इति सूत्रेण तप्रत्यये'लिटस्तझयोरेशिरेच्' इत्यनेन तकारस्य स्थाने एशि आदेशेऽनुबन्ध लोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'अत एकहल्मध्येऽनादेशादेर्लिटि' इति सूत्रेण अभ्यासस्य एत्वे 'हलादिः शेषः'इति हलो लोपे भेजे इति सिद्धम् ।

अभाक्षीत् । ३३ । भजधातोः लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इति इकारस्य लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे च्लिप्रत्यये च्लेः सिजादेशेऽनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इति ईडागमे, 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ सकारस्य षत्वे जकारस्य कुत्वेन गकारे गकारस्य चर्त्वेन ककारे कष-संयोगे क्षकारे वर्णसम्मेलने अभाक्षीक्ष् इति सिद्धम् । आत्मनेपदेषु तु त प्रत्यये सिचो लुकि जकारस्य कुत्वे अभक्त इति रूपम् ।

इयाज । ५९ ।—देवपूजासङ्गतिकरणदानार्थकयज्धातोः लिटि, तिपि, अनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति तिपो णलि, अनुबन्धलोपे धातोः द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति हलो लोपे य+यज् अ इति जाते सूत्रेण पूर्वरूपे 'अत उपधायाः' इति वृद्धौ इयाज इति सिद्धम् ।

ईजतुः—यज् धातोः लिटि, तसि तसः अतुसि कृते 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे प्राप्ते तं प्रबाध्य 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति नियमात् 'वचिस्वपियजादीनां किति' इति सूत्रेण सम्प्रसारणे पूर्वरूपे 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति न्यायात् द्वित्वे अभ्यासकार्ये लोपे च इ+इज +अतुस् इति जाते सवर्णदीर्घे सकारस्य रुत्वे विसर्गे च कृते ईजतुः इति सिद्धम्

वोढा—वह्धातोः 'अनद्यतने लुट्' इति लुटि, तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इति प्राप्ते तं प्रबाध्य 'स्यतासी लृलुटोः' इत्यनेन तासि 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डादेशेऽनुबन्धलोपे टिलोपे वह्+त्+आ इति जाते ह्स्य 'हो ढः' इति ढत्वे तकारस्य 'झषस्तथोर्धोऽधः' इति धत्वे ष्टुत्वेन ढत्वे 'ढो ढे लोपः' इत्यनेन पूर्वढकारस्य लोपे 'सहिवहोरोदवर्णस्य' इति अकारस्यौत्वे संयोगे वोढा इति सिद्धम् ।

उवाह । ६४ । --वह्धातोः लिटि, णलि, अनुबन्धलोपे 'लिटिधातोरनभ्यासस्य' इत्यनेन द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति हलो लोपे 'लिटचभ्यासस्योभयेषाम्' इत्यनेन सम्प्रसारणे पूर्वरूपे 'अत उपधायाः' इति उपधावृद्धौ संयोगे उवाह इति सिद्धम् ।

अवोढाम्—वह्धातोः लुङि, तसि, तसः 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तामि अडागमे च्लिप्रत्यये 'च्लेः सिच्' इति च्लेः सिजादेशे 'झलो झलि' इति सकारस्य लोपे 'हो ढः' इति ढत्वे 'झषस्तथोर्धोऽधः' इति सूत्रेण तकारस्य धकारे 'ष्टुना ष्टुः' इति ष्टुत्वेन धकारस्य ढकारे 'ढो ढे लोपः' इति पूर्वढकारस्य लोपे 'सहिवहोरोदवर्णस्य' इति ओत्वे संयोगे अवोढाम् इति सिद्धम् ।

ईजुः (ई० ४७)—यज्धातोर्लिटि प्रथमपुरुषबहुवचने झौ उसि 'ईजुः' इति ।

अयाक्षीत्—'यज् देवपूजासंगतिकरणदानेषु' इत्यस्माद् धातोर्लुङि प्रथमपुरुषैकवचने तिपि 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे-च्लौ च्लेः सिचि इचि गते सिचः सस्यार्धधातुकत्वात् 'एकाच उपदेशेऽनुदात्तात्' इतीट्निषेधे 'इतश्च' इति तिपः इकारलोपे तकारस्यापृक्तत्वात् 'अस्तिसिचोऽपृक्ते' इति ईटि 'अयज् स् ई त्' इति स्थिते 'वदव्रजहलन्तस्याचः' इति वृद्धौ 'व्रश्चभ्रस्जसृज' इति जस्य षत्वे 'षढोः क सि' इति षस्य कत्वे कात्परत्वात् सिचः सकारस्य 'आदेशप्रत्यययोः'इति षत्वे 'अयाक्षीत्' इति। आत्मनेपदे तु 'अयष्ट' इति भवति।

उवोढ (ई० ५०)—वहधातोर्लिटि सिपि सिपो थलि अनुबन्धलोपे 'एकाच उपदेशेऽनुदात्तात्' इति इडभावे प्राप्तेऽपि क्रादिनियमान्नित्ये प्राप्ते 'उपदेशेऽत्वत इति तन्निषेधे थलः पित्त्वात् 'असंयोगाल्लिट् कित्' इत्यस्याप्राप्त्या कित्त्वाऽभावेन 'वचिस्वपी'ति सम्प्रसारणाऽभावे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे अभ्याससंज्ञायां 'लिटचभ्यासस्यीभयेषाम्' इति अभ्यासवकारस्य सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'हलादिः शेषः' इति अभ्याससम्बन्धिहकारस्य लोपे 'उ वह् थ' इति स्थिते 'हो ढः' इति हस्य ढत्वे 'झषस्तथोर्धोऽधः' इति थस्य धत्वे 'ष्टुना ष्टुः' इति धस्य ष्टुत्वेन ढत्वे 'ढो ढे लोपः' इति पूर्वढकारस्य लोपे 'ढ्लोपे पूर्वस्य दीर्घोऽणः' इति दीर्घे प्राप्ते तम्प्रबाध्य 'सहिवहोरोदवर्णस्य' इत्यकारस्य ओत्वे 'उवोढ' इति सिद्धम्।

अवाक्षीत् (ई० २५)—वहधातोर्लुङि तिपि अडागमे अनुबन्धलोपे च्लौ सिचि इचि गते 'इतश्च' इति तिप इकारलापे तस्यापृक्तत्वात् 'अस्तिसिचोऽपृक्ते' इति ईटि 'अवह् स् ई त्' इति स्थिते 'वदव्रजहलन्तस्याचः' इति वृद्धौ 'हो ढः' इति हस्य ढत्वे 'षढोः कः सि' इति ढस्य कत्वे 'आदेशप्रत्यययोः' इति सिचः सस्य षत्वे 'अवाक्षीत्' इति रूपं भवति। आत्मनेपदे 'अवोढ' इति भवति।

विव्याय (ई० ५१)—'व्येञ् संवरणे' इति धातोर्लिटि तत्स्थाने तिपि 'परस्मैपदानामि' त्यादिना णलादेशे अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे प्राप्ते 'न व्यो लिटि' इति तन्निषेधे 'अचो ञ्णिति' इति वृद्धौ 'व्यै अ' इति स्थिते 'लिटि धातोः—' इति द्वित्वे अभ्याससंज्ञायां 'लिटचभ्यासस्योभयेषाम्'

इत्यभ्यासयकारस्य सम्प्रसारणे पूर्वरूपे 'विव्यैँ अ' इति स्थिते ऐकारस्य आयादेशे 'विव्याय' इति सिद्धम् ।

न चात्र सम्प्रसारणात् प्राक् परत्वाद्धलादिशेषेण यकारस्य निवृत्तौ ततः वकारस्य सम्प्रसारणे उकारे सति 'उव्याय' इति रूपमापद्येतेति वाच्यम्, उभयेषां ग्रहणसामर्थ्येन परमपि हलादिशेषं बाधित्वा यस्य सम्प्रसारणविधानेनाऽदोषात् । अन्यथा 'लिटयभ्यासस्ये'त्यत्र 'वचिस्वपियजादीनामि'त्यस्य 'ग्रहिज्ये' त्यादिसमग्रसूत्रस्य च स्वरितत्वादनुवृत्त्यैव सिद्धे उभयेषां ग्रहणस्य वैयर्थ्यं वारयितुं कः शक्नुयात् ?

नचैवमपि वस्यैवाऽनेन सम्प्रसारणं कुतो नेति वाच्यम् ? 'न सम्प्रसारणे सम्प्रसारणम्' इति लिङ्गेन पूर्वं यस्यैव सम्प्रसारणावगतेः ।

इति भ्वादिप्रकरणम् ।

अथ अदादिप्रकरणम्

जघास । २१ ।—भक्षणार्थक अदधातोः 'परोक्षे लिट्' इति लिटि अनुबन्ध लोपे 'लिटयन्यतरस्याम्' इत्यनेन वैकल्पिके अदो घस्लादेशेऽनुबन्धलोपे लकारस्य स्थाने 'तिप्तस्झिसिप्थस्थमिब्वस्मस् ताऽतांझथासाथांध्वमिड्वहिमयिङ्' इत्यनेन तिप्प्रत्ययेऽनुबन्धलोपे तिपो 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण णलि, अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेन अभ्यासमसंज्ञायां 'हलादिः शेषः' इत्यनेन हलोलोपे 'कुहोश्चुः' इत्यनेन चुत्वेन धकारस्य झकारे'अभ्यासे चर्च' इति सूत्रेण चर्त्वेन जकारे 'अत उपधायाः' इत्यनेन वृद्धौ जघास इति सिद्धम् ।

जक्षतुः । ६१ ।—अदधातोः लिटि अदो 'लिटयन्यतरस्याम्' इत्यनेन घस्लादेशेऽनुबन्धलोपे लस्य तसि तसः अतुसि धातोः द्वित्वे अभ्याससंज्ञायां हलो

लोपे 'कुहोश्चुः' इति चुत्वे 'अभ्यासे चर्च' इति जश्त्वेन जकारे 'गमहनजनखनघसां लोपः क्ङित्यनङि' इति सूत्रेण उपधालोपे ज+घस्+अतुस् इति जाते 'खरि च' इति चर्त्वेन धकारस्य ककारे 'शासिवसिघसीनां च' इत्यनेन सकारस्य षकारे क-ष-संयोगे क्षत्वे प्रत्ययस्थसकारस्य रुत्वे विसर्गे संयोगे जक्षतुः इति सिद्धम् । पक्षे घस्लादेशाभावे अद+आद+अतुस् इति 'अत आदेः' इति दीर्घे सवर्णदीर्घे च कृते सकारस्य रुत्वे विसर्गे आदतुः इति रूपम् ।

जक्षुः (ई० ६२)—अद्धातोर्लिटि तत्स्थाने झौ झेर्जुसि 'लिटयन्यतरस्याम्' इति अदो 'घस्लृ' आदेशे अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन अभ्याससकारस्य लोपे 'कुहोश्चुः' इति घस्य झत्वे 'अभ्यासे चर्च' इति झस्य जत्वे 'असंयोगाल्लिट् कित्'इति कित्वे 'गमहनजनखनघसां लोपः क्ङित्यनङि'इति उपधाऽकारस्य लोपे 'खरि च' इति घस्य चर्त्वेन ककारे 'शासिवसिघसीनां च' इति सस्य षत्वे सकारस्य रुत्वे विसर्गे 'जक्षुः' इति, घस्लादेशाभावे तु 'आदुः' इति भवति ।

आदुः—घस्लादेशाऽभावपक्षे अद्धातोर्लिटि तत्स्थाने झौ झेर्जुसि द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति दलोपे 'अत आदेः' इत्यभ्यासाऽकारस्य दीर्घे 'अत उपधायाः' इति उपधाऽकारस्य वृद्धौ सवर्णदीर्घे सकारस्य रुत्वे विसर्गे 'आदुः' इति सिद्धम् ।

आद—घस्लादेशाऽभावपक्षे अद्धातोर्लिटि तिपि णलि द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इत्युपधादकारस्य लोपे 'अ अद् अ' इति जाते 'अत आदेः' इत्याद्यकारस्य दीर्घे 'अत उपधायाः' इति वृद्धौ 'आ अद् अ' इति स्थिते सवर्णदीर्घे 'आद' इति सिद्धम् ।

जघसिथ । ६९ ।—अद्धातोः लिटि, 'लिटयन्यतरस्याम्' इति सूत्रेण अदः पाक्षिके घस्लादेशेऽनुबन्धलोपे लकारस्य सिपि, सिपः थलि, अनुबन्धलोपे धातोः द्वित्वे 'हलादिः शेषे' 'कुहोश्चुः' इति चुत्वे 'अभ्यासे चर्च' इत्यनेन जकारे ज+घस्+थ इति जाते तासि घसोऽभावात् थलि क्रादिनियमात् नित्ये इटि संयोगे जघसिथ इति रूपम् । घस्लादेशाभावपक्षे द्वित्वे अभ्यासकार्ये 'अत आदेः' इति

सूत्रेण दीर्घे 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे 'इडत्यर्तिव्ययतीनाम्' इति सूत्रेण नित्यं इटि संयोगे आदिथ इति सिद्धम् ।

अद्धि । ६५ ।—अदधातोः लोटि, सिपि, अनुबन्धलोपे 'सेर्ह्यपिच्च' इति सिपो ह्रौ 'कर्त्तरि शप्' इत्यनेन शपि तस्य 'लुकि' 'हुझल्भ्यो हेर्धिः' इत्यनेन हिस्थाने धित्वे संयोगे अद्धि इति रूपम् । पक्षे 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इत्यनेन हेः तातङादेशेऽनुबन्धलोपे दकारस्य चर्त्वे तकारे संयोगे अत्तात् इति सिद्धम् ।

आदत् । ६० ।—अदधातोः 'अनद्यतने लङ्' इति लङि लङः स्थाने तिप्यनुबन्धलोपे 'इतश्च' इति इकारस्य लोपे 'कर्त्तरि शप्' इत्यनेन शपि 'अदिप्रभृतिभ्यः शपः' इत्यनेन शपो लुकि अडागमं प्रबाध्य 'आडजादीनाम्'इत्यनेन आडागमेऽनुबन्धलोपे 'आटश्च' इत्यनेन वृद्धौ आद्+त् इति जाते 'अदः सर्वेषाम्' इत्यनेन अटि, अनुबन्धलोपे संयोगे आदत् इति सिद्धम् ।

अघसत्—अद्धातोः लोटि 'लुङ्सनोर्घस्लृ' इत्यनेन अदो घस्लादेशेऽनुबन्धलोपे लस्य तिपि तिपः इकारस्य 'इतश्च' इति लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति सिजादेशे प्राप्ते तं बाधित्वा 'पुषादिद्युताद्यॢदितः' इति सूत्रेण च्लेः अङादेशे कृते संयोगे अघसत् इति सिद्धम् ।

जघ्नतुः । ५५ ।—हिंसागमनार्थक हन्धातोः लिटि, तसि-अतुसि 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे 'पूर्वोऽभ्यासः' इति अभ्याससंज्ञायां 'हलादिः शेषः' इति हलो लोपे 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्युपधालोपे 'हो हन्तेर्ञ्णिन्नेषु' इत्यनेन हकारस्य कुत्वेन घत्वे ह+घन्+अतुस् इति जाते 'कुहोश्चुः' इत्यनेन अभ्यासहकारस्य चुत्वेन झकारे 'अभ्यासे चर्च' इति तस्य जकारे सकारस्य रुत्वे विसर्गे जघ्नतुः इति सिद्धम् ।

जघनिथ । ३० ।—हन्धातोः लिटि, सिपि, थलि, अनुबन्धलोपे धातोः द्वित्वे अभ्यासकार्ये ह+हन्+ इति स्थिते 'कुहोश्चुः' इत्यनेन चुत्वे 'अभ्यासे चर्च'

इत्यनेन जकारे 'ऋतो भारद्वाजस्य' इति सूत्रनियमात् पाक्षिके इडागमेऽनुबन्धलोपे ञ्णित्प्रत्ययपरत्वाभावात् नकारपरत्वाभावाच्च 'हो हन्तेर्ञ्णिन्नेषु' इत्यस्याप्राप्त्या अभ्यासाच्च' इति सूत्रेण हकारस्य कुत्वेन जघनिथ इति रूपम् । इडागमाभावपक्षे 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्युपधालोपे संयोगे जघन्थ इति सिद्धम् ।

असिद्धवदत्राऽऽभात् (ई० ४६)—इत ऊर्ध्वमापादपरिसमाप्तेराभीयम् समानाश्रये तस्मिन् कर्तव्ये तदसिद्धं स्यात् । 'असिद्धवदत्राभात्' (६।४।२।।) सूत्र से लेकर षष्ठ अध्याय के चतुर्थ पाद की समाप्ति पर्यन्त सभी सूत्र 'आभीय' कहलाते हैं । समानाश्रय आभीय कार्य के करने में कृतसमानाश्रय आभीय कार्य असिद्ध हो । यही इस सूत्र का भावार्थ हुआ । उदाहरण जैसे 'जहि' यहाँ जकार के असिद्ध होने से अकार के परे 'हि' का 'अतो हेः' से लोप नहीं हुआ ।

जहि (ई० ४७, ५३)—हन्धातोर्लोटि तत्स्थाने सिपि अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'सेर्ह्यपिच्च' इति सिपः सस्य हौ 'हन् हि' इति जाते 'हन्तेर्जः' इति हनः स्थाने जादेशे 'जहि' इति । अत्र जादेशे कृते 'अतो हेः' इति अतः परस्य हेर्लुक् तु न भवति, 'असिद्धवदत्राभात्' इत्यनेन जादेशस्यासिद्धत्वात् ।

अहत—।३६। हनधातोः लङि अनुबन्धलोपे लकारस्य स्थाने मध्यमपुरुषबहुवचने थप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे ऽनुबन्धलोपे 'तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण थकारस्य तकारे 'कर्तरि शप्' इति शपि तस्य 'अदिप्रभृतिभ्यः शपः' इति लुकि 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इत्यनेन नकारस्य लोपे संयोगे अहत इति सिद्धम् ।

अवधीत्—।४८।हनधातोः 'लुङि' इति लुङि 'लुङि च' इत्यनेन हनो वधादेशे लस्य स्थाने तिप्प्रत्ययेऽनुबन्धलोपे 'इतश्च' इतीकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे अ+वध+ति इति स्थिते 'च्लि लुङि' इति

च्लिप्रत्यये 'च्लेः सिच्' इति सिजादेशेऽनुबन्धलोपे वधादेशस्यानेकाच्त्वात् 'एकाच उपदेशेऽनुदात्ताद्' इति सूत्रेण इड्निषेधाभावात् 'आर्धधातुकस्येड्वलादेः' इति इडागमे, 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमेऽनुबन्धलोपे अल्लोपे 'इट ईटि' इति सूत्रेण सकारस्य लोपे 'अतो हलादेर्लघोः' इति वृद्धौ प्राप्तायाम् 'अचः परस्मिन् पूर्वविधौ' इत्यनेन अल्लोपस्य स्थानिवद्भावात् वृद्धेर्निषेधे सवर्णदीर्घे अवधीत् इति सिद्धम् ।

अयुः—।५६। या प्रापणे इत्यर्थकयाधातोः लङि झौ 'कर्तरि शप्' इति शपि तस्य 'अदिप्रभृतिभ्यः शपः' इत्यनेन लुकि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'लङः शाकटायनस्यैव' इति सूत्रेण वैकल्पिके झेर्जुसादेशेऽनुबन्धलोपे 'उस्यपदान्तात्' इत्यनेन पररूपे सकारस्य रुत्वे विसर्गे अयुः इति रूपम् । जुसादेशाभावपक्षे—'झोऽन्तः' सूत्रेण झस्य अन्तादेशे 'इतश्च' इकारलोपे तकारस्य 'संयोगान्तस्य लोपः' इति लोपे अयान् इति सिद्धम् ।

विदाञ्चकार—।२७। ज्ञानार्थकात् विदधातोः लिटि 'उषविदजागृभ्योऽन्यतरस्याम्' इत्यनेन आमि विद इत्यदन्तनिपातनाल्लघूपधगुणाभावे 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परककृञोऽनुप्रयोगे लकारस्य तिपि अनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण तिपो णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन कृ इत्यस्य द्वित्वे 'अभ्याससंज्ञायां' 'उरत्' इत्यत्वे रपरे 'हलादिः शेषः' इति हलो लोपे 'कुहोश्चुः' इत्यनेन चुत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरे 'अत उपधायाः' इति वृद्धौ यकारस्य अनुस्वारे परसवर्णे च कृते विदाञ्चकार इति रूपम् । आमोऽभावपक्षे धातोः द्वित्वे अभ्यासकार्ये गुणे कृते संयोगे विवेद इति सिद्धम् ।

विदाङ्करोतु–(ई० ३२)–विद्धातोर्लोटि 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति आमि गुणाऽभावे लोटो लुकि लोट्परककृञोऽनुप्रयोगे च निपातिते 'वदाम् कृ लोट्' इति स्थिते लोटः स्थाने तिपि अनुबन्धलोपे तिपः सार्वधातुकत्वात् शपि प्राप्ते तम्प्रबाध्य 'तनादिकृञ्भ्य उः' इत्युत्वे 'विदाम् कृ उ ति' इति जाते आर्धधातुकं शेषः' इत्युकारस्यार्धधातुकत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे

च विहृते 'विदाम्कर् उ ति' इति स्थिते तिपो निमित्तमादाय पुनः उकारस्य गुणे 'एरुः' इति तिप इकारस्य उत्वे मस्यानुस्वारे परसवर्णे च कृते 'विदाङ्करोतु' इति सिद्धम् । तातङि पक्षे 'विदाङ्कुरुतात्' इति ।

विदाङ्कुरुतात्—विदधातोर्लोटि 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति आमि गुणाभावे लोटो लुकि लोट्परककृञोऽनुप्रयोगे च निपातिते 'विदाम् कृ लोट्' इति जाते लोटस्तिपि अनुबन्धलोपे 'एरुः' इत्युत्वे 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति तातङि अनुबन्धलोपे शपं बाधित्वा 'तनादिकृञ्भ्य उः' इत्युप्रत्यये तस्यार्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे च कृते 'अत उत्सार्वधातुके' इति ककाराकारस्य उत्वे मस्यानुसारे परसवर्णे च कृते 'विदाङ्कुरुतात्' इति । 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति विकल्पपक्षे 'वेत्तु' इति ।

वेत्तु—विद्धातोर्लिटि तिपि अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'विद् ति' इति स्थिते गुणे दस्य चर्त्वे 'एरुः' इति तिप इकारस्य उत्वे 'वेत्तु' इति सिद्धम् ।

विदांकुर्वन्तु—(ई० ५२)—विद्धातोर्लोटि 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इत्यामि गुणाभावे लोटो लुकि लोडन्तकृञोऽनुप्रयोगे च निपातिते 'विद् आम् लोट्' इति स्थिते लोटः स्थाने झौ 'विदाम् कृ उः' इत्युप्रत्यये 'विदाम् कृ उ झि' इति दशायामुप्रत्ययस्यार्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरे च कृते 'विदाम् कर् उ झि' इति जाते 'झोऽन्तः' इत्यनेन झस्यान्तादेशे 'अत उत्सार्वधातुके' इति ककाराकारस्य उत्वे मस्यानुस्वारे परसवर्णे 'एरुः' इत्युत्वे 'इको यणचि' इति यणि 'विदाङ्कुर्वन्तु' इति । विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति विकल्पपक्षे 'विदन्तु, इति च सिद्धम् भवति ।

विदाङ्कुरु—(ई० ४७)—विद्धातोर्लोटि 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति आमि गुणाऽभावे लोटो लुकि लोडन्तकृञोऽनुप्रयोगे च निपतिते 'विद् आम् लोट्' इति स्थिते लोटः स्थाने सिपि सिपः सार्वधातुकत्वात् शपि प्राप्ते तम्प्रबाध्य 'तनादिकृञ्भ्यः उः' इत्युप्रत्यये उप्रत्ययस्य आर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरे च कृते 'सेर्ह्यपिच्च' इति सिपः स्थाने हौ 'उतश्च प्रत्ययाद-

संयोगपूर्वात्' इति ह्रेलुंकि उक्तं रूपं सिद्धम् ।

स्तः—(ई० २७)—अस्धातोर्लटः तसि सार्वधातुकसंज्ञाया शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'श्नसोरल्लोपः' इति अस्तेरकारलोपे सस्य रुत्वे विसर्गे 'स्तः' इति ।

एधि—।२९। अस्धातोः लोटि मध्यमपुरुषैकवचने सिपि अनुबन्धलोपे सर्वधातुकसंज्ञायां 'कर्तरि शप्' इत्यनेन शपि तस्य 'अदिप्रभृतिभ्यः शपः' इत्यनेन लोपे 'सेर्ह्यपिच्च' इत्यनेन सेर्हिभावे अस्+हि इति भूते 'घ्वसोरेद्धावभ्यासलोपश्च' इति सूत्रेण सकारस्य एत्वे एत्वस्याऽसिद्धत्वात् 'हुझल्भ्यो हेर्धिः' इत्यनेन हेर्धिभावे 'श्नसोरल्लोपः' इत्यनेन अकारलोपे कृते संयोगे एधि इति सिद्धम् । तातङादेशे परेण तातङा बाधात् एत्वाभावे स्तात् इति सिद्धम् ।

आसीत्—।३०। अस्धातोः लङि, तिपि, अनुबन्धलोपे 'इतश्च' इत्यनेन इकारलोपे 'कर्तरि शप्' इति शपि शपो 'अदिप्रभृतिभ्यः शपः' इत्यनेन लुकि, 'आडजादीनाम्' इत्यनेन आडागमेऽनुबन्धलोपे 'आटश्च' इति वृद्धौ 'अस्तिसिचोऽपृक्ते' इत्यनेन इडागमेऽनुबन्धलोपे संयोगे आसीत् इति सिद्धम् ।

निष्यात्—'नि' उपसर्गात् 'अस' धातोर्लिङि तिपि अनुबन्धलोपे यासुटि अनुबन्धलोपे 'नि' अस् यास् ति' इति स्थिते यासुटः कित्त्वेन तस्मिन् परे 'श्नसोरल्लोपः' इत्यल्लोपे 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' इति धातोः सस्य षत्वे 'इतश्च' इति तिप इकारलोपे'स्कोः संयोगाद्योरन्ते च'इति सलोपे 'निष्यात्' इति सिद्धम् ।

रवीति—(ई० ४३)–रुधातोर्लटि तत्स्थाने तिपि सार्वधातुकसंज्ञायां शपि 'अदिप्रभृतिभ्यः शपः इति शपो लुकि 'तुरुस्तुशम्यमः सार्वधातुके' इति विभाषया ईटि 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'रवीति' इति । ईडभावपक्षे 'उतो वृद्धिर्लुकि हलि' इति वृद्धौ 'रौति' इति भवति ।

आयन्—(ई० ४७)—इण्धातोर्लङि तस्थाने झौ झस्यान्तादेशे 'इणो यण्' इत्यनेन इकारस्य यणि तस्याभीयत्वेन असिद्धत्वादाटि शपो लुकि 'इतश्च' इतीकारलोपे 'संयोगान्तस्य लोपः' इति तलोपे 'आयन्' इति सिद्धम् ।

निरियात्—(ई० ५०) निरुपसर्गपूर्वकात् इण्धातोराशीर्लिङि तत्स्थाने-

तिपि 'इतश्चे'ति ति तिप इकारलोपे यासुटि तस्यार्धधातुकत्वे सलोपे 'अकृत्सार्वधातुकयोर्दीर्घः' इति ह्रस्वे 'निरियात्' इति ।

अभीयात्—(ई० ४९)—अभीत्युपसर्गपूर्वकात् इण्धातोर्लिङस्तिपि इकारलोपं यासुटि तस्यार्धधातुकत्वे कित्त्वे सलोपे सवर्णदीर्घे 'अभीयात्' इति ।

अत्र 'अन्तादिवच्च' इत्यनेन पूर्वान्तवद्भावेन 'एतेर्लिङि' इति ह्रस्वः कुतो नेति चेन्न, 'उभयत आश्रयणे नान्तादिवत्' इति निषेधात् ।

अयम्भावः—एकादेशस्य ईकारस्य पूर्वान्तत्वे तु उपसर्गानुप्रवेशात् इण्धातुत्वं न सम्भवति । परादित्वेन इण्धात्वाश्रयणे तु नोपसर्गात् परत्वम्, उपसर्गैकदेशस्य इकारात्मना सत्त्वेन 'अभ्' इत्यस्य उपसर्गत्वाभावात् ।

अधियन्ति—(ई० ४४)—'अधि' इत्युपसर्गादिक्स्मरणे धातोर्लटि तत्स्थाने झौ झस्य अन्तादेशे शपो लुकि 'इण्वदिक इति वक्तव्यम्' इति वार्तिकोक्त्या 'इणो यण' इति यणि 'अधियन्ति' इति ।

केचित्तु 'आर्धधातुके' इत्यधिकारे 'इणो गा लुङि' इति सूत्रे इण्वदिकः—' इति वार्तिकपाठस्य भाष्ये दर्शनात् तदधिकारोक्तानामेव कार्याणामुपस्थितत्वाद् अत्र 'इणो यण्' इत्यस्य आर्धधातुकाधिकारस्थत्वाऽभावात् तेन नात्र यण् इति वदन्ति । तन्मते झस्यान्तादेशे इयङि सवर्णदीर्घे 'अधीयन्ति' इत्यूह्यम् । अतः एवोक्तं भट्टिकाव्ये 'ससीतयो राघवयोरधीयन्नि' ति ।

अवोचत्—(ई० ५२)—'वच् परिभाषणे' इत्यस्माद्धातोर्लुङि तिपि अनुबन्धलोपे 'च्लि लुङि' इति च्लौ 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेरङि 'वच उम' इति उमि अनुबन्धलोपे 'लुङ्-लङ्—' इत्यडागमे 'आद्गुणः' इति गुणे 'अवोचत्' इति ।

मृड्ढि–(ई० ५०)–'मृजू शुद्धौ' इत्यस्माद्धातोर्लोटि सिपि सेर्ह्यादेशे हेरपित्वेन ङित्वात् 'मृजेर्वृद्धि' इति वृद्धिनिषेधे 'व्रश्चभ्रज्ज–' इति जस्य षत्वे हेर्ध्यादेशे षस्य जश्त्वेन डत्वे धस्य ष्टुत्वेन ढत्वे 'मृड्ढि' इति ।

सुषुपतुः—(ई० ४६, ५०)—'ञिष्वप् शये' इत्यस्माद् धातोर्लिटि तसि अतुसि 'धात्वादेः षः सः इति सत्वे 'वचिस्वपि–' इति सम्प्रसारणे पूर्वरूपे

'लिटयभ्यासस्योभयेषाम्' इति द्वित्वे अभ्याससंज्ञायां हलादिशेषे सस्य षत्वे अतुसः सस्य रुत्वे विसर्गे उक्तं रूपं सिद्धम् ।

जक्षति–(ई० ५३) जक्ष्धातोर्लटि झौ शपो लुकि 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञायाम् 'अदभ्यस्तात्' इति झस्य अन्तादेशं प्रबाध्य अदादेशे 'जक्षति' इति सिद्धम् ।

जाग्रोऽविचिण्णल्ङित्सु–जाग्रः इडि षष्ठी । 'अविचिण्णल्ङित्सु' इति-च्छेदः । वि चिण् णल् ङित् एषां द्वन्द्वे नञ्समासः । 'जाग्रतेर्गुणः स्याद् विचिण्णल्ङिद्भ्योऽन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च' इति सूत्रार्थः । प्रत्युदाहरणं यथा, वि–जागृविः । णिच्–अजागारि । णल्–जजागार । ङित्–जागृतः । इति ।

जजागरुः–(ई० ५१)—जागृधातोर्लिटि झौ 'परस्मैपदानाम्—' इति झेरुसादेशे 'उषविदजागृभ्योऽन्यतरस्याम्' इत्यामभावपक्षे 'लिटि धातो–' इति द्वित्वे अभ्यासादिकार्ये 'जजागृ उस्' इति स्थिते कित्त्वाद् गुणानिषेधे प्राप्ते 'जाग्रोऽविचिण्णल्ङित्सु' इत्यनेन गुणे रपरत्वे सस्य रुत्वे विसर्गे 'जजागरुः' इति सिद्धम् ।

अजागरीत्–(ई० ४२, ४८) जागृधातोर्लुङि तिपि अडागमे अनुबन्धलोपे 'इतश्च' इति पित इकारलोपे मध्ये च्लौ तस्य सिजादेशे इचावितौ 'आर्धधातुकस्येड्वलादेः' इति सस्य इटि 'अजागृ इ स् त्' इत्यवस्थायां (यणि प्राप्ते तम्प्रबाध्य 'सार्वधातुकार्धधातुकयोः' इति इति गुणे प्राप्ते तञ्च बाधित्वा 'सिचि वृद्धि—इति वृद्धिः प्राप्ता तामपि प्रबाध्य) 'जाग्रोऽविचिण्णल्ङित्सु' इति गुणे रपरत्वे च कृते ('अजागर् इ स् त्' इति स्थिते हलन्तलक्षणायाः वृद्धेः 'नेटि' इति निषेधेऽपि 'अतो हलादेर्लघोः' इति वृद्धिः प्राप्ता ताञ्च बाधित्वा 'अतो-ल्रान्तस्य इत्यनेन प्राप्तायामपि वृद्धौ 'ह्यचन्त–इति निषेधे) 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे 'इट ईटि' इति सलोपे सवर्णदीर्घे 'अजागरीत्' ।

ददरिद्रौ–(ई० ५१)–दरिद्राधातोर्लिटि तिपि णलि द्वित्वे 'आत औ णलः' इति णलः औकारे वृद्धौ 'ददरिद्रौ' इति ।

नच 'आत औ णलः' इत्यनेन ओकार एव विधीयतां वृद्धौ सत्यामुक्तरूपस्य सिद्धिः स्यादेवेति वाच्यम्, तथा सति 'आतो लोप इटि च' इत्यनेनाल्लोपे सति औकारस्य श्रवणानापत्तेः। यत्त्वत्र अनेकाच्त्वेन आमि कृते 'दरिद्राञ्चकार' इत्युक्तं तन्न, आमि सति णल एव अप्रसक्त्या अस्माद्धातोरेव परस्यौकारस्य श्रवणार्थम् औकारविधानस्य वैयर्थ्यापत्तेरिति केचित्।

अचकात्–(ई० ४९)–'चकासृ दीप्तौ' इत्यस्माद्धातोर्लङि तिपि अडागमे अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे 'हल्ङ्या' दिना तलोपे 'ससजुषो रुः' इति रुत्वं प्रबाध्य 'तिप्यनस्तेः' इति सस्य दत्वे 'वाऽवसाने' इति चर्त्वे 'अचकात्' इति।

शाधि–(इ० ४४, ४७, ५४)–शासधातोर्लोटि सिपि सेर्ह्यादेशे शपो लुकि 'शास् हि' इति स्थिते 'शास इदङ्हलोः' इति सूत्रं प्रबाध्य 'शा हौ' इत्यनेन शासः शादेशे तस्य आभीयत्वेन 'असिद्धवदत्राभात्' इत्यनेन असिद्धत्वात् 'हुझल्भ्यो हेर्धिः' इति हेर्ध्यादेशे 'शाधि' इति जातम्।

इयाय–।५८। गत्यर्थकात् इण्धातोः लिटि तिपि, अनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तिपो णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति सूत्रेण धातोः द्वित्वे अभ्यासकार्ये 'अचोञ्णिति' इति वृद्धौ 'एचोऽयवायावः' इत्यनेन अयादेशे 'अभ्यासस्यासवर्णे' इति-सूत्रेण इयङि अनुबन्धलोपे इयाय इति सिद्धम्।

ईयतुः– ।५१। इण् धातोः लिटि तसि अतुसि कृते 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इति हलो लोपे 'इको यणचि' इति सूत्रेण यणि 'दीर्घ इणः किति' सूत्रेण अभ्यासस्य इकारस्य दीर्घे सकारस्य रुत्वे विसर्गे च कृते ईयतुः इति सिद्धम्।

अगात्–।४०। इण्धातोः लुङि 'इणो गा लुङि' सूत्रेण इणो गादेशे लस्य स्थाने तिप्रत्ययेऽनुबन्धलोपे 'इतश्च' इति इकारस्य लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशेऽनुबन्धलोपे 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो

लुकि संयोगे अगात् इति सिद्धम् ।

अशिषत्—(ई० ४५, ४८)—शास् धातोर्लुङि तिपि अडागमे अनुबन्धलोपे तिप इकारलोपे च कृते 'च्लि लुङि' इति च्लौ 'सर्तिशास्त्यर्तिभ्यश्च' इति च्लेरङि अनुबन्धलोपे 'शास इदङ्हलोः' इति शासः उपाधायाः इत्वे 'अशिषत्' इति ।

अध्ययै—(ई० ५१)–अध्युपसर्गपूर्वकाद् इङ्धातोर्लोटि मध्यमपुरुषैकवचने इटि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'टित आत्मनेपदानां टेरे' इति टेरेत्वे 'एत ऐ' इति एकारस्य ऐकारे 'अधि इ ऐ' इति जाते 'आडुत्तमस्य पिच्च' इत्यादि 'आटश्च' इति वृद्धौ पित्त्वात् पूर्वस्य इकारस्य गुणे अयादेशे 'अधि अय् ऐ' इति जाते इकारस्य यणि 'अध्ययै' इति सिद्धम् ।

अधीयीत—(ई० ४७)—अधिपूर्वकाद् इङो लिङस्तप्रत्यये शपो लुकि सीयुटि 'सुट् तिथोः' इति सुटि अनुबन्धलोपे सलोपे यलोपे च कृते इयङि सवर्णदीर्घे उक्तं रूपं सिद्धम् ।

अध्यगीष्ट-अध्यैष्ट—(ई० ४७)—अधिपूर्वकादिङ्धातोर्लुङि तप्रत्यये 'विभाषा लुङ्लृङोः' इति इङो गाङादेशे 'लुङ् लङ्' इत्यडागमे अनुबन्धलोपे 'अधि अ गा त' इति स्थिते च्लौ च्लेः सिचि इचि गते 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति सिचो ङित्वे 'घुमास्थागापाजहातिसां हलि' इति अकारस्य ईत्वे यणि सिचः सस्य षत्वे ष्टुत्वे 'अध्यगीष्ट' इति । गाङोऽभावे आटि वृद्धौ पूर्वोक्तंकार्ये च सम्पन्ने 'अध्यैष्ट' इति च भवति ।

चख्ये –(ई० ४२)—चक्षिङ्धातोर्लिटि 'चक्षिङः ख्याञ्–वा लिटि' इति चक्षिङः ख्याञादेशे ञित्त्वात् पदद्वयमध्ये परस्मैपदे लिटः स्थाने तिपि णलि अनुबन्धलोपे, उक्तसूत्रे भाष्ये 'ख्शादिरयमादेशः' इत्यभिधाय 'ख्शाञः शस्य यो वा वक्तव्यः' इत्युक्तम्, तथा च तेन शस्य यत्वाभावपक्षे द्वित्वेऽभ्याससंज्ञायां 'शर्पूर्वाः खयः' इति खयः शेषे अन्त्यलोपे च कृते 'कुहोश्चुः' इति अभ्यासस्य चुत्वे खस्य चर्त्वे 'आत औ णलः' इति णलः औत्वे वृद्धौ सत्यां 'चक्शौ' इति । अत्र 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति कृतचर्त्वस्य कस्य खो न

भवति, चर्त्वस्याऽसिद्धत्वात् । शस्य यत्वपक्षे 'चख्यौ' इति । आत्मनेपदे तु 'चख्ये, चक्शे' इति रूपे भवतः । ख्याञादेशाभावे तु 'चचक्षे' इति भवति ।

शेरते । ५० । स्वप्नार्थकशीङ्धातोः लटि आत्मनेपदे झप्रत्यये 'कर्तरि शप्' इति शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'आत्मनेपदेष्वनतः' इत्यनेन झस्य अदादेशे 'शीङः सार्वधातुके गुणः' इत्यनेन गुणे 'शीङो रुट्' इत्यनेन रुटि, अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे च कृते शेरते इति सिद्धम् ।

शयीत—शीङ् धातोः लिङि त प्रत्यये शपि शपो लुकि कृते 'शीङः सार्वधातुके गुणः' इति गुणे 'लिङः सीयुट्' इति सूत्रेण सीयुटि 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारस्य लोपे 'एचोऽयवायावः' इति अयादेशे 'लोपो व्योर्वलि' इत्यनेन वकारस्य लोपे संयोगे शयीत इति सिद्धम् ।

अधिजगे—।५५। अध्ययनार्थकात् अधिपूर्वकात् इङ् धातोः लिटि 'गाङ्लिटि' इति सूत्रेण इङो गाङादेशेऽनुबन्धलोपे लिटः त प्रत्यये तकारस्य लिटस्तझयोरेशिरेच्' इत्यनेन एशादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे अभ्यासत्वे 'ह्रस्व' इत्यनेन ह्रस्वे अधि+गगा+ए इति जाते 'कुहोश्चुः' इति गस्य चुत्वेन जकारे 'आतो लोप इटि च' इति सूत्रेण अकारस्य लोपे संयोगे अधिजगे इति सिद्धम् ।

अधिजगिरे—।४५ । अधिपूर्वकात् इङ् धातोः लिटि लस्य स्थाने झप्रत्यये 'गाङ् लिटि' इत्यनेन इङः गाङादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे अभ्यासकार्ये ह्रस्वे 'कुहोश्चुः' इत्यनेन गस्य चुत्वेन जकारे 'लिटस्तझयोरेशिरेच्' इत्यनेन झस्य स्थाने इरेच् इत्यादेशे चकारलोपे 'आतो लोप इटि च' इत्यनेन अकारलोपे कृते संयोगे 'अधिजगिरे' इति सिद्धम् ।

अध्ययै—। । अधिपूर्वकात् इङ् धातोः 'लोट च' इति 'आशिषि लिङ्लोटौ' इत्यनेन वा लोटि लस्य स्थाने उत्तमपुरुषैकवचने इ प्रत्ययेऽनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इत्यनेन एत्वे 'आडुत्तमस्य पिच्च' इति सूत्रेण आडागमेऽनुबन्धलोपे 'आटश्च' इत्यनेन वृद्धौ 'अधि+इ+ऐ' इति जाते गुणेऽयादेशे यणि च

कृते संयोगे अध्ययै इति सिद्धम् ।

अध्यगीष्ट । ५५ ।—अधिपूर्वाद् इङ् धातोः लुङि लस्य तप्रत्यये 'विभाषा लुङ्लृङोः' इत्यनेन इङः गाङादेशेऽनुबन्धलोपे 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति सिजादेशेऽनुबन्धलोपे अधि+गा+स+त इति स्थिते 'गाङ् कुटादिभ्योऽञ्णिन्ङित्' इति सूत्रेण सिचः ङित्वे 'घुमास्थागापाजहातिसां हलि' इति सूत्रेण अकारस्य ईत्वे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे यणि सकारस्य षत्वे तकारस्य ष्टुत्वे च कृते अध्यगीष्ट इति सिद्धम् ।

दुदोह । ५० ।—प्रपूरणार्थकात् दुहधातोः लिटि, तिपि, तिपो णलि, अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति धातोः द्वित्वे अभ्यासकार्ये दु+दुह+अ इति जाते 'पुगन्तलघूपधस्य च' इत्यनेन गुणे संयोगे दुदोह इति सिद्धम् ।

धुक्षीष्ट । ३० ।—दुहधातोः 'आशीर्लिङि' तस्य तप्रत्यये 'लिङ्सिचावात्मनेपदेषु' इत्यनेन तकारस्य कित्त्वाद् गुणाभावे 'लिङः सीयुट्' इति सीयुटि, अनुबन्धलोपे 'सुट् तिथोः' इत्यनेन सुटि, अनुबन्धलोपे 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति सूत्रेण भष्भावे धकारे 'लोपो व्योर्वलि' इत्यनेन यकारलोपे 'दादेर्धातोर्घः' इत्यनेन हस्य घत्वे 'खरि च' इत्यनेन चर्त्वेन धकारस्य ककारे सीयुटः सुटश्च सकारयोः षत्वे क्-षसंयोगे क्षत्वे धुक्षी+ष्—त इति जाते 'ष्टुना ष्टुः' इति तकारस्य ष्टुत्वे संयोगे धुक्षीष्ट इति सिद्धम् ।

आत्थ । ६३ ।—व्यक्तायां वाचि इत्यर्थक-ब्रूञ् धातोः लटि, मध्यमपुरुषैकवचने सिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इति 'अदिप्रभृतिभ्यः शपः' इत्यनेन शपो लुकि 'ब्रुवः पञ्चानाम्' इत्यनेन सिपः थलि ब्रुवः आहादेशे च कृते 'आहस्थः' इत्यनेन हकारस्य थकारे थकारस्य चर्त्वेन तकारे संयोगे आत्थ इति रूपम् । पक्षे आहादेशाभावे 'ब्रुवः ईट्' इत्यनेन ईटि गुणेऽवादेशे सकारस्य षत्वे संयोगे ब्रवीषि इति सिद्धम् ।

अवोचत् । ४९ ।—ब्रूञ्धातोः लुङि आत्मनेपदे तप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे च्लिप्रत्यये च्लेः सिजादेशे प्राप्ते तं बाधित्वा 'ब्रुवो वचिः' इत्यनेन ब्रुवः वचादेशे अ+वच+च्लि—त इति जाते

'अस्यतिवक्तिख्यातिभ्योऽङ्' इत्यनेन च्लेः अङादेशेऽनुबन्धलोपे 'वच उम्' इति सूत्रेण उमागमे गुणे अवोचत् इति रूपम् । पक्षे परस्मैपदे तिप्प्रत्ययेऽनुबन्धलोपे पूर्वोक्तकार्ये संयोगे अवोचत् इति सिद्धम् ।

अख्यत (ई० ४९)—चक्षिङ्धातोर्लुङि तिपि अडागमे अनुबन्धलोपे तिप इकारलोपे च कृते 'चक्षिङः ख्याञ्' इति ख्याञादेशे अनुबन्धलोपे मध्ये च्लौ 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेरङि 'आतो लोप इटि च' इत्यालोपे 'अख्यत्' इति। आत्मनेपदे 'अख्यत' इति पूर्ववत्। ख्याञादेशस्य भाष्ये क्शादित्वं प्रतिपादितं तस्यासिद्धकाण्डे 'शस्य यो वा' इत्यनेन विकल्पेन यत्वं विहितम्, तथा च यत्वाऽभावपक्षे परस्मैपदे अडागमे च्लेरङ्विधौ ख्यातीति यकारनिर्देशात् अङभावे आदन्तत्वेन 'यमरमनमातां सक् च' इति समागमे इटि च कृते 'अस्ति-सिचोऽपृक्ते' इति ईडागमे सलोपे दीर्घे 'अक्शासीत्' इति । आत्मनेपदे तु 'अक्शास्त' इति ।

दुग्धः (ई० २५)—दुहधातोर्लटि तसि सार्वधातुकसंज्ञायां शपि 'अदि-प्रभृतिभ्यः शपः' इति शपो लुकि 'दादेर्धातोर्घः' इति हस्य घत्वे 'झषस्तथोर्धोऽधः' इति तस्य धत्वे 'झलां जश् झशि' इति धस्य जश्त्वेन गत्वे तसः अपित्त्वेन ङित्त्वात् 'क्ङिति च' इति गुणनिषेधे सस्य रुत्वे विसर्गे 'दुग्धः' इति ।

अधोक्—दुह धातोर्लङस्तिपि अनुबन्धलोपे शपो लुकि अङ्गस्याडागमे 'पुग-न्तलघूपधस्य च' इति गुणे 'इतश्च' इति तिपि इकारलोपे 'हल्ङ्याब्भ्यः' इति तलोपे 'अदोह्' इति जाते 'दादेर्धातोर्घः' इति हस्य घत्वे 'एकाचो बशो भष्झष-न्तस्य स्ध्वोः' इति दस्य धत्वे घस्य जश्त्वे तस्य चर्त्वेन ककारे 'अधोक्' इति सिद्धम् ।

अधुक्षत् (ई० ५३)—दुह धातोर्लुङि तिपि अडागमे अनुबन्धलोपे च्लौ तस्य सिजादेशं प्रबाध्य 'शल इगुपधादनिटः क्सः' इति क्सादेशे अनुबन्धलोपे 'अदुह स ति' इति जाते 'इतश्च' इति इकारलोपे 'दादेर्धातोर्घः' इति हस्य घत्वे 'एकाचो बशः'—इति दस्य धत्वे 'अ धु ध् स त्' इति जाते घस्य जश्त्वे चर्त्वे सस्य षत्वे 'अधुक्षत्' इति सम्पन्नम् ।

अधुक्षाताम् (ई० ४२)—दुहधातोर्लुङि आतामि अडागमे अनुबन्धलोपे च्लौ तस्य 'शल इगुपधादनिटः क्सः' इति क्सादेशे अनुबन्धलोपे 'अदुह स आताम्' इति स्थिते 'क्सस्याचि' इत्यनेन 'अलोन्त्यस्ये' तिसहकारात् सस्याऽकारस्य लोपे 'अदुह स आताम्' इति जाते 'दादेर्धातोर्घः' इत्यनेन हस्य घत्वे 'एकाचः' इत्यनेन दस्य भष्भावेन धत्वे 'खरि च' इत्यनेन घस्य चर्त्वे 'अधक् स् आताम्' इति स्थिते 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे क्सस्य कित्त्वाद् गुणाऽभावे 'अधुक्षाताम्' इति जातम् ।

उवचिथ—ब्रूधातोर्लिटः सिपि सिपस्थलादेशे थलः आर्धधातुकत्वात् 'ब्रुवो-वचिः' इति ब्रुवो वच्यादेशे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति अभ्यासवकारस्य लोपे 'लिटचभ्यासस्योभयेषाम्' इत्यभ्यासस्य सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे थलः आर्धधातुकत्वादिटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति निषेधे भारद्वाजनियमात् विभाषया इटि अनुबन्धलोपे 'उवचिथ' इति । इडभावपक्षे 'चोः कुः' इति कुत्वे 'उवक्थ' इति भवति ।

ऊर्णुनाव (ई० ३२)—ऊर्णुधातोर्लिटस्तिपि तिपो णलि अनुबन्धलोपे 'ऊर्णु अ' इति स्थिते 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामि प्राप्ते 'उर्णोतेराम्नेति वाच्यम्' इति निषेधे 'अजादेर्द्वितीयस्य' इति 'णु' शब्दस्य द्वित्वे प्राप्ते 'नन्द्राः संयोगादयः' इति रेफस्य द्वित्वनिषेधे णत्वस्याऽसिद्धत्वात् 'नु' शब्दस्य द्वित्वे 'रषाभ्यां नो णः समानपदे' इति प्रथमनकारस्य णत्वे 'ऊर्णु नु अ' इति जाते गुणं बाधित्वा नित्यत्वाद् 'अचो ञ्णिति' इति वृद्धौ 'एचोऽयवायावः' इत्यावादेशे 'ऊर्णुनाव' इति सिद्धम् ।

ऊर्णविशिष्ट—ऊर्णुधातोराशीर्लिङस्तप्रत्यये 'लिङः सीयुट्' इति सीयुटि उटावितौ 'ऊर्णु सीय् त' इति स्थिते 'लोपो व्योर्वलि' इति यलोपे 'आर्धधातुकस्येड्वलादेः' इति इटि 'विभाषोर्णोः' इति इटो ङित्वाऽभावपक्षे गुणे अवादेशे 'सुट् तिथोः' इत्यनेन तस्य सुटि उटि गते षत्वे ष्टुत्वे 'ऊर्णविषीष्ट' इति । इटो ङित्वात् गुणाऽभावपक्षे उवङि 'ऊर्णुविषीष्ट' इति च सिद्धं भवति ।

और्णावीत् (ई० ५२)—ऊर्णुधातोर्लुङस्तिपि अनुबन्धलोपे 'आडजादी-

नाम्' इत्यादि 'आटश्च' इति वृद्धौ च्लौ च्लेः सिचि इचि गते 'इतश्च' इति तिप इकारलोपे 'आर्धधातुकस्येड् वलादेः' इति सिचः सस्य इटि 'अस्तिसिचोऽपृक्ते' इति इटो ङित्त्वाद् गुणाऽभावे उवङि अनुबन्धलोपे सवर्णदीर्घे 'और्णुवीत्' इति। ङित्वाऽभावपक्षे गुणं बाधित्वा 'ऊर्णोतेर्विभाषा' इति विभाषया वृद्धौ अवादेशे 'और्णावीत्' इति। वृद्ध्यभावपक्षे 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'और्णवीत्' इति च सिद्धं भवति।

और्णुविष्ट। ४५।—ऊर्णुधातोः लुङि आत्मनेपदे तप्रत्यये आटि वृद्धौ च्लिप्रत्यये च्लेः सिजादेशेऽनुबन्धलोपे, 'आर्धधातुकस्येड् वलादेः' इति इटि 'विभाषोर्णोः' इति ङित्वात् गुणाभावे उवङि सस्य षत्वे ष्टुत्वे और्णुविष्ट इति रूपम्। ङित्त्वाभावपक्षे गुणेऽवादेशे और्णविष्ट इति सिद्धम्।

ऊर्णुञ्धातोर्लुङि रूपाणि (ई० २४)

परस्मैपदे			आत्मनेपदे		
और्णुवीत्	और्णुविष्टाम्	और्णुविषुः	और्णुविष्ट	और्णुविषाताम्	और्णुविषत
और्णावीत्	और्णाविष्टाम्	और्णाविषुः	और्णविष्ट	और्णविषाताम्	और्णविषत
और्णवीत्	और्णविष्टाम्	और्णविषुः			
और्णुवीः	और्णुविष्टम्	और्णुविष्ट	और्णुविष्ठाः	और्णुविषाथाम्	और्णुविढ्वम्
और्णावीः	और्णाविष्टम्	और्णाविष्ट			और्णुविध्वम्
और्णवीः	और्णविष्टम्	और्णविष्ट	और्णविष्टाः	और्णविषाथाम्	और्णविढ्वम्
					और्णविध्वम्
और्णुविष्टम्	और्णुविष्ट	और्णुविष्म	और्णुविषि	और्णुविष्वहि	और्णुविष्महि
और्णाविषम्	और्णाविष्व	और्णाविष्म	और्णविषि	और्णविष्वहि	और्णविष्महि
और्णविषम्	और्णविष्व	और्णविष्म			

॥ इति अदादिप्रकरणम् ॥

अथ जुहोत्यादिप्रकरणम्

जुहोति । ३५ ।——दानादनयोः वर्तमानात् हुधातोः लटि तस्य स्थाने तिपि अनुबन्धलोपे 'कर्तरि शप्' इत्यनेन शपि 'जुहोत्यादिभ्यः श्लुः' इति सूत्रेण शपः श्लौ 'श्लौ' इति सूत्रेण धातोः द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायाम् हलादिशेषे 'कुहोश्चुः' इत्यनेन हकारस्य चुत्वेन झकारे 'अभ्यासे चर्च' इति सूत्रेण झकारस्य जकारे 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे संयोगे जुहोति इति सिद्धम् ।

जुह्वति—हुधातोर्लिटि झौ शपि 'जुहोत्यादिभ्यः श्लुः' इति श्लौ 'श्लौ' इति सूत्रेण द्वित्वे अभ्यासत्वे हलादिः शेषे चुत्वे चर्त्वे 'अदभ्यस्तात्' इति झस्यादादेशे 'हुश्नुवोः सार्वधातुके' इति यणि सिद्धम् ।

जुहवाञ्चकार । ५५ ।—हुधातोः लिटि 'भीह्रीभृहुवां श्लुवच्च' इति सूत्रेण पाक्षिके आमि श्लुवद्भावे च कृते 'श्लौ' इत्यनेन द्वित्वे अभ्यासकार्ये चुत्वेन हकारस्य झकारे तस्य 'अभ्यासे चर्च' इत्यनेन जश्त्वेन जकारे 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणेऽवादेशे 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परककृञोऽनुप्रयोगे ततः लिटस्तिपि तिपः 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन णलि, अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन कृ इत्यस्य द्वित्वे अभ्याससंज्ञायाम् 'उरत्' इत्यत्वे रपरे हलादिशेषे 'कुहोश्चुः' इत्यनेन चुत्वे गुणे रपरे उपधावृद्धौ मकारस्य अनुस्वारे परसवर्णे च कृते जुहवाञ्चकार इति रूपम् । आमोऽभावपक्षे लिटि, तिपि, णलि, द्वित्वेऽभ्यासकार्ये वृद्धौ आवादेशे 'जुहाव' इति रूपद्वयं सिद्धम् ।

जुहुधि । ५० ।—हुधातोः लोटि मध्यमपुरुषैकवचने सिपि अनुबन्ध लोपे 'कर्तरि शप्' इत्यनेन शपि 'जुहोत्यादिभ्यः श्लुः' इत्यनेन शपः स्थाने श्लौ 'श्लौ' इति सूत्रेण धातोः द्वित्वे अभ्यासकार्ये हकारस्य चुत्वेन झकारे तस्य 'अभ्यासे चर्च' इत्यनेन सिपो हौ 'हुझल्भ्यो हेर्धिः' इति सूत्रेण हेधौ जुहुधि इति सिद्धम् ।

अजुहवुः । ३० ।—हुधातो लङि लस्य स्थाने झौ 'लुङ्लङ्लृङ्क्ष्वडुदात्तः'

इति अडागमे शपि तस्य 'जुहोत्यादिभ्यः श्लुः' इत्यनेन श्लौ 'श्लौ' इति सूत्रेण द्वित्वे अभ्यासकार्ये चुत्वे जश्त्वे च कृते 'सिजभ्यस्तविदिभ्यश्च' इत्यनेन झेर्जुसि 'हुश्नुवोः सार्वधातुके' इति सूत्रेण यणि प्राप्ते तं प्रबाध्य परत्वात् 'जुसि च' इत्यनेन गुणेऽवादेशे सकारस्य रुत्वे विसर्गे च कृते संयोगे-अजुहवुः इति सिद्धम् ।

अहौषीत्—हुधातोर्लुङि तिपि शपि प्रबाध्य श्लौ सिचि । अस्तिसिचोऽपृक्ते इति ईटि सिचि वृद्धिः परस्मैपदे इति वृद्धौ षत्वे सिद्धम् ।

बिभेति । ५१ ।—ञिभी भये इत्यर्थके भीधातोः लटि, तिपि अनुबन्धलोपे 'कर्त्तरि शप्' इत्यनेन शपि 'जुहोत्यादिभ्यः श्लुः' इत्यनेन शपः श्लौ 'श्लौ' इति सूत्रेण द्वित्वेऽभ्यासकार्ये 'ह्रस्वः' इत्यनेन ह्रस्वे 'अभ्यासे चर्च' इति सूत्रेण भकारस्य जश्त्वेन बकारे बि + भी + ति इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे संयोगे बिभेति इति सिद्धम् ।

बिभ्यति—भीधातोः लटि, झौ शपि शपः श्लौ 'श्लौ' इति सूत्रेण धातोः द्वित्वेऽभ्यासकार्ये ह्रस्वे 'अभ्यासे चर्च' इत्यनेन जश्त्वेन भकारस्य बकारे 'अदभ्यस्तात्' इत्यनेन झकारस्य अत् इत्यादेशे 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि संयोगे बिभ्यति इति सिद्धम् ।

बिभयाञ्चकार-बिभाय (ई० ४८)—भीधातोर्लिटि 'भीह्रीभृहुवां श्लुवच्च' इत्यामि आमः श्लुवद्भावात् 'श्लौ' इति द्वित्वे अभ्यासत्वे अभ्यासस्याचो ह्रस्वे भस्य बत्वे 'आमः' इति लिटो लुकि 'कृञ् चानुप्रयुज्यते लिटि' लिट्परककृञोऽनुप्रयोगे 'लिटि धातोः'—'इति द्वित्वे अभ्यासत्वे 'उरत्' इत्यत्वे रपरत्वे हलादिशेषे 'कुहोश्चुः' इति चुत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे अयादेशे 'बिभयाम् च कृ अ' इति स्थिते 'अचो ञ्णिति' इति वृद्धौ रपरत्वे मस्यानुस्वारे परसवर्णे 'बिभयाञ्चकार' इति । आमोऽभावपक्षे लिटस्तिपि णलि द्वित्वादिकार्ये वृद्धौ आयादेशे 'बिभाय' इति भवति ।

बिभितात् । ३५ ।—भीधातोः 'लोट् च' इत्यनेन लोटि तस्य स्थाने तिपि 'कर्त्तरि शप्' इत्यनेन शपि तस्य 'जुहोत्यादिभ्यः श्लुः' इति सूत्रेण श्लौ 'श्लौ' इति सूत्रेण धातोः द्वित्वे अभ्यासकार्ये 'ह्रस्वः' इत्यनेन ह्रस्वे 'अभ्यासे चर्च' इति

भकारस्य बकारे कृते 'एरुः' इत्यनेन तिपः इकारस्य उकारे 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इत्यनेन वैकल्पिके तातङादेशेऽनुबन्धलोपे 'भियोऽन्यतरस्याम्' इति सूत्रेण पाक्षिके इकारस्य ह्रस्वे इकारे संयोगे बिभितात् इति रूपम् । पक्षे ह्रस्वाभावे बिभीतात् इति रूपम् । तातङादेशाभावपक्षे इकारस्य गुणे संयोगे बिभेतु इति सिद्धम् ।

जिह्राय–। ३४ । लज्जार्थके ह्रीधातोः लिटि, 'भीह्रीभृहुवां श्लुवच्च' इत्यनेन पाक्षिके आमि श्लुवद्भावे च कृते 'श्लौ' इत्यनेन धातोः द्वित्वेऽभ्यासकार्ये 'कुहोश्चुः' इत्यनेन चुत्वेन हकारस्य झकारे 'अभ्यासे चर्च' इति जश्त्वेन जकारे गुणेऽयादेशे जिह्रय+आम् + लिट् इति स्थिते 'आमः' इत्यनेन लिटो लुकि पुनः लिट्परकक्रञोऽनुप्रयोगे जिह्रय + आम् + कृ + लिट् भूते लकारस्य स्थाने तिपि णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन कृ इत्यस्य द्वित्वेऽभ्यासकार्ये चुत्वेन जिह्रायाम्+चकृ+अ इति जाते उपधावृद्धौ मकारस्य अनुस्वारे परसवर्णे अकारे संयोगे जिह्रायाञ्चकार इति रूपम् ।

अमोऽभावपक्षे लिटि, तिपि, णलि अनुबन्धलोपे धातोः द्वित्वे अभ्यासकार्ये ह्रस्वे चुत्वे चर्त्वेन जकारे च कृते 'अचो ञ्णिति' इत्यनेन वृद्धौ 'एचोऽयवायावः' इति सूत्रेण अयादेशे संयोगे जिह्राय इति सिद्धम् ।

जिह्रीयात्—। । ह्रीधातोः विधिलिङि तिपि, अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'कर्त्तरि शप्' इत्यनेन शपि शपः 'जुहोत्यादिभ्यः श्लुः' इति सूत्रेण श्लौ' इति सूत्रेण धातोः द्वित्वे अभ्यासकार्ये ह्रस्वे 'कुहोश्चुः' इति चुत्वेन हस्य झकारे तस्य 'अभ्यासे चर्च' इति जश्त्वेन जकारे कृते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति सूत्रेण यासुटि 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे संयोगे जिह्रीयात् इति सिद्धम् ।

पिपूर्तः—।६३। पालनपूरणार्थकपॄधातोः लटि तस्य स्थाने तसि शपि शपः 'जुहोत्यादिभ्यः श्लुः' इति श्लुः 'श्लौ' इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति अभ्याससंज्ञायां 'हलादिः शेषः' इति लोपे 'अर्तिपिपर्त्योश्च' इति सूत्रेण अभ्या-

सस्य इकारे पि + पृ+तस् इति जाते 'उदोष्ठ्यपूर्वस्य' इति सूत्रेण ॠकारस्य उकारे रपरे 'हलि च' इत्यनेन उपधा दीर्घे सकारस्य रुत्वे विसर्गे पिपूर्तः इति सिद्धम् ।

पिपुरति—(इ० ४०)—पॄ धातोर्लटि झौ शपि शपः श्लौ द्वित्वे अभ्यासत्वे 'ह्रस्वः' इति ह्रस्वे 'उरत्' इत्यत्वे हलादिशेषे 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य इत्वे 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायाम् 'अदभ्यस्तात्' इति झेरति 'उदोष्ठ्यपूर्वस्य' इत्युत्वे रपरत्वे 'पिपुरति' इति सिद्धम् ।

पप्रतुः—।४८। पॄधातोः लिटि सिपि तस्य स्थाने 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण अतुसि 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे 'उरत्' इत्यत्वे रपरे अभ्यासकार्ये 'ऋच्छत्यॄताम्' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'शॄदॄप्रां ह्रस्वो वा' इत्यनेन पाक्षिके ह्रस्वे यणि सकारस्य रुत्वे विसर्गे पप्रतुः इति रूपम् । ह्रस्वाभावपक्षे 'ऋच्छत्यॄताम्' इत्यनेन गुणे रपरे पपरतुः इति सिद्धम् ।

अपिपः (ई० ४५)—पॄधातोर्लङस्तिपि अडागमे अनुबन्धलोपे तिप इकारलोपे शपि शपः श्लौ द्वित्वे अभ्यासकार्ये 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वे गुणे रपरत्वे हल्ङ्यादिना तलोपे रेफस्य विसर्गे 'अपिपः' इति ।

अपिपरुः (ई० ४६, ३९)—पॄधातोर्लङि झौ शपि शपः श्लुत्वे द्वित्वे अभ्यासादिकार्ये 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य इत्वे 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायां 'सिजभ्यस्तविदिभ्यश्च' इति झेर्जुसि 'जुसि च' इति गुणे रपरत्वे सस्य रुत्वे विसर्गे 'अपिपरुः' इति ।

अपारिष्टाम् (ई० ५०)—पॄधातोर्लुङि तसि तसस्तामि अडागमे च्लौ च्लेः सिचि इचि गते 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ रपरत्वे सिचः सस्य इटि 'वृतो वा' इति दीर्घे प्राप्ते 'सिचि च परस्मैपदेषु' इति निषेधे सस्य षत्वे ष्टुत्वे 'अपारिष्टाम्' इति ।

जहाहि—।४९। ओहाक् त्यागे इत्यर्थके हाधातोः 'आशिषि लिङ्लोटौ' इत्यनेन लोटि लकारस्य स्थाने सिपि 'सेर्ह्यपिच्च' इत्यनेन सिपो हौ शपि तस्य श्लौ 'श्लौ' सूत्रेण धातोः द्वित्वेऽभ्यासकार्ये ह्रस्वे 'कुहोश्चुः' इत्यनेन चुत्वे जश्त्वेन

जकारे 'आ च हौ' इत्यनेन आत्वे जहाहि इति रूपम् । 'जहातेश्च' इत्यनेन इत्वे जहिहि इति रूपम्, 'ई हल्यघोः' इति सूत्रेण इत्वे जहीहि इति रूपत्रयं सिद्धम् ।

जह्यात् (ई० ५८)—हाधातोर्लिङि तिपि शपि शपः श्लौ द्वित्वे अभ्यासत्वे ह्रस्वे हस्य झत्वे झस्य जश्त्वे च कृते यासुटि अनुबन्धलोपे लिङः सलोपोऽन्त्यस्य, इति सलोपे 'इतश्च' इति तिप ईकारलोपे 'लोपो यि' इत्याकारलोपे 'जह्यात्' इति जातम् ।

हेयात् (ई० ५१)—हाधातोराशीर्लिङि' तिपि यासुटि उटावितौ तिप इकारलोपे 'स्कोः'–इति सलोपे 'एर्लिङि' इति हस्य एत्वे 'हेयात्' इति ।

अहासीत्—हाधातोः लुङि तस्य तिपि, अनुबन्धलोपे 'इतश्च' इति इकारस्य लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशेऽनुबन्धलोपे 'अस्तिसिचोपृक्ते' इत्यनेन ईटि 'यमरमनमातां सक् च' इत्यनेन सकि सिचः आर्धधातुकसंज्ञायां 'आर्धधातुकस्येड्वलादेः' इत्यनेन इटि 'इट ईटि' इत्यनेन सकारस्य लोपे सवर्णदीर्घे संयोगे अहासीत् इति सिद्धम् ।

ऐयरुः (ई० ५४)—ऋधातोर्लङि तत्स्थाने झौ झेर्जुसि शपः श्लौ द्वित्वे अभ्याससंज्ञाम् उरदत्वं बाधित्वा 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य इत्वे रपरत्वे हलादिशेषे 'अभ्यासस्यासवर्णे' इति इयङि उत्तरखण्डस्य गुणे रपरत्वे सस्य रुत्वे विसर्गे 'इयरुः' इति स्थिते आदिवृद्धौ 'ऐयरुः' इति सिद्धम् ।

धत्तः—।६४। धारणपोषणार्थके धाधातोः लटि लकारस्य स्थाने तसि 'कर्त्तरि शप्' इति सूत्रेण शपि शपः 'जुहोत्यादिभ्यः श्लुः' इत्यनेन श्लौ 'श्लौ' इत्यनेन धातोः द्वित्वेऽभ्यासकार्ये ह्रस्वे 'श्नाभ्यस्तयोरातः' इत्यनेन अल्लोपे 'दधस्तथोश्च' इति सूत्रेण भष्भावे चर्त्वे सकारस्य रुत्वे विसर्गे धत्तः इति सिद्धम् ।

मिमीते—।४०। मानशब्दार्थके माङ्धातोः 'वर्तमाने लट्' इत्यनेन लटि, लकारस्य स्थाने त प्रत्यये 'टित आत्मनेपदानां टेरे' इत्यनेन टेः एत्वे कर्त्तरि शप्' इति शपि तस्य 'जुहोत्यादिभ्य श्लुः' इत्यनेन श्लौ 'श्लौ' इति सूत्रेण धातोः द्वित्वे अभ्यासकार्ये 'ह्रस्वः' इति ह्रस्वे 'आ च हौ' इत्यात्वे 'भृञामित्' इति

सूत्रेण इत्वे तस्य ङित्वात् 'ई हल्यघोः' इत्यनेन ईत्वे च कृते सिद्धम्।

आरत् (ई० ५१)—ऋधातोर्लुङि तिपि च्लौ 'सर्त्तिशास्त्यर्तिभ्यश्च' इति च्लेरङि अनुबन्धलोपे 'ऋदृशोऽङि गुणः' इति गुणे रपरत्वे आटि वृद्धौ तिप इकारलोपे 'आरत्' इति।

अमिमीत् (ई० ४१)—माङ्धातोर्लङि लः स्थाने तादेशे अडागमे शपः श्लुत्वे 'श्लौ' इति द्वित्वे अभ्यासकार्ये 'भृञामित्' इत्यभ्यासस्य इत्वे 'ई हल्यघोः' इति ईत्वे 'अमिमीत' इति सिद्धम्।

बिभर्ति—।५०। धारणपोषणार्थके भृधातोः लटि तिपि, शपि, तस्य 'जुहोत्यादिभ्यः श्लुः' इत्यनेन श्लौ 'श्लौ' इति सूत्रेण धातोः द्वित्वेऽभ्यासकार्ये भृ+भृ+ति इति जाते 'भृञामित्' इत्यनेन अभ्यासस्य इकारे 'अभ्यासे चर्च' इति चर्त्वेन भस्य बकारे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे रपरे कृते बिभर्ति इति सिद्धम्।

बिभ्रति—भृञ्धातोर्लटः झौ सार्वधातुकसंज्ञायां शपि शपः श्लौ द्वित्वे अभ्यासत्वे 'भृ भृ झि' इति स्थिते 'भृञामित्' इति अभ्यासस्य इत्वे रपरत्वे 'हलादिः शेषः' इति अभ्यासरेफस्य लोपे अभ्यासभकारस्य बत्वे 'बि भृ झि' इति स्थिते 'उभेऽभ्यस्तम्' इति अभ्यस्तसंज्ञायां 'अदभ्यस्तात्' इति झस्य अति 'इको यणचि' इति यणि 'बिभ्रति' इति सिद्धम्।

बिभराञ्चक्रे (ई० ४६) भृधातोर्लिटि 'भीह्रीभृहुवां श्लुवच्च' इत्यमि श्लुवद्भावे द्वित्वे अभ्यासादिकार्ये 'भृञामित' इत्यभ्यासस्य इत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरे 'आम' इति लिटो लुकि 'कृञ् चानुप्रयुज्यते लिट्' इति लिट्परकक् ञोऽनुप्रयोगे आत्मनेपदपक्षे लिटः तादेशे तस्य एकादेशे द्वित्वादिकार्ये मस्यानुस्वारे परसवर्णे ऋकारस्य यणि उक्तं रूपं सिद्धम्। आमोऽभावपक्षे 'बभ्रे' इति च सिद्धं भवति।

अबिभः—।५०। भृञधातोः लङि तस्य स्थाने तिपि 'लुङ्लङ्लृङक्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे शपि तस्य 'जुहोत्यादिभ्यः श्लुः' इत्यनेन श्लौ 'श्लौ' इति सूत्रेण द्वित्वेऽभ्यासकार्ये 'भृञामित्' इत्यनेन इत्वे 'अभ्यासे चर्च'

इत्यनेन जश्त्वेन बकारे गुणे 'इतश्च' इत्यनेन इकारस्य लोपे 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण तकारस्य लोपे रेफस्य विसर्गे कृते संयोगे अबिभः इति सिद्धम् ।

अबिभरुः—। ९५ । भृञ्धातोः लुङि झौ अटि शपि शपः श्लौ 'श्लौ' इति सूत्रेण द्वित्वेऽभ्यासकार्ये 'भृञामित्' इतीकारे 'अभ्यासे चर्च' इत्यनेन जश्त्वेन बकारे। गुणे 'सिजभ्यस्तविदिभ्यश्च' इत्यनेन झेर्जुसादेशे सकारस्य रुत्वे विसर्गे संयोगे अबिभरुः इति सिद्धम् ।

भ्रियात्—। ४७ । भृञधातोः 'आशिषि लिङ्लोटौ' इत्यनेन लिङ् तस्य तिपि, अनुबन्धलोपे 'इतश्च' इति इकारस्य लोपे आर्धधातुकसंज्ञायाम् 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुटि, अनुबन्धलोपे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारस्य लोपे भृ+या+त् इति जाते 'रिङ्शयग्लिङ्क्षु' इत्यनेन ऋकारस्य रिङादेशेऽनुबन्धलोपे 'अकृत्सार्वधातुकयोः दीर्घः' इति सूत्रेण दीर्घे प्राप्ते 'रीङ ऋतः' इत्यनेन रीङ इत्यनुवृत्त्यैव सिद्धे रिङ् इति ह्रस्वविधानसामर्थ्यात् दीर्घाभावे भ्रियात् इति सिद्धम् ।

भृषीष्ट—।४३। भृधातोः आशीर्लिङि तस्य तप्रत्यये 'लिङः सीयुट्' इत्यनेन सीयुटि, अनुबन्धलोपे 'सुट् तिथोः' इत्यनेन सुटि, अनुबन्धलोपे 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे भृ+सी+त् इति जाते 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रसहकारेण 'क्ङिति च' इत्यनेन गुणनिषेधे सकारद्वयस्य षत्वे ष्टुत्वे च कृते भृषीष्ट इति सिद्धम् ।

अभृत—(ई० ४९)—भृधातोर्लुङि आत्मनेपदे लुङस्तादेशे अडागमे च्लौ च्लेः सिचि 'ह्रस्वादङ्गात्' इति सिचो लुकि 'उश्च' इति कित्त्वात् गुणनिषेधे 'अभृत' इति ।

ददौ—दाधातोर्लिटि तिपि णलि द्वित्वे अभ्यासत्वे, हलादिशेषे ह्रस्वे ददा अ इति स्थिते 'आत औ णलः' इति औत्वे वृद्धौ ददौ इति सिद्धम् ।

देहि—। ५० । दानार्थके डुदाञ् धातोः लोटि, सिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इत्यनेन शपि शपः श्लौ सिपः 'सेर्ह्यपिच्च' इत्यनेन सेर्ह्यादेशे 'दाधाघ्वदाप्'

इति सूत्रेण घुसंज्ञायां 'श्लौ' धातोः द्वित्वे अभ्यासकार्ये ह्रस्वे 'घ्वसोरेद्धावभ्यासलोपश्च' इत्यनेन एत्वे अभ्यासलोपे च कृते भूषीष्ट इति सिद्धम् ।

दासीष्ट—। ६२ । दानार्थक दाधातोः 'आशिषि लिङ्लोटौ' इति सूत्रेण लिङि लकारस्य तप्रत्यये'लिङः सीयुट्' इत्यनेन सीयुट अनुबन्धलोपे 'सुट् तिथोः' इत्यनेन सुटि, अनुबन्धलोपे दा+सी+स्+त् इति जाते 'आदेशप्रत्यययोः' इत्यनेन सुटः सकारस्य षत्वे ष्टुना ष्टुः इत्यनेन ष्टुत्वे संयोगे दासीष्ट इति सिद्धम् ।

अदात्—। २४ । दाधातोः लुङि तिपि अनुबन्धलोपे 'इतश्च' इत्यनेन इकारस्य लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशेऽनुबन्धलोपे अ+या+स+त् इति जाते 'दाधाघ्वदाप्' इति सूत्रेण दा इत्यस्य घुसंज्ञायाम् घुत्वात् 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचः लुकि अदात् इति रूपं सिद्धम् ।

अदित—(ई० ४३, ४९)—दाधातोरात्मनेपदे लुङ्स्तादेशे अडागमे अनुबन्धलोपे च्लौ च्लेः सिचि इचि गते 'दाधाघ्वदाप्' इति घुत्वात् 'स्थाघ्वोरिच्च' इति इत्वे 'ह्रस्वादङ्गात्' इति सिचो लुकि 'उश्च' इति कित्त्वात् गुणाभावे 'अदित' इति ।

नेनेग्धि—'णिजिर् शौचपोषणयोः' अस्माद्धातोःलोटि 'इर इत्संज्ञा वाच्या' इति इर इत्संज्ञायां लोपे च विहिते 'णो नः' इति धातोर्णस्य नत्वे 'निज् लोट्' इति स्थिते लोटः स्थाने सिपि सार्वधातुकसंज्ञायां शपि शपः श्लौ द्वित्वे अभ्याससंज्ञायाम् 'शेषे लोपः' इत्यभ्यासजकारस्य लोपे 'सेर्ह्यपिच्च' इति सेर्हित्वे 'निजां त्रयाणां गुणः श्लौ' इति अभ्यासगुणे 'हुझल्भ्यो हेर्धिः' इति हेर्ध्यादेशे 'पुगन्तलघूपधस्य च' इति गुणे 'चोः कुः' इति जस्य गत्वे 'नेनेग्धि' इति जातम् ।

धेहि—।५९। धाधातोः लोटि लकारस्य स्थाने सिपि 'सेर्ह्यपिच्च' इत्यनेन सिपः हौ 'कर्तरि शप्' इति शपि शपः 'श्लौ' इति सूत्रेण द्वित्वेऽभ्यासकार्ये 'ह्रस्वः' इत्यनेन ह्रस्वे 'दाधाघ्वदाप् इत्यनेन घुसंज्ञायाम् 'घ्वसोरेद्धावभ्यासलोपश्च' इत्यनेन एत्वे अभ्यासलोपे च कृते धेहि इति सिद्धम् ।

दधाथ—।३५। धारणपोषणार्थकधाधातोः लिटि, सिपि, तस्य थलि अनुबन्धलोपे धा+थ इति स्थिते 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे पूर्वोभ्यासः' इत्यनेन अभ्याससंज्ञायाम् 'हलादिःशेषः' इति हलो लोपे 'ह्रस्वः' इत्यनेन ह्रस्वे ध+धा+थ इति जाते 'अभ्यासे चर्च' इत्यनेन जश्त्वेन धकारस्य दकारे 'ऋतो भारद्वाजस्य' इत्यनेन वैकल्पिक इडभावे दधाथ इति रूपम्। इटोनिषेधाभावे 'आर्धधातुकस्येड्वलादेः' इत्यनेन इटि कृते अल्लोपे संयोगे दधिथ इति सिद्धम् ।

नेनेक्ति—शौचपोषणार्थकात् णिजि धातोः 'इर इत् संज्ञा वाच्या' इति वार्तिकेन णिजिर् इत्यत्र इरभागस्य इत्संज्ञायां लोपे 'णो नः'इत्यनेन णकारस्य नकारे निज इति भूते धातुत्वात् लटि तिपि, अनुबन्धलोपे शपि शपः 'जुहोत्यादिभ्यः श्लुः' इत्यनेन श्लौ 'श्लौ' इति सूत्रेण द्वित्वेऽभ्यासकार्ये 'णिजां त्रयाणां गुणः श्लौ' इति सूत्रेण अभ्यासस्य गुणे 'पुगन्तलघूपधस्य च' इत्यनेन द्वितीयस्य इकारस्य गुणे कुत्वे चर्त्वे संयोगे नेनेक्ति इति सिद्धम् ।

नेनेजानि—। ५६ । णिजिर् धातोः 'इर इत्संज्ञा वाच्या' इति वार्तिकेन इर इत्यस्य इत्संज्ञायां लोपे च 'णो नः' इत्यनेन णकारस्य नकारे ततः निज् धातोः लोटि तस्य स्थाने उत्तमपुरुषैकवचने मिपि 'मेर्निः' इत्यनेन मेर्न्यादेशे 'कर्तरि शप्' इति शपि शपः 'श्लौ' इति द्वित्वेऽभ्यासकार्ये नि+निज्+मि इति जाते ततः आडागमेऽनुबन्धलोपे 'णिजां त्रयाणां गुणः श्लौ' इत्यनेन अभ्यासस्य गुणे आटः कित्त्वात् 'पुगन्तलघूपस्य च' इत्यनेन प्राप्तं गुणं प्रबाध्य 'नाभ्यस्तस्याचि पिति सार्वधातुके' इत्यनेन गुणनिषेधे संयोगे नेनिजानि इति सिद्धम् ।

अनेनिजम्—(इ० ५१) णिजधातोर्लङि णस्य नत्वे मिपि शपि शपः श्लौ द्वित्वे अभ्यासादिकार्ये अडागमे 'णिजां त्रयाणां गुणः श्लौ' इति अभ्यासस्य गुणे 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति गुणनिषेधे 'अनेनिजम्' इति ।

अनिजत्—।४२। णिजर् धातोः 'इर इत्संज्ञा वाच्या' इति वार्तिकेन इरभागस्य इत्संज्ञायां लोपे 'णो नः' इत्यनेन णस्य नत्वे ततो निज् धातोः लुङि लकारस्य स्थाने तिपि, अनुबन्धलोपे 'इतश्च' इति सूत्रेण इकारस्य लोपे 'लुङ्

लङ्लृङ्क्ष्वडुदात्तः’ इत्यनेन अडागमेऽनुबन्धलोपे ‘च्लि लुङि’ इति च्लिप्रत्यये ‘इरितो वा इत्यनेन वैकल्पिके च्लेः चङादेशेऽनुबन्धलोपे ङित्वम् गुणाभावे संयोगे अनिजत् इति रूपम् । च्लेः अङादेशाभाववक्षे च्लौ ‘च्लेः सिच्’ इति सूत्रेण च्लेः सिजादेशेऽनुबन्धलोपे ‘अस्तिसिचोऽपृक्ते’ इति सूत्रेण ईटि ‘वदव्रजहलन्तस्याचः’ इत्यनेन वृद्धौ ‘चोः कुः’ इत्यनेन कुत्वेन जकारस्य गकारे चर्त्वेन ककारे सकारस्य षत्वे कषसंयोगे क्षत्वे संयोगे अनैक्षीत् इति सिद्धम् ।

इति जुहोत्यादिप्रकरणम्

अथ दिवादिप्रकरणम्

दीव्यति–क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु इत्यर्थेषु दिवधातुः प्रयुज्यते । ततः दिवधातोः लटि, तिपि, अनुबन्धलोपे ‘कर्त्तरि शप् इत्यनेन शपि प्राप्ते तं प्रबाध्य ‘दिवादिभ्यः श्यन्’ इत्यनेन श्यनि अनुबन्धलोपे ‘सार्वधातुकमपित्’ इति सूत्रेण ङित्वात् गुणाभावे हलि च इति दीर्घे दीव्यति इति सिद्धम् ।

नर्तिष्यति—। ६४। गात्रविक्षेपार्थक् नृतधातोः लृटि लकारस्य स्थाने तिपि ‘स्यतासीलृलुटोः’ इत्यनेन शपं बाधित्वा स्यप्रत्यये तस्य आर्धधातुकत्वात् ‘सेऽसिचिकृतचृतछृदतृदनृतः’ इत्यनेन पाक्षिके इडागमेऽनुबन्धलोपे सकारस्य षत्वे नर्तिष्यति इति सिद्धम् । इडभावे ‘पुगन्तलघूपधस्य च’ इत्यनेन गुणे रपरे नर्त्स्यति इति रूपम् ।

त्रेसतुः—उद्वेगार्थक त्रसीधातोः लिट् तसि अतुसि ‘लिटि धातोरनभ्यासस्य’ इति धातोः द्वित्वे अभ्यासकार्ये अतुसः कित्वात् ‘वा जृभ्रमुत्रसाम्’ इत्यनेन पाक्षिके अभ्यासस्य एत्वे अभ्यासलोपे च कृते सकारस्य रुत्वे विसर्गे संयोगे त्रेसतुः इति रूपम् । एत्वाभ्यासलोपाभावपक्षे तत्रसतुः इति सिद्धम् ।

शशौ—तनूकरणार्थक शोधातोः 'परोक्षे लिट्' इत्यनेन लिटि लकारस्य तिपि, अनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन लिटि तिपो- णलि अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इति सूत्रेण ओकारस्य आत्वे शा+अ इति स्थिते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्यासकार्ये 'ह्रस्वः' इति ह्रस्वे श+शा+अ इति जाते 'आत औ णलः' इत्यनेन णलः औकारे वृद्धौ संयोगे शशौ इति सिद्धम् ।

अशात् । ६९ ।—शोधातोः लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे अनुबन्धलोपे 'आदेच उपदेशेऽशिति' 'इत्यात्वे च्लि लुङि' इति च्लि प्रत्यये 'च्लेः सिच्' इति सूत्रेण च्लेः सिजादेशेऽनुबन्धलोपे 'विभाषा घ्राधेट्शाच्छासः' इति सूत्रेण वैकल्पिके सिचो लुकि संयोगे अशात् इति रूपम् । सिज्लुगभावपक्षे 'अस्तिसिचोऽपृक्ते' इति सूत्रेण ईटि 'यमरमनमातां सक् च' इत्यनेन सकि सिचः आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इत्यनेन इटि 'इट ईटि' इति सूत्रेण सलोपे 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे अशासीत् इति सिद्धम् ।

स्यति । ३८ ।—अन्तकर्मणि षोधातोः लटि, तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इत्यनेन शपि प्राप्ते तं प्रबाध्य 'दिवादिभ्यः श्यन्' इत्यनेन श्यनि प्रत्ययेऽनुबन्धलोपे 'धात्वादेः षः सः' इत्यनेन षकारस्य सकारे 'ओतः श्यनि' इत्यनेन ओकारस्य लोपे संयोगे स्यति इति सिद्धम् ।

ससौ । ५० । षोधातोः लिटि, तिपि, णलि, अनुबन्धलोपे 'धात्वादेः षः सः' इत्यनेन षकारस्य सकारे 'आदेच उपदेशेऽशिति' इति सूत्रेण ओकारस्य आत्वे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वेऽभ्यासकार्ये ह्रस्वे स+सा+अ इति जाते 'आत औ णलः' इति सूत्रेण णलः औकारे वृद्धौ संयोगे ससौ इति सिद्धम् ।

विव्याध—ताडनार्थकाद् व्यध् धातोः लिटि, तिपि, णलि, अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे 'लिटयभ्यासस्योभयेषाम्' इति सूत्रेण सम्प्रसारणे 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे अभ्याससंज्ञायाम् 'हलादिः शेषः' इति हलो

लोपे उपधावृद्धौ संयोगे विव्याध इति सिद्धम् ।

व्यत्स्यति । ४१ । व्यध्धातोः 'लृट् शेषे च' इत्यनेन लृटि लकारस्य स्थाने तिप् प्रत्ययेऽनुबन्धलोपे व्यध + ति इति स्थिते शपं बाधित्वा 'स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये 'खरि च' इत्यनेन चर्त्वेन धकारस्य तकारे व्यत्स्यति इति सिद्धम् ।

ररन्ध (ई० ४२)—रध्धातोर्लिटि तिपि णलि द्वित्वे अभ्यासत्वे हलादिशेषे 'रधिजभोरचि' इति नुमि 'ररन्ध' इति ।

ररन्धिव, रेध्व (ई० ४२, ४५)—रध्धातोर्लिटि वसि 'परस्मैपदानाम्-' इति वसो द्वित्वे अभ्यासत्वे हलादिशेषे 'रधादिभ्यश्च' इति विभाषया इटि 'रधिजभोरचि' इति नुमि 'ररन्धिव' इति । इडभावपक्षे 'अत एकहल्मध्येऽनादेशादेर्लिटि' इत्येत्वाभ्यासलोपे 'रेध्व' इति ।

रधिता (ई० ४४)—रध्धातोर्लुटि तिपि तिपो डादेशे 'रधादिभ्यश्च' इति वेटि 'नेटचलिटि रधेः' इत्यनेन 'रधिजभोरचि' इति प्राप्तस्य नुमो निषेधे 'रधिता' इति । इडभावपक्षे 'रद्धा' इति भवति ।

अरधत (ई० ४६)—रध्धातोर्लुङि तिपि अडागमे अनुबन्धलोपे तिप इकारलोपे च्लौ 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इति च्लेरङि 'रधिजभोरचि' इति नुमि 'अनिदिताम्-' इति नलोपे 'अरधत्' इति ।

अतर्पीत् (ई० ५३)—'तृप् प्रीणने' इत्यस्माद्धातोर्लुङि तिपि अडागमे तिप इकारलोपे च्लौ 'स्पृशमृशकृषतृष-' इति विभाषया च्लेः सिचि सस्य 'रधादिभ्यश्च' इति इटि तस्य च 'अस्तिसिचोऽपृक्ते' इति ईटि' 'इट ईटि' इति सलोपे सवर्णदीर्घे 'अतर्पीत्' इति । 'रधादिभ्यश्च' इत्यस्य विकल्पपक्षे 'वदव्रज-' इति वृद्धौ 'अतार्प्सीत्' इति । 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इत्यनेन अम्पक्षे यणि कृते 'अत्राप्सीत्' इति । 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इत्यङ्पक्षे 'अतृपत्' इति च सिद्धं भवति ।

भ्रेमतुः (ई० ४०)—'भ्रमु अनवस्थाने' इत्यस्माद्धातोर्लिटि तसि अतुसि

द्वित्वे अभ्यासादिकार्ये 'वा जृभ्रमुत्रसाम्' इत्येत्वाभ्यासलोपे सस्य रुत्वे विसर्गे भ्रेमतुः' इति । पक्षे 'बभ्रमतुः' इति ।

चक्षन्थ (ई० ४२)—'क्षम सहने' इत्यस्माद्धातोर्लिटि थलि द्वित्वादिकार्ये ऊदित्वात् वेटि 'चक्षमिथ' इति । इडभावे अनुस्वारे परसवर्णे 'चक्षन्थ' इति ।

आस्थत् (ई० ४०)—असुधातोर्लुङि तिपि च्लौ 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इति च्लेरङि 'अस्यतेस्थुक्' इति थुकि आटि वृद्धौ तिप इकारलोपे 'आस्थत्' इति ।

दीयते । ४० ।—क्षयार्थक दीधातोः लटि लकारस्य स्थाने तप्रत्यये 'सार्वधातुके यक्' इत्यनेन यकि, अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेरेत्वे संयोगे दीयते इति सिद्धम् ।

दिदीये (ई० ४७, ४९, ५२)—दीङ्क्षये' इत्यस्माद्धातोर्लिटि प्रथमपुरुषैकवचने आत्मनेपदे ते 'लिटि धातोरि'ति द्वित्वे अभ्यासत्वे 'ह्रस्वः' इति ह्रस्वे 'दि दी त' इति स्थिते 'लिटस्तझयोरेशिरेच्' इति तस्य एशि अनुबन्धलोपे 'दिदीए' इति स्थिते 'दीङो युडचि क्ङिति' इत्यजादेरार्धधातुकस्य युटि तस्यासिद्धत्वात् 'एरनेकाचः' इति परत्वाद् यणि प्राप्ते 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' इति वार्तिकेनासिद्धत्वाऽभावात् युटि उटि गते 'दिदीये' इति सिद्धम् ।

दिदीयिरे । ३७ ।—क्षयार्थक दीङ्धातोः लिटि तस्य स्थाने झप्रत्यये द्वित्वेऽभ्यासकार्ये 'ह्रस्वः' इत्यनेन ह्रस्वे दि+दी+झ इति जाते 'दीङो युडचि क्ङिति' इत्यनेन युटि अनुबन्धलोपे 'लिटस्तझयोरेशिरेच्' इत्यनेन झकारस्य इरेचि अनुबन्धलोपे 'असिद्धवदत्राभात्' इत्यनेन युटः असिद्धत्वात् 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणि प्राप्ते 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' इति वार्तिकेन युटः सिद्धत्वात् यणो निषेधे संयोगे दिदीयिरे इति सिद्धम् ।

अदास्त । ४५ ।—दीधातोः लुङि तस्य स्थाने तप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे अ+दी+त इति स्थिते 'मीनातिमिनोतिदीङां ल्यपि च' इत्यनेन इकारस्य आत्वे 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'च्लेः सिच्' इति सूत्रेण च्लेः सिजादेशेऽनुबन्धलोपे अ+दा+स+त इति जाते 'दाधा-

ध्वदाप्' इति सूत्रेण घुसंज्ञायाम् 'स्थाघ्वोरिच्च' इत्यनेन एत्वे प्राप्ते 'स्थाघ्वोरित्वे दीङः प्रतिषेधः' इति वार्तिकेन तस्य निषेधे संयोगे अदास्त इति सिद्धम् ।

जायते । ४७ ।—प्रादुर्भावार्थक जन् धातोः लटि तस्य स्थाने तप्रत्यये 'कर्त्तरि शप्' इत्यनेन शपि प्राप्ते तं प्रबाध्य 'दिवादिभ्यः श्यन्' इत्यनेन श्यन् प्रत्ययेऽनुबन्धलोपे जन्+य+त इति जाते 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेरेत्वे 'ज्ञाजनोर्जा' इति सूत्रेण जादेशे संयोगे जायते इति सिद्धम् ।

अजनि । ४० ।—जन्धातोः लुङि तस्य स्थाने तप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति 'च्लि प्रत्यये' 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इत्यनेन च्लेः चिणि 'चिणो लुक्' इत्यनेन तस्य लुकि 'अत उपधायाः' इत्यनेन वृद्धौ प्राप्ते तं बाधित्वा 'जनिवध्योश्च' इति सूत्रेण वृद्ध्यभावे अजनि इति रूपम् । पक्षे चिणोऽभावे च्लेः सिचि, इटि, सकारस्य षत्वे ष्टुत्वे अजनिष्ट इति सिद्धम् ।

अदीपि । ४९ ।—दीप्तार्थके दीपधातोः लुङि तप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये तस्य 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इत्यनेन वैकल्पिके चिणादेशे, अनुबन्धलोपे 'चिणो लुक्' इत्यनेन तकारस्य लोपे अदीप्+इ+त इति जाते संयोगे अदीपि इति रूपम् । चिणोऽभावपक्षे च्लेः सिजादेशे अटि, इटि, सस्य षत्वे ष्टुत्वे संयोगे च विहिते अदीपिष्ट इति सिद्धम् ।

अवित्त । ५० ।—सत्तार्थक विद्धातोः लुङि तस्य तप्रत्यये अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लिप्रत्यपे 'च्लेः सिच्' सिजादेशेऽनुबन्धलोपे 'लिङ्सिचावात्मनेपदेषु' इत्यनेन कित्वात् 'क्ङिति च' इति सूत्रेण गुणनिषेधे 'झलो झलि' इति सूत्रेण सकारस्य लोपे 'खरि च' इति चर्त्वेन दकारस्य तकारे अवित्त इति सिद्धम् ।

अबोधि । ५५ ।--अवगमनार्थक बुध्धातोः लुङि तस्य स्थाने तप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये 'दीपजनबुधपूरि-

तायिप्यायिभ्योन्यतरस्याम्' इत्यनेन पाक्षिके च्लेः चिणादेशेऽनुबन्धलोपे 'चिणो लुक्' इति सूत्रेण तकारस्य लोपे 'पुगन्तलघूपधस्य च' इत्यनेन गुणे संयोगे अबोधि इति रूपम् । चिणोऽभावपक्षे च्लेः सिजादेशे सकारस्य लोपे नकारस्य धकारे जश्त्वे अबुद्ध इति सिद्धम् ।

स्रष्टा (ई० २८)—सृज धातोर्लुटस्तादेशे तासि प्रत्यये तकारस्य डात्वे-डित्वसामर्थ्यादभस्यापि टेर्लोपे 'सृजिदृशोर्झल्यमकिति' इत्यमि अनुबन्धलोपे 'सृ अज् ता' इति भूते यणि 'व्रश्चभ्रस्जसृजमृजयराजभ्राजच्छशां षः' इति षत्वे ष्टुत्वे 'स्रष्टा' इति जातम् ।

असृष्ट । ३० ।—विसर्गार्थकाद् सृज्धातोः लुङि तस्य स्थाने त प्रत्यये अडागमेऽनुबन्धलोपे अ+सृज+त इति जाते च्लि प्रत्यये—'च्लेः सिच्' इति सूत्रेण च्लेः सिजादेशेऽनुबन्धलोपे 'लिङ्सिचावात्मनेपदेषु' इत्यनेन सिचः कित्त्वात् अम्गुणयोरभावे 'झलोझलि' इत्यनेन सस्य लोपे 'व्रश्चभ्रस्जसृजमृज-यजराजभ्राजच्छशां षः' इत्यनेन जकारस्य षत्वे ष्टुत्वे कृते सयोग असृष्ट इति सिद्धम् ।

अपादि (ई० ४८)—'पद् गतौ' इति धातोर्लुङस्तादेशे अटि अनुबन्ध-लोपे च्लौ 'चिण् ते पदः' इति च्लेश्चिणि अनुबन्धलोपे 'चिणो लुक्' इति चिणः परस्य तशब्दस्य लुकि 'अत उपधायाः' इति वृद्धौ 'अपादि' इति सिद्धम् ।

लाता (-ई० ४५, ५१)—लीधातोर्लुटस्तादेशे तासिप्रत्यये 'लुटः प्रथमस्य' इति तस्य डादेशे अनुबन्धलोपे डित्वसामर्थ्यादभस्यापि टेर्लोपे 'विभाषा लीयते' इत्यात्वे 'लाता' इति । पक्षे गुणे 'लेता' इति ।

ननद्ध । ५० ।—बन्धनार्थक णह धातोः 'णो नः' इत्यनेन णकारस्य नकारे ततो लिटि, सिपि, तस्य थलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्यासकार्ये न+नह+थ इति जाते 'ऋतो भारद्वाजस्य' इति नियमात् वैकल्पिके इडभावे 'नहो धः' इत्यनेन हकारस्य धकारे 'झषस्तथोर्धोऽधः' इत्यनेन थस्य धत्वे जश्त्वेन दकारे ननद्ध इति रूपम् । पक्षे इटि कृते 'थलि च सेटि' इत्यनेन एत्वाऽभ्यासलोपे संयोगे नेहिथ इति सिद्धम् ।

नेशिथ । ९७ ।—अदर्शनार्थक णश् धातोः 'णो नः' इत्यनेन णकारस्य नकारे नश्धातोः लिटि, सिपि, थलि, अनुबन्धलोपे लिटिधातोरनभ्यासस्य' इति द्वित्वेऽभ्यासकार्ये 'रधादिभ्यश्च' इत्यनेन वैकल्पिके इटि 'थलि च सेटि' इत्यनेन एत्वेऽभ्यासलोपे च कृते नेशिथ इति रूपम् । इडभावपक्षे 'मस्जिनशो-र्झलि' इत्यनेन नुमि अनुस्वारे 'व्रश्चभ्रस्ज' इत्यादिना शकारस्य षत्वे ष्टुत्वे ननष्ट इति सिद्धम् ।

इति दिवादिप्रकरणम्

अथ स्वादिप्रकरणम्

सुनोति । ४८ ।—अभिषवार्थक् षुङ् धातोः 'धात्वादेः षः सः' इत्यनेन षकारस्य सकारे ततो लटि, तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इत्यनेनं शपि प्राप्ते तं बाधित्वा 'स्वादिभ्यः श्नुः' इत्यनेन श्नुप्रत्ययेऽनुबन्धलोपे सुनु + ति इति जाते जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे सुनोति इति सिद्धम् ।

असावीत्-असोष्ट (ई० ४२, ५०)—'षुङ्' धातोर्लुङि प्रथमपुरुषैक-वचने लुङस्तिपि अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे 'धात्वादेः षः सः' इति सत्त्वे 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे च्लौ च्लेः सिचि इचि गते 'अ सु स् त' इति स्थिते 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इति सिचः सस्य इटि 'अस्तिसिचोऽ-पृक्ते' इत्यनेन अपृक्तसंज्ञकस्य तिपस्तकारस्य ईटि 'इट ईटि' इति सलोपे 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ सवर्णदीर्घे 'असावीत्' इति । आत्मनेपदे 'सार्व-धातुकार्धधातुकयोः' इति गुणे षत्वे ष्टुत्वे 'असोष्ट इति सिद्धम् भवति ।

चिकाय । ६५ ।—चयनार्थक् चिञ् धातोः लिटि, तिपि, तिपः 'परस्मै-पदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण णलि अनुबन्धलोपे धातोः द्वित्वेऽ-भ्यासकार्ये 'अचो ञ्णिति' इत्यनेन वृद्धौ आयादेशे 'विभाषा चेः' इत्यनेन पाक्षिके

कुत्वे चिकाय इति रूपम् । कुत्वाभावपक्षे चिचाय इति सिद्धम् ।

स्तर्यात् । ३८ ।—आच्छादनेऽर्थे स्तृञ्धातोः आशीर्लिङि लकारस्य स्थाने तिप्यनुबन्धलोपे 'इतश्च' इत्यनेन इकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुटि 'लिङाशिषि' इत्यनेन आर्धधातुकसंज्ञायाम् 'किदाशिषि' इत्यनेन कित्वे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारस्य लोपे यासुटः कित्वात् गुणाभावे प्राप्ते 'गुणोऽर्तिसंयोगाद्योः' इत्यनेन गुणे रपरे च कृते संयोगे स्तर्यात् इति सिद्धम् ।

स्तृषीष्ट (ई० ४५)—स्तृधातोराशीर्लिङि सीयुटि 'सुट् तिथोः' इति सुटि 'ऋतश्च संयोगादेः' इति विकल्पेन इटि 'गुणोर्तिसंयोगाद्योः' इति गुणे उभयोः सकारयोः षत्वे स्तरिषीष्ट' इति । पक्षे 'उश्चे' ति कित्वात् गुणाभावे 'स्तृषीष्ट' इति ।

अस्तरिष्ट, अस्तृत (ई० ४८)—स्तृधातोर्लुङि लुङस्तादेशे अटि च्लौ 'ऋतश्च संयोगादेः'इति विभाषया इटि गुणे रपरत्वे सस्य षत्वे ष्टुत्वे 'अस्तरिष्ट' इति पक्षे 'ह्रस्वादङ्गाद्' इति सिज्लोपे 'अस्तृत' इति । गुणस्तु न 'उश्चे' ति कित्वेन तन्निषेधात् ।

दुधविथ—'धूञ् कम्पने' इति धातोर्लिटः सिपि थलि अनुबन्धलोपे 'लिटि धातोः' इति द्वित्वे अभ्यासत्वेन 'ह्रस्वः' इत्यनेन अभ्यासस्य ह्रस्वे 'अभ्यासे चर्च' इति अभ्यासधकारस्य जश्त्वेन दकारे'दु धू थ' इति स्थिते 'स्वरतिसूतिसूयतिधूञूदितो वा' इति वेटि अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'दुधविथ' इति सिद्धम् । इडभावे गुणे 'दुधोथ' इति च भवति ।

दुधुविव (ई० ४९) ञकारेत्संज्ञकधूधातोर्लिटः स्थाने वसि वसो 'व' आदेशे धातोर्द्वित्वे अभ्यासत्वे ह्रस्वे 'अभ्यासे चर्च' इति अभ्यासधकारस्य जश्त्वे 'दु धू व' इति जाते 'श्र्युकः किति' इत्यनेन 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति न्यायेन 'स्वरतिसूतिसूयतिधूञूदितो वा' इति परत्वात् विभाषया प्राप्तस्येटो निषेधेऽपि क्रादिनियमान्नित्यामिटि अनुबन्धलोपे'दु धू इ व' इति स्थिते 'अचिश्नुधातुभ्रुवाम्' इति उवङि अनुबन्धलोपे 'दुधुविव' इति जातम् ।

अधावीत्—धूञ् धातोः लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इति सूत्रेण इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये च्लेः सिजादेशेऽनुबन्धलोपे अ+धू+स्+त् इति जाते 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिके इटि प्राप्ते तं बाधित्वा 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इत्यनेन इडागमेऽनुबन्धलोपे कृते 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि 'इट ईटि' इत्यनेन सकारस्य लोपे 'सिचि वृद्धिः परस्मैपदेषु' इति सूत्रेण वृद्धौ आवादेशे सवर्णदीर्घे च कृते संयोगे असावीत् इति रूपम् सिद्धम् । आत्मनेपदे—धूञो लुङि प्रत्ययेऽडागमे, च्लि प्रत्यये च्लेः सिचि 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन पाक्षिके इटि गुणेऽवादेशे सकारस्य षत्वे च कृते अधविष्ट इति रूपम् । इडागमाभावपक्षे गुणे अधोष्ट इति सिद्धम् ।

ववरिथ (ई० ५०)—'वृञ् वरणे' इत्यस्माद्धातोर्लिटि थलि द्वित्वादिकार्ये इटि गुणे 'ववरिथ' इति । अत्र क्रादिनियमादिट्निषेधः कुतो नेति चेदुच्यते—'बभूथाऽऽततन्थजगृम्भववर्थेति निगमे' अत्र निगमे=वेदे, बभूथ-आततन्थ-जगृम्भ-ववर्थ एते निपाताः स्युरित्यर्थः । अतः वृञ्धातोर्लिटि परतः थलि 'ववर्थे' ति निपातः । किन्तु तादृशगुणविशिष्टेडागमरहितो निपातः केवलं वेदे एव प्रसज्यते । लोके त्वत्र क्रादित्वेऽपि इण्निषेधो नेति ववरिथ इति भवति ।

वरिषीष्ट (ई० ५३)—वृधातोराशीर्लिङि तङि सीयुटि सुटि-वृ सी स् त इति स्थिते 'लिङ्सिचोरात्मनेपदेषु' इति विकल्पेन इटि गुणे रपरत्वे उभयोः सकारयोः षत्वे ष्टुत्वे 'वरिषीष्ट' इति । इडभावे 'उश्चे'ति कित्त्वाद् गुणनिषेधे 'वृषीष्ट' इति च भवति ।

प्रहिणोति (ई० ५१, ५२)—प्रोपसर्गात् 'हि गतौ' इत्यस्माद्धातोर्लटि 'स्वादिभ्यः श्नुः' इति श्नौ गुणे 'हिनुमीना' इति णत्वे 'प्रहिणोति' इति ।

जिघाय (ई० ४४, ४८)—हिधातोर्लिटि तिपि णलि द्वित्वे अभ्यासत्वे 'अभ्यासे चर्च' इति चर्त्वे 'हेरचङि' इति अभ्यासात् परस्य हस्य कुत्वेन घकारे वृद्धौ आयादेशे 'जिघाय' इति ।

देभतुः (ई० ४५, ५१)—दम्भ्धातोर्लिटि तसि अतुसि द्वित्वे 'श्रन्थिग्रन्थि-

दम्भिस्वञ्जीनां लिटः कित्त्वं वा' इति कित्त्वपक्षे 'अनिदिताम्—इति नलोपे तस्य आभीयत्वादसिद्धत्वेन 'अत एकहल्मध्य—' इत्येत्वाप्राप्त्या 'दम्भेश्च' इति एत्वाभ्यासलोपे सस्य रुत्वे विसर्गे 'देभतुः' इति ।

आनशे (ई० ४९)—अश्धातोर्लिटि तङि द्वित्वे अभ्यासत्वे हलादिशेषे 'अत आदेः' इत्यभ्यासस्य दीर्घे 'अश्नोतेश्च' इति नुटि 'लिटस्तझयोः—' इत्येशि 'आनशे' इति सिद्धम् ।

।। इति स्वादिप्रकरणम् ।।

अथ तुदादिप्रकरणम्

वभर्ज (ई० ४८)—भ्रस्ज्धातोर्लिटि तिपि णलि द्वित्वे अभ्यासत्वे हलादिशेषे 'अभ्यासे चर्च' इति भस्य बत्वे 'भ्रस्जो रोपधयोरमन्यतरस्याम्' इति रेफस्योपधाभूतस्य सकारस्य च रमागमे अमावितौ 'वभर्ज' इति । रमोऽभावे तु सस्य श्चुत्वेन शत्वे 'झलां जश् झशि' इति शस्य जश्त्वे 'बभ्रज्ज' इति ।

बभर्जिथ (ई० ३४) भ्रस्ज्धातोर्लिटि सिपि थलि द्वित्वे अभ्यासत्वे हलादिशेषे 'अभ्यासे चर्च' इति अभ्यासभकारस्य बकारे 'भ्रस्जो रोपधयोरमन्यतरस्याम्' इति रमागमे अमावितौ 'आर्धधातुकस्येड् वलादेः' इतीटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति निषेधे भारद्वाजनियमात् विकल्पेन इटि 'बभर्जिथ' इति । इडभावे तु द्वित्वादिकार्ये 'बभ्रस्ज्थ' इति स्थिते 'भ्रस्जो रोपधयोः' इति रमि रोपधयोश्च निवृत्तौ 'बिभर् ज् थ' इति स्थिते 'व्रश्चभ्रस्ज' इति जस्य षत्वे ष्टुत्वे 'बभर्ष्ठ' इति ।

रमभावपक्षे—द्वित्वादिकार्ये कृते भारद्वाजनियमाद् विकल्पेनेटि सस्य श्चुत्वेन शत्वे 'झलां जश् झशि' इति शस्य जश्वे 'बभ्रज्जिथ' इति । रमभावे इडभावे च पक्षे पूर्ववत् द्वित्वादिकार्ये 'बभ्रस्ज्थ' इति स्थिते 'स्कोः संयोगाद्योरन्ते

च' इति सलोपे 'व्रश्चभ्रस्ज' इति जस्य षत्वे ष्टुत्वे 'बभ्रष्ठ' इति चतुर्थं रूपं सिद्धम् भवति।

अभार्क्षीत्(ई० ५३) भ्रस्ज्धातोर्लुङि तिपि अडागमे च्लौ सिचि भ्रस्जोरोपधयोः–' इति रमागमे 'व्रश्चभ्रस्ज–' इति षत्वे 'षढोः कः सि' इति षस्य कत्वे सस्य षत्वे तिप इकारलोपे इटि 'वदव्रज–' इति वृद्धौ 'अभार्क्षीत्' इति। रमोऽभावे 'स्को–' इति सलोपे 'व्रश्च–' इति जस्य षत्वे षस्य कत्वे सिचः सस्य षत्वे 'वदव्रज–' इति वृद्धौ 'अभ्राक्षीत्' इति।

भृज्ज्यात्।४५। भ्रस्जधातोः आशीर्लिङि तत्स्थाने तिपि, अनुबन्धलोपे 'इतश्च' इत्यनेन इकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' 'इत्यनेन यासुडागमेऽनुबन्धलोपे यासुटः कित्वात् 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारस्य लोपे भ्रस्ज+या+त् इति जाते 'क्ङितिरमागमं बाधित्वा सम्प्रसारणं पूर्वविप्रतिषेधेन' इति वार्तिकेन रमं बाधित्वा सम्प्रसारणे 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे सकारस्य 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वेन शकारे, शस्य जश्त्वेन जकारे च कृते संयोगे भृज्ज्यात् इति सिद्धम्।

भर्क्षीष्ट।५१। भ्रस्जधातोः आशीर्लिङि आत्मनेपदे तप्रत्यये 'लिङःसीयुट्' इत्यनेन सीयुटि, अनुबन्धलोपे 'लोपो व्योर्वलि' इत्यनेन यकारलोपे भ्रस्ज+सी+त इति 'सुट्तिथोः' इति सूत्रेण सुडागमेऽनुबन्धलोपे 'भ्रस्जोरोपधयोरन्यतरस्याम्' इति सूत्रेण वैकल्पिके रेफसकारयोः स्थाने मित्वादन्त्यादचः परे रमागमेऽनुबन्धलोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यनेन षत्वे 'षढोः कः सि, इत्यनेन षस्य कत्वे सकारस्य सत्वे क-ष संयोगेन क्षत्वे ष्टुत्वे भर्क्षीष्ट इति रूपम्। रमागमाभावपक्षे भ्रक्षीष्ट इति सिद्धम्

क्रष्टा।५०। विलेखनार्थकात् कृष्धातोः लुटि लकारस्य स्थाने तिपि, अनुबन्धलोपे 'कर्तरि शप्' इत्यनेन शपि प्राप्ते तं बाधित्वा 'स्यतासी लृलुटोः' इत्यनेन तासि 'लुटः प्रथमस्य डारौरसः' इति सूत्रण तिपो डादेशेऽनुबंधलोपे डित्वसामर्थ्यादभस्यापि टेर्लोपे कृष्+ता+अ इति जाते 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति सूत्रेण पाक्षिके अमि, यणि तकारस्य ष्टुत्वेन टकारे क्रष्टा इति रूपम्।

अमोऽभावपक्षे गुणे कर्ष्टा इति रूपद्वयं सिद्धम् ।

अक्राक्षीत् ।४०। कृषधातोः लुङि तिपि, अनुबन्धलोपे 'इतश्च' इति इकार-लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये 'शल इगुपधादनिटः क्सः' इत्यनेन च्लेःक्सादेशे प्राप्ते तं बाधित्वा 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' इति वार्तिकेन वैकल्पिके च्लेः सिजादेशेऽनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति सूत्रेण अति कृते 'इको यणचि' इत्यनेन यणि 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ 'षढोः कः सि' इत्यनेन षकारस्य ककारे 'आदेशप्रत्यययोः' इत्यनेन सिचः सकारस्य षत्वे क् ष संयोगेन क्षकारे अक्राक्षीत् इति रूपम्

अमोऽभावपक्षे वृद्धौ रपरे अकार्क्षीत् इति रूपम् । सिचोऽभावे च्लेः क्सादेशे षस्य कत्वे संयोगे अकृक्षत् इति सिद्धम् ।

अकृष्ट(ई० २३)—कृष्धातोर्लुङि अडागमे लुङस्तादेशे च्लौ 'स्पृशमृश्कृष्' इति विभाषया च्लेः सिचि इति गते 'लिङ्सिचावात्मनेपदेषु' इति कित्वादमृगुण-योरभावे 'अकृष् स् त' इति स्थिते 'झलो झलि' इति सलोपे ष्टुत्वे 'अकृष्ट' इति । सिजभावे अटि 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे अनुबन्धलोपे 'अ कृष स त' इति स्थिते कित्वादमृगुणयोरभावे 'षढोः कः सि' इति धातोः षकारस्य कत्वे सस्य षत्वे 'अकृक्षत' इति द्धिद्धम् ।

मुञ्चति(ई० ४६)—मुच्धातोर्लटि तिपि 'तुदादिभ्यः शः' इति शप्रत्यये 'शे मुचादीनाम्' इति नुमि अनुस्वारे परसवर्णे 'मुञ्चति' इति सिद्धम् ।

अलिपत्—(ई० ५०)—लिप्धातोर्लुङि प्रथमपुरुषैकवचने परस्मैपदे लुङस्तिपि अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'लुङ्' इत्यडागमे अनुबन्ध-लोपे च्लौ 'लिपिसिचिह्वश्च' इति च्लेरङि अनुबन्धलोपे ङित्वात् गुणाभावे 'अलिपत्' इति ।

अमुचत् ।६१। मोचनार्थकमुच्धातोः लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इत्यनेन इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लि प्रत्यये च्लेः स्थाने 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इति सूत्रेण अङि संयोगे

अमुचत् इति रूपम् ।

आत्मनेपदे तु—लुङि, त प्रत्यये अडागमेऽनुबन्धलोपे च्लि प्रत्यये 'च्लेः सिच्' इत्यनेन सिचि, 'झलो झलि' इत्यनेन सकारस्य लोपे 'चोः कुः' इत्यनेन चकारस्य कुत्वेन ककारे संयोगे अमुक्त इति सिद्धम् ।

असिचत् । ४६ । षिच् क्षरणे इत्यर्थकषिच्धातोः षिचः सकारस्य षकारे लुङि, तिपि, अनुबन्धलोपे इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये 'लिपि सिचि ह्वश्च' इत्यनेन च्लेरङि तस्य ङित्वाद् गुणाभावे संयोगे असिचत् इति रूपम् ।

आत्मनेपदे तु—लुङि, तप्रत्यये अडागमे च्लि प्रत्यये 'आत्मने पदेष्वन्यतरस्याम्' इत्यनेन च्लेः सिजादेशेऽनुबन्ध लोपे 'झलो झलि' इत्यनेन सकारस्य लोपे चकारस्य कत्वे संयोगे असिक्त सिद्धम् ।

वव्रश्च ।५०। ओव्रश्चू छेदने इत्यर्थके व्रश्च्धातोः लिटि, तिपि, अनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायाम् 'लिटयभ्यासस्योभयेषाम्' इत्यनेन सम्प्रसारणे, पूर्वरूपे 'उरत्' इत्यनेन अत्वे रपरे 'अचः परस्मिन्पूर्वविधौ' इत्यनेन अत्वस्य स्थानित्वात् 'न सम्प्रसारणे सम्प्रसारणम्' इति सूत्रेण वकारस्य सम्प्रसारणनिषेधे हलादिशेषे संयोगे वव्रश्च इति सिद्धम् ।

अव्राश्चीत्—व्रश्च्धातोः लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इति इकार लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लि प्रत्यये च्लेः सिचि ऊदित्वात् वैकल्पिके इटि 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि 'इट ईटि' इति सूत्रेण सकारस्य लोपे 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ प्राप्ते 'नेटि' इत्यनेन सलोपे 'व्रश्चभ्रस्जसृज' इत्यादिना षकारस्य ककारे सकारस्य षत्वे क-षसंयोगेन क्षत्वे अव्राक्षीत् इति सिद्धम् ।

अव्याचीत् । ५५ । व्याजीकरणार्थके व्यच्धातोः लुङि, तिपि अनुबन्धलोपे 'इतश्च' इति इकारस्य लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे च्लि लुङि' इत्यनेन च्लि प्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः स्थाने सिजादेशे 'आर्धधा-

तुकस्येड्वलादेः' इत्यनेन इटि अ + व्यच् + इ + स+त् इति जाते 'अस्तिसिचोऽपृक्ते' इति सूत्रेण ईटि 'इटः ईटि' इत्यनेन सकारस्य लोपे अनसीति पर्युदासेन कृन्मात्रविषयत्वात् 'व्यचेः कुटादित्वमनसि' इत्यस्यात्राप्रवृत्या 'अतो हलादेर्लघोः' इति सूत्रेण पाक्षिके वृद्धौ सवर्णदीर्घे च कृते अव्याचीत् इति रूपम् । वृद्धयभावपक्षे तु दीर्घे अव्यचीत् इति सिद्धम् ।

व्यचेः कुटादित्वमिति (ई० २४)—ननु 'व्यचेः कुटादित्वमनसि' इति व्यच् धातोः कुटादित्वात् 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इत्यनेन तासादेर्ङिद्वद्भावे तस्मिन् परे व्यचो यकारस्य 'ग्रहिज्ये' त्यनेन सम्प्रसारणे लुटि 'विचिता' इत्यादि कथन्नेति चेन्न, अनसीति पर्युदासेन अस्भिन्नाऽस्सदृशस्य कृत्त्वेनैव तत्र ग्रहणात् । एवं च अस्भिन्नकृत्प्रत्यये परे एव तत्प्रवृत्तिस्वीकारणादोषात् ।

तृम्फति—'तृन्फ' धातुरुपदेशे 'तृम्फ' इति । तस्माल्लटि तिपि शपं प्रबाध्य 'तुदादिभ्यः शः' इति शप्रत्यये शस्याऽपित्वेन 'सार्वधातुकमपित्' इति ङित्वे 'अनिदिताम्' इति नलोपे 'शे तृम्फादीनां नुम्वाच्यः' इति वार्तिकेन नुमि अनुबन्धलोपे अनुस्वारे परसवर्णे 'तृम्फति' इति ।

आनर्च्छ । ३० । गतीन्द्रियप्रलयमूर्तिभावेषु इत्यर्थके ऋच्छधातोः 'परोक्षे लिट्' इत्यनेन लिटि, तस्य स्थाने तिपि 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन सिपो णलि, अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वेऽभ्याससंज्ञायां 'उरत्' इति अत्वे रपरे 'हलादिः शेषः' इति हलां लोपे 'अत आदेः' इत्यनेन दीर्घे 'ऋच्छत्यृताम्' इति सूत्रेण रपरे 'द्विहल्ग्रहणस्यानेकहलुपलक्षणत्वात् 'तस्मान्नुड् द्विहलः' इत्यनेन नुटि संयोगे आनर्च्छ इति सिद्धम् ।

आनर्च्छुः । २५ । ऋच्छधातोः लिटि, लकारस्य स्थाने झिप्रत्यये उसादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां 'उरत्' इत्यनेन अत्वे रपरे च कृते अ+ऋच्छ + उस् इति स्थिते 'अत आदेः' इति सूत्रेण दीर्घे द्विहल्ग्रहणस्यानेकहलुपलक्षणत्वात् 'तस्मान्नुड् द्विहलः' इत्यनेन नुडागमेऽनुबन्ध-

लोपे 'ऋच्छत्यृताम्' इत्यनेन गुणे रपरे सकारस्य रुत्वे विसर्गे संयोगे आनर्च्छुः इति सिद्धम् ।

लोभिता । ५९ । विमोहनार्थकात् लुभधातोः 'अनद्यतने लुट्' इत्यनेन लुटि, अनुबन्धलोपे लस्य स्थाने तिपि, 'कर्त्तरि शप्' इत्यनेन शपि प्राप्ते तं प्रबाध्य 'स्यतासी लृलटोः' इत्यनेन तासागमे कृते 'तीषसहलुभरुषरिषः' इति सूत्रेण पाक्षिके इडागमेऽनुबन्धलोपे 'पुगन्तलघूपधस्य च' इति सूत्रेण गुणे 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डादेशेऽनुबन्धलोपे डित्वात् टिलोपे च कृते संयोगे लोभिता इति रूपम् । ईडभावपक्षे जश्त्वेन तकारस्य धकारे भकारस्य जश्त्वेन बकारे लोब्धा इति सिद्धम् ।

चुकुटिथ—कौटिल्यार्थकात् कुटधातोः लिटि, सिपि, सिपः 'परस्मैपदानां णलतुसुस्थलतुसणल्वमाः' इत्यनेन थलि, अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्यासकार्ये 'कुहोश्चुः' इत्यनेन चुत्वेन चकारे 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति सूत्रेण ङित्वात् गुणाभावे संयोगे चुकुटिथ इति सिद्धम् ।

ममज्जिथ ।३१। शुद्धार्थकमस्जधातोः लिटि, सिपि, सिपो थलि, अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वेऽभ्यासकार्ये म+मस्ज्+थ इति स्थिते 'मज्जेरन्त्यात्पूर्वो नुम्वाच्यः' इति वार्तिकसहकारेण 'मस्जिनशोर्झलि' इत्यनेन सकारात्परे नुमि कृते अनुबन्धलोपे 'स्कोः संयोगाद्योरन्ते च' इति सूत्रेण सकारस्य लोपे म+मन्+ज्+थ इति जाते 'चोः कुः' इत्यनेन चकारस्य कुत्वेन गकारे 'खरि च' इति सूत्रेण चर्त्वेन गकारस्य ककारे नकारस्य अनुस्वारे परसवर्णे इडभावे ममङ्क्थ इति रूपम् । पक्षे 'ऋतो भारद्वाजस्य' इत्यनेन वैकल्पिके इटि झलादित्वाभावात् नुमोऽभावे 'स्तोः श्चुना श्चुः' इत्यनेन सकारस्य श्चुत्वेन शकारे 'झलां जश् झशि' इत्यनेन शकारस्य जकारे कृते ममज्जिथ इति रूपद्वयं सिद्धम् ।

ममङ्क्थ (ई० ४४, ५२)—मस्ज्धातोर्लिटि सिपि थलि अनुबन्धलोपे द्वित्वे अभ्यासत्वे 'हलादिः' शेषः इत्यभ्यासस्यान्त्यहलो लोपे 'म मस्ज् थ' इति

भूते 'स्तोः श्चुना श्चुः' इति सस्य श्चुत्वेन शत्वे 'झलां जश् झशि' इति शस्य जश्त्वेन जत्वे 'ऋतो भारद्वाजस्य' इति विभाषया इटि झलादित्वाऽभावान्नुमोऽभावे 'ममज्जिथ' इति सिद्धम् ।

इडभावे तु 'मस्जिनशोर्झलि' इति सूत्रेण 'मस्जेरन्त्यात्पूर्वो नुम्वाच्यः' इति वार्तिकबलात् सकारात् परे नुमि अनुबन्धलोपे 'म मस् मद् ज् थ' इति दशायां 'स्कोः संयोगाद्योरन्ते च' इति सलोपे 'म मद् ज् थ' इति भूते 'चोः कुः' इति जस्य कुत्वेन गत्वे 'खरि च' इति गस्य कत्वे नस्यानुस्वारे परसवर्णे 'ममङ्क्थ' इति च सिद्धं भवति ।

अम्राक्षीत्—मृश्धातोर्लुङि तिपि अटि अनुबन्धलोपे च्लौ 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' इति वार्तिकेन विकल्पेन च्लेः सिचि इचि गते 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति विभाषया अमि मलोपे ऋकारस्य यणि 'इतश्च' इति तिप इकारलोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति शस्य षत्वे 'वदव्रजहलन्तस्याचः' इति वृद्धौ 'षढोः कः सि' इति षस्य कत्वे 'आदेशप्रत्यययोः' इति सिचः सस्य षत्वे 'अस्तिसिचोऽपृक्ते' इति अपृक्तसंज्ञकस्य तस्य इटि अनुबन्धलोपे 'अम्राक्षीत्' इति । अमोऽभावे उक्तसूत्रेण विभाषया च्लेः सिचि कृते 'अमृश् स त्' इति स्थिते ईटि 'वदव्रजे'ति वृद्धौ रपरत्वे 'व्रश्चे'ति षत्वे कत्वे सिचः सस्य च षत्वे 'अमार्क्षीत्' इति । सिजभावे तु 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे धातोः शस्य 'व्रश्चे'ति षत्वे सिचः सस्य च षत्वे कित्वाद् वृद्धयभावे 'अमृक्षत्' इति च सिद्धं भवति ।

अमाङ्क्षीत् ।३१। मस्ज् धातोः लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इत्यनेन इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः स्थाने सिचादेशेऽनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इति सूत्रेण ईटि 'मस्जेरन्त्यात्पूर्वो नुम् वाच्यः' इतिवार्तिकसहकारेण 'मस्जिनशोर्झलि' इत्यनेन सकारात्परे नुमि अनुबन्धलोपे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारलोपे 'वदव्रजहलन्तस्याचः' इति सूत्रेण वृद्धौ जकारस्य कुत्वेन गकारे तस्य चर्त्वेन

ककारे नकारस्यानुस्वारे परसवर्णे सकारस्य षत्वे कषसंयोगे क्षत्वे अमाङ्क्षीत् इति सिद्धम् ।

अम्राक्षीत् । ४८ । आमर्शने मृशधातोः लुङि, तिपि अनुबन्धलोपे 'इतश्च' इत्यनेन इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अटयनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः स्थाने सिजादेशे प्राप्ते तं बाधित्वा 'शल इगुपधादनिटः क्सः' इति सूत्रेण क्सादेशे प्राप्ते तंप्रबाध्य 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' इति वार्तिकेन पाक्षिके सिचि, अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन इटि 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति सूत्रेण अमि, यणि 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति सूत्रेण शकारस्य षत्वे 'षढोः कः सि' इत्यनेन कत्वे 'आदेशप्रत्यययोः' इति सूत्रेण सिचः सकारस्य षत्वे कषसंयोगे क्षत्वे अम्राक्षीत् इति रूपम् ।

अमोऽभावपक्षे-अमृश् + स + ई + त् इति जाते वृद्धौ, रपरे, षत्वादिकार्ये कृते सति अमार्क्षीत् इति रूपम् । सिचोऽभावपक्षे 'शल इगुपधादनिटः' क्सः इत्यनेन च्लेः क्सादेशे शस्य षत्वे कत्वे क्षत्वे च कृते अमृक्षत् इति त्रीणि रूपाणि सिद्धचन्ति ।

शीयते । ६५ ।—शातनेर्थे शद्धातोः 'वर्तमाने लट्' इत्यनेन लट्लकारेऽनुबन्धलोपे लस्य स्थाने तप्रत्यये तस्य 'टित आत्मने पदानां टेरे' इत्यनेन टेरेत्वे 'कर्त्तरि शप्' इति सूत्रेण शपि प्राप्ते तं प्रबाध्य 'तुदादिभ्यः शः' इत्यनेन शप्रत्ययेऽनुबन्धलोपे 'पाघ्राध्मास्थाम्नादाणदृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसीदाः' इति सूत्रेण शदः शीयादेशे कृते संयोगे शीयते इति सिद्धम् ।

किरति । ४२ ।—विक्षेपार्थकात् कृधातोः लटि, तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इत्यनेन शपि प्राप्ते तं बाधित्वा 'तुदादिभ्यः शः' इत्यनेन शः प्रत्ययेऽनुबन्धलोपे' ॠत इद्धातोः इति सूत्रेण इत्वे रपरे किरति इति सिद्धम् ।

चकरतुः । २९ । कृधातो लिटि, तसि, तसः स्थाने 'परस्मैपदानां णलतुसुस्थ

लथुसणल्वमाः' इति सूत्रेण अतुसादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वेऽभ्याससंज्ञायां 'ह्रस्वः' इत्यनेन ह्रस्वे 'उरत्' इत्यत्वे रपरे 'हलादि शेषः' इत्यनेन हलो लोपे च+कृ+अतुस् इति जाते 'ऋच्छत्यृताम्' इति सूत्रेण गुणे रपरे 'कुहोश्चुः' इति चुत्वेन चकारे सकारस्य रुत्वे विसर्गे संयोगे चकरतुः इति सिद्धम् ।

उपास्किरत् । ३७ ।उपपूर्वात्कृधातोः 'अनद्यतने लङ्' इत्यनेन लङि तस्य स्थाने तिपि, अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे शपं प्रबाध्य 'तुदादिभ्यः शः' इत्यनेन शप्रत्यये 'ऋत इद्धातोः' इत्यनेन ऋकारस्य इत्वे रपरे 'अडभ्यासव्यवायेऽपि, 'सुट्कात्पूर्व इति वक्तव्यम्' इति वार्तिकबलाद् ककारात् पूर्वं सुटि दीर्घे संयोगे उपास्किरत् इति सिद्धम् ।

उपस्किरति—उपपूर्वात्कॄधातोः लटि, तिपि, अनुबन्धलोपे शपं बाधित्वा 'तुदादिभ्यः शः' इति शप्रत्ययेऽनुबन्धलोपे 'ऋत इद्धातोः' इत्यनेन ऋकारस्य इत्वे रपरे उप+किर+अ ति इति जाते 'हिंसायां प्रतेश्च' इत्यनेन सुटि अनुबन्धलोपे संयोगे उपस्किरति इति सिद्धम् ।

गिलति—निगरणार्थक गॄधातोः लटि, तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इत्यनेन शपि प्राप्ते तं प्रबाध्य 'तुदादिभ्यः शः' इत्यनेन शप्रत्ययेऽनुबन्धलोपे 'ऋत इद्धातोः' इत्यनेन इत्वे रपरे 'अचि विभाषा' इत्यनेन वैकल्पिके रेफस्य लत्वे गिलति इति रूपम् । लत्वाभावपक्षे गिरति इति सिद्धम् ।

अप्राक्षीत् । ५१ । प्रच्छज्ञीप्सायाम् इत्यर्थकप्रच्छधातोः लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इत्यनेन इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति सूत्रेण च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन सिजादेशेऽनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन इटि 'वदव्रजहलन्तस्याचः' इति सूत्रेण वृद्धौ 'व्रश्चभ्रस्ज' इत्यादिना छस्य षत्वे षकारस्य ककारे सिचः सकारस्य षत्वे क्ष संयोगेन क्षत्वे संयोगे अप्राक्षीत् इति सिद्धम् ।

म्रियते—प्राणत्यागार्थक मृङ् धातोः लटि 'म्रियतेर्लुङ्लिङोश्च'

इत्यनेन आत्मनेपदत्वात् लकारस्य स्थाने तप्रत्यये शपं बाधित्वा 'तुदादिभ्यः शः' इत्यनेन शप्रत्ययेऽनुबन्धलोपे 'रिङ् शयग्लिङ्क्षु' इति सूत्रेण ऋकारस्य रिङि, इयङि च कृते 'आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे संयोगे म्रियते इति सिद्धम्।

अमृषत। ३६। मृङ्, धातोः लुङि, लस्य झ प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये च्लेः सिजादेशेऽनुबन्धलोपे सस्य षत्वे आत्मनेपदेष्वनतः इति सूत्रेण झस्य अदादेशे कृते संयोगे अमृषत इति सिद्धम्।

उद्विजिता। ४१। भयचलनयोः अर्थे उत्पूर्वाद्विज् धातोः लुटि तिपि, अनुबन्धलोपे शपं बाधित्वा 'स्यतासी लृलुटोः' इत्यनेन तासि प्रत्यये इडागमेऽनुबन्धलोपे 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डादेशेऽनुबन्धलोपे डित्वात् टिलोपे 'विज इट्' इत्यनेन ङित्वात्गुणाभावे संयोगे उद्विजिता इति सिद्धम्।

इति तुदादिप्रकरणम्।

अथ रुधादिप्रकरणम्

रुणद्धि। ३२। आवरणार्थक रुधधातोः लटि, तिपि, 'पुगन्तलघूपधस्य च' इत्यनेन गुणे प्राप्ते तं प्रबाध्य 'रुधादिभ्यः श्नम्' इति सूत्रेण श्नमि, अनुबन्धलोपे 'झषस्तथोर्धोऽधः' इत्यनेन तकारस्य धकारे 'झलां जश् झशि' इति सूत्रेण धकारस्य दकारे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे संयोगे रुणद्धि इति सिद्धम्।

रुन्धः। ४६। रुधधातोः लटि, तसि 'कर्तरि शप्' प्राप्ते तं बाधित्वा 'रुधादिभ्यः श्नम्' इति सूत्रेण श्नमि, अनुबन्धलोपे 'श्नसोरल्लोपः' इत्यनेन अका-

रस्य लोपे 'झषस्तथोर्धोऽधः' इत्यनेन तकारस्य स्थाने धकारे 'झरो झरि सवर्णे' इति सूत्रेण धकारस्य लोपे सस्य रुत्वे विसर्गे च कृते रुन्धः इति सिद्धम् ।

अरुणत् । ५७ । रुधधातोः 'अनद्यतने लङ्' इत्यनेन लङि, तिपि अनुबन्धलोपे 'इतश्च' इत्यनेन इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे शपं प्रबाध्य 'रुधादिभ्यः श्नम्' इत्यनेन श्नमि, अनुबन्धलोपे अ + रु + न+ध + त् इति जाते नकारस्य णत्वे 'हल्ङ्याभ्यो' इत्यनेन तकारस्य लोपे जश्त्वेन धकारस्य दकारे 'वावसाने' इत्यनेन वैकल्पिके चर्त्वेन दस्य तकारे संयोगे अरुणत् इति सिद्धम् ।

अरुधत्—रुधधातोः 'लुङ्' इति सूत्रेण लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः सिजादेशे प्राप्ते तं बाधित्वा 'इरितो वा' इत्यनेन वैकल्पिके च्लेरङि संयोगे अरुधत् इति रूपम् । च्लेरङाभावपक्षे सिचि 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ धस्य जश्त्वेन दकारे चर्त्वेन तकारे संयोगे अरौत्सीत् इति सिद्धम् ।

तृणेढि । ६० । तृहहिंसि हिंसायाम् इत्यस्माद् धातोः 'वर्त्तमाने लट्' इति सूत्रेण लटि तिपि, अनुबन्धलोपे शपं प्रबाध्य 'रुधादिभ्यः श्नम्' इति सूत्रेण श्नमि, अनुबन्धलोपे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन नकारस्य णत्वे तृणह इम्' इति सूत्रेण इडागमेऽनुबन्धलोपे गुणे 'हो ढः' इति हस्य ढत्वे 'झषस्तथोर्धोऽधः' इत्यनेन तकारस्य धकारे ष्टुत्वे 'ढो ढे लोपः' इत्यनेन पूर्वढकारस्य लोपे कृते संयोगे तृणेढि इति रूपम् सिद्धम् ।

अतृणेट् । ४३ । तृहधातोः लङि लस्य स्थाने तिपि, अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे शपं बाधित्वा 'रुधादिभ्यः श्नम्' इति सूत्रेण श्नमि, अनुबन्धलोपे नस्य णत्वे अ+तृणह +त इति जाते 'तृणह इम्' इत्यनेन इमागमेऽनुबन्धलोपे गुणे 'होढः' इत्यनेन हकारस्य ढत्वे तकार लोपे 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन ढकारस्य डकारे

कृते 'वाऽवसाने' इत्यनेन वैकल्पिके चर्त्वेन डकारस्य टकारे संयोगे अतृणट् इति रूपम् । चर्त्वाभावे अतृणेड् इति सिद्धम् ।

हिनस्ति । ४९ । हिस् धातोः 'इदितो नुम् धातोः' इत्यनेन नुमि, अनुबन्धलोपे ततो निष्पन्नहिंसधातोः लटि, लस्य स्थाने तिपि, अनुबन्धलोपे शपं प्रबाध्य श्नमि,अनुबन्धलोपे 'श्नान्नलोपः' इति सूत्रेण नकारस्य लोपे हिनस्ति इति सिद्धम् ।

अहिनत्—हिस्धातोः इदित्वात् 'इदितो नुम् धातोः' इति नुमि अनुबन्धलोपे ततो लङि तिपि, अनुबन्धलोपे, 'इतश्च' इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे शपं बाधित्वा श्नमि कृते 'श्नान्नलोपः' इत्यनेन नकारस्य लोपे 'हल्ङ्याब्भ्यः इत्यादिना तकारस्य लोपे 'ससजुषो रुः' इत्यनेन रुत्वे प्राप्ते तं बाधित्वा 'तिप्यनस्तेः' इत्यनेन सकारस्य दकारे चर्त्वे संयोगे अहिनत् इति सिद्धम् ।

अहिनः । ४९ । हिस्धातोः इदित्वाद् नुमि, अनुबन्धलोपे ततः 'अनद्यतने लङ्' इत्यनेन लङि लस्य स्थाने सिप्यनुबन्धलोपे इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे शपं बाधित्वा 'रुधादिभ्यः श्नम्' इति श्नमि अनुबन्धलोपे 'श्नान्नलोपः' इत्यनेन नकारस्य लोपे 'हल्ङ्यादिलोपे च कृते 'सिपि धातो रुर्वा' इत्यनेन पाक्षिके रुत्वे विसर्गे च कृते संयोगे अहिनः इति रूपम् । अत्र वा शब्दस्य समुच्चयार्थकत्वात् 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यनेन दकारस्यानुवृत्या रुत्वाभावपक्षे सकारस्य दकारे 'वावसाने' इत्यनेन पाक्षिके चर्त्वे अहिनत् इति । चर्त्वाभावे अहिनद् इति त्रीणि रूपाणि सिद्ध्यन्ति ।

'औनत् ।४८। क्लेदनार्थक् उन्दधातोः 'अनद्यतने लङ्' इत्यनेन लङि लकारस्य स्थाने तिपि, अनुबन्धलोपे 'इतश्च' इति इकारलोपे शपं प्रबाध्य 'रुधादिभ्यः श्नम्' इति श्नमि अनुबन्धलोपे 'आडजादीनाम्' इति सूत्रेणाडागमेऽनुबन्ध लोपे 'आटश्च' इत्यनेन वृद्धौ 'श्नान्नलोपः' इत्यनेन नस्य लोपे 'हल्ङ्याब्भ्यो' इत्यादिना तकारस्य लोपे 'वाऽवसाने' इति पाक्षिके दस्य चर्त्वे च कृते औनत्,

औनद् इति रूपद्वयं सिद्धम् ।

आनञ्जिथ—अञ्ज् व्यक्तिम्रक्षणकान्तिगतिषु इत्यर्थक अञ्ज धातोः लिटि, सिपि, तस्य स्थाने 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन थलि, अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्यासकार्ये 'अत आदेः' इति सूत्रेण दीर्घे 'तस्मान्नुड् द्विहलः' इति सूत्रेण नुटि, 'स्वरतिसूतिसूयति धूञूदितो वा' इति सूत्रेण वैकल्पिके इटि संयोगे आनञ्जिथ इति सिद्धम् ।

इडभावे जस्य कुत्वेन गकारे तस्य चर्त्वेन ककारे निमितापायात् ञकार-निवृत्तौ अनुस्वारे परसवर्णे आनङ्थ इति सिद्धम् ।

अनजानि । ४० । अञ्ज् धातोः लोटि तस्य स्थाने मिप्प्रत्ययेऽनुबन्धलोपे शपं प्रबाध्य 'रुधादिभ्यः श्नम्' इत्यनेन श्नमि अनुबन्धलोपे 'श्नान्नलोपः' इत्यनेन नकारस्य लोपे 'लोटो लङ्वत्' इत्यनेन लङ्कार्यातिदेशेन 'तस्थस्थमिपांतां-तन्तामः' इत्यनेन मिपो अमादेशे प्राप्ते तं प्रबाध्य 'मेर्निः' इत्यनेन मेर्न्यादेशे इकारोच्चारणसामर्थ्यात् इकारस्य उत्वाभावे 'आडुत्तमस्य पिच्च' इत्यनेन आडा-गमेऽनुबन्धलोपे निमित्तापाये नैमित्तिकस्याप्यपायः इति न्यायेन ञकारनिवृत्ताव-नुस्वारे परसवर्णे च कृते अनजानि इति सिद्धम् ।

आनक् । ३५ ।—अञ्जधातोः 'अनद्यतने लङ्' इति सूत्रेण लङि, तिपि, अनुबन्धलोपे 'इतश्च' इति इकारलोपे शपं प्रबाध्य 'रुधादिभ्यः श्नम्' इति श्नमि अनुबन्धलोपे 'श्नान्नलोपः' इति सूत्रेण नकारस्य लोपे 'आडजादीनाम्' इत्यनेन अडागमेऽनुबन्धलोपे वृद्धौ 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सूत्रेण तकारलोपे 'चोः कुः' इत्यनेन कुत्वेन जकारस्य गकारे 'वाऽवसाने' इत्यनेन चर्त्वेन गकारस्य ककारे संयोगे आनक् इति सिद्धम् ।

आञ्जीत् । ५९ । अञ्जधातोः लुङि तस्य स्थाने तिपि, अनुबन्धलोपे 'इतश्च' इतीकारलोपे 'च्लि लुङि' इत्यनेन च्लि प्रत्यये च्लेः सिजादेशेऽनुबन्धलोपे 'आडजादीनाम्' इत्यनेन आडागमे 'आटश्च' इति सूत्रेण वृद्धौ आ+अञ्ज्+स+त् इति जाते 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि 'अञ्जेः सिचि' इत्यनेन नित्यमिटि

अनुबन्धलोपे 'इट ईटि' इति सूत्रेण सकारस्य लोपे दीर्घे संयोगे आञ्जीत् इति सिद्धम् ।

शिण्ड्ढि ।४८। विशेषणार्थक् शिष्धातोः लोट लकारे लस्य स्थाने सिपि, अनुबन्धलोपे शपं प्रबाध्य 'रुधादिभ्यः श्नम्' इति सूत्रेण श्नमि अनुबन्धलोपे 'सेर्ह्यपिच्च' इत्यनेन सेर्हिभावे 'हुझल्भ्यो हेर्धिः' इत्यनेन हि स्थाने धिभावे कृते 'श्नसोरल्लोपः' इति सूत्रेण अल्लोपे शिनष्+धि इति जाते षकारस्य 'झलां जश् झशि' इत्यनेन जश्त्वेन डकारे ष्टुत्वेन धकारस्य ढत्वे 'झरो झरि सवर्णे' इत्यनेन पाक्षिके डकारस्य लोपे 'नश्चाऽपदान्तस्य झलि' इत्यनेन नकारस्यानुस्वारे 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन परसवर्णे कृते शिण्ढि इति रूपम् । डलोपाभावपक्षे शिण्ड्ढि इति रूपं सिद्धम् ।

अशिनट् । ५० । शिष्धातोः लङि, तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इत्यनेन शपि प्राप्ते तं बाधित्वा 'रुधादिभ्यः श्नम्' इत्यनेन श्नमि 'इतश्च' इत्यनेन इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'हल्ङ्याब्भ्यो' इत्यादिना तकारस्य लोपे षकारस्य जश्त्वेन डकारे 'वाऽवसाने' इति सूत्रेण पाक्षिके चर्त्वेन डकारस्य टकारे संयोगे अशिनट् इति रूपम् । चर्त्वाभावपक्षे अशिनड् इति सिद्धम् ।

भुङ्क्ते—पालनाभ्यवहारयोः वर्तमानात् भुज्धातोः लटि तस्य स्थाने 'भुजोऽनवने' इत्यनेन त प्रत्यये शपं बाधित्वा श्नमि 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे 'श्नसोरल्लोपः' इत्यल्लोपे जस्य कुत्वे चर्त्वेऽनुस्वारे परसवर्णे भुङ्क्ते इति सिद्धम् ।

इति रुधादिप्रकरणम्

अथ तनादिप्रकरणम्

अतनिष्ट । ४९ । तनुविस्तारे इत्यस्माद्धातोः लुङि तस्य स्थाने आत्मनेपदे त प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लि प्रत्यये 'च्लेः सिच्' इत्यनेन च्लेः स्थाने सिचि अ+तन्+स्+त इति जाते 'तनादिभ्यस्तथासोः' इत्यनेन वैकल्पिके सिचो लोपे 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इत्यनेन नकारस्य लोपे अतत् इति रूपम् । सिचो लोपाभावपक्षे 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे सस्य षत्वे ष्टुत्वे अतनिष्ट इति रूपम् सिद्धम् ।

अतानीत्—तन्धातोः परस्मैपदे लुङि तिपि अनुबन्धलोपे 'इतश्च' इकारलोपे अडागमेऽनुबन्धलोपे च्लि प्रत्यये च्लेः स्थाने सिजादेशेऽनुबन्धलोपे इटि 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि 'इट ईटि' इत्यनेन सकारस्य लोपे 'अतो हलादेर्लघोः इत्यनेन पाक्षिके वृद्धिकार्ये सवर्णदीर्घे अतानीत् इति रूपम् । वृद्धयभावपक्षे च कृते अतनीत् इति सिद्धम् ।

असात । ३० । दानार्थक षणुधातोः धात्वादेः षः सः' इति सूत्रेण षकारस्य सकारे णत्वस्य निवृत्तौ ततो लुङि तस्य त प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लि प्रत्यये 'च्लेः सिच्' इति च्लेः सिजादेशेऽनुबन्धलोपे 'तनादिभ्यस्तथासोः' इत्यनेन वैकल्पिके सिचो लुकि 'जनसनखनां सञ्झलोः' इत्यनेन आत्वे सवर्ण दीर्घे कृते असात इति रूपम् । सिज्लोपाभावपक्षे इडागमे ष्टुत्वे असनिष्ट इति सिद्धम् ।

अक्षत । ३५ । हिंसार्थक क्षणुधातोः लुङि लकारस्य स्थाने त प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लि प्रत्यये 'च्लेः सिच्' इति सूत्रेण च्लेः स्थाने सिजादेशेऽनुबन्धलोपे 'तनादिभ्यस्तथासोः' इत्यनेन वैकल्पिके सिचो लुकि 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो 'झलि क्ङिति' इति सूत्रेण नकारस्य लोपे अक्षत इति रूपम् । सिज्लोपाभावपक्षे इटि सस्य षत्वे ष्टुत्वे च कृते अक्षणिष्ट इति रूपं सिद्धम् ।

कुरुतः । ३२ । करणार्थक डुकृञ् धातोः 'वर्तमाने लट्' इति सूत्रेण लटि लकारस्य स्थाने तसि 'कर्तरि शप्' इति सूत्रेण शपि प्राप्ते तं प्रबाध्य 'तनादिकृञ्भ्य उः' इति सूत्रेण उ प्रत्यये कृ+उ+तस् इति स्थिते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे रपरे च 'अत उत्सार्वधातुके' इत्यनेन उत्वे सस्य रुत्वे विसर्गे च कृते संयोगे कुरुतः इति सिद्धम् ।

कुर्वन्ति । ६५ । कृधातोः लटि लकारस्य स्थाने झि प्रत्यये 'कर्त्तरि शप्' इत्यनेन शपि प्राप्ते तं बाधित्वा 'तनादिकृञ्भ्यः उः' इति सूत्रेण उ प्रत्यये 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे रपरे 'अत उत्सार्वधातुके' इत्युत्वे 'झोऽन्तः' इति सूत्रेण झकारस्यान्तादेशे यणि 'हलि च' इत्यनेन दीर्घे प्राप्ते 'न भकुर्छुराम्'इति सूत्रेण निषेधे प्राप्ते णत्वं प्रबाध्य नकारस्यानुस्वारे परसवर्णे नकारे तस्यासिद्धत्वान्न णत्वम् कुर्वन्ति इति सिद्धम् ।

चक्रतुः । ३० । कृ धातोः लिटि तस्य स्थाने तसि, तसः स्थाने 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन अतुसि 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्यासंज्ञायां 'उरत्' इत्यनेन अत्वे 'उरण् रपरः' इत्यनेन रपरे कर्+कृ+अतुस् इति जाते 'हलादिः शेषः' इत्यनेन अभ्यासहलो लोपे 'कुहोश्चुः' इत्यनेन चुत्वेन चकारे यणि सस्य रुत्वे विसर्गे च कृते चक्रतुः इति सिद्धम् ।

कुर्यात् । ५९ । कृधातोः विधिलिङि लस्य परस्मैपदे तिपि, अनुबन्धलोपे इकारलोपे 'कर्त्तरि शप्' इत्यनेन शपि प्राप्ते तं बाधित्वा 'तनादिकृञ्भ्यः उः' इत्यनेन उ प्रत्यये गुणे रपरे कुर्+त् इति जाते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमेऽनुबन्धलोपे सकारलोपे 'अत उत्सार्वधातुके' इत्यनेन उत्वे 'ये च' इत्यनेन उ प्रत्ययस्य लोपे 'हलि च' इति दीर्घे प्राप्ते तं प्रबाध्य 'न भकुर्छुराम्' इत्यनेन तन्निषेधे कृते संयोगे कुर्यात् इति सिद्धम् ।

कुर्वीत । ३६ । करणार्थक कृधातोः 'विधिनिमन्त्रणामन्त्रणाऽधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इत्यनेन लिङि आत्मनेपदे लस्य स्थाने त प्रत्यये शपं बाधित्वा 'तनादिकृञ्भ्यः उः' इत्यनेन उ प्रत्यये गुणे रपरे 'लिङः सीयुट्' इत्यनेन सीयुटि

अनुबन्धलोपे सस्य लोपे 'अत उत्सार्वधातुके' इत्युत्वे यणि च कृते 'न भकुर्छुराम्' इत्यनेन निषेधात् दीर्घाभावे यकारस्य लोपे संयोगे कुर्वीत इति सिद्धम् ।

क्रियात् । ४२ । कृधातोः आशीर्लिङि तस्य स्थाने तिपि अनुबन्धलोपे 'इतश्च' इति इकारलोपे यासुटि अनुबन्धलोपे कृ+यास्+त् इति जाते सकारलोपे 'रिङ् शयग्लिङ्क्षु' इत्यनेन रिङादेशे कृते संयोगे क्रियात् इति सिद्धम् ।

अकार्षीत् । ५१ । कृधातोः लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लि प्रत्यये च्लेः सिचि अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि अ+कृ + स् + ई + त् इति जाते 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ नकारस्य षत्वे संयोगे अकार्षीत् इति सिद्धम् ।

उपस्कुरुते । ३७ । उपपूर्वात् कृधातोः लटि लकारस्य स्थाने त प्रत्यये 'टित आत्मनेपदानां टेरे' इत्यनेन एत्वे शपं प्रबाध्य 'तनादिकृञ्भ्यः उः' इत्यनेन उ प्रत्यये 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे रपरे 'अत उत्सार्वधातुके' इत्युत्वे 'उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च' इत्यनेन सुटि अनुबन्धलोपे कृते संयोगे उपस्कुरुते इति सिद्धम् ।

उपस्कृतं ब्रूते । २५ । उपपूर्वात् कृधातोः क्त प्रत्यये 'उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च' इति सूत्रेण सुटि अनुबन्धलोपे संयोगे उपस्कृतं ब्रूते इति सिद्धम् ।

अमत—अवबोधनार्थक मन् धातो लुङि तस्य त प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लि प्रत्यये 'च्लेः सिच्' इति सूत्रेण च्लेः स्थाने सिजादेशेऽनुबन्धलोपे अ + मन् + स + त इति जाते 'तनादिभ्यस्तथासोः' इति सूत्रेण पाक्षिके सिचो लुकि 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इत्यनेन नकारस्य लोपे संयोगे अमत इति रूपम् । सिचो लोपाभावपक्षे इटि सस्य षत्वे ष्टुत्वे च कृते अमनिष्ट इति सिद्धम् ।

इति तनादिप्रकरणम् ।

अथ क्र्यादिप्रकरणम्

क्रीणाति—द्रव्यविनिमयार्थक क्रीधातोः लटि, तिपि 'कर्त्तरि शप्' इत्यनेन शपि प्राप्ते तं प्रबाध्य 'क्र्यादिभ्यः श्ना' इत्यनेन श्ना प्रत्ययेऽनुबन्धलोपे नकारस्य णत्वे संयोगे क्रीणाति इति सिद्धम् ।

चिक्रयिथ – क्रीधातोः लिटि, सिपि, अनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन सिपो थलि कृते अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे अभ्यासकार्ये 'ह्रस्वः' इति ह्रस्वे 'कुहोश्चुः' इत्यनेन चुत्वेन ककारस्य चकारे 'ऋतो भारद्वाजस्य' इति सूत्रनियमात् वैकल्पिके इटि गुणे 'एचोऽयवायावः' इति सूत्रेण अयादेशे संयोगे चिक्रयिथ इति रूपम् । इडभावपक्षे चिक्रेथ इति सिद्धम् ।

प्रमीणीते ।३७। हिंसार्थक प्रपूर्वात् मीधातोः लटि लकारस्य स्थाने तप्रत्यये 'टित आत्मनेपदानां टेरे' इत्यनेन एत्वे 'कर्त्तरि शप्' इति शपि प्राप्ते तं बाधित्वा 'क्र्यादिभ्यः श्ना' इत्यनेन श्नाप्रत्ययेऽनुबन्धलोपे 'ई हल्यघोः' इत्यनेन ईत्वे 'हिनुमीना' इति सूत्रेण नस्य णत्वे संयोगे प्रमीणीते इति सिद्धम् ।

चुस्काव—आप्लवनार्थक स्कुञ् धातोः लिटि, तिपि, अनुबन्धलोपे 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तिपो णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वेऽभ्याससंज्ञायां 'शर्पूर्वाः खयः' इति सूत्रेण अभ्यासककारस्य शेषे 'कुहोश्चुः' इत्यनेन चुत्वे वृद्धौ आवादेशे संयोगे चुस्काव इति रूपम् । आत्मनेपदे तु—त प्रत्यये तकारस्य 'लिटस्तझयोरेशिरेच्' इत्यनेन एशादेशेऽनुबन्धलोपे द्वित्वादिकार्ये गुणे अवादेशे संयोगे चुस्कवे इति सिद्धम् ।

स्तभान ।६२। स्तम्भ्वादयः चत्वारः सौत्राः, सर्वे रोधनार्थाः परस्मैपदिनः धातवः । स्तम्भ् धातोः लोटि लकारस्य स्थाने सिपि 'सेर्ह्यपिच्च' इत्यनेन सिपः स्थाने हौ 'स्तन्भुस्तुन्भुस्कुस्कुञ्भ्यः श्नुश्च' इति सूत्रेण शपं प्रबाध्य श्नाप्रत्ययेऽनुबन्धलोपे 'हलः श्नः शानज्झौ' इति सूत्रेण श्नः शानजादेशेऽनुबन्धलोपे शित्त्वा-

त्सार्वधातुकत्वेऽपित्त्वेन ङित्त्वे ङित्त्वात् 'अनिदितां हल उपधायाः क्ङिति' इति सूत्रेण नकारस्य लोपे 'अतो हेः' इत्यनेन हेर्लुकि संयोगे स्तभान इति सिद्धम् । पक्षे श्नुप्रत्यये स्तभ्नुहि इति ।

व्यष्टभत् (ई० ४१,५१,५३)—विपूर्वकात् 'स्तम्भ' धातोर्लुङि तिपि अडागमे अनुबन्धलोपे तिप इकारलोपे च्लौ च्लेः सिचि प्राप्ते तम्प्रबाध्य'जृस्तन्भु-' इत्यादिना अङिअनुबन्धलोपे 'वि अ स्तन्भ् अ त्' इति जाते यणि 'अनिदिताम्–' इति नलोपे 'स्तन्भेः' इति सस्य षत्वे ष्टुत्वे 'व्यष्टभत्' इति । अङोऽभावे च्लेः सिचि इचि गते 'विं अस्तन्भ् स् त्' इति स्थिते यणि सस्य इटि 'अस्तिसिचोऽपृक्ते' इति तस्य ईटि अनुबन्धलोपे 'इट ईटि' इति सलोपे सवर्णदीर्घे 'स्तन्भेः इति सस्य षत्वे ष्टुत्वे नस्यानुस्वारे परसवर्णे 'व्यष्टम्भीत्' इति च भवति । मूले तु अङभावे 'अस्तम्भीत्' इत्युक्तम् । अत्र 'स्तन्भेः' इति षत्वन्तु न उपसर्गादिणः परस्यैव स्तन्भेः षः स्यादित्यर्थात् ।

अस्तम्भीत् ।३६। स्तम्भ् धातोः लुङि तिपि, अनुबन्धलोपे इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः इत्यनेन अडागमेऽनुबन्धलोपे च्लि प्रत्यये च्लेः स्थाने 'जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुञ्चुश्विभ्यश्च' इति सूत्रेण पाक्षिके च्लेरङः अभावे'च्लेः सिच्' इत्यनेन सिजादेशेऽनुबन्धलोपे अ=स्तम्भ्=स्=त् इति जाते 'आर्धधातुकस्येड् वलादेः' इत्यनेन इटि 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि च कृते 'इट ईटि' इत्यनेन सकारस्य लोपे 'अकः सवर्णे दीर्घः' इत्यनेन सवर्ण दीर्घे संयोगे अस्तम्भीत् इति सिद्धम् ।

प्वादीनां ह्रस्वः । चौबीस प्वादि धातुओं को शित् प्रत्यय परे रहते ह्रस्व होता है । वे चौबीस प्वादि धातु इस प्रकार से हैं–पूञ्-लूञ् स्तृञ्-कृञ्-वृञ् धूञ्-शृ-वृ-मृ-जृ-झृ-धृ-नृ-कृ-ॠ-गृ-ज्या-ब्ली-प्ली ।

तस्तरतुः । स्तृञ् आच्छादने इत्यस्मात् धातोः लिटि, तसि, तसः अतुसि च कृते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां 'उरत्' इत्यनेन अत्वे रपरे 'शर्पूर्वाः खयः' इति सूत्रेण अभ्यासतकारस्य शेषे 'ऋच्छत्यृताम्' इत्यनेन गुणे रपरे सस्य रुत्वे विसर्गे संयोगे तस्तरतुः इति सिद्धम् ।

स्तरिषीष्ट ।६५। स्तॄधातोः लिङितस्य स्थाने तप्रत्यये 'लिङःसीयुट्' इत्यनेन सीयुटि, अनुबन्धलोपे 'लोपो व्योर्वलि' इत्यनेन यकारस्य लोपे 'सुट् तिथोः' इति सुटि 'लिङ्सिचोरात्मनेपदेषु' इत्यनेन वैकल्पिके इडागमेऽनुबन्धलोपे सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणे रपरे 'वृतो वा' इत्यनेन दीर्घे प्राप्ते 'न लिङि' इत्यनेन निषेधे 'आदेशप्रत्यययोः' इति सकारस्य षत्वे ष्टुत्वे स्तरिषीष्ट इति रूपम् । इडागमाभावपक्षे–'उश्च' इत्यनेन कित्वाद् गुणाभावे इत्वे रपरे 'हलि च' इति दीर्घे स्तीर्षीष्ट इति सिद्धम् ।

अस्तरीष्ट । स्तॄधातोः लुङि, लकारस्य स्थाने तप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये च्लेः स्थाने सिजादेशेऽनुबन्धलोपे 'लिङ्सिचोरात्मनेपदेषु' इत्यनेन पाक्षिके इडागमेऽनुबन्धलोपे गुणे रपरे सस्य षत्वे 'वृतो वा' इत्यनेन पाक्षिके दीर्घे अस्तरीष्ट इति रूपम् । दीर्घाभावे अस्तरीष्ट इति रूपम् । इडभावे 'उश्च' इति कित्वात् गुणाभावे 'ॠत इद् धातोः' इत्यनेन इत्वे रपरे 'हलि च' इति दीर्घे षत्वे अस्तीर्ष्ट इति सिद्धम् ।

वूर्यात् ।४५। वरणार्थक वृञ् धातोः आशीर्लिङ् लकारे तस्य तिपि अनुबन्ध लोपे 'इतश्च' इत्यनेन इकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुटि अनुबन्धलोपे वृ + यास् + त् इति जाते 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारस्य लोपे 'उदोष्ठ्यपूर्वस्य' इति सूत्रेण उत्वे रपरे 'हलि च' इत्यनेन उकारस्य दीर्घे संयोगे वूर्यात् इति सिद्धम् ।

जग्राह । उपादानेऽर्थे ग्रह्धातोः लिटि तिपि, णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन धातोः द्वित्वे 'पूर्वोऽभ्यासः' इत्यनेन अभ्याससंज्ञायां 'लिट्यभ्यासस्योभयेषाम्' इति सूत्रेण अभ्यासस्य सम्प्रसारणे 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे 'उरत्' इत्यत्वे रपरे 'हलादिः शेषः' इति हलो लोपे' कुहोश्चुः' इति चुत्वे 'अत उपधायाः' इति उपधावृद्धौ संयोगे जग्राह इति सिद्धम् ।

जगृहे । ग्रह्धातोः लिटि आत्मनेपदे लकारस्य त प्रत्यये धातोः द्वित्वे अभ्याससंज्ञायां 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च'

इति सूत्रेण सम्प्रसारणे पूर्वरूपे 'उरत्' इत्यत्वे रपरे हलादिशेषे चुत्वे 'लिटस्तझयो-रेशिरेच्' इत्यनेन तकारस्य एशादेशे संयोगे जगृहे इति सिद्धम् ।

ग्रहीता ।५७। ग्रह्धातोः लुटि, तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इति सूत्रेण शपि प्राप्ते तं बाधित्वा 'स्यतासी ऌलुटोः' इति सूत्रेण तास् प्रत्यये 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपः डादेशेऽनुबन्धलोपे डित्वासामर्थ्यात् टिलोपे 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे 'ग्रहोऽलिटि दीर्घः' इति दीर्घे ग्रहीता इति सिद्धम् ।

गृहाण ।६०। ग्रह्धातोः 'लोट् च' इत्यनेन लोटि लस्य स्थाने सिपि सिपः 'सेर्ह्यपिच्च' इत्यनेन हौ शपं बाधित्वा 'क्र्यादिभ्यः श्नाः' इत्यनेन श्ना प्रत्यये-ऽनुबन्धलोपे 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' इत्यनेन सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'हलः श्नः शानज्झौ' इत्यनेन श्नः स्थाने शानजादेशेऽनुबन्धलोपे गृह्+आन+हि इति जाते नकारस्य, णत्वे 'अतो हेः' इत्यनेन हेर्लुकि संयोगे गृहाण इति सिद्धम् ।

अग्रहीत् ।४२। ग्रह्धातोः लुङि, तिपि, अनुबन्धलोपे इकारलोपे 'लुङ्लङ्-ऌङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये च्लेः स्थाने 'च्लेः सिच्' इत्यनेन सिजादेशेऽनुबन्धलोपे अ+ग्रह्+स्+त् इति जाते 'आर्धधातुकस्येड् व-लादेः' इति सूत्रेण इडागमे 'अस्तिसिचोऽपृक्ते' इत्यनेन च ईडागमेऽनुबन्धलोपे 'इट ईटि' इति सकारस्य लोपे 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धिः प्राप्ता 'नेटि' इत्यनेन निषेधे 'अतो हलादेर्लघोः' इत्यनेन वृद्धिः प्राप्ता 'ह्म्यन्त्क्षणश्व-सजागृणिश्व्येदिताम्' इत्यनेन निषेधे सवर्णदीर्घे अग्रहीत् इति सिद्धम् ।

अशान ।३५। भोजनार्थकात् अशधातोः लोटि लस्य स्थाने सिपि तस्य स्थाने 'सेर्ह्यपिच्च' इत्यनेन हौ शपं बाधित्वा 'क्र्यादिभ्यः श्ना' इत्यनेन श्ना प्रत्ययेऽनुबन्धलोपे 'हलःश्नः शानज्झौ' इति सूत्रेण श्नः स्थाने शानजादेशेऽनु-बन्धलोपे अश्+आन+हि इति जाते 'अतो हेः' इति हेर्लुकि संयोगे अशान इति सिद्धम् ।

शश्रतुः (ई० ४९) श्रृधातोर्लिटि तसि द्वित्वादिकार्ये 'शॄदॄप्रां ह्रस्वो

वा' इति ह्रस्वे यणि 'शश्रतुः' इति। ह्रस्वाभावे 'ऋच्छत्यॄताम्' इति गुणे रपरत्वे 'शशरतुः' इति।

अभान्त्सीत् (ई० ५१)—बन्धधातोर्लुङि तिपि अडागमे च्लौ सिचि 'वद्व्रज—' इति वृद्धौ 'एकाचः—' इति बस्य भष्भावे तिप इकारलोपे तस्य इटि धस्य चर्त्वे 'अभान्त्सीत्' इति।

मुषाण। ४०। मुष्स्तेये इत्यस्माद्धातोः लोटि, सिपि सिपः स्थाने 'सेर्ह्यपिच्च' इत्यनेन हौ शपं बाधित्वा श्नाप्रत्यये 'हलः श्नः शानज्झौ' इति श्नः शानजादेशेऽनुबन्धलोपे मुष्+आन+हि इति जाते 'अतो हेः' इति हेर्लुकि 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति नस्य णत्वे मुषाण इति सिद्धम्।

इति क्र्यादिप्रकरणम्।

अथ चुरादिप्रकरणम्।

चोरयति–चुर्स्तेये इत्यस्मात् धातोः 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्" इत्यनेन णिच् प्रत्ययेऽनुबन्धलोपे 'पुगन्तलघूपधस्य च' इत्यनेन गुणे 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वात् लटि तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इति शपि गुणेऽयादेशे कृते संयोगे चोरयति इति रूपम्। 'णिचश्च' इत्यात्मनेपदे तप्रत्यये टेरेत्वे शपि गुणेऽयादेशे कृते चोरयते इति सिद्धम्।

अचूचुरत्, अचूचुरत (ई० ४४, ४६, ४८)–'चुर स्तेये' इत्यस्माद्धातोः 'सत्यापपाशरूपवीण–' इत्यादिसूत्रेण चुरादित्वात् स्वार्थे णिचि णचयोरित्संज्ञायां लोपे च कृते 'चुर् इ' इति स्थिते णिच इकारस्य 'आर्धधातुकं शेषः' इत्यार्धधातुकत्वे 'पुगन्तलधूपधस्य च' इति उपधा गुणे 'चोरि' इति जाते 'सनाद्यन्ता धातवः इति धातुसंज्ञायां धातुत्वाल्लटि लः स्थाने परस्मैपदे तिपि 'लुङ्लङ्—'इत्यडागमे

अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे च्लौ 'णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्' इति च्लेश्चङि अनुबन्धलोपे णेरनिटि' इति णिलोपे 'अ चोर अ त्' इति जाते 'णौ चङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वे 'चङि' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्यासत्वे 'हलादिः शेषः' इत्यभ्यासरेफस्य लोपे 'अ चु चुर् त्' इति दशायां 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे 'दीर्घो लघोः' इति अभ्यासस्य दीर्घे 'अचूचुरत्' इति। आत्मनेपदे 'अचूचुरत' इत्यपि तथैव सिद्धं भवति।

अपीपिडत् (ई० ४५, ५० : ५२)—'पीड अवगाहे' इत्यस्माद्धातोः 'सत्यापपाश—' इति णिचि अनुबन्धलोपे 'सनाद्यन्ता धातवः' इति णिजन्तस्य धातुसंज्ञायां धातुत्वाल्लुङि तिपि अडागमे अनुबन्धलोपे तिप इकारलोपे च्लौ 'णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्' इति चङि 'चङि' इति द्वित्वे अभ्यासत्वे हलादिशेषे अभ्याससम्बन्धिनः इकारस्य ह्रस्वे 'अपिपीड् इत्' इति स्थिते 'भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्' इति उपधायाः ह्रस्वे कृते लघुपरकत्वात् 'सन्वल्लघुनि'—इति सन्वद्भावे'दीर्घो लघोः' इत्यनेन अभ्यासस्य दीर्घे 'णेरनिटि' इति णिलोपे 'अपीपिडत्' इति। ह्रस्वाभावपक्षे ह्रस्वपरकत्वाऽभावेन सन्वद्भावाभावात् दीर्घाप्राप्त्या 'अपिपीडत्' इति भवति।

अपप्रथत् (ई० ४०, ५१)—प्रथधातोः 'सत्यापपाश—' इति णिचि णिजन्तस्य धातुत्वाल्लुङि तिपि अडागमे तिप इकारलोपे च्लौ 'णिश्रि—'इति च्लेश्चङि 'चङि' इति द्वित्वे अभ्याससंज्ञायां हलादिशेषे 'सन्वल्लघुनि—' इति सन्वद्भावे 'सन्यतः' इति इत्वे प्राप्ते तम्प्रबाध्य 'अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्' इत्यभ्यासाकारस्य अत्वे 'णेरनिटि' इति 'णिलोपे अपप्रथत्' इति।

अपीपृथत—पृथ्धातोः स्वार्थे णिचि धातुत्वाल्लुङि तिपि अडागमे च्लौ 'णिश्रि—' इति च्लेश्चङि 'णेरनिटि' इति णिलोपे प्रत्यलक्षणेन णिचमाश्रित्य 'पुगन्ते' ति प्राप्तं गुणं बाधित्वा 'उऋत्' इत्यनेन ऋकारस्य ऋकारे 'चङि' इति द्वित्वे अभ्यासत्वे उरदत्वे हलादिशेषे सन्वत्त्वादित्वे 'दीर्घो लघोः' इति दीर्घे 'अपीपृथत्' इति। ऋत्वाभावपक्षे 'द्विर्वचनेऽचि' इति निषेधात् गुणात् प्राग् द्वित्वे उरदत्वे हलादिशेषे प्रत्ययलक्षणेन णित्त्वमाश्रित्य ऋकारस्य गुणे

रपरत्वे 'अपपर्थत्' इति । अत्र लघुपरकत्वाभावेन सन्वत्त्वविरहात् इत्वदीर्घौ न भवतः ।

कीर्तयति (ई० ५३)—कृत्धातोः स्वार्थे णिचि 'सनाद्यन्ताः—' इति धातुत्वाल्लटि तिपि शपि 'उपधायाश्च' इति धातोरुपधाया ऋतः इत्वे रपरत्वे 'उपधायां च' इति दीर्घे 'सार्वधातुकार्धधातुकयोः' इति गुणे अयादेशे 'कीर्त्तयति' इति ।

अचीकृतत्-अचिकीर्तत् (ई० ४५, ५१, ५३)—कृत्धातोः स्वार्थे णिचि धातुत्वाल्लुङि तिपि च्लौ च्लेश्चङि 'उपधायाश्च' इति प्राप्तमित्त्वमपवाद्य 'उर्ऋत्' ऋवर्णस्य ऋत्वे 'चङि' इति द्वित्वे अभ्यासत्वे उरदत्वे हलादिशेषे चुत्वे सन्वत्त्वादित्वे 'दीर्घो लघोः' इति दीर्घे 'लुङ्लङ्—इत्यडागमे तिप इकारलोपे 'णेरनिटि' इति णिलोपे 'अचीकृतत्' इति । 'उर्ऋत्' इति विकल्पपक्षे 'उपधायाश्च' इति इत्वे रपरत्वे 'अचीकृतत्' इति । दीर्घे 'कीर्त् इ अ ति' इति स्थिते द्वित्वे अभ्यासत्वे हलादिशेषे ह्रस्वे चुत्वे अटि णिलोपे तिप इकारलोपे 'अचिकीर्तत्' इति ।

अलुलोकत् (ई० ४४, ४९)—ऋकारेत्संज्ञक-भाषार्थक लोक् धातोः स्वार्थे णिचि धातुत्वाल्लुङि तिपि अडागमे च्लौ 'णिश्रि–' इति च्लेश्चङि द्वित्वे अभ्यासत्वे हलादिशेषे अभ्यासह्रस्वे 'णौ चङ्युपधाया ह्रस्वः' इति उपधाह्रस्वे प्राप्ते 'नाग्लोपिशास्वृदिताम्' इति निषेधे लघुपरकत्वाभावेन सन्वत्त्वविरहात् 'दीर्घो लघोः' इति दीर्घाप्राप्तौ 'णेरनिटि' इति णिलोपे तिप इकारलोपे 'अलुलोकत्' इति ।

धूनयति (ई० ५२)—धूञ् धातोः स्वार्थे णिचि धातुत्वाल्लटि तिपि शपि 'धूञ्प्रीञोर्नुक्' इति वार्तिकेन नुकि गुणे अयादेशे 'धूनयति' इति सिद्धम् ।

कथयति । ६५ । वाक्यप्रबन्धार्थक कथधातोः 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्' इति सूत्रेण णिच् प्रत्ययेऽनुबन्धलोपे णिचः आर्धधातुकत्वात् 'अतो लोपः' इत्यनेन अकारस्य लोपे 'सनाद्यन्ता धातवः' इति सूत्रेण धातुसंज्ञायां लटि, तिपि, शपि, अनुबन्धलोपे कथ्+ई+अ+ति

इति जाते 'अत उपधायाः' इत्यनेन उपधावृद्धिः प्राप्ता तां बाधित्वा 'अचः परस्मिन्पूर्वविधौ' इत्यनेन अकारलोपस्य स्थानिवद्भावात् तस्य निषेधे 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणेऽयादेशे च कृते कथयति इति सिद्धम् ।

अचकथत् । ४६ । कथधातोः णिचि अल्लोपे 'सनाद्यन्ता धातवः' इति धातुत्वात् लुङि लस्य स्थाने तिपि अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन च्लेश्चङि कृते अनुबन्धलोपे अ+कथ्+इ+अ+त् इति जाते 'णेरनिटि' इत्यनेन णिलोपे 'चङि' इत्यनेन द्वित्वेऽभ्यासकार्ये 'कुहोश्चुः' इत्यनेन ककारस्य चुत्वेन चकारे अग्लोपित्वात् दीर्घसन्वद्भावयोर्निषेधे संयोगे अचकथत् इति सिद्धम् ।

गणयति । ४९ । संख्यानार्थक गण धातोः णिचि णिचः आर्धधातुकत्वात् 'अतो लोपः' इत्यनेन अकारलोपे 'अत उपधायाः' इत्यनेन वृद्धिः प्राप्ता तां प्रबाध्य 'अचः परस्मिन्पूर्वविधौ' इत्यनेन अल्लोपस्य स्थानिवद्भावात् वृद्ध्यभावे ततः 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लटि, तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इति शपि अनुबन्धलोपे गुणेऽयादेशे च कृते गणयति इति सिद्धम् ।

अजीगणत् । ५७ । गणधातोः चुरादित्वात् णिचः आर्धधातुकत्वात् 'अतो लोपः' इत्यल्लोपे तस्य स्थानिवत्त्वात् वृद्ध्यभावे 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां 'लुङ्' इति सूत्रेण लुङि तिपि, अनुबन्धलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन च्लेश्चङि अनुबन्धलोपे 'णौ चङ्युपधायाः ह्रस्वः इत्यनेन ह्रस्वे 'णेरनिटि' इति णिलोपे 'चङि' इत्यनेन द्वित्वेऽभ्याससंज्ञायां 'हलादिः शेषः' इति सूत्रण णकारस्य लोपे अ+ग+गण+अ+त् इति जाते 'कुहोश्चुः' इति सूत्रेण गकारस्य जकारे अग्लोपित्वात् दीर्घसन्वद्भावयोः निषेधे, 'ईच गणः' इत्यनेन पाक्षिके अभ्यासस्य इत्वे कृते संयोगे अजीगणत् इति रूपम् । पक्षे ईत्वाभावे अजगणत् इति सिद्धम् ।

औननत् (ई० ४६, ४९)—'ऊन परिहाणे' इत्यस्मादजन्ताद्धातोः स्वार्थे

णिचि धातुत्वाल्लुङि तिपि अडागमे 'अचोञ्णिति' इति वृद्धौ च्लिप्रत्यये 'णिश्रि–' इति च्लेश्चङि 'चङि' इति अजादेर्द्वितीयस्य इति नशब्दस्य द्वित्वे अभ्यासत्वे 'अतो लोपः' इत्यलोपे अग्लोपित्वेन सन्वद्भावाभावाद् अभ्यासस्य इत्वदीर्घयोरभावे 'णेरनिटि' इति णिलोपे तिप इकारलोपे 'औननत्' इति ।

नचात्र द्वित्वात् प्रागेव परत्वाद् अल्लोपे ततो निशब्दस्य द्वित्वे कृतेऽभ्यासे अकारश्रवणं न स्यादिति वाच्यम् 'णिच्यच आदेशो न स्याद् द्वित्वे कर्तव्ये' इत्यर्थकेन द्विर्वचनेऽचि' इति सूत्रेण तन्निषेधात् ।

नचोक्तार्थे किं मानमिति वाच्यम्–'पिपावयिषति, बिभावयिषति' इत्यादौ उक्तार्थाऽनङ्गीकारे द्वित्वं प्रति णिचोऽनिमित्तत्वाद् 'द्वर्वचनेऽचि' इति निषेधस्याऽप्रवृत्तौ द्वित्वात् प्रागेव परत्वाद् वृद्धयवादेशयोः कृतयोः अभ्यासे आकारस्य ह्रस्वे 'सन्यतः' इत्यनेनैव इत्वे सिद्धे 'ओः पुयण्ज्यपरे' इति सूत्रे पवर्गयण्प्रत्याहारजकारग्रहणस्यैव मानत्वात् । नचोक्तनियमस्वीकारे कृत्धातोर्णिचि लुङि द्वित्वे कर्तव्ये णावच आदेशस्य निषिद्धतया 'उपधादीर्घे' 'अचिकीर्तत्' इत्यस्य स्थाने 'अचकीर्तत्' इत्यनिष्टरूपमापद्येतेति वाच्यम् । यत्र धातौ चङि द्विर्वचने कृते अभ्यासोत्तरखण्डस्य आद्योऽच् प्रक्रियायां परिनिष्ठिते वा अवर्णो लभ्यते तत्रैव द्वित्वे कार्ये णावच आदेशो नेत्ययं निषेधविज्ञानात् । नचात्र किं बीजमिति वाच्यम्, पुयण्जीत्यभ्यासोत्तरखण्डेऽवर्णपरा भवन्तीति ज्ञापकस्य सजातीयापेक्षत्वेन तथा स्वीकारे क्षत्यभावात् ।

इति चुरादिप्रकरणम्

अथ ण्यन्तप्रकरणम्

स्वतन्त्रः कर्त्ता—क्रिया की सिद्धि में स्वातन्त्र्येण = प्राधान्येन विवक्षित अर्थ की कर्तृ संज्ञा होती है ।

तत्प्रयोजको हेतुश्च—कर्त्ता के प्रयोजक—प्रेरक की हेतु संज्ञा और कर्तृ संज्ञा होती है।

हेतुमति च—प्रेषणादि (आज्ञा, प्रार्थना, अनुमति) रूप प्रयोजकव्यापार वाच्यत्वेन विवक्षित रहते धातु से णिच् प्रत्यय होता है।

ओः पुयण्ज्यपरे—सन् पर रहते जो अंग उसका अवयव जो अभ्यास उकार उसको इकार हो, अवर्ण पर हो जिससे ऐसे पवर्ग यण्जकार परे रहते।

अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ—ऋ गतिप्रापणयोः, ऋ गतौ, ह्री लज्जायाम् ब्लीवरणे, रीं गतिरेषणयोः, रीङ् श्रवणे, क्नूयी शब्दे उन्दे च, क्ष्मायी विधूनने इनको और आकारान्त धातु को पुक् हो णि पर रहते।

विशेष—जिस अर्थ में प्रत्यय होता है वह अर्थ उक्त होता है, उससे भिन्न अनुक्त है। जैसे—कर्ता अर्थ में यदि प्रत्यय हो तो कर्त्ता उक्त होता है उससे भिन्न कर्मादि अनुक्त है। उक्त कर्त्ता कर्मादि में प्रथमा विभक्ति होती है अनुक्त कर्त्ता में तृतीया विभक्ति होती है। अनुक्त कर्म में द्वितीया विभक्ति होती है। ण्यन्त में प्रयोज्य और प्रयोजक दो कर्त्ता होते हैं। प्रयोजक कर्त्ता में णिच् प्रत्यय होता है इससे वह उक्त होता है उसमें प्रथमा विभक्ति होती है। प्रयोज्य कर्त्ता अनुक्त हुआ उसमें सब जगह (सकर्मक धातु और अकर्मक धातु दोनों स्थलों में) तृतीया प्राप्त होती है। परन्तु 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ' इस सूत्र से गत्यर्थक, बुद्धयर्थक, भक्षणार्थक, शब्दकर्मक, अकर्मक धातु के प्रयोज्य कर्त्ता को णिच् प्रत्ययस्थल में कर्म संज्ञा होती है। जिस अर्थ में प्रत्यय हो उसके अधीन क्रिया होती है। अर्थात् यदि युष्मद्-अस्मद् शब्द से भिन्न प्रयोजक कर्त्ता हो तो प्रथम पुरुष होता है। युष्मद् प्रयोजक कर्त्ता हो तो मध्यम पुरुष होता है। अस्मद् प्रयोजक कर्त्ता हो तो उत्तम पुरुष होता है। इसमें भी एकवचन कर्त्ता हो तो एकवचन क्रिया, द्विवचन कर्त्ता हो तो द्विवचन क्रिया होती है। बहुवचन कर्त्ता हो तो क्रिया भी बहुवचनान्त होती है।

उदाहरण जैसे—देवदत्तः भवति यज्ञदत्तः प्रेरयति यह अर्थ है। यज्ञदत्तः

देवदत्तं भावयति यह प्रयोग होता है। देवदत्तो भवति यज्ञदत्तौ प्रेरयतः यहाँ यज्ञदत्तौ देवदत्तं भावयतः यह प्रयोग होता है। देवदत्तो भवति यज्ञदत्ताः प्रेरयन्ति इस अर्थ में यज्ञदत्ताः देवदत्तं भावयन्ति यह प्रयोग होता है। देवदत्तो भवति त्वं प्रेरयसि इति त्वं देवदत्तं भावयसि। देवदत्तो भवति युवां प्रेरयथः इति युवां देवदत्तं भावयथः। देवदत्तो भवति यूयं प्रेरयथ इति यूयं देवदत्तं भावयथ। देवदत्तो भवति अहं प्रेरयामि इति अहं देवदत्तं भावयामि। देवदत्तो भवति आवां प्रेरयावः इति आवां देवदत्तं भावयावः। देवदत्तो भवति वयम् प्रेरयामः इति वयम् देवदत्तं भावयामः।

इन स्थलों में प्रयोजक कर्त्ता के अधीन ही क्रियायें हुई। यदि प्रयोजक कर्त्ता का दूसरा प्रयोजक हो जाय तो प्रधान प्रयोजक के अधीन ही क्रिया होगी और प्रधान प्रयोजक के उक्त होने से उसमें प्रथमा विभक्ति होगी। अप्रधान प्रयोजक के अनुक्त होने से उसमें तृतीया विभक्ति होगी। उदाहरण देवदत्तो भवति यज्ञदत्तः प्रेरयति प्रेरयन्तं यज्ञदत्तं विष्णुमित्रः प्रेरयति इति विष्णुमित्रो यज्ञदत्तेन देवदत्तं भावयति' यहाँ प्रधान प्रयोजक के अधीन क्रिया हुई।

इसी प्रकार अन्य वचनों में भी समझना चाहिए। युष्मद् शब्द प्रधान प्रयोजक कर्त्ता रहने पर ही यहाँ मध्यम-पुरुष होगा और अस्मद् शब्द प्रधान प्रयोजक कर्त्ता रहने पर ही उत्तम पुरुष होगा यह पूरा ध्यान रखना चाहिए।

गत्यर्थक से भिन्न सकर्मक धातुस्थल में प्रयोजक कर्त्ता उक्त होने से उसमें प्रथमा, प्रयोज्य कर्त्ता के अनुक्त होने से उसमें तृतीया विभक्ति होगी। देवदत्तः तण्डुलं पचति, यज्ञदत्तः प्रेरयति यहाँ यज्ञदत्तो देवदत्तेन तण्डुलं पाचयति यह होगा। यहाँ पर भी प्रयोजक का दूसरा प्रयोजक रहने पर प्रधान प्रयोजक में प्रथमा अप्रधान प्रयोजक कर्त्ता और प्रयोजक कर्त्ता दोनों में तृतीया होगी। जैसे—देवदत्तः तण्डुलं पचति यज्ञदत्तः प्रेरयति प्रेरयन्तं यज्ञदत्तं विष्णुमित्रः प्रेरयति इति विष्णुमित्रो यज्ञदत्तेन देवदत्तेन तण्डुलं पाचयति यह प्रयोग होगा। इसी प्रकार से अन्य धातुओं के लकारों में भी विचार करना चाहिए।

भावयति । ६६ ।—भवन्तं प्रेरयति इति विग्रहे भूधातोः 'हेतुमति च' इत्यनेन णिचि, अनुबन्धलोपे 'अचोऽञ्णिति' इत्यनेन वृद्धौ आवादेशे 'सनाद्यन्ता धातवः' इत्यनेन धातुत्वात् लटि तिपि, अनुबन्धलोपे 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणेऽयादेशे भावयति इति सिद्धम् । आत्मनेपदे तु त प्रत्यये टेरेत्वे च कृते भावयते इति रूपम् भवति ।

ओः पुयण्ज्यपरे—'उ' इत्यस्य 'ओः' इति षष्ठी 'पुयण्जि' इति छेदः पुश्च यण् ज् चेति समाहारद्वन्द्वात् सप्तमी । अः परो यस्मादिति बहुव्रीहिः । 'सन्यतः' इत्यस्मात् सनीत्यनुवर्तते । अङ्गस्येत्यधिकृतम् । 'अत्र लोपः' इत्यस्मादभ्यासस्येति 'भृञामित्' इत्यस्मादिति चानुवर्तते । ततश्च 'सनि परे यदङ्गं तदवयवाभ्यासोकारस्येत्वं स्यात् पवर्गयणजकारेष्ववर्णपरेषु परतः' इत्यर्थो भवति । उदाहरणं तु 'अबीभवत्' इति । अत्र 'अ बु भव् अ त्' इति स्थिते 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इत्यनेन 'चङ्परे णौ यदङ्गं तदवयवो योऽभ्यासो लघुपरस्तस्य सनीवकार्यं स्याण्णावग्लोपे' असति, इत्यर्थपत्रे सन्वद्भावे विहिते 'पिपठिषति' इत्यत्र यथा 'सन्यतः' इत्यनेन सनि परे अङ्गावयवाऽभ्यासाऽकारस्य इत्वं भवति तथैवाऽत्रापि चङ्परे सत्यप्यनेन सन्परकबुद्धया अवर्णपरकपवर्गे (भकारे) परे अङ्गावयवाभ्यासोकारस्य इत्वं सिद्धम् ।

अबीभवत् । ५७ । भूधातोः 'हेतुमति च' इति सूत्रेण णिचि प्रत्ययेऽनुबन्धलोपे भू+इ इति स्थिते 'णिच्यच आदेशो न द्वित्वे कर्तव्ये' इति निषेधात्पूर्वं वृद्ध्यभावे ततः 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायाम् 'लुङ् च' इत्यनेन लुङि लकारेऽनुबन्धलोपे लस्य स्थाने तिपि अनुबन्धलोपे इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लि प्रत्यये 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन च्लेः स्थाने चङि 'णेरनिटि' इति सूत्रेण णिलोपे 'चङि' इत्यनेन द्वित्वेऽभ्यासकार्ये 'णौ चङ्युपधाया ह्रस्वः' इति उपधाह्रस्वे जश्त्वेन भकारस्य बकारे अ+बु+भू+अ+त् इति जाते प्रत्ययलक्षणत्वात् वृद्धौ 'एचोऽयावायावः' इत्यनेन आवादेशे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इत्यनेन सन्वद्भावे 'ओः पुण्यज्यपरे' इति सूत्रेण अभ्यासभूतस्य उकारस्य एत्वे 'दीर्घो लघोः' इत्यनेन दीर्घे

कृते अबीभवत् इति सिद्धम् ।

अचूचुरत् (ई० २५)—चुरधातोः स्वार्थे णिचि उपधागुणे 'चोरि' इति तस्मात् 'हेतुमति च' इति हेतुमण्णौ 'चोरि इ' इति स्थिते 'ण्यल्लोपाविङ्यण्-गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन' इति परत्वात् प्राप्तामपि वृद्धिं बाधित्वा णिलोपे ण्यन्तस्य 'सनाद्यन्ताः–' इति धातुत्वाल्लुङि तिपि अडागमे तिप इकारलोपे च्लौ 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति च्लेश्चङि 'णौ चङ्युपधाया ह्रस्वः' इति उपधाह्रस्वे 'णेरनिटि' इति णिलोपे 'चङि' इति 'चुर्' इत्यस्य द्वित्वे 'सन्वल्लघुनि-' इति सन्वद्भावविषयत्वाद् 'दीर्घो लघोः' इति दीर्घे 'अचूचुरत्' इति ।

नन्वत्र उपधाह्रस्वः अभ्यासदीर्घश्चेति द्वयमपि चङ्परे णौ विहितम्; तदुभयमप्यत्र प्रत्ययलक्षणमाश्रित्य प्रथमणिचमादाय न सम्भवति, तस्य द्वितीयणिचा व्यवहितत्वेन चङ्परकत्वाभावात् । नापि द्वितीयणिचमादाय तदुभयोः सम्भवः, द्वितीयणिच्प्रकृतेः प्रथमण्यन्तस्य णिलोपमादाय अग्लोपित्वादिति चेन्न, 'चङ्परे णौ' इत्यत्र णावित्यस्य चङ्परकणिच्त्वजात्याश्रयैकाऽनेकणिग्व्यक्तिपरकत्वेन विवक्षितत्वात् । तथा च णिद्वयस्य चङ्परकत्वाभावे णित्वस्य चङ्परकत्वमस्तीति ह्रस्वदीर्घयोरस्ति प्रवृत्तिरिति ।

अशूशवत् (ई० ४८)—श्विधातोः हेतुमण्णौ ण्यन्तस्य 'सनाद्यन्ताः—' इति धातुत्वाल्लुङि तिपि अडागमे तिपि इकारलोपे च्लौ 'णिचि—' इति च्लेश्चङि 'अश्वि इ अ त्' इति स्थिते 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति भाष्यात् वृद्धयायादेशौ प्रबाध्य 'णौ च संश्चङोः' इत्यनेन वस्य सम्प्रसारणे पूर्वरूपे 'शु' इत्यस्य 'चङि' इत्यनेन द्वित्वे उत्तरखण्डस्य णिचमाश्रित्य वृद्धयावादेशयोः उपधाह्रस्वे सन्वत्त्वविषयत्वाद् 'दीर्घो लघोः' इत्यभ्यासदीर्घे 'अशूशवत्' इति । सम्प्रसारणाऽभावे 'अशिश्वयत्' । अत्र अलघुत्वात् सन्वद्भावाभावेन दीर्घो न भवति ।

घातयति (ई० ४५)—हन्धातोः हेतुमण्णौ 'अदुपधायाः' इति वृद्धौ 'हनस्तोऽचिण्णलोः' इति हन्तेस्तकारान्तादेशे ण्यन्तस्य धातुत्वाल्लटि तिपि शपि 'हो हन्तेः' इति हस्य कुत्वे गुणेऽयादेशे 'घातयति' इति सिद्धम

स्थापयति (ई० ५३)—स्थाधातोः हेतुमण्णौ 'अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ' इति पुकि ण्यन्तस्य धातुत्वाल्लटि तिपि शपि गुणे अयादेशे 'स्थापयति' इति सिद्धम् ।

अतिष्ठिपत् । ५६ । गतिनिवृत्तौ ष्ठाइत्यस्माद्धातोः षस्य सत्वे षत्वस्यापायात् ष्टुत्वनिवृत्तौ तकारस्य थकारे स्था इति निष्पन्ने ततो 'हेतुमति च' इत्यनेन णिचि अनुबन्धलोपे 'अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ' इत्यनेन पुकि 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इति इकारस्य लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति सूत्रेण अडागमेऽनुबन्धलोपे च्लिप्रत्यये 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति सूत्रेण च्लेः स्थाने चङि अनुबन्धलोपे 'णिच्यच आदेशो न द्वित्वे कर्तव्ये' इति निषेधात् इत्वापेक्षया पूर्वं 'चङि' इति द्वित्वेऽभ्याससंज्ञायां 'शर्पूर्वाःखयः' इत्यनेन सकारस्य लोपे 'णौ चङ्युपधाया ह्रस्वः' इत्यनेन उपधाह्रस्वे चर्त्वे 'णेरनिटि' इति णिलोपे सन्वद्भावे 'सन्यतः' इति सूत्रेण इत्वे सकारस्य षत्वे ष्टुत्वे 'तिष्ठतेरित्' इत्यनेन इत्वे संयोगे अतिष्ठिपत इति सिद्धम् ।

अजिघ्रपत्—घ्राधातोः णिचि पुकि धातुत्वाल्लुङि तिपि च्लौ सिचि प्राप्ते 'चङि' अडागमे तिपः इकार लोपे द्वित्वेऽभ्यासत्वे हलादि लोपे जिघ्रतेवी इति विकल्पेनेत्वे णिलोपे अजिघ्रिपत् इत्वाभावे अजिघ्रपत् इति सिद्धम् ।

अत्र केचित्—ओण् अपनयने इत्यत्र ऋदित्करणाल्लिङ्गात् 'उपधाकार्यं द्वित्वात्प्रबलम्' इति कल्पनया पूर्व 'तिष्ठतेरित्' इति इत्वं ततो द्वित्वम् इति, तन्न समीचीनम् । उक्तकल्पनाया उपधाकार्यमात्रविषयकत्वात् । ओः पयोरिति वक्तव्ये पुयण्जीति पवर्गयण्प्रत्याहारग्रहणाल्लिङ्गात् 'णिच्यच आदेशो न द्वित्वे कर्तव्ये' कल्पनायास्तु यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽच प्रक्रियायां परिनिष्ठिते रूपे वा अवर्णो लभ्यते तन्मात्रविषयकत्वम् इति विशेषेणानेन सामान्यस्य तस्य बाधात इति दिक् ।

शाययति (ई० ५१)—'शो तनूकरणे' इत्यस्माद्धातोः 'आदेश उपदेशेऽशिति' इत्यात्वे हेतुमण्णौ 'शाच्छासाह्वाव्यावेपां युक्' इति युकि 'सनाद्यन्ताः–'

इति धातुत्वाल्लटि तिपि शपि गुणे अयादेशे 'शाययति' इति ।

अपीप्यत् (ई० ४२)—पाधातोः हेतुमण्णौ 'शाच्छासाह्वाव्यावेपां युक्' इति युकि 'पायि' इति, तस्मात् 'सनाद्यन्ताः–' इति धातुत्वाल्लुङि तिपि अडागमे तिप इकारलोपे च्लौ 'णिश्रि–' इति च्लेश्चङि द्वित्वेऽभ्यासत्वे हलादिशेषे 'लोपः पिबतेरीच्चाभ्यासस्य' इति उपधालोपे अभ्यासस्य ईत्वे च कृते णिलोपे 'अपीप्यत्' इति ।

पालयति (ई० ५३)—'रक्षणे पा' इत्यस्माद्धातोः हेतुमण्णौ 'पातेर्णौ लुग्वक्तव्यः' इति लुकि धातुत्वाल्लटि तिपि शपि गुणेऽयादेशे 'पालयति' इति ।

वाजयति (ई० ५०)—'ओ वै शोषणे' इति धातुः हेतुमण्णौ 'आदेच उपदेशे–' इत्यात्वे 'वो विधूनने जुक्' इति जुकि ण्यन्तस्य धातुत्वाल्लटि तिपि शप गुणेऽयादेशे 'वाजयति इति ।

रोपयति (ई० ४८)—रुह धातोः हेतुमण्णौ 'रुहः पोन्यतरस्याम्' इति धातोः हस्य पकारादेशे लघूपधगुणे 'सनाद्यन्ताः—' इति धातुत्वाल्लटि तिपि शपि गुणेऽयादेशे 'रोपयति' इति सिद्धम् ।

दूषयति (ई० ४१, ५२)—दुष्धातोः हेतुमण्णौ 'दोषो णौ' इति ऊत्वे 'सनाद्यन्ता—' इति धातुत्वाल्लटि तिपि शपि गुणेऽयादेशे 'दूषयति' इति ।

ज्ञपयति । ५० । ज्ञाने ज्ञापने च वर्तमानात् ज्ञप इत्यस्मात् धातोः 'हेतुमति च' इत्यनेन णिचि अनुबन्धलोपे 'अत उपधायाः' इत्यनेन उपधावृद्धौ 'मितां ह्रस्वः' इत्यनेन ह्रस्वे ज्ञपि इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायाम् लटि लस्य स्थाने तिप्प्रत्ययेऽनुबन्धलोपे 'कर्तरि शप्' इति शपि, गुणेऽयादेशे च कृते संयोगे ज्ञपयति इति सिद्धम् ।

अजिज्ञपत् । ५० । ज्ञप इत्यस्मात् 'हेतुमति च' इत्यनेन णिचि अनुबन्धलोपे 'सनाद्यन्ता धातवः' इति सूत्रेण धातुसंज्ञायाम् लुङि लस्य स्थाने तिपि अनुबन्धलोपे इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इत्यनेन च्लिप्रत्यये 'णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्' इत्यनेन च्लेश्चङि कृते उपाधावृद्धौ उपधाह्रस्वे च कृते 'चङि' इत्यनेन द्वित्वेऽभ्यासकार्ये अ+ज +

ज्ञप+इ+ अ त् इति जाते 'सन्वल्लघुनि चङ् परेऽनग्लोपे' इत्यनेन सन्वद्भावे 'सन्यत:' इत्यनेन इत्वे 'णेरनिटि' इत्यनेन णिलोपे संयोगे अजिज्ञपत् इति सिद्धम् ।

अररम्भत् (ई० ४४) रभधातोः हेतुमण्णौ 'रभेरशब्लिटोः इति नुमि ण्यन्तस्य धातुत्वाल्लुङि तिपि अडागमे च्लौ 'णिश्रि—' इति च्लेश्चङि द्वित्वे अभ्यासत्वे हलादिशेषे णिलोपे तिप इकारलोपे 'अररम्भत्' इति । अलघुत्वेन सन्वद्भावाऽभावादत्र दीर्घो न भवति ।

ऐर्ष्यिय त (ई० ५१) ईर्ष्य धातोः हेतुमण्णौ 'सनाद्यन्ता:—' इति धातुत्वाल्लुङि तिपि आटि वृद्धौ च्लौ च्लेश्चङि तिप इकारलोपे 'ऐर्ष्य इ अ त्' इति स्थिते 'ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्' इति वार्तिकेन तृतीयव्यञ्जनस्य द्वित्वपक्षे व्यञ्जनापेक्षया तृतीयव्यञ्जन यकारस्तत्सहितस्य 'यि' इत्येकाचो द्वित्वे णिलोपे 'ऐर्ष्यियत्' इति । तृतीयैकाचो द्वित्वपक्षे अत्र तृतीयैकाचोऽभावेन वार्तिकाप्रवृत्तौ 'अजादेर्द्वितीयस्य' इति 'ष्य' शब्दस्य द्वित्वे अभ्यासादिकार्ये च कृते 'ऐर्षिष्यत्' इति । एवं च 'ऐर्ष्यियत्' इति रूपसिद्ध्यर्थं वार्तिकम् । 'ऐर्षिष्यत्' इति तु 'अजादेर्द्वितीयस्य' इत्यनेनैव सिद्धमिति दिक् ।

इति ण्यन्तप्रकरणम् ।

अथ सन्नन्तप्रकरणम्

धातोः कर्मणः समानकर्तृकादिच्छायां वा—इष्धातु का जो कर्म उस कर्मका बोधक और इष्धातु के समानकर्तृक अर्थात् इष्धातु का जो कर्ता वही कर्ता हो जिसका ऐसे धातु से इच्छा अर्थ में सन् प्रत्यय विकल्प से होता है, सूत्रार्थ । उदाहरण जैसे—देवदत्तः पठितुमिच्छति पिपठिषति । यहाँ पर धातु का कर्ता देवदत्त है वही देवदत्त पठधातु का (पठितुम् का) भी कर्त्ता है

और इष् धातुका पठधातु पठितुम् यह कर्म भी है। अतः पठधातु से सन् प्रत्यय होता है।

पिपठिषति। ६३। पठितुमिच्छति इति विग्रहे पठ्धातोः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इत्यनेन सन्प्रत्ययेऽनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे 'सन्यङोः' इति सूत्रेण धातोः द्वित्वे अभ्यासकार्ये 'सन्यतः' इत्यनेन इत्वे 'आदेशप्रत्यययोः' इत्यनेन षत्वे पिपठिष् इति जाते ततो 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायाम् लटि लकारस्य स्थाने तिप्प्रत्ययेऽनुबन्धलोपे 'कर्तरि शप्' इति शपि अनुबन्धलोपे पररूपे च कृते पिपठिषति इति सिद्धम्।

जिघत्सति। ५८। अत्तुमिच्छति इति विग्रहे अद्भक्षणे इत्यस्मात् धातोः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इत्यनेन सन्प्रत्ययेऽनुबन्धलोपे 'लुङ्सनोर्घस्लृ' इत्यनेन अदः घस्लृ इत्यादेशेऽनुबन्धलोपे 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रेण इडागमस्य निषेधे 'सन्यङोः' इत्यनैन द्वित्वेऽभ्यासकार्ये 'सन्यतः' इतीत्वे 'सः स्यार्धधातुके' इत्यनेन सस्य तकारे 'कुहोश्चुः' इत्यनेन चुत्वेन पूर्वघकारस्य झकारे चर्त्वेन जकारे च कृते 'सनाद्यन्ता धातवः' इति सूत्रेण धातुसंज्ञायां लटि तिपि, शपि, अनुबन्धलोपे 'अतो गुणे' इति पररूपे संयोगे जिघत्सति इति सिद्धम्।

चिकीर्षति। ५७। कर्तुमिच्छति इति विग्रहे 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इत्यनेन सन् प्रत्ययेऽनुबन्धलोपे 'एकाच उपदेशेऽनुदात्तात् इति' सूत्रेण इण्निषेधे 'अज्झनगमां सनि' इत्यनेन दीर्घे 'इको झल' इति सनः कित्वात् गुणाभावे 'ऋत् इद्धातोः' इत्यनेन इत्वे रपरे किर्+स इति जाते 'सन्यङोः' इत्यनेन द्वित्वेऽभ्यासकार्ये 'कुहोश्चुः' इत्यनेन चुत्वेन ककारस्य चकारे 'हलि च' इत्यनेन दीर्घे 'आदेशप्रत्यययोः' इति सस्य षत्वे चिकीर्ष इति जाते 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वाल्लटि तिपि, 'कर्त्तरि शप्' इति शपि अनुबन्धलोपे 'अतो गुणे' पररूपे कृते चिकीर्षति इति सिद्धम्।

बुभूषति।५९। भूधातोः'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इत्यनेन

सन्प्रत्ययेऽनुबन्धलोपे 'आर्धधातुकस्येड् वलादेः' इत्यनेन इडागमे प्राप्ते तं बाधित्वा 'सनि ग्रहगुहोश्च' इत्यनेन इटो निषेधे 'सार्वधातुकार्धधातुकयोः इत्यनेन गुणे प्राप्ते 'इको झल्' इत्यनेन कित्वात् गुणाभावे 'सन्यङोः' इत्यनेन द्वित्वेऽभ्यासकार्ये 'ह्रस्वः' इत्यनेन अभ्यासस्य ह्रस्वे 'अभ्यासे चर्च' इति चर्त्वेन 'झलां जशः खयां चरः' इति पूर्वभकारस्य बकारे 'आदेशप्रत्यययोः' इति सस्य षकारे बुभूष इति जाते 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायाम् धातुत्वात् 'वर्तमाने लट्' लटि तस्य स्थाने तिप्प्रत्ययेऽनुबन्धलोपे 'कर्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'अतो गुणे' इति सूत्रेण पररूपे संयोगे बुभूषति इति सिद्धम् ।

जिघांसति (ई० ४६, ४९)—हन्तुमिच्छति इति विग्रहे हन्धातोः सनि 'अज्झनगमां सनि' इति दीर्घे 'सन्यङोः' इति द्वित्वे अभ्यासत्वे ह्रस्वे हलादिशेषे 'सन्यतः' इतीत्वे 'अभ्यासाच्च' इति कुत्वे 'नश्च' इत्यनुस्वारे 'जिघांस्' इति स्थिते 'सनाद्यन्ताः-इति धातुत्वाल्लटि तिपि शपि पररूपे 'जिघांसति' इति ।

जिघृक्षति (ई० ४६, ४९) ग्रहीतुमिच्छति इति विग्रहे 'ग्रह्' धातोः सनि 'सनि ग्रहगुहोश्च' इति इट्निषेधे 'रुदविदमुष—'इति सनः कित्वात् 'ग्रहिज्या' इति सम्प्रसारणे 'गृह् स' इत्यवस्थायां हकारादिणः परस्य सस्य षत्वे प्राप्ते तम्प्रबाध्य 'हो ढः' इति हस्य ढत्वे 'एकाचो बशो—' इति भष्भावे 'षढोः कः सि' इति ढस्य कत्वे कात्परस्य सस्य षत्वे 'सन्यङोः' इति द्वित्वे अभ्यासत्वे 'उरत्' इत्यत्वे रपरत्वे हलादिशेषे 'अभ्यासे चर्च' इति जत्वे 'सन्यतः' इतीत्वे 'सनाद्यन्ताः-' धातुत्वाल्लटि तिपि शपि पररूपे 'जिघृक्षति' इति ।

जुघुक्षति (ई० ५१)—गूहितुमिच्छतीति विग्रहे ऊकारेत्संज्ञकगूह् धातोः सनि 'हलन्ताच्च' इति सनः कित्वाद् गुणाऽभावे 'सनि ग्रहगुहोश्च' इति ऊदित्वात्प्राप्तेटो निषेधे 'गूह् स' इति स्थिते हकारादिणः परस्य सस्य षत्वे प्राप्ते ढत्वे'एकाच—इति गस्य भष्भावे 'सन्यङोः' इति द्वित्वे अभ्यासत्वे हलादिशेषे 'अभ्यासे चर्च' इति गस्य जत्वे 'षढोः कः सि' इति कत्वे षत्वे धातुत्वाल्लटि तिपि शपि पररूपे 'जुघुक्षति' इति ।

जिगलिषति (ई० ४५)–गिलितुमिच्छतीति विग्रहे सनि द्वित्वे अभ्यासत्वे उरदत्वे हलादिशेषे गस्य जश्त्वे 'सन्यतः' इतीत्वे 'किरश्च पञ्चभ्यः' इति इटि 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे 'अचि विभाषा' इति गिरतेः रेफस्य लत्वे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि पररूपे उक्तं रूपं सिद्धम् । लत्वाऽभावपक्षे 'जिगरिषति' इति । 'वृतो वा' इति इटो दीर्घस्तु न, 'अत्रेटो दीर्घो नेष्टः' इति तन्निषेधात् ।

दिद्यूषति-दिदेविषति (ई० ५०, ५२)—देवितुमिच्छतीति विग्रहे दिव्धातोः सनि 'सनीवन्तर्ध—' इति इटि अझलादित्वेन 'इको झल्' इत्यस्याप्रवृत्या कित्वाऽभावे लघूपधगुणे 'सन्यङोः' इति द्वित्वे अभ्यासत्वे हलादिशेषे ह्रस्वे च कृते 'सन्यतः' इति इत्वे सस्य षत्वे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि पररूपे 'दिदेविषति' इति । इडभावपक्षे 'च्छ्वोः च' इति वस्य ऊठि दकारादिकारस्य यणि 'द्यू स' इति स्थिते 'सन्यङोः इत्यनेन 'द्यू' इत्यस्य द्वित्वे अभ्यासत्वे हलादिशेषे 'अज्झनगमां सनि' इति पर्जन्यवल्लक्षणप्रवृत्या दीर्घे षत्वे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि पररूपे 'दिद्यूषति' इति सिद्धम् ।

ईप्सति (ई ४४,४९,५३)–आप्तुमिच्छतीति विग्रहे लृकारेत्संज्ञकात् आप्' धातोः सनि 'सन्यङो' इति द्वित्वात् पूर्वं 'आप्ज्ञप्यृधामीत्' इति ईत्वे ततो द्वित्वे अभ्यासत्वे 'अत्र लोपोऽभ्यासस्य' इति अभ्यासलोपे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि पररूपे 'ईप्सति' इति ।

अर्दिधिषति (ई.५०)—अर्धितुमिच्छतीति विग्रहे ऋध्धातोः सनि 'सनीवन्तर्ध–' इटि विभाषया इटि सनः सादित्वाभावात् ईत्वाभावे गुणे रपरत्वे 'अर् ध् इ स' इति स्थिते 'सन्यङोः' इति धिस् इत्यस्य द्वित्वे अभ्यासत्वे हलादिशेषे धस्य जश्त्वे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि षत्वे पररूपे अर्दिधिषति' इति ।

ईर्त्सति (ई.५०)—ऋधेः सनि 'सनीवन्तर्धे' ति इडभावपक्षे 'आप्ज्ञप्यृधामीत्' इति ऋकारस्य ईत्वे रपरत्वे धस्य चर्त्वे 'नन्द्राः संयोगादयः' इति रेफं वर्जयित्वा 'अजादेर्द्वितीयस्य' इति 'त्स' इत्यस्य 'सन्यङोः' इति द्वित्वे अभ्यासत्वे

'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि पररूपे 'ईर्त्सति' इति सिद्धम् ।

दिदम्भिषति (ई.४८)—दम्भितुमिच्छतीति विग्रहे सनि 'सनीवन्तर्ध-इति इटि, इट्पक्षे सनो झलादित्वाभावेन कित्वाऽभावात् नलोपाभावे 'सन्यङोः' इति 'दम्भ्' इत्यस्य द्वित्वे अभ्याससंज्ञायां हलादिशेषे 'सन्यतः' इत्यभ्यासस्य इत्वे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि पररूपे षत्वे 'दिदम्भिषति' इति । इडभावपक्षे मलोपे दभ इत्यस्य द्वित्वे अभ्यासकार्ये इत्वे 'धिप्सति' ईत्वपक्षे-धीप्सति, इति ।

धिप्सति (ई. ४८)—दम्भितुमिच्छतीति विग्रहे सनि 'सनीवन्तर्ध-इति इड-भावे 'दम्भ इच्च' इति इत्वपक्षे 'दिम्भ् स' इति स्थिते 'हलन्ताच्च' इत्यत्र हल्-ग्रहणस्य जातिपरत्वेन कित्वात् मलोपे एकाचो बशः—' इति दस्य धत्वे भस्य चर्त्वेन पत्वे 'धिप्स' इति सन्नन्तस्य द्वित्वे 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपे धातु-त्वाल्लटि तिपि पररूपे 'धिप्सति' इति । ईत्वपक्षे 'धीप्सति' इति ।

िततनिषति–तितांसति–तितंसति (ई.४५)—तनितुमिच्छतीति विग्रहे तनोतेः सनि 'तनिपतिदरिद्रातिभ्यः सनो वा इड् वाच्यः' इति वार्तिकेन इटि द्वित्वे अभ्यासत्वे हलादिशेषे 'सन्यतः' इति इत्वे षत्वे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि उक्तं रूपं सिद्धम् । इडभावे तु 'तनोतेर्विभाषा' इत्युपधायाः दीर्घे द्वित्वे अभ्यासत्वे हलादिशेषे अभ्यासाकारस्य ह्रस्वे 'सन्यतः' इति इत्वे नस्यानुस्वारे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि पररूपे 'तितांसति' इति । दीर्घाऽभावे 'तितंसति' इति ।

जुगुप्सते (ई. ४४)—गुपेर्निन्दायां 'गुप्तिज्किद्भ्यः सन्' इति स्वार्थे सनि द्वित्वे अभ्यासत्वे हलादिशेषे नस्य चुत्वे 'हलन्ताच्च' इति कित्वात् गुणाऽभावे पूर्व-वत्सनः' इति आत्मनेपदे तङि टेरेत्वे शपि पररूपे 'जुगुप्सते' इति ।

दीदांसति (ई. ४०)–दानेरार्जवेऽर्थे तस्मात् 'मान्बधदान्शान्भ्यो दीर्घश्चा-भ्यासस्य' इति स्वार्थे सनि द्वित्वादिकार्योत्तरमभ्यासस्येकारस्य दीर्घे च कृते नस्यानु-स्वारे सन्नन्तस्य धातुत्वाल्लटि तिपि शपि पररूपे 'दीदांसति' इति ।

॥ इति सन्नन्तप्रकरणम् ॥

अथ यङन्तप्रकरणम्

धातोरेकाचो हलादेः क्रियासमभिहारे यङ्—पौनःपुन्य बारम्बार और भृश अत्यन्त अर्थ द्योत्य होने पर एकाच् हलादि धातु से यङ् प्रत्यय होता है।

बोभूयते। ६२। पुनः पुनः अतिशयेन वा भवति इति विग्रहे भूधातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इति सूत्रेण यङ् प्रत्ययेऽनुबन्धलोपे 'सन्यङो' इत्यनेन धातोः द्वित्वेऽभ्यासत्वे 'गुणो यङ्लुकोः' इति सूत्रेण अभ्यासोकारस्य गुणे जश्त्वे बोभूय इति स्थिते तस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वाल्लटि ङित्वादात्मनेपदे ततो लटः स्थाने तप्रत्यये 'कर्त्तरि शप्' इत्यनेन शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे च कृते 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे संयोगे बोभूयते इति सिद्धम्।

अबोभूयिष्ट।४०। भू धातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इत्यनेन यङि अनुबन्धलोपे 'सन्यङोः' इत्यनेन द्वित्वे बोभूय इति जाते सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वाल्लुङ् लकारे लस्य स्थाने तप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'च्लि लुङि' इति च्लिप्रत्यये 'च्लेः सिच्' इति च्लेः स्थाने सिजादेशेऽनुबन्धलोपे अबोभूयः+स + इति जाते 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे 'अतो लोपः' इत्यनेन अकारस्य लोपे सकारस्य षत्वे ष्टुत्वे अबोभूयिष्ट इति सिद्धम्।

वाव्रज्यते। ६०। कुटिलं व्रजति इति विग्रहे व्रजधातोः 'नित्यं कौटिल्ये गतौ' इत्यनेन यङि अनुबन्धलोपे 'सन्यङोः' इत्यनेन द्वित्वेऽभ्यासकार्ये 'दीर्घोऽकितः' इति सूत्रेण अस्यासस्य दीर्घे वाव्रज्य इति जाते ततः 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वाल्लटि तस्य स्थाने ये प्रत्यये 'कर्त्तरि शप्' इति शपि अनुबन्धलोपे 'अतो गुणे' इत्यनेन पररूपे कृते 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेरेत्वे संयोगे वाव्रज्यते इति सिद्धम्।

वाव्रजाञ्चक्रे। ४०। व्रज्धातोः यङ् प्रत्ययेऽनुबन्धलोपे 'सन्यङोः' इति

द्वित्वेऽभ्यासकार्ये 'दीर्घोऽकितः' इत्यनेन दीर्घे वाव्रज्य इति जाते तस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां ततां लिटि 'कास्यनेकाच आम् वक्तव्यः' इत्यनेन आमि 'आमः' इत्यनेन लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति सूत्रेण लिट् परकृञोऽनुप्रयोगे वाव्रज्य + आम् + कृ + लिट् इति स्थिते लस्य त प्रत्यये 'आदेः परस्य' इति सूत्रसहकारेण 'यस्य हलः' इति सूत्रेण द्वित्वेऽभ्यासकार्ये 'कुहोश्चुः' इत्यनेन चुत्वेन ककारस्य चकारे 'लिटस्तझयोरेशिरेच्' इत्यनेन तकारस्य एशि शकारस्य लोपे यणि मकारस्यानुस्वारे परसवर्णे कृते वाव्रजाञ्चक्रे इति सिद्धम् ।

चेक्रीयते (ई० ४८)—पुनः पुनः करोतीति विग्रहे कृधातोर्यङि 'रीङ् ऋतः' इति रीङि 'सन्यङो' इति द्वित्वे अभ्यासत्वे हलादिशेषे ह्रस्वे चर्त्वे 'गुणो यङ्लुकोः' इति गुणे 'सनाद्यन्ता धातवः' इति धातुत्वाल्लटि यङो ङित्वादात्मनेपदे तङि टेरेत्वे शपि पररूपे 'चेक्रीयते' इति ।

वरीवृत्यते । ६६ । पुनः पुनरतिशयेन वा वर्तते इति विग्रहे वृतधातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इत्यनेन यङि अनुबन्धलोपे 'सन्यङोः' इति द्वित्वेऽभ्याससंज्ञायां 'उरत्' इति सूत्रेण अत्वे रपरे 'हलादि शेषः' इत्यनेन रेफतकारयोर्लोपे व + वृत् + य इति जाते 'रीगृदुपधस्य च' इति सूत्रेण अभ्यासस्य रीगागमेऽनुबन्धलोपे वरीवृत्य इति जाते तस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वाल्लटि तस्य स्थाने तप्रत्यये शपि पररूपे च कृते 'ङित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे संयोगे वरीवृत्यते इति सिद्धम् ।

वरीवृतांचक्रे । ४५ । वृतधातोः यङि, द्वित्वेभ्याससंज्ञायां 'उरत्' इत्यत्वे रपरे हलादिशेषे 'रीगृदुपधस्य च' इत्यनेन अभ्यासस्य रीगागमेऽनुबन्धलोपे वरीवृत्य इति निष्पन्नं तस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां ततो लिटि 'कास्यनेकाच आम् वक्तव्यः' इत्यनेन आमि 'आमः' इत्यनेन लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परकृञोऽनुप्रयोगे वरीवृत्य+आम्+कृ+लिट् इति जाते लकारस्य स्थाने त प्रत्यये 'यस्य हलः' इति यकारलोपे 'अतो लोपः' इति अल्लोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन कृइत्यस्य द्वित्वेऽभ्याससंज्ञायां अत्वे रपरे 'हलादि शेषः' इत्यनेन हलो लोपे चुत्वेन कस्य चकारे 'लिटस्तझयोरेशिरेच्'

इत्यनेन तकारस्य एकादेशेऽनुबन्धलोपे लस्यानुस्वारे परसवर्णे 'इको यणचि' इति यणि संयोगे वरीवृताञ्चक्रे इति सिद्धम् ।

नरीनृत्यते । ५९ । पुनः पुनरतिशयेन वा नृत्यति इति विग्रहे नृत् धातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इत्यनेन यङ् प्रत्ययेऽनुबन्धलोपे 'सन्यङोः' इति द्वित्वेऽभ्याससंज्ञायां 'उरत्' इत्यत्वे रपरे हलादिशेषे 'रीगृदुपधस्य च' इत्यनेन अभ्यासस्य रीगागमेऽनुबन्धलोपे नरीनृत्य इति जाते तस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वात् लटि तस्य स्थाने तप्रत्यये शपि पररूपे 'टित आत्मनेपदानां टेरे इति सूत्रेण टेरेत्वे नरीनृत्यते इति सिद्धम् ।

नचात्र 'अट्कुप्वाङ्नुम्व्यवायेपि' इत्यनेन णत्वं कुतो नेति वाच्यम् ? 'क्षुभ्नादिषु च' इति सूत्रेण णत्वस्य निषेधात् न भवति इति दिक् ।

जरीगृह्यते । ४१ । पुनः पुनरतिशयेन वा गृह्णाति इति विग्रहे ग्रहधातोः यङि अनुबन्धलोपे 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिभृज्जतीनां ङिति च' इत्यनेन सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे गृह+य इति स्थिते 'सन्यङोः' इत्यनेन 'द्वित्वेऽभ्याससंज्ञायां 'उरत्' इत्यत्वे रपरे हलादिशेषे 'रीगृदुपधस्य च' इत्यनेन अभ्यासस्य रीगागमेऽनुबन्धलोपे 'कुहोश्चुः' इत्यनेन गकारस्य चुत्वेन जकारे जरीगृह्य इत्यस्य धातुसंज्ञायां लटि तत्स्थाने त प्रत्यये शपि पूर्वरूपे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे संयोगे जरीगृह्यते इति सिद्धम् ।

वरीवृश्च्यते (ई० ४५)—पुनः पुनः वृश्चतीति विग्रहे व्रश्चधातोः यङि ङित्त्वाद् 'ग्रहिज्ये'ति सम्प्रसारणे पूर्वरूपे 'सन्यङोः' इति द्वित्वे उरदत्वे रपरत्वे हलादिशेषे 'रीगृत्वत इति वाच्यम्' इति अभ्यासस्य रीगागमे 'वरीवृश्च्य इति यङन्तस्य 'सनाद्यन्ताः–' इति धातुत्वाल्लटि यङो ङित्वादात्मने पदे तङि टेरेत्वे शपि पररूपे वरीवृश्च्यते' इति ।

चञ्चूर्यते (ई० ५०)—पुनः पुनः चरतीति विग्रहे चर्धातोः यङि 'सन्यङोः' इति द्वित्वे अभ्याससंज्ञायां हलादिशेषे 'चरफलोश्च' इति नुकि 'नुगित्यनेन अनुस्वार उपलक्ष्यते' 'स च पदान्तवद् वाच्यः' इत्युक्तत्वात् 'वा पदान्तस्य' इत्यनेन परसवर्णे 'उत्परस्यातः' इत्युत्वे 'हलि चे' ति दीर्घे यङन्तस्य

धातुत्वाल्लटि ङित्वात्तङि टेरेत्वे शपि पररूपे 'चञ्चूर्यते' इति । परसवर्णाऽभावे 'चंचूर्यते' इति ।

जञ्जप्यते (ई० ४१, ५२)—गर्हितं जपतीति विग्रहे जप्धातोर्यङि द्वित्वे अभ्यासत्वे हलादिशेषे 'जपजभदहशभञ्जपशां च' इति सूत्रेण अभ्यासस्य नुकि अनुस्वारे परसवर्णे यङन्तस्य धातुत्वाल्लटि ङित्वात् तङि टेरेत्वे शपि पररूपे उक्तं रूपं सिद्धम् ।

जेगिल्यते (ई० ४८)—गर्हितं गिलतीति विग्रहे गॄधातोर्यङि 'ॠत इद्धातोः' इति इत्वे रपरत्वे 'ग्रो यङि' इति रेफस्य लत्वे 'सन्यङोः' इति द्वित्वें अभ्यासत्वे हलादिशेषे चुत्वे 'गुणो यङ्लुकोः' इति गुणे यङन्तस्य धातुत्वाल्लटि ङित्वात्तङि टेरेत्वे शपि पररूपे उक्तं रूपं जातम् ।

जेघ्नीयते (ई० ४४)—पुनः पुनरतिशयेन वा हन्तीति विग्रहे हन्धातोर्यङि 'हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः' इति वार्तिकेन घ्नीभावे 'सन्यङोः' इति द्वित्वे अभ्यासत्वे हलादिशेषे ह्रस्वे चुत्वे 'गुणो यङ्लुकोः' इति अभ्यासस्य गुणे धातुत्वाल्लटि ङित्वात्तङि टेरेत्वे शपि पररूपे उक्तं रूपं सिद्धम् ।

शाशय्यते (ई० ४९)—शीङ्धातोर्यङि 'अयङ् यि क्ङिति' इति अयङि 'सन्यङोः' इति द्वित्वे अभ्यासत्वे हलादिशेषे 'दीर्घोऽकितः' इति दीर्घे यङन्तस्य धातुत्वाल्लटि ङित्वात्तङि टेरेत्वे शपि पररूपे उक्तं रूपं सिद्धम् ।

चेकीयते (ई० ४२)—धातोर्यङि 'चायः की' इति क्यादेशे द्वित्वे अभ्यासत्वे ह्रस्वे चुत्वे गुणे तङि टेरेत्वे पररूपे उक्तं सिद्धम् ।

देध्मीयते (ई० ४६)—ध्माधातोर्यङि 'ईघ्राध्मोः' इति ईत्वे द्वित्वे अभ्यासत्वे ह्रस्वे हलादिशेषे 'अभ्यासे चर्च' इति जश्त्वे 'गुणो यङ्लुकोः' इति अभ्यासस्य गुणे यङन्तस्य धातुत्वाल्लटि ङित्वात्तङि टेरेत्वे शपि पररूपे 'देध्मीयते' इति ।

वनीवच्यते (ई० ५१)—वञ्चुधातोर्यङि ङित्वात् अनुनासिकलोपे 'सन्यङोः' इति द्वित्वे अभ्यासत्वे हलादिशेषे 'नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्'

इत्यभ्यासस्य नीगागमे 'दीर्घोऽकितः' इत्यत्र 'अकित' इत्युक्तत्वात् दीर्घाप्राप्त्या यङ्न्तस्य धातुत्वात्तङि ङित्वात्तङि टेरेत्वे शपि पररूपे 'वनीवच्यते' इति सिद्धम् ।

॥ इति यङन्तप्रकरणम् ॥

अथ यङ्लुक्प्रकरणम्

बोभवीति । ५० । पुनः पुनरतिशयेन वा भवति इति विग्रहे भूधातोः धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इत्यनेन यङि 'यङोऽचि च' इत्यनेन द्वित्वापेक्षया आदौ यङो लुकि ततः प्रत्ययलक्षणेन यङन्तत्वमादाय 'सन्यङोः' इत्यनेन द्वित्वेऽभ्याससंज्ञायां 'हलादिः शेषः' इति हलो लोपे 'गुणो यङ् लुकोः' इत्यनेन गुणे जश्त्वेन भकारस्य बकारे बोभू इति जाते ततः 'सनाद्यन्ता धातवः' इति सूत्रेण धातुसंज्ञायां धातुत्वात् लटि, तिपि, अनुबन्धलोपे 'कर्त्तरि शप्' इत्यनेन शपि 'चर्करीतं च' इत्यनेन यङ्लुगन्तस्य अदादौ पाठात् शपो लुकि बो+भू+ति इति स्थिते 'यङो वा' इति सूत्रेण वैकल्पिके इडागमेऽनुबन्धलोपे 'बोभूतु तेतिक्ते' इति छन्दसि निपातनात् 'भूसुवोस्तिङि' इत्यनेन गुणनिषेधस्य यङ्लुकि भाषायामप्रवृत्त्या गुणेऽवादेशे च कृते बोभवीति इति रूपम् । इडागमाभावपक्षे 'सार्वधातुकार्धधातुकयोः' इति गुणे बोभोति इति सिद्धम् ।

बोभवाञ्चकार ।५१। भूधातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इति सूत्रेण यङ् प्रत्यये 'यङोऽचि च' इत्यनेन यङो लुकि प्रत्ययलक्षणेन यङन्तत्वमादाय 'सन्यङोः' इति द्वित्वेऽभ्यासकार्ये 'गुणो यङ्लुकोः' इत्यनेन अभ्यासस्य गुणे 'अभ्यासे चर्च' इत्यनेन चर्त्वेन भकारस्य वकारे वोभू इति स्थिते ततः 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां ततः 'परोक्षे लिट्' इति लिटि 'कास्यनेकाच आम् वक्तव्यः' इति 'वाकिन आमि' इत्यनेन लिटो लुकि

'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परकृञोऽनुप्रयोगे लकारस्य स्थाने तिपि 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन तिपो णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन कृइत्यस्य द्वित्वेऽभ्याससंज्ञायां 'उरत्' इत्यत्वे रपरे 'हलादिः शेषः' इति हलो लोपे 'कुहोश्चुः' इति चुत्वेन ककारस्य चकारे वृद्धौ आवादेशे मस्यानुस्वारे परसवर्णे च कृते संयोगे बोभवाञ्चकार इति सिद्धम् ।

अबोभवीत्—अबोभोत् ।४५।--भूधातोः यङि 'यङोऽचि' इत्यनेन यङो लुकि प्रत्ययलक्षणेन यङन्तत्वमादाय 'सन्यङो' इति द्वित्वेऽभ्यासकार्ये 'गुणो यङ्लुकोः, इत्यनेन गुणे 'अभ्यासे चर्च' इति चर्त्वे भकारस्य बकारे बोभू इति जाते 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वात् लङि लकारस्य स्थाने तिप्प्रत्ययेऽनुबन्धलोपे 'इतश्च' इति सूत्रेण इकारस्य लोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'यङो वा' इत्यनेन पाक्षिके इडागमेऽनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणेऽवादेशे संयोगे अबोभवीत् इति रूपम् । इडागमाभावपक्षे—गुणे अबोभोत् इति सिद्धम् ।

अबोभवुः ।४०। भूधातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इत्यनेन यङ् प्रत्यये 'यङोऽचि च' इत्यनेन यङो लुकि प्रत्ययलक्षणेन यङन्तत्वात् 'सन्यङोः' इत्यनेन गुणे 'अभ्यासे चर्च' इत्यनेन चर्त्वेन भकारस्य बकारे बोभू इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां ततो लङि लकारे लस्य स्थाने झिप्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे, 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणेऽवादेशे 'सिजभ्यस्तविदिभ्यश्च' इति सूत्रेण झेर्जुसादेशेऽनुबन्धलोपे सस्य रुत्वे विसर्गे अबोभवुः इति सिद्धम् ।

बोभूयात् ।३९। भूधातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इत्यनेन यङि 'यङोऽचि च' इत्यनेन यङो लुकि पुनः प्रत्ययलक्षणेन यङन्तत्वमादाय 'सन्यङो' इति द्वित्वे अभ्यासकार्ये 'ह्रस्वः' इति ह्रस्वे 'अभ्यासे चर्च' इत्यनेन भकारस्य जश्त्वेन बकारे 'गुणो यङ् लुकोः, इत्यनेन अभ्यासस्य गुणे बोभू इत्यस्य 'सनाद्यन्ता धातवः' इति सूत्रेण धातुसंज्ञायां ततो लिङि लकारस्य स्थाने तिपि अनुबन्धलोपे इकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुट अनु-

बन्धलोपे 'स्कोःसंयोगाद्योरन्ते च' इत्यनेन सकारस्य लोपे संयोगे बोभूयात् इति सिद्धम्।

बोभूयुः।३५। भूधातोः यङि 'यङोऽचि च' यङो लुकि पुनः प्रत्ययलक्षणेन यङन्तत्वमादाय 'सन्यङोः' इति द्वित्वेऽभ्यासकार्ये जश्त्वेन भकारस्य बकारे 'गुणो यङ्लुकोः' इति गुणे बोभू इति स्थिते तस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वात् लिङि लस्य स्थाने झि प्रत्यये 'झेर्जुस्' इत्यनेन झेर्जुसादेशेऽनुबन्धलोपे यासुटि उटावितौ सस्य लोपे सकारस्य रुत्वे विसर्गे कृते संयोगे बोभूयुः इति सिद्धम्।

अबोभूवीत्।४१। भूधातोः यङि 'यङोऽचि च' इति यङो लुकि पुनः प्रत्ययलक्षणेन यङन्तत्वमादाय 'सन्यङोः इति द्वित्वेऽभ्यासकार्ये 'गुणो यङ्लुकोः' इत्यनेन गुणे जश्त्वेन भस्य बकारे बोभू इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां 'लुङ् च' इति सूत्रेण लुङि, तिपि, अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे च्लिप्रत्यये च्लेः सिजादेशे गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुकि 'यङो वा' इत्यनेन वैकल्पिके इडागमेऽनुबन्धलोपे गुणं बाधित्वा 'भुवो वुग् लुङ्-लिटोः' इयत्नेन वुगागमेऽनुबन्धलोपे संयोगे अबोभूवीत् इति रूपम्। ईडागमाभावपक्षे – 'सार्वधातुकार्धधातुकायोः' इत्यनेन गुणे संयोगे अबोभोत् इति सिद्धम्।

अबोभविष्यत्। ३०। भूधातोः यङि कि च श्लु कृते पुनः प्रत्ययलक्षनेन यङन्तत्वमादाय 'सन्यङोः' इत्यनेन द्वित्वेऽभ्यासकार्ये 'गुणो यङ्लुकोः' इत्यनेन अभ्यासस्य गुणे जश्त्वेन भकारस्य बकारे बोभू इति स्थिते ततः 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वात् 'लिङ्निमित्ते लृङ्क्रियातिपत्तौ' इत्यनेन लृङ् लकारे लस्य स्थाने तिप्प्रत्ययेऽनुबन्धलोपे इकारलोपे लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्धलोपे 'स्यतासी लृलुटोः' इत्यनेन स्यप्रत्यये 'अर्धधातुकस्येड् वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे गुणेऽवादेशे सस्य षत्वे संयोगे अबोभविष्यत् इति सिद्धम्।

वर्वृतीति–वरिवृतीति–वरीवृतीति (ई० ४२,३३)—'वृतु वर्तने' इत्यस्माद्धातोर्यङि 'यङोऽचि' इति तस्य लुकि 'सन्यङोः' इति द्वित्वेऽभ्यासत्वे उरदत्वे हलादिशेषे 'रुग्रिकौ च लुकि' इति रुगागमे प्रत्ययलक्षणेन 'सनाद्यन्ता' इति धातुत्वाल्लटि तिपि शपि 'चर्करीतं च' इत्यदादौ पाठेन अदादित्वात् शपो लुकि 'यङो वा' इति ईटि 'वर्वृतीति' इति रुगागमपक्षेरूपम्। 'रिक' पक्षे 'वरिवृतीति' इति। 'रीक' पक्षे 'वरीवृतीति' इति। ईडागमाभावपक्षे 'पुगन्त–' इति गुणे रपरत्वे 'वर्वर्ति-वरिवर्ति-वरीवर्ति' इति।

अवर्वाः (ई० ४२, ४४, ४९)—वृधातोर्यङि यङो लुकि 'सन्यङो' इति द्वित्वे अभ्यासत्वे उरदत्वे रपरत्वे हलादिशेषे धातुत्वाल्लङि सिपि अडागमे 'चर्करितं चे' त्यदादौ पाठात् शपो लुकि गुणे रपरत्वे 'अवर्वर्त् स' इति स्थिते जश्त्वे 'दश्च' इति दकारस्य रुत्वे 'रो रि' इति पूर्वरेफस्य लोपे 'ढ्रलोपे पूर्वस्य' इति दीर्घे हल्ङ्यादिना सिपो लोपे रेफस्य विसर्गे 'अवर्वाः' इति। रिक्पक्षे 'अवरिवाः' एवं रीक पक्षे 'अवरीवाः' इति।

अचाकरुः (ई० ५१)—'कॄ विक्षेपे' इत्यस्माद्धातोर्यङि यङो लुकि द्वित्वे अभ्यासत्वे उरदत्वे हलादिशेषे चुत्वे 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घे धातुत्वाल्लङि झौ झेर्जुसि अडागमे गुणे रपरत्वे 'चर्करीतं च' इत्यदादौ पाठात् शपो लुकि सस्य रुत्वे विसर्गे 'अचाकरुः' इति। अत्र 'ऋतश्चे'ति रुगाद्यागमस्तु न तपरनिर्देशात्।

अचाकारीत् (ई० ४१)—कृधातोर्यङि यङो लुकि द्वित्वे अभ्यासत्वे उरदत्वे हलादिशेषे 'अभ्यासे चर्चे' इति चुत्वे 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घे धातुत्वाल्लुङि तिपि अडागमे तिप इकारलोपे च्लौ च्लेः सिचि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ रपरत्वे सस्य इटि 'अस्ति सिचः–' इति ईटि 'इट ईटि' इति सलोपे सवर्णदीर्घे 'अचाकारीत्' इति सिद्धम्।

इति यङ्लुगन्तप्रकरणम्

अथ नामधातुप्रकरणम्

सुप आत्मनः क्यच्—इष् धातु का कर्म भूत और एषिता अर्थात् इच्छा करने वाले का सम्बन्धी जो अर्थ तद्वाचकत्वेन विवक्षित सुबन्त से इच्छा अर्थ में विकल्प से क्यच् प्रत्यय होता है। उदाहरण जैसे—देवदत्तः आत्मनः पुत्रमिच्छति पुत्रीयति। यहाँ पर पुत्र इष् धातु का कर्म है और इच्छा करने वाले देवदत्त का सम्बन्धी भी है तद्वाचकत्वेन विवक्षित पुत्र अम् इस सुबन्त से क्यच् प्रत्यय होता है।

पुत्रीयति। ६६। पुत्रमिच्छति इति विग्रहे पुत्र + अम् इति सुबन्तात् 'सुप आत्मनः क्यच्' इत्यनेन क्यच् प्रत्ययेऽनुबन्धलोपे 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इत्यनेन अमो लुकि पुत्र + य इति स्थिते 'क्यचि च' इति सूत्रेण अकारस्य इत्वे पुत्रीय इति जाते धातुत्वात् लटि, तिपि अनुबन्धलोपे 'कर्त्तरि शप्' इति शपि 'अतो गुणे' इत्यनेन पररूपे संयोगे पुत्रीयति इति सिद्धम्।

राजीयति। ४०। आत्मानं राजानमिच्छति इति विग्रहे 'सुप आत्मनः क्यच्' इति क्यच्प्रत्ययेऽनुबन्धलोपे राजन् + अम् + य इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इत्यनेन अमो लुकि राजन्+य इति जाते 'नः क्ये' इत्यनेन राजन् इत्यस्य पदत्वाद् 'नलोपः प्रातिपदिकान्तस्य' इत्यनेन नकारस्य लोपे 'क्यचि च' इति सूत्रेण अकारस्य इत्वे ततः राजीय इत्यस्य एकदेशविकृतन्यायेन धातुत्वात् लटि, तिपि, शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे च कृते राजीयति इति सिद्धम्।

वाच्यति। ५१। आत्मनो वाचमिच्छति इति विग्रहे वाच्शब्दाद् 'सुप आत्मनः क्यच्' इत्यनेन क्यच्प्रत्ययेऽनुबन्धलोपे 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां धातुत्वात् 'सुपो धातुप्रातिपदिकयोः' इति सूत्रेण सुपो लुकि 'नः

क्ये' इत्यनेन नान्तस्यैव पदत्वात् 'चोः कुः' इत्यनेन कुत्वाभावे ततः एकदेशविकृत-न्यायेन धातुत्वात् लटि, तिपि, अनुबन्धलोपे शपि, पररूपे च कृते संयोगे वाच्यति इति सिद्धम् ।

समिधिता ।५६। समिधमिच्छति इति विग्रहे समिध् शब्दात् 'सुप आत्मनः क्यच्' इत्यनेन क्यच् प्रत्ययेऽनुबन्धलोपे धातुसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुकि 'नः क्ये' इति सूत्रेण पदत्वाभावेन जश्त्वाभावे समिध्य इत्यस्य एकदेशविकृतन्यायेन धातुत्वात् लुटि लस्य स्थाने तिपि अनुबन्धलोपे 'कर्त्तरि शप्' इति शपि प्राप्ते तं बाधित्वा 'स्यतासी लृलुटोः' इत्यनेन तासि, 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डादेशेऽनुबन्धलोपे डित्वात् टिलोपे 'आर्ध-धातुकस्येड् वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे 'आदेः परस्य' इति सूत्रसहकारेण 'क्यस्य विभाषा' इत्यनेन वैकल्पिके यकारस्य लोपे 'अतोलोपः' इत्यनेन अकारलोपे अल्लोपस्य स्थानिवत्त्वात् 'पुगन्तलघूपधस्य च' इत्यनेन गुणाभावे समिधिता इति रूपम् । यलोपाभावपक्षे समिध्यिता इति सिद्धम् ।

पुत्रीयति च्छात्रम् ।५८। पुत्रमिवाचरति इति विग्रहे पुत्रशब्दात् 'उपमाना-दाचारे' इति सूत्रेण क्यचि अनुबन्धलोपे धातुत्वात् 'सुपो धातुप्रातिपदिकयोः' इति सूत्रेण सुपो लुकि पुत्र+य इति स्थिते 'क्यचि च' इत्यनेन ईत्वे पुत्रीय इति जाते एकदेशविकृतन्यायेन धातुत्वात् लटि लकारस्य स्थाने तिप्प्रत्ययेनुबन्धलोपे शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे च कृते संयोगे पुत्रीयति च्छात्रम् इति सिद्धम् ।

कृष्णति —कृष्ण इवाचरति इति विग्रहे कृष्णशब्दात् 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति वार्तिकेन क्विपि तस्य सर्वापहारलोपे कृष्ण इत्यस्य धातु-संज्ञायां धातुत्वाल्लटि, तिपि, शपि, अनुबन्धलोपे 'अतो गुणे' इति सूत्रेण पररूपे संयोगे कृष्णति इति सिद्धम् ।

सस्वौ—। ५० । स्व इवाचरति इति विग्रहे स्वशब्दात् सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति वार्तिकेन क्विप्प्रत्यये तस्य सर्वापहारलोपे स्व इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लिटि तस्य स्थाने तिपि 'परस्मैपदानां

णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण तिपो णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्यासकार्ये स+स्व+अ इति जाते 'अचोञ्णिति' इति वृद्धौ 'आत औ णलः' इत्यनेन णलः अकारस्य औत्वे 'वृद्धिरेचि' इति वृद्धौ संयोगे सस्वौ इति सिद्धम् ।

इदामति ।५९। इदमिवाचरति इति विग्रहे इदम्शब्दात् 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति वार्तिकेन क्विपि तस्य लोपे धातुसंज्ञायां लटि, तिपि, शपि, अनुबन्धलोपे 'अनुनासिकस्य क्विझलोः क्ङिति' इत्यनेन दीर्घे संयोगे इदामति इति सिद्धम् ।

पथीनति । ४० । पन्था इवाचरति इति विग्रहे पथिन्शब्दात् 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' इति वार्तिकेन क्विपि तस्य सर्वापहारलोपे 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि, तिपि शपि, अनुबन्धलोपे पररूपे 'अनुनासिकस्य क्विझलोः क्ङिति' इत्यनेन दीर्घे पथीनति इति सिद्धम् ।

कष्टायते । ५१ । कष्टाय क्रमते इति विग्रहे चतुर्थ्यन्तकष्टशब्दात् 'कष्टाय क्रमणे' इति सूत्रेण क्यङ्प्रत्ययेऽनुबन्धलोपे धातुसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि ङित्त्वादात्मनेपदे धातुत्वात् लटि, लस्य स्थाने तप्रत्यये शपि 'अतो गुणे' इति पररूपे 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे 'अकृत्सार्वधातुकयोर्दीर्घः' इति सूत्रेण दीर्घे संयोगे कष्टायते इति सिद्धम् ।

शब्दायते—शब्दं करोति इति विग्रहे अमन्तशब्दशब्दात् 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इति सूत्रेण क्यङ्प्रत्ययेऽनुबन्धलोपे 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि शब्द+य इति जाते ङित्त्वात् आत्मनेपदे लटि तप्रत्यये शपि, पररूपे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे शब्दायते इति सिद्धम् ।

घटयति ।५०। घटं करोति आचष्टे वा इति विग्रहे घटशब्दात् 'प्रातिपदिकात् धात्वर्थे बहुलमिष्ठवच्च' इति वार्तिकेन णिचि इष्ठवद्भावाट्टिलोपे च तस्य स्थानिवद्भावात् उपधावृद्ध्यभावे धातुसंज्ञायां लटि लस्य स्थाने तिपि, शपि,

अनुबन्धलोपे पररूपे गुणेऽयादेशे संयोगे घटयति इति सिद्धम्।

राजानति (ई० ४९, ५३)—राजा-इव-आचरतीति विग्रहे 'सर्वप्रातिपदिकेभ्यः—' इति क्विपि सर्वापहारे धातुत्वाल्लटस्तिपि शपि 'अनुनासिकस्य–' इति दीर्घे तत्सिद्धिः।

ओजायते (ई० ५०)—ओजस्वीव आचरतीति विग्रहे ओजश्शब्दात् क्यङि सुब्लुकि 'सनाद्यन्ताः—' इति धातुत्वाल्लटि ङित्वात् तङि टेरेत्वे 'ओजसोऽप्सरसो नित्यमितरेषां विभाषया' इति वार्तिकेन सकारस्य नित्ये लोपे 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे शपि पररूपे 'ओजायते' इति।

विद्वायते (ई० ४२)—विद्वानिव आचरतीति विग्रहे क्यङि सुब्लुकि धातुत्वाल्लटि ङित्वात्तङि टेरेत्वे 'ओजसोऽप्सरसो—' इति वार्तिकेन विभाषया सलोपे अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे शपि पररूपे 'विद्वायते' इति। पक्षे 'विद्वस्यते' इति।

लोहितायते (ई० ४४)—अलोहितो लोहितो भवतीति विग्रहे 'लोहितादिडाज्भ्यः क्यष्' इति क्यषि सुब्लुकि 'वा क्यषः' इति परस्मैपदाभावपक्षे तङि टेरेत्वे, अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे शपि पररूपे 'लोहियायते' इति।

रोमन्थायते (ई० ४५, ४६)—रोमन्थं वर्तयतीति विग्रहे 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति सूत्रेण कर्मीभूतात् रोमन्थशब्दात् क्यङि सुब्लुकि'सनाद्यन्ताः—' इति धातुत्वाल्लटि ङित्वादात्मनेपदे तङि टेरेत्वे 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे शपि पररूपे 'रोमन्थायते' इति।

बाष्पायते (ई० ५२)—बाष्पमुद्वमति विग्रहे 'बाष्पोष्मभ्यामुद्वमने' इति क्यङि सुब्लोपे धातुत्वाल्लटि टेरेत्वे 'अकृत्सार्व–' इति दीर्घे शपि पररूपे उक्तं रूपं सिद्धम्।

सुदिनायते (ई० ४४)—सुदिनं करोतीत्यर्थे 'सुदिनदुर्दिननीहारेभ्यश्च' इति क्यङि सुब्लुकि लटि तङि 'अकृत्सार्व—' इति दीर्घे शपि पररूपे टेरेत्वे 'सुदिनायते' इति।

नीहारायते (ई०)—नीहारं करोति इत्यर्थे 'सुदिनदुर्दिननीहारेभ्यश्च इति क्यङि सुब्लुकि लटि तङि टेरेत्वे दीर्घे शपि पररूपे उक्तं रूपं सिद्धम्।

अपीपटत् (ई० ५८)—पटुमाचष्टे इति विग्रहे 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' इति कर्मीभूतात् पटुशब्दात् णिचि सुब्लुकि इष्ठवद्भावेन पूर्वं टिलोपे प्राप्ते तम्प्रबाध्य परत्वात् वृद्धौ सत्यां टिलोपे 'सनाद्यन्ताः–' इति धातुत्वाल्लुङि तिपि अडागमे तिप इकारलोपे च्लौ 'णिश्रि–' इति च्लेश्चङि द्वित्वे अभ्यासत्वे हलादिशेषे 'सन्वल्लघुनि–' इति सन्वद्भावे 'सन्यतः' इति इत्वे 'दीर्घो लघोः' इति दीर्घे 'णेरनिटि' इति णिलोपे 'अपीपटत्' इति।

भाष्ये तु 'णौ चङि–' इत्यत्र 'वृद्धेर्लोपो बलीयान्' इत्युक्तम्, तथा च वृद्धेः प्राक् टेः (उकारस्य) लोपे अग्लोपित्वात् सन्वद्भावाभावेन इत्वाप्राप्तया अपपटत् इति।

उत्पुच्छयते (ई० ५१, ५३)—कर्मीभूतात् उत्पूर्वकात्पुच्छशब्दात् 'पुच्छ भाण्डचीवराण्णिङ्' इति सूत्रस्थेन 'पुच्छादुदसने व्यसने पर्यसने स' इति वार्तिकेन णिङि सुब्लुकि इष्ठवद्भावेन टिलोपे धातुत्वाल्लटि ङित्त्वात्तङि टेरेत्वे शपि गुणे अयादेशे पररूपे उत्पुच्छयते इति।

मुण्डयति (ई० ४४)—मुण्डं करोतीति विग्रहे कर्मीभूतात् मुण्डशब्दात् 'मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्' इति णिचि सुब्लुकि इष्ठवद्भावेन टिलोपे धातुत्वाल्लटि तिपि शपि गुणेऽयादेशे 'मुण्डयति' इति।

हलयति (ई० ४९)—'महद्धलं हलिः' हलिं गृह्णातीति विग्रहे 'हल्यादिभ्यो ग्रहणे' इति वार्तिकेन कर्मीभूतात् हलिशब्दात् णिचि 'हलिकल्योरदन्तत्वं च निपात्यते' इति वार्तिकेन निपातनात् इकारस्य अकारे इष्ठवत्त्वेन टेर्लोपे धातुत्वाल्लटि तिपि शपि गुणे अयादेशे पररूपे 'हलयति' इति। निपातनफलं तु 'अजहलत्' इत्यादौ 'अग्लोपित्वात् सन्वद्भावदीर्घौ नेति बोध्यम्।

कलयति (ई० ५०)—कलिं गृह्णाति-कलयति। इत्यत्र णिचि अत्वे-

इष्ठवद्भावेन टेर्लोपे धातुत्वाल्लटि तिपि शपि गुणे अयादेशे पररूपे इति पूर्ववत् सिद्धम् ।

वितूस्तयति (ई० ४०) — तूस्तानि विहन्ति-वितूस्तयति । तूस्तं केशा इत्येके । जटीभूताः केशा इत्यन्ये । पापमित्यपरे । विपूर्वकात् कर्मीभूतात् तूस्तेति प्रातिपदिकात् 'मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्' इति णिचि इष्ठवत्त्वाट्टिलोपे धातुत्वाल्लटि तिपि शपि गुणे अयादेशे पररूपे वितूस्तयति इति ।

इति नामधातुप्रकरणम् ।

अथ कण्ड्वादिप्रकरणम्

कण्डूयति—कण्डूञ् गात्रविघर्षणे इत्यस्मात् धातोः 'कण्ड्वादिभ्यो यक्' इत्यनेन यकि अनुबन्धलोपे 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि, तिपि, शपि, अनुबन्धलोपे संयोगे कण्डूयति इति रूपम् । आत्मनेपदे तु कण्डूयते इति सिद्धम् ।

इति कण्ड्वादिप्रकरणम् ।

अथ आत्मनेपदप्रकरणम्

कर्त्तरि कर्मव्यतिहारे—क्रियाविनिमय अर्थात् अन्य से करने योग्य क्रिया का अन्य से करना द्योत्य रहते कर्त्ता अर्थ में धातु से आत्मनेपदसंज्ञक प्रत्यय होते हैं ।

व्यतिलुनीते —वि अतिपूर्वात् लूञ्धातोः ञित्वादात्मनेपदे परस्मैपदे च प्राप्ते तं प्रबाध्य 'कर्त्तरि कर्मव्यतिहारे' इति सूत्रेण आत्मनेपदे लटि तस्य स्थाने तप्रत्यये शपं प्रबाध्य 'क्र्याऽऽदिभ्यः श्ना' इति सूत्रेण श्नाप्रत्ययेऽनुबन्धलोपे 'प्वादीनां ह्रस्वः' इति ह्रस्वे 'ई हल्यघोः' इत्यनेन इत्वे टेरेत्वे च कृते संयोगे व्यतिलुनीते इति सिद्धम् ।

व्यतिघ्नन्ति । ४० । वि अतिपूर्वकहन्धातोः क्रियाविनिमयेऽर्थे 'कर्त्तरि कर्मव्यतिहारे' इत्यनेन आत्मनेपदत्वे प्राप्ते 'न गतिहिंसार्थेभ्यः' इति सूत्रेण तस्य निषेधे ततो लटि लकारस्य स्थाने झिप्रत्यये 'झोऽन्तः' इति झस्य अन्तादेशे हकारस्य जश्त्वे चर्त्वे घत्वे अल्लोपे च कृते यणि व्यतिघ्नन्ति इति सिद्धम् ।

निविशते । ६५ । निपूर्वकात् विशधातोः 'नेर्विशः' इत्यनेन आत्मनेपदे लटि तस्य स्थाने तप्रत्यये 'कर्तरि शप्' इति शपि अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेरेत्वे निविशते इति सिद्धम् ।

विजयते । ५८ । विपूर्वकात् जिधातोः 'विपराभ्यां जेः' इत्यनेन आत्मनेपदे लटि लकारस्य स्थाने तप्रत्यये शपि अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इति सूत्रेण गुणेऽयादेशे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे संयोगे विजयते इति सिद्धम् ।

पराजयते (ई० ५३)—'विपराभ्यां जेः' इत्यनेनात्र आत्मनेपदे सिद्धम् ।

सन्तिष्ठते । ५५ । सम्पूर्वात् स्थाधातोः 'समवप्रविभ्यः स्थः' इत्यनेन आत्मनेपदे लटि लस्य स्थाने तप्रत्यये शपि अनुबन्धलोपे स्था इत्यस्य स्थाने 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' इत्यनेन तिष्ठादेशे कृते टेरेत्वे पररूपे मकारस्य अनुस्वारे परसवर्णे च कृते संयोगे सन्तिष्ठते इति सिद्धम् ।

अवतिष्ठते—अवपूर्वात् स्थाधातोः लटि 'समवप्रविभ्यः स्थः' इत्यनेन आत्मनेपदे लस्य स्थाने तप्रत्यये शपि अनुबन्धलोपे 'पाघ्राध्मा' इत्यादि स्था

इत्यस्य स्थाने तिष्ठादेशे 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे 'अतो गुणे' इति पररूपे संयोगे अवतिष्ठते इति सिद्धम् ।

प्रतिष्ठते । ५० ।—प्रपूर्वकात् स्थाधातोः 'समवप्रविभ्यः स्थः' इत्यनेन आत्मनेपदे लटि तस्य स्थाने तप्रत्यये स्था इत्यस्य स्थाने तिष्ठादेशे शपि, पररूपे, टेरेत्वे संयोगे प्रतिष्ठते इति सिद्धम् ।

सर्पिषो जानीते । ५७ । ज्ञाधातोः अकर्मत्वात् 'अकर्मकाच्च' इति सूत्रेण आत्मनेपदे लटि तस्य स्थाने त प्रत्यये टेरेत्वे शपि प्राप्ते तं प्रबाध्य 'क्र्यादिभ्यः श्ना' इति सूत्रेण श्नाप्रत्ययेऽनुबन्धलोपे ज्ञाधातोः जादेशे 'ई हल्यघोः' इत्यनेन ईत्वे कृते संयोगे सर्पिषो जानीते इति सिद्धम् ।

अकर्मकाच्च—अकर्मक धातु से आत्मनेपद होता है ।

'धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात्' ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ।

धातु का दूसरा अर्थ होने से, कर्म का धातु के अर्थ में सङ्गृहीत होने से, कर्म की प्रसिद्धि में, कर्म की अविवक्षा में, इन चार कारणों से सकर्मक भी धातु अकर्मक हो जाता हैं ।

अध्ययनाय क्रमते (ई० ४४)—क्रमधातोः 'वृत्तिसर्गतायनेषु क्रमः' इत्यनेनात्र आत्मनेपदे सिद्धम् ।

प्रक्रमते (ई० ४४)—क्रमधातोः 'प्रोपाभ्यां समर्थाभ्याम्' इत्यनेनात्र आत्मनेपदे सिद्धम् ।

शतमपजानीते (ई० ५२)—ज्ञाधातोः 'अपह्नवे ज्ञः' इत्यनेनात्र आत्मनेपदे सिद्धयति ।

संशय्य कर्णादिषु तिष्ठते यः (ई० ४४)—स्थाधातोः अत्र 'प्रकाशन-स्थेयाख्ययोश्च' इत्यनेन आत्मनेपदे भवति ।

मुक्तावुत्तिष्ठते (ई० ५१)—उत्पूर्वात् स्था धातोः 'उदोनूर्ध्वकर्मणि' इत्यनेनात्र आत्मनेपदे सिद्धम् ।

उत्तपते (ई० ४४)—उत्पूर्वात् तप धातोः 'उद्विभ्यां तपः' इत्यनेनात्र

आत्मनेपदव्यवस्था बोध्या ।

आयच्छते (ई० ५०)—आङ् पूर्वात् यमधातोः 'आङो यमहनः' इति सूत्रेणात्र आत्मनेपदं भवति ।

अवधिष्ठ-आहत—आङ्पूर्वाद्धन्धातोः 'आङो यमहनः' इत्यात्मनेपदे लुङि तङि टेरेत्वे च्लौ सिचि इटि 'आत्मनेपदे त्वन्यतरस्याम्' इति पाक्षिके हनो वधादेशे 'उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोगे प्रत्यये चिकीर्षिते पृथक् क्रियते' इति नियमेन 'आङः' पृथक्करणात् वधशब्दात् प्रागटि सवर्णदीर्घे षत्वे ष्टुत्वे 'अवधिष्ट' इति । वधादेशाभावपक्षे तङि च्लौ सिचि 'हनः सिच्' इति सिचः कित्त्वात् 'अनुदात्तोपदे–' इति नलोपे 'ह्रस्वादङ्गात्' इति सिचो लोपे अटि दीर्घे 'आहत' इति ।

उदायत (ई० ४२)—उद् आङ् पूर्वाद् यमधातोर्लुङि 'आङो यमहनः' इत्यात्मनेपदे तङि च्लौ सिचि 'यमो गन्धने' इति सिचः कित्त्वात् 'अनुदात्तोपदेश–' इति नलोपे 'उपसर्गसमानाकारम्–' इति उदः पृथक्करणात् यमः प्रागटि सवर्णदीर्घे 'ह्रस्वादङ्गात्' इति सिचो लोपे उदायत इति ।

सङ्गच्छते (ई० ४९, ५२)—सम्पूर्वकात् गम्धातोर्लटि 'समो गम्यृच्छिभ्याम्' इत्यात्मनेपदे तङि टेरेत्वे शपि 'इषुगमियमां छः' इति छादेशे तुकि श्चुत्वे जश्त्वे चर्त्वे अनुस्वारे परसवर्णे 'सङ्गच्छते' इति ।

सङ्गसीष्ट-सङ्गंसीष्ट (ई० ४६)—सम्पूर्वाद् गम्धातोर्लिङि 'समो गम्यृच्छिभ्याम्' इत्यात्मनेपदे तङि सीयुटि 'सुट् तिथोः' इति सुटि 'वा गमः' इति लिङः कित्त्वेन 'अनुदात्तोपदेशे–' इति गमो मस्य लोपे षत्वे ष्टुत्वे अनुस्वारे परसवर्णे 'सङ्गसीष्ट' इति । कित्त्वाऽभावपक्षे मस्यानुस्वारे 'सङ्गंसीष्ट' इति ।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥

अत्र (१) धातोरर्थान्तरे वृत्तेः, (२) धात्वर्थेनोपसंग्रहात्, (३) प्रसिद्धेः, (४) अविवक्षातः, इति वाक्यचतुष्टयम् । अकर्मिका क्रियेति सर्वत्र सम्बध्यते ।

प्रत्येकमुदाहरणं यथा—१. 'नदी वहति' इति। अत्र प्रापणार्थकस्य सकर्मकस्य वहेः स्यन्दनरूपेऽर्थान्तरे वर्तमानत्वाद् अकर्मकत्वम्। २. 'जीवति' इति। अत्र प्राणरूपकर्मणो धात्वर्थेन = प्राणधारणरूपेण, उपसंग्रहात् = अन्तर्भावात्, जीवतेरकर्मकता। ३. 'मेघो वर्षति' इति। अत्र वर्षणकर्मणो जलस्य प्रसिद्धत्वात् वर्षेतेरकर्मकत्वम्। ४. 'हितान्न यः संश्रृणुते स किंप्रभु' (ई० ४५) इति। (हितात् = हितपुरुषात् यः' न संश्रृणुते = स्वहितं न संश्रृणुते स किंप्रभु = कुत्सितो राजेत्यर्थः) अत्र स्वहितस्य वस्तुतः कर्मत्वेऽपि तदविवक्षयाकर्मकत्वम्।

कृष्णश्चाणूरमाह्वते (ई० ४१)—'आङ्पूर्वात् ह्वेञ् धातोः स्पर्द्धायामाङः' इत्यनेनात्र आत्मनेपदं सिद्धम्।

भार्यामुपयच्छते (ई० ५३)—'उपपूर्वात् यमधातोः उपाद्यमः स्वीकरणे' इत्यनेनात्र आत्मनेपदं सिद्धम्।

उपायत (ई० ४२, ४६)—उप-आङ्-पूर्वकात् यम्धातोर्लुङि 'उपाद्यमः स्वीकरणे' इत्यात्मनेपदे तङि 'उपसर्गसमानाकारम्–' इति आङः पृथक्करणात् यमः प्रागटि सवर्णदीर्घे च्लौ सिचि 'विभाषोपयमे' इति सिचः कित्त्वात् 'अनुदात्तोपदेश' इति मलोपे 'ह्रस्वादङ्गात्' इति सिज्लोपे 'उप आयत' इति स्थिते सवर्णदीर्घे 'उपायत' इति।

धर्ममुच्चरते। ५६। उत्पूर्वात् चरधातोः 'उदश्चरः सकर्मकात्' इति सूत्रेण आत्मनेपदे लटि तस्य स्थाने त प्रत्यये 'कर्त्तरि शप्' इत्यनेन शपि 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेरेत्वे संयोगे धर्ममुच्चरते इति सिद्धम्।

रथेन सञ्चरते। ५९। सम्पूर्वात् चरधातोः 'समस्तृतीयायुक्तात्' इति सूत्रेण आत्मनेपदे लटि तस्य तप्रत्यये शपि पररूपे टेरेत्वे मस्यानुस्वारे परसवर्णे रथेन सञ्चरते इति सिद्धम्।

दास्या संयच्छते कामी। ५०। 'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया' इति वार्तिकेन दास्यां इत्यत्र चतुर्थ्यर्थे तृतीया ततश्च दास्या इति तृतीयान्तयुक्तात् सम्पूर्वात् दाणधातोः लटि'दाणश्च सा चेच्चतुर्थ्यर्थे इत्यनेन आत्मने-

पदे लस्य त प्रत्यये 'पाघ्राध्मास्थाम्नादाण्' इत्यादिना दाण् इत्यस्य स्थाने यच्छादेशे शपि.पररूपे मस्यानुस्वारे दास्या संयच्छते कामी इति सिद्धम् ।

एदिधिषते । ४० । एध् धातोः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इत्यनेन सन्प्रत्ययेऽनुबन्धलोपे धातुत्वात् लटि 'पूर्ववत्सनः' इत्यनेन आत्मनेपदे लस्य स्थाने त प्रत्यये 'आर्धधातुकस्येड् वलादेः' इति इटि 'सन्यङोः' इत्यनेन द्वित्वेऽभ्यासकार्ये धस्य जश्त्वेन दकारे सस्य षत्वे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे संयोगे एदिधिषते इति सिद्धम् ।

पूर्ववत्सनः—सन् से पूर्व जो धातु उसके तुल्य सन्नन्त से भी आत्मनेपद होता है। अर्थात् जिस धातु से सन् प्रत्यय किया हो उस धातु से यदि आत्मनेपद होता हो तो उस धातु से सन्नन्त भी आत्मनेपद हो ।

निविविक्षते । ५५ । निपूर्वात् विशधातोः सनि 'हलन्ताच्च' इत्यनेन सनः कित्त्वाद् गुणाभावे 'सन्यङोः' इत्यनेन द्वित्वेऽभ्यासकार्ये 'व्रश्चभ्रस्जसृजेत्या' दिना शस्य षत्वे षस्य कत्वे सनः सस्य षत्वे क-ष संयोगे क्षत्वे 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लटि 'पूर्ववत्सनः' इति सूत्रेण आत्मनेपदे लस्य स्थाने त प्रत्यये शपि, पररूपे, टेरेत्वे संयोगे निविविक्षते इति सिद्धम् ।

गन्धनावक्षेपणेत्यादि—अत्र गन्धनम् = सूचनम् (चुगली करना) अवक्षेपणम् = भर्त्सनम् (भयभीत होना) । सेवनम् = सेवते (सेवा करना) । साहसिक्यम् = सहसा प्रवर्तनम् (बलात्कार करना) । प्रतियत्नः = गुणाधानम् (गुण ग्रहण करना) । प्रकथनम् = कथयति (अच्छी तरह कहना) । उपयोगः = धर्मार्थंविनियुङ्क्ते (धर्मार्थ दान देना) । एतेष्वर्थेषु कृधातोरात्मनेपदं भवति । यथा—

उत्कुरुते—सूचयति इत्यर्थः । श्येनो वर्तिकामुत्कुरुते भर्त्सयतीत्यर्थः । हरिमुपकुरुते = सेवते इत्यर्थः । परदारान् प्रकुरुते = तेषु सहसा प्रवर्तत इत्यर्थः । एधोदकस्योपस्कुरुते = गुणमाधत्ते इत्यर्थः । कथाः प्रकुरुते = प्रकथयति इत्यर्थः । शतं प्रकुरुते = धर्मार्थं विनियुङ्क्ते इत्यर्थः ॥

हरिमुपकुरुते । ४० । हरिम् + उपकुरुते इत्यत्र 'गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः' इत्यनेन आत्मनेपदे लटि, त प्रत्यये टेरेत्वे च कृते हरिमुपकुरुते इति सिद्धम् ।

एधोदकस्योपस्कुरुते – अत्र 'गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः' इति सूत्रेण प्रतियत्नेऽर्थे आत्मनेपदं भवतीति विशेषः । प्रतियत्नः गुणाधानम् । 'अबोदैधोद्मप्रश्रथहिमश्रथाः' इति सूत्रे निपातितः एधशब्दोऽदन्तः । एधश्च उदकं चेति एधोदकं तस्य = एधोदकस्य, उपस्कुरुते = गुणमाधत्ते इत्यर्थः ।

इति आत्मनेपदप्रकरणम् ।

अथ परस्मैपदप्रकरणम्

अनुकरोति । ४८ । अत्र 'अनुपराभ्यां कृञः' इत्यनेन परस्मैपदे ततो लटि लस्य स्थाने तिपि, शपि, प्राप्ते तं प्रबाध्य 'तनादिभ्य उः' इति उ प्रत्यये गुणे रपरे संयोगे अनुकरोति इति सिद्धम् ।

अभिक्षिपति । ६५ । अभिपूर्वकात् क्षिप्धातोः 'अभिप्रत्यतिभ्यः क्षिपः इत्यनेन परस्मैपदे लटि तस्य स्थाने तिपि, शपि, अनुबन्धलोपे संयोगे अभिक्षिपति इति सिद्धम् ।

प्रवहति । ५८ । प्रपूर्वकात् वहधातोः 'प्राद्वहः' इत्यनेन परस्मैपदे कृते ततो लटि लकारस्य स्थाने तिपि, शपि, अनुबन्धलोपे संयोगे प्रवहति इति सिद्धम् ।

उपरमति (ई० ४५)—'उपपूर्वात् रमधातोः उपाच्च' इत्यनेन परस्मैपदे सिद्धं भवति ।

बोधयति (ई० ४१, ४४)—'बुधधातोः बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' इत्यनेनात्र परस्मैपदे सिद्धं भवति ।

अध्यापयति (ई० ५०)—अधिपूर्वादिङः णौ 'क्रीङ्जीनां णौ' इत्यात्वे यणि पुकि 'अध्यापि' इति जाते 'बुधयुध'—इति परस्मैपदे लटि तिपि शपि गुणे अयादेशे पररूपे 'अध्यापयति' इति ।

हरिमुपकुरुते । ४० । हरिम् + उपकुरुते इत्यत्र 'गन्धनाऽवक्षेपणसेवनसाह-सिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः' इत्यनेन आत्मनेपदे लटि, त प्रत्यये टेरेत्वे च कृते हरिमुपकुरुते इति सिद्धम् ।

एधोदकस्योपस्कुरुते – अत्र 'गन्धनाऽवक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथ-नोपयोगेषु कृञः' इति सूत्रेण प्रतियत्नेऽर्थे आत्मनेपदं भवतीति विशेषः । प्रतियत्नः गुणाधानम् । 'अबोदैधोद्मप्रश्रथहिमश्रथाः' इति सूत्रे निपातितः एधशब्दोऽदन्तः । एधश्च उदकं चेति एधोदकं तस्य = एधोदकस्य, उपस्कुरुते = गुणमाधत्ते इत्यर्थः ।

इति आत्मनेपदप्रकरणम् ।

अथ परस्मैपदप्रकरणम्

अनुकरोति । ४८ । अत्र 'अनुपराभ्यां कृञः' इत्यनेन परस्मैपदे ततो लटि लस्य स्थाने तिपि, शपि, प्राप्ते तं प्रबाध्य 'तनादिभ्य उः' इति उ प्रत्यये गुणे रपरे संयोगे अनुकरोति इति सिद्धम् ।

अभिक्षिपति । ६५ । अभिपूर्वकात् क्षिप्धातोः 'अभिप्रत्यतिभ्यः क्षिपः इत्यनेन परस्मैपदे लटि तस्य स्थाने तिपि, शपि, अनुबन्धलोपे संयोगे अभिक्षि-पति इति सिद्धम् ।

प्रवहति । ५८ । प्रपूर्वकात् वहधातोः 'प्राद्वहः' इत्यनेन परस्मैपदे कृते ततो लटि लकारस्य स्थाने तिपि, शपि, अनुबन्धलोपे संयोगे प्रवहति इति सिद्धम् ।

उपरमति (ई० ४५)—'उपपूर्वात् रमधातोः उपाच्च' इत्यनेन परस्मैपदे सिद्धं भवति ।

बोधयति (ई० ४१, ४४)—'बुधधातोः बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' इत्यनेनात्र परस्मैपदे सिद्धं भवति ।

अध्यापयति (ई० ५०)—अधिपूर्वादिङः णौ 'क्रीङ्जीनां णौ' इत्यात्वे यणि पुकि 'अध्यापि' इति जाते 'बुधयुध'—इति परस्मैपदे लटि तिपि शपि गुणे अयादेशे पररूपे 'अध्यापयति' इति ।

अध्यजीगपत् (ई० ४६)—अधिपूर्वादिङः णौ 'बुधयुधनशजनेङ्प्रुद्रुस्रु-भ्यो णेः' इति परस्मैपदे लुङि तिपि अडागमे तिप इकारलोपे यणि 'णौ च संश्चङोः' इति विभाषया इङो गाङादेशे पुकि 'अध्य गापि त्' इति जाते च्लौ 'णिश्रि'—इति च्लेश्चङि 'णौ चङ्युपधाया ह्रस्वः ह्रस्वे 'सन्यङोः' इति द्वित्वे अभ्यासत्वे हलादिशेषे 'अभ्यासे चर्च'इति जश्त्वे 'सन्यतः' इति इत्वे 'दीर्घोऽकितः' इति दीर्घे 'णेरनिटि' इति णिलोपे 'अध्यजीगपत्' इति।

अध्यापिपत् (ई० ४६)—'णौ च संश्चङोः' इति विकल्पपक्षे अधिपूर्वादिङः णौ 'बुधयुध'—इति परस्मैपदे लुङि तिपि इकारलोपे च्लौ 'णिश्रि'—इति च्लेश्चङि 'अधि इ इ अ त्' इति स्थिते 'क्रीङ्जीनां णौ' इत्यात्वे पुकि आदिवृद्धौ यणि 'सन्यतः' इति पि शब्दस्य द्वित्वे णेर्लोपे 'अध्यापिपत्' इति।

विरमति। ५७।—विपूर्वकात् रम्धातोः लटि 'व्याङ्परिभ्यो रमः' इति सूत्रेण परस्मैपदे कृते लटि, तिपि, शपि, अनुबन्धलोपे संयोगे विरमति इति सिद्धम्।

निगारयति (ई० ५३)—निपूर्वात् गॄधातोः अत्र 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदं भवति।

चलयति (ई० ४९)'निगरणचलनार्थेभ्यश्च' इत्यनेनात्र परस्मैपदं सिद्धम्।

पाययते (ई० ५१)—पाधातोर्णिचि आदन्तात् युकि 'अणावकर्मकाच्चित्तवत्कर्तृकात्'इति प्राप्तं परस्मैपदं'न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः' इत्यनेन निषेधे तङि टेरेत्वे शपि गुणे अयादेशे पूर्वरूपे 'पाययते' इति।

दमयते (ई० ४०)—दम्धातोर्णिचि उपधावृद्धौ 'अणावकर्मकात्–' इति प्राप्तं परस्मैपदं 'न पादम्याङ्–' इति निषेधे लटि तङि टेरेत्वे शपि गुणेऽयादेशे पूर्वरूपे 'दमयते' इति।

नर्तयते (ई० ४४)—नृत धातोर्णिचि लघूपधगुणे रपरत्वे 'अणावकर्तृकात्–' इति प्राप्तस्य परस्मैपदस्य 'नपादम्याङ्–' इति निषेधे लटि तङि टेरेत्वे शपि गुणेऽयादेशे नर्तयते इति।

इति परस्मैपदप्रकरणम्

अथ भावकर्मप्रकरणम्

भावकर्मणोः—भाव क्रिया को कहते हैं। उसका भावार्थक लकार से अनुवाद होता है। कर्त्ता में लकार करने पर तिङ् और युष्मद् अस्मद् शब्द कर्त्ता रूप एक अर्थ के वाचक होते हैं तो मध्यम और उत्तम पुरुष धातु से होता है। भाव में लकार करने पर तिङ् के साथ युष्मद् अस्मद् एकार्थवाचक नहीं होता किन्तु प्रथम पुरुष ही होता है। तिङर्थ क्रिया के द्रव्य रूप न होने से द्वित्व बहुत्व संख्या की प्रतीति नहीं होती। अतः द्विवचन बहुवचन नहीं होते, किन्तु स्वाभाविक एकवचन ही होता है।

भूधातु अकर्मक है उससे भाव में प्रत्यय होता है। अनुक्त होने से कर्त्ता में तृतीया होती है। जैसे 'देवदत्तो भवति' इस अर्थ में 'देवदत्तेन भूयते' यह होता है। त्वं भवसि इति त्वया भूयते। अहं भवामि इति मया भूयते।

भूयते। ४९। भूधातोः 'वर्तमाने लट्' इत्यनेन भावे लटि 'भावकर्मणोः' इत्यनेन लस्य स्थाने आत्मनेपदे त प्रत्यये 'सार्वधातुके यक्' इति सूत्रेण यकि अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इति सूत्रेण टेरेत्वे संयोगे भूयते इति सिद्धम्।

भाविता (ई० २५)—भूधातोर्लुटि 'भावकर्मणोः' इत्यात्मनेपदे लुटस्तप्रत्यये तासि डादेशो डित्वसामर्थ्यादभस्याऽपि टेर्लोपे 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' इति चिण्वद्भावे इटि च कृते चिण्वद्भावाद् वृद्धौ आवादेशे 'भाविता' इति। चिण्वदभावपक्षे इटि गुणे अवादेशे भवितेति। ण्यन्तात् 'भावि' इत्यस्मात् कर्मणि प्रत्ययेऽपि 'भाविता' इति भवति। तत्र चिण्वद्भावे इटि च कृते तस्याभीयत्वेनासिद्धत्वाण्णिलोप इति विशेषः। अत्र चिण्वदभावपक्षे इटि गुणे आयादेशे 'भावयिता' इति बोध्यम्।

भाविषीष्ट (ई० २६)—भूधातोराशीर्लिङि 'भावकर्मणोः' इत्यात्मनेपदत्वाल्लिङस्तप्रत्यये सीयुटि सुटि यलोपे 'स्यसिच्सीयुट्तासिषु' इति चिण्वद्भावे इटि च कृते वृद्धौ आवादेशे उभयोः सकारयोः षत्वे ष्टुत्वे 'भाविषीष्ट' इति।

चिण्वदभावे तु 'भविषीष्ट' इति। अत्र गुणावादेशौ इति विशेषः। ण्यन्तात् 'भावि' इत्यस्मात् कर्मणि प्रत्ययेऽपि 'भाविषीष्ट' भावयिषीष्ट इति भवति। अत्र चिण्वद्भावे इटि च कृते तस्याभीयत्वेन असिद्धत्वाण्णिलोपो भवति, चिण्वदभावे तु इटि कृते गुणायादेशौ भवत इति विशेषः।

अभावि (ई० ४८)—भूधातोर्भावे लुङि 'भावकर्मणोः' इत्यात्मनेपदे लुङस्तप्रत्यये अटि च्लौ 'चिण् भावकर्मणोः' इति च्लेश्चिणि वृद्धौ आवादेशे 'चिणो लुक्' इति तलोपे 'अभावि' इति।

अनुभूयते (ई० ५२)–'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते' इति स्मरणादत्र अकर्मकोऽपि भूधातुः उपसर्गवशात् सकर्मक इति विशेषः।

भाव्यते—भूधातोर्णिचि वृद्धौ आवादेशे 'भावि' इति। तस्मात् कर्मणि लटि 'भावकर्मणोः' इत्यात्मनेपदे लटस्तप्रत्यये टेरेत्वे 'सार्वधातुके यकि' 'णेरनिटि' इति णिलोपे भाव्यते इति।

बुभूष्यते (ई० २४)—सन्नन्तात् 'बुभूष' इत्यस्माद्धातोर्भावे लटि 'भाव कर्मणोः इत्यात्मनेपदत्वाल्लटस्तप्रत्यये टेरेत्वे 'सार्वधातुके यक्' इति यकि' 'अतो लोपः' इति सनोऽकारस्य लोपे 'बुभूष्यते' इति।

बोभूय्यते (ई० २६)—यङन्ताद्भूधातोर्भावे लटि 'भावकर्मणोः' इत्यात्मनेपदत्वाल्लटस्तप्रत्यये टेरेत्वे 'सार्वधातुके यक्' इति यकि 'अतो लोपः' इति यङोऽकारस्य लोपे 'बोभूय्यते' इति।

अस्तावि—'ष्टु' इत्यत्र षस्य सत्वे ष्टुत्वनिवृत्तौ 'स्तु' इति। तस्मात् कर्मणि लुकि 'भावकर्मणोः' इत्यात्मनेपदत्वाल्लुङस्तप्रत्यये अटि च्लौ 'चिण्भावकर्मणोः' इति च्लेश्चिणि वृद्धौ आवादेशे 'चिणो लुक्' इति तस्य लुकि 'अस्तावि' इति।

आरिता (ई० २५)—ऋधातोः, कर्मणि लुटि 'भावकर्मणोः' इत्यात्मनेपदत्वाल्लुटः स्थाने त प्रत्यये तासि 'स्यसिच्' इति चिण्वदिटि चिण्वद्भावाद् 'अचो ञ्णिति' इति वृद्धौ रपरत्वे तस्य डादेशे डित्त्वादभस्यापि टेर्लोपे 'आरिता' इति। चिण्वदिडभावपक्षे गुणे 'अर्ता' इति।

तायते (ई० ४२, ४४, ५०)—तन्धातोः कर्मणि लटस्तप्रत्यये यकि 'तनोतेर्यकि' इत्यात्वे सवर्णदीर्घे 'तायते' इति । आत्वाऽभावपक्षे 'तन्यते' इति ।

अन्वतप्त (ई० २४)—अनुपूर्वात् तप्धातोः कर्मणि लुङस्तप्रत्यये अटि यणि च्लौ 'चिण् भावकर्मणोः' इति च्लेश्चिणि प्राप्ते 'तपोऽनुतापे च' इति तन्निषेधे च्लेः सिचि 'झलो झलि' इति सलोपे 'अन्वतप्त' पापेनेति शेषः । पापेनेति कर्तरि तृतीया ।

ननु अनुपूर्वस्य तपेः पश्चात्तापार्थकत्वे असंगतिः, नहि पापस्य सूर्यादिवत्तपनशक्तिरस्ति, शोकार्थकत्वे तु अकर्मकत्वापत्त्या कर्मणि लकार एव न स्यादिति चेन्न अनुपूर्वकस्य तप्धातोः उपसर्गवशात् अभिहननार्थके प्रवर्तमानत्वेन सकर्मकत्वस्य जागरूकत्वात् ।

अकर्मकोऽप्युपसर्गवशात्सकर्मकः—अकर्मक भी धातु उपसर्गवश सकर्मक होता है । अनुपूर्वक भूधातु अनुभवार्थक होने से सकर्मक हुआ । अतएव उससे कर्म में प्रत्यय होता है । कर्म उक्त होने से उसमें प्रथमा, कर्त्ता अनुक्त होने से उससे तृतीया होती है । युष्मद् कर्म रहने पर मध्यम पुरुष, अस्मद् कर्म रहने पर उत्तम पुरुष, इससे भिन्न कर्म रहने पर प्रथम पुरुष होता है । कर्म के एकवचन, द्विवचन, बहुवचन रहने पर क्रमशः क्रिया एकवचन, द्विवचन, बहुवचन होती है उदाहरण जैसे –

चैत्रः आनन्दमनुभवति इति	चैत्रेण आनन्दः अनुभूयते	एकवचन
चैत्रः आनन्दो अनुभवति इति	चैत्रेण आनन्दौ अनुभूयते	द्विवचन
चैत्रः आनन्दान् अनुभवति इति	चैत्रेण आनन्दाः अनुभूयन्ते	बहुवचन
चैत्रः त्वामनुभवति इति	चैत्रेण त्वम्-अनुभूयसे	एकवचन
चैत्रः युवाम् अनुभवति इति	चैत्रेण युवाम् अनुभूयेथे	द्विवचन
चैत्रः युष्मान् अनुभवति इति	चैत्रेण यूयम् अनुभूयध्वे	बहुवचन
चैत्रः मामनुभवति इति	चैत्रेण अहमनुभूये	एकवचन
चैत्रः आवामनुभवति इति	चैत्रेण आवामनुभूयावहे	द्विवचन
चैत्रः अस्मान् अनुभवति इति	चैत्रेण वयमनुभूयामहे	बहुवचन

इसी प्रकार अन्य लकारों में भी विचार करना चाहिए । अकर्मक धातु से

णिच् प्रत्यय होने पर सकर्मक होता है। उसमें भी कर्म में प्रत्यय होता है और कर्म के अनुसार ही क्रिया होती है। उदाहरण जैसे—

—देवदत्तो भवति यज्ञदत्तः प्रेरयति

यज्ञदत्तो देवदत्तं भावयति इति	यज्ञदत्तेन देवदत्तो भाव्यते	एकवचन
यज्ञदत्तो देवदत्तौ भावयति इति	यज्ञदत्तेन देवदत्तौ भाव्येते	द्विवचन
यज्ञदत्तो देवदत्तान्भावयति इति	यज्ञदत्तेन देवदत्ताः भाव्यन्ते	बहुवचन
यज्ञदत्तो त्वाम् भावयति इति	यज्ञदत्तेन त्वं भाव्यसे	एकवचन
यज्ञदत्तो युवां भावयति इति	यज्ञदत्तेन युवां भाव्येथे	द्विवचन
यज्ञदत्तो युष्मान् भावयति इति	यज्ञदत्तेन यूयं भाव्यध्वे	बहुवचन
यज्ञदत्तो मां भावयति इति	यज्ञदत्तेन अहं भाव्ये	एकवचन
यज्ञदत्तो आवां भावयति इति	यज्ञदत्तेन आवां भाव्यावहे	द्विवचन
यज्ञदत्तो अस्मान् भावयति इति	यज्ञदत्तेन वयं भाव्यामहे	बहुवचन

अस्तावि । ५ । भावेऽर्थे स्तुधातौः 'भावकर्मणोः' इत्यनेन आत्मनेपदे ततो लुङि लकारस्य स्थाने त प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमेऽनुबन्ध-लोपे च्लिप्रत्यये 'चिण्भावकर्मणोः' इति सूत्रेण च्लेः स्थाने चिणि अनुबन्धलोपे णित्वात् 'अचोञ्णिति' इत्यनेन वृद्धौ आवादेशे 'चिणो लुक्' इत्यनेन तस्य लुकि संयोगे अस्तावि इति सिद्धम् ।

आरिता । ५४ । भावेऽर्थे ऋधातोः 'भावकर्मणोः' इति सूत्रेण आत्मनेपदे लुटि लस्य स्थाने त प्रत्यये 'स्यसिच्सीयुटेत्या'दिना उपदेशग्रहणात् पाक्षिके चिण्वदिटि चिण्वद्भावात् 'अचोञ्णिति' इत्यनेन वृद्धौ रपरे आर्+इ+त इति जाते तासि प्रत्ययेऽनुबन्धलोपे तकारस्य 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण डादेशेऽनुबन्धलोपे डित्वात् टिलोपे संयोगे आरिता इति सिद्धम् । चिण्वदभावपक्षे गुणे अर्ता इति रूपम् ।

इज्यते । ५५ । भावेऽर्थे यज्धातोः 'भावकर्मणोः' इत्यनेन आत्मनेपदे लटि तस्य स्थाने तप्रत्यये 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे 'सार्वधातुके यक्' इत्यनेन यकि अनुबन्धलोपे 'वचिस्वपियजादीनां किति' इत्यनेन सम्प्रसारणे

'सम्प्रसारणाच्च' इति पूर्वरूपे च कृते संयोगे इज्यते इति सिद्धम् ।

दायिता । ५६ । दाधातोः लुटि लस्य स्थाने तप्रत्यये शपं प्रबाध्य तासि प्रत्यये 'स्यसिच्सीयुट्' इत्यादिना पाक्षिके चिण्वदिटि 'आतो युक्चिण्कृतोः' इत्यनेन युकि अनुबन्धलोपे तकारस्य स्थाने 'लुटः प्रथमस्य डारौरसः' इति सूत्रेण डादेशे टिलोपे संयोगे दायिता इति रूपम् । चिण्वदभावपक्षे दाता इति सिद्धम् ।

दायिषीष्ट । ४० । दाधातोः आशीर्लिङि लकारस्य तप्रत्यये सीयुटि, सुटि अनुबन्धलोपे दा+सीय+स+त इति जाते 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च', इति वार्तिकेन चिण्वदिटि 'आतो युक् चिण्कृतोः' इति युकि अनुबन्धलोपे सकारद्वयस्य षत्वे ष्टुत्वे यलोपे च कृते संयोगे दायिषीष्ट इति रूपम् । चिण्वदभावपक्षे यलोपे दासीष्ट इति सिद्धम् ।

अदायि । ४० । दाधातोः लुङि तस्य तप्रत्यये अडागमेऽनुबन्धलोपे च्लिप्रत्यये 'चिण्भावकर्मणोः' इत्यनेन च्लेश्चिणि 'आतो युक्चिण्कृतोः' इत्यनेन युकि अनुबन्धलोपे 'चिणो लुक्' इति तकारलोपे अदायि इति सिद्धम् ।

अकामि (ई० ४६) कम्धातोर्णिचि 'नोदात्तोपदेशस्य–'इति उपधावृद्धिनिषेधस्य 'अनाचमिकमिवमीनामिति वक्तव्यम्' इति निषेधात् उपधावृद्धौ लुङि तङि अटि च्लौ च्लेश्चिणि 'चिणो लुक्' इति तलोपे 'अकामि' इति ।

अभाजि । ५५ । भञ्जधातोः लुङि तस्य स्थाने त प्रत्यये अडागमेऽनुबन्धलोपे च्लिप्रत्यये 'चिण्भावकर्मणोः' इत्यनेन च्लेश्चिणि अनुबन्धलोपे 'भञ्जेश्च चिणि' इत्यनेन नकारस्य लोपे 'चिणो लुक्' इति तकारस्यलोपे 'अत उपधायाः' इत्यनेन वृद्धौ अभाजि इति । नलोपाभावे अभञ्जि इति रूपद्वयं सिद्धम् ।

अलम्भि । ५० । लभधातोः भावे लुङि 'भावकर्मणोः' आत्मनेपदे लकारस्य त प्रत्यये 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इति अडागमेऽनुबन्धलोपे च्लौ 'चिण भावकर्मणोः' इति च्लेश्चिणि 'विभाषा चिण्णमुलोः' इत्यनेन पाक्षिके नुमि अनुबन्धलोपे नस्यानुस्वारे परसवर्णे अलम्भि इति रूपम् । नुमोऽभावे उपधावृद्धौ अलाभि इति सिद्धम् ।

इति भावकर्मप्रकरणम्

अथ कर्मकर्तृप्रकरणम्

कर्मवत्कर्मणा तुल्यक्रियः—कर्मस्था क्रिया के तुल्य है क्रिया जिसकी ऐसा कर्त्ता कर्मवत् हो जाता है। इससे यगादि होते हैं। जहाँ कर्म में क्रिया-कृत विलक्षणता दीख पड़े वहाँ कर्मस्था क्रिया होती है। जैसे—पके चावल।

पच्यते फलम्। ६१। सूर्यः फलं पचति, किम् तेन, फलं स्वयमेव पच्यते इति विग्रहे सूर्यस्य कर्तृत्वेनाविवक्षायां फलरूपस्य कर्मणः एव कर्तृत्वेन विवक्षाया अकर्मकत्वात् पच्धातोः कर्तरि लटि लटा कर्तुः उक्तत्वात् प्रथमायाम् 'कर्मवत्कर्मणा तुल्यक्रियः, इति सूत्रेण फलस्य कर्तुः कर्मवद्भावात् 'भावकर्मणोः' इत्यनेनात्मनेपदे लटः तप्रत्यये 'सार्वधातुके यक्' इत्यनेन यकि अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे पच्यते फलम् इति सिद्धम्।

चिकीर्षते कटः (ई० ५१)—स्वयमेव इच्छाविषय इत्यर्थः। अत्र कृधातोः किरादिगणपठितत्वात् 'भूषावाचिनां किरादीनां सन्नन्तानां च यक्चिणौ चिण्वदिट् च नेति वक्तव्यम्' इति वार्तिकेन कर्मकर्तर्यपि यक्निषेधात् कृधातोः सनि इत्वे रपरत्वे दीर्घे द्वित्वादिकार्ये षत्वे तङि टेरेत्वे शपि पररूपे 'चिकीर्षते' इति।

तप्यते तपस्तापसः (ई० ४९,५३)—तपिरर्चनार्थः प्रजाप्रत्यादि कृच्छाद्यात्मकं तपः सम्पादयतीत्यर्थः। सम्पादनस्यात्मकर्तृकत्वात् तपेरुपकर्मस्थत्वाऽभावात् 'कर्मवत्–' इत्यप्राप्तं 'तपस्तपःकर्मकस्यैव' इत्यनेन कर्मवत्वं विधीयते। तेन यगात्मनेपदादि सिद्धयति।

उत्तपति सुवर्णम् (ई० ४५)—अत्र तपःकर्मकत्वाऽभावात् 'तपस्तपः कर्मकस्येव' इत्यनेन कर्मत्वं न भवति।

गौः पयो दुग्धे (ई० ४६,४८, ५२)—गौः स्वयमेव पयः उत्सृजतीत्यर्थः। अत्र 'दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम्' इत्यनेन कर्मकर्तृभूतायां गवि सत्याम् दुहज्ञातोर्लटि 'भावकर्मणोः' इत्यात्मनेपदे तङि टेरेत्वे 'न दुहस्नुनमां यक्चिणौ' इति यक्निषेधे शपि'अदिप्रभृतिभ्यः शपः'इति शपो लुकि 'झषस्तथो। इति धत्वे 'वा द्रुह–' इति घत्वे जश्त्वे 'दुग्धे' इति।

उदुम्बरः फलं पच्यते (ई० ४५, ३०)—उदुम्बरो वृक्षः स्वयमेव काल-विशेषमनपेक्ष्य फलं पक्वाश्रयं करोतीत्यर्थः । अत्र 'दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम्' इत्यनेन कर्तुः कर्मवद्भावे सति 'पच्यते' इत्यत्र यगादि सिद्धयति ।

इति कर्मकर्तृप्रकरणम् ।

अथ लकारार्थप्रकरणम्

स्मरसि कृष्ण गोकुले वत्स्यामः ।६६। स्मरसि इत्युपपदात् वस् धातोः भूतानद्यतनेऽर्थे लङि प्राप्ते तं प्रबाध्य 'अभिज्ञावचने लृट्' इत्यनेन लृटि लस्य स्थाने मसि प्रत्यये शपं प्रबाध्य 'स्यतासी लृलुटोः' इत्यनेन स्य प्रत्यये 'सः स्यार्धधातुके' इत्यनेन सस्य तकारे 'अतो दीर्घो यञि' इत्यनेन दीर्घो सस्य रुत्वे विसर्गे वत्स्यामः इति सिद्धम् ।

कदा गमिष्यसि ।४६। इति प्रश्ने एष गच्छामि इत्युत्तरम् । अत्र गम् धातोः 'लृट् शेषे च' इत्यनेन लृटि प्राप्ते तं प्रबाध्य 'वर्तमानसामीप्ये वर्तमानवद्वा' इत्यनेन पाक्षिके लटि मिपि, शपि, अनुबन्धलोपे 'इषगमियमां छः' इत्यनेन तस्य छकारे 'छे च' इत्यनेन तुकि तस्य श्चुत्वेन चकारे 'अतो दीर्घो यञि' इति दीर्घे गच्छामि इति रूपम् । पक्षे लृटि, मिपि, शपं बाधित्वा स्यप्रत्यये दीर्घे सस्य षत्वे इति संयोगे गमिष्यामि इति सिद्धम् ।

जगाम किम्? (ई० ५३)—अत्र 'प्रश्ने चासन्नकाले' इति सूत्रेंण लिङ्-विषये लुङ्लिटौ स्तः । तेन पक्षे 'अगच्छत् किम् ?' इत्यपि भवति ।

वसन्तीह पुरा छात्राः ई० ४६, ५१) अत्र 'वसन्ति' इत्यत्र 'पुरि लुङ्-चाऽस्मे' इति सूत्रेण पुरायोगे लट् लडभावे 'अवात्सुः' 'अवसन्' 'ऊषुः' इति ।

यावद् भुङ्क्ते, पुरा भुङ्क्ते (४९)-'यावत् पुरानिपातयोर्लट्' इति लट् ।

कृष्णं नमेच्चेत् सुखं यायात् (४९)—अत्र नमस्कारः सुखहेतुरिति हेतुहेतुमद्भावसत्त्वात् 'नम्' धातोः 'या' धातोश्च भविष्यति प्रबाध्य 'हेतुहेतु-मतोर्लिङ्' इति' लिङि तिबादिकार्ये तत्सिद्धिः ।

वसन् ददर्श (ई० ५०, ५२)—ननु वस् धातोः 'वर्तमाने लट्' इति स्थाने 'लटः शतृ –' इति शतरि निष्पन्नस्य 'वर्तमानकालिकवासकर्तुः देवदत्तादेः 'परोक्षे लिट्' इति भूतकालविहितलिट्प्रत्ययघटित 'ददर्श' ति तिङन्तप्रतिपाद्यभूतकालिकदर्शनकर्तृत्वं न स्यादिति चेन्मैवम् । 'धातुसम्बन्धे प्रत्ययाः' इति सूत्रेण विहितकालातिरिक्तकालेऽपि प्रत्ययस्य विधानेन प्रकृते प्रधानभूतकालिकलिट्प्रत्ययान्तददर्शेतिपदप्रतिपाद्यदर्शनक्रियानुरोधे च वसधातोरपि भूतकाले एव लटी जायमानत्वेन वसन्निति पदेनापि अतीतकालस्यैव बोधेन भूतकालिकवासकर्तृभूतदेवदत्तादिकर्तृकातीतकालिकं दर्शनमित्यस्यैव शाब्दबोधेन दोषविरहादिति दिक् ।

पुरीमवस्कन्द० (ई० ४४)—बली=रावणः, नमुचिद्विषा=इन्द्रेण सह, विगृह्य=विरोधं प्राप्य, पुर्याः=अमरावत्याः, अवस्कन्दनं=पीडनम्, नन्दनवनस्य लवनं,रत्नानां मोषणम्,अमराङ्गनानां हरणम् इत्येवं प्रकारेण अहर्दिवम् अहन्यहनि अस्वास्थ्यं चक्रे, कृतवानित्यन्वयः । इत्थं शब्दः इतिपर्यायः अवस्कन्दनादिक्रियाविशेषाणाम् अस्वास्थ्यक्रियासामान्ये अभेदं ग्राहयति ।

(बली रावण इन्द्र से वैर कर स्वर्ग को घेर लिया और नन्दन बन को उजाड़ डाला, रत्नों को चुरा लिया तथा देवाङ्गनाओं का (भी) अपहरण किया—इस प्रकार उसने दिन-रात स्वर्ग को अस्वस्थ (अस्तव्यस्त) कर डाला ।

इति लकारार्थप्रकरणम् । (तिङन्तं समाप्तम्)

अथ कृदन्ते कृत्यप्रकरणम्

एधितव्यम् (ई० ४४, ४६)—एध्धातोः 'कर्तरि कृत्' इति सूत्रं प्रबाध्य 'तयोरेव कृत्यक्तखलर्थाः' इति नियमेन 'तव्यत्तव्यनीयारः' इति तव्यप्रत्यये 'आर्धधातुकस्येड् वलादेः' इति इटि 'एधितव्य' इति स्थिते प्रातिपदिकसंज्ञायां सौ 'भावे औत्सर्गिकैकत्वं क्लीबत्वं च' इति क्लीबत्वात् सोरमि पूर्वरूपे 'एधितव्यम् इति ।

एधनीयम् (४७) एध्धातोः अनीयर्प्रत्यये कृते 'एधनीयम् इति ।

भिदेलिमाः (४४, ४८)—भिद्धातोः 'केलिमर उपसंख्यानम्' इति वार्तिकात् केलिमर्प्रत्यये 'भिदेलिमाः सरला' इति। सरलाः वृक्षविशेषाः।

वास्तव्यः (ई० ४७, ५२)—वसतीति वास्तव्यः। वस्धातोः 'वसेस्तव्यत् कर्तरि णिच्च' इति तव्यत्प्रत्यये णिद्वद्भावे च कृते णित्वादुपधावृद्धौ विभक्तिकार्ये 'वास्तव्यः' इति।

प्रयाणीयम् (ई० ४१, ५०)—प्रोपसर्गात् याधातोः 'तव्यत्तव्यानीयरः' इति अनीयर्प्रत्यये सवर्णदीर्घे 'कृत्यचः' इति णत्वे विभक्ति कार्ये सिद्धम्।

प्रेङ्खणीयम् (ई० ५१)—'इखि गतौ' इदित्त्वान्नुमि अनुस्वारे परसवर्णे, 'इङ्ख्' इत्यस्मात् अनीयर्प्रत्यये 'इजादेः सनुमः' इति णत्वे विभक्त्यादिकार्ये प्रेङ्खणीयम्' इति।

प्रभानीयम् (ई० ४६)—प्रोपसर्गात् भाधातोः अनीयर्प्रत्यये सवर्णदीर्घे 'कृत्यचः' इति णत्वे प्राप्ते ,न भाभूपूकमिगमिप्यायीवेपाम्' इति सूत्रेण निषेधे विभक्तिकार्ये 'प्रभानीयम्' इति।

वृत्यम् (ई० ४२)—वृत्धातोः 'ऋदुपधाच्चाऽक्लृपिचृतेः' इति क्यपि तुकि विभक्तिकार्ये 'वृत्यम्' इति।

जेयम् (ई० ४७)—जेतुं योग्यं जेयम्। जिधातोः 'अचो यत्' इति यत्प्रत्यये 'आर्धधातुकं शेषः' इति तस्यार्धधातुकत्वे गुणे सौ सोरमि पूर्वरूपे 'जेयम्' इति।

देयम् (ई० ४९)—दातुं योग्यं देयम्। दाधातोः 'अचो यत्' इति यत्प्रत्यये 'ईद्यति' इति ईत्वे यतः आर्धधातुकत्वात् गुणे विभक्तिकार्ये 'देयम्' इति।

शप्यम् (ई० ५१)—शप्तुं योग्यं शप्यम्। 'शप् आक्रोशे' इति धातोः 'पोरदुपधात्' इति यत्प्रत्यये विभक्तिकार्ये 'शप्यम्' इति।

लभ्यम् (ई० ५३)—लब्धुं योग्यं लभ्यम्। लभ्धातोः 'पोरदुपधात्' इति यत्प्रत्यये विभक्तिकार्ये 'लभ्यम्' इति।

उपलभ्यः साधुः (ई० ४४)–साधुशब्दात् प्रशंसागम्यमाने 'उपात्प्रशंसायाम्' इति यादौ प्रत्यये विवक्षिते उपात्परस्य लभेर्नुमि अदुपधत्वाऽभावात् पोरदुपधात् इति यत्प्रत्ययस्याऽप्रवृत्तेः 'ऋहलोर्ण्यत्' इति ण्यति तस्यानुस्वारे परसवर्णे विभक्तिकार्ये 'उपलभ्यः साधुः' इति। समीपे प्राप्य इत्यर्थः।

शक्यम् (ई० ५०)—शक्धातोः 'शकिसहोश्च' इति यति विभक्तिकार्ये 'शक्यम्' इति ।

अवद्यं-पापम् (ई० ४०)—नञुपपदात् वद्धातोः 'अपद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु' इति सूत्रेण गर्ह्यायां 'वदेः सुपि क्यप् च' इति क्यपं प्रबाध्य निपातनात् यति विभक्त्यादिकार्ये 'अवद्यं पापं इति' । गर्हितत्वादवाच्यमित्यर्थः ।

पण्यम् (ई० ४०)—'पण व्यवहारे स्तुतौ च' इति धातोः व्यवहार्येऽर्थे 'अवद्यपण्य-'इति सूत्रेण निपातनात् यति विभक्तिकार्ये 'पण्यं विक्रेयम्' इति सिद्धम् ।

अर्यः (ई० ४४, ४७)—'ऋ गतौ' इत्यस्माद्धातोः 'अर्यः स्वामिवैश्ययोः' इति सूत्रेण ण्यतं प्रबाध्य निपातनात् यति गुणे विभक्तिकार्ये 'अर्यः' इति । पक्षे 'ऋहलोर्ण्यत्' इति ण्यति वृद्धौ रपरत्वे विभक्तिकार्ये 'आर्यः-ब्राह्मणः' इति सिद्धम् ।

ब्रह्मोद्यम् (ई० ५१)—ब्रह्म = वेदं वदतीति ब्रह्मोद्यम् । ब्रह्मोपपदात् वद्धातोः 'वदः सुपि क्यप् च' इति सूत्रेण क्यपि 'वचिस्वपि-' इति सम्प्रसारणे पूर्वरूपे गुणे विभक्तिकार्ये उक्तं रूपं सिद्धम् ।

ब्रह्मभूयम् (ई० ४४, ४७)—ब्रह्मणो भावः-ब्रह्मोपपदात् भूधातोः 'भुवो भावे' इति क्यपि कित्वात् गुणाऽभावे विभक्तिकार्ये सिद्धम् ।

इत्यः, स्तुत्यः (ई० ४४, ५३)—एतुं योग्यः 'इत्यः' इण्धातोः एतिस्तुशास्वृदृजुषः क्यप्' इति क्यपि 'ह्रस्वस्य पिति कृति तुक्' इति तुकि विभक्तिकार्ये 'इत्यः' इति एवं स्तोतुं योग्यः । स्तुधातोः क्यपि तुकि 'स्तुत्यः' इति ।

शिष्यः वृत्यः । ४९ ।—शासितुं योग्यः शिष्यः । शास्धातोः 'एतिस्तुशास्वृदृजुषः क्यप्' इति क्यपि 'शास इदङ्हलोः' इत्युपधाया इत्वे 'शासिवसिघसीनां च' इति सस्य षत्वे विभक्तिकार्ये 'शिष्यः' इति ।

आदृत्यः जुष्यः (ई० ४८)—आङुपसर्गात् दृधातोः 'एतिस्तुशास्वृदृजुसः क्यप्' इति क्यपि 'ह्रस्वस्य पिति कृति तुक्' इति तुकि विभक्तिकार्ये 'वृत्यः' इति । एवं जुष् धातोः क्यपि विभक्तिकार्ये 'जुष्यः' इति ।

मार्ग्यः (ई० ५९)—मार्जितुं योग्यः । क्यबभावपक्षे मृज्धातोः 'ऋहलोर्ण्यत्' इति ण्यति 'मृजेर्वृद्धिः' इति वृद्धौ रपरत्वे 'चजोः कु घिण्ण्यतोः' इति कत्वे 'मार्ग्यः' इति । 'मृजेर्विभाषा' इति क्यपि तु 'मृज्यः' इति ।

पाव्यम् (ई० ५१)—पूधातोः 'ओरावश्यके' इति ण्यति 'अचो ञ्णिति' इति वृद्धौ 'वान्तो यि—' इत्यावादेशे विभक्तिकार्ये 'पाव्यम्' इति ।

अवश्यलाव्यम् (४८)—

लुम्पेदवश्यमः कृत्ये, तुं काममनसोरपि ।
समो वा हिततयोर्मासस्य पचि युङ्घञोः ।।

लुम्पेदिति—कृत्यप्रत्यये परे अवश्यम् शब्दस्य मकारो लुप्यते । काममनसोः परयोः तुमो मकारो लुप्यते । हिततयोः परयोः समो मकारो वा लुप्यते, युङ्घञ्परके पच्धातौ परे इत्यर्थः । उदाहरणानि यथा—आवश्यलाव्यम् । वक्तुकाम । गन्तुमनाः । सततम्-सन्ततम् । सहितं संहितम् । मांस्पचनी । मास्पाकः । इत्यादि ।

भव्यः (ई० ५२) जुधातोः 'भव्यगेयप्रवचनोपस्थानीयोपस्थानीयजनन्याप्लाव्यापात्या वा' इति सूत्रेण कर्तरि निपातनात् यत्प्रत्यये गुणे अवादेशे विभक्तिकार्ये 'भव्यः' इति ।

वाच्यम् (ई० ४४, ४७)—वच्धातोः 'ऋहलोर्ण्यत्' इति ण्यति वृद्धौ 'वचोऽशब्दसंज्ञायाम्' इति कुत्वनिषेधे विभक्तिकार्ये 'वाच्यम्' इति 'वक्तु'' इति शब्दाख्यायां तु 'वाक्यम्' इति भवति ।

पुष्यः (५३)—पुष्यन्त्यस्मिन्नर्थाः । पुष्धातोः 'पुष्यसिध्यौ नक्षत्रे' इति निपातनात् क्यपि कित्वात् गुणनिषेधे विभक्तिकार्ये 'पुष्यः' इति । अन्यत्र तु 'पोष्यः' इति ।

जित्यः (ई० ४०)—जिधातोः 'विपूयविनीयजित्या मुञ्जकल्कहलिषु', इति सूत्रेण हल्यर्थे निपातनात् क्यपि तुकि कित्वात् गुणनिषेधे विभक्तिकार्ये 'जित्यः' इति ।

प्रतिगृह्यम् (४६, ४७)—प्रत्युपसर्गात् ग्रहधातोः 'प्रत्यपिभ्यां ग्रहेः'

'छन्दसीति वक्तव्यम्' इति छन्दसि क्यपि 'ग्रहिज्ये' ति सम्प्रसारणे 'विभक्तिकार्ये' प्रतिगृह्यम्' इति। लोके तु ण्यति वृद्धौ 'प्रतिग्राह्यम्' इति भवति।

आर्यगृह्यः (ई० ५०)—आर्यैर्गृह्यते। 'पदाऽस्वैरिबाह्यापक्ष्येषु च' इति सूत्रेण ग्रहेः क्यपि 'ग्रहिज्ये' ति सम्प्रसारणे विभक्तिकार्ये 'आर्यगृह्यः' तत्पक्षाश्रित इत्यर्थः।

कृत्यं-कार्यम्। वृष्यम्-वर्ष्यम् (४९)—कर्तुं योग्यं कार्यम्। कृधातोः 'विभाषा कृवृषोः' विभाषया क्यपि कित्वात् गुणनिषेधे 'ह्रस्वस्य पिति—' इति तुकि विभक्तिकार्ये 'कृत्यम्' इति। पक्षे ण्यति 'अचो ञ्णिती' ति वृद्धौ 'कार्यम्' इति। एवं वृषधातोः क्यपि 'वृष्यम्' ण्यति सति गुणे 'वर्ष्यम्' इति।

अमावस्या (ई० ५२)—अमा सह वसतोऽस्यां चन्द्राकौं इति अत्र 'अमावास्यादन्यतरस्याम्' इति सूत्रेण अमोपपदात् वसतेरधिकरणे ण्यति, वृद्धौ सत्यां पाक्षिको ह्रस्वाऽभावश्चानेन निपात्यते, तेन पक्षे, 'अमावस्या' इत्यपि भवति।

चित्यः (४८)—चीयते इति चित्यः। 'चित्याग्निचये च' इति सूत्रेणात्र चिधातोः अग्न्याधारस्थलविशेषेऽर्थे निपातनात् कर्मणि क्यपि कित्वात् गुणनिषेधे विभक्तिकार्ये 'चित्यः' इति सिद्धम्।

इति कृत्यप्रकरणम्।

अथ पूर्वकृदन्तप्रकरणम्

कर्ता, कारकः—करोतीति-कर्ता। कृधातोः 'ण्वुल्तृचौ' इति तृचि गुणे रपरत्वे 'कर्तृ इति, तस्मात् कृदन्तत्वात् प्रातिपदिकसंज्ञायां सौ 'ऋदुशनस्—' इत्यनङि 'अप्तृन्' इति दीर्घे सुलोपे नलोपे 'कर्त्ता' इति। पक्षे ण्वुलि अकादेशे वृद्धौ 'कारकः' इति।

जनार्दनः, नन्दनः (ई० ५०) (ई० ५१)—जनमर्दयतीति विग्रहे 'अर्द धातोः णिचि 'नन्दिग्रहि—' इति ल्युप्रत्यये 'युवोरनाकौ' इति योरनादेशे णिलोपे 'कर्तृकर्मणोः कृति' इति जनमिति कर्मणि षष्ठीविभक्तौ षष्ठीसमासे सुब्लुकि

प्रातिपदिकत्वात् सौ रुत्वे विसर्गे 'जनार्दनः' इति सिद्धम् । एवं नन्दनः ।

लवणः (४७)—लुनातीति—लवणः । 'लूञ् धातोः 'नन्दिग्रहि—' इति ल्युप्रत्यये 'युवोरनाकौ' इति योरनादेशे गुणे अवादेशे निपातनात् णत्वे विभक्ति-कार्ये तत्सिद्धिः ।

प्रज्ञः (ई० ४०, ५३)—प्रोपसर्गकज्ञाधातोः 'आतश्चोपसर्गे' इति कप्रत्यये 'आतो लोप इटि च' इत्यालोपे विभक्तिकार्ये तत्सिद्धिः ।

क्षिपः, बुधः, कृशः, ज्ञः, प्रिय किरः—क्षिप्धातोः 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्यये कित्वाद् गुणनिषेधे विभक्तिकार्ये 'क्षिपः' इति । बुध्धातोः कप्रत्यये बुधः इति । कृशधातोः कप्रत्यये 'कृशः' इति । ज्ञाधातोः कप्रत्यये आतो लोपे 'ज्ञः' इति । प्रीधातोः कप्रत्यये इयङि 'प्रियः' इति । कृधातोः कप्रत्यये इत्वे रपरत्वे 'किरः' इति ।

उदेजयः (ई० ४२)—उत्पूर्वात् ण्यन्तात् एज्धातोः 'अनुपसर्गाल्लिम्प—' इति सूत्रेण शप्रत्यये शपि गुणेऽयादेशे पररूपे विभक्तिकार्ये 'उदेजयः' इति । सूत्रे उदेजीति उपसर्गविशिष्टस्यैव पाठात् 'अनुपसर्गादिति नानुपयन्नम्' ।

गोविन्दः, अरविन्दम् (४५)—गाः विन्दतीति गोविन्दः, एवम्-अराणि (दलविशेषाणि) विन्दतीति अरविन्दम् । उभयत्र 'गवादिषु विन्देः संज्ञायाम् इति शप्रत्ययो भवति ।

ज्वालः चालः (ई० ४५, ४६)–उभयत्र 'ज्वलतिकसन्तेभ्यो णः' इत्यनेन णप्रत्यये वृद्धिर्भवति ।

गृहम् (ई० ४५)—गृह्णाति धान्यादिकमिति—ग्रह धातोः 'गेहे कः' इति कप्रत्यये 'ग्रहिज्ये' ति सम्प्रसारणे पूर्वरूपे कित्वाद् गुणनिषेधे स्वादिकार्ये 'गृहम्' इति ।

कुम्भकारः (ई० ४७)—कुम्भं करोतीति विग्रहे 'तत्रोपपदं सप्तमीस्थम्' इति कुम्भशब्दस्योपपदसंज्ञायां सत्यां कुम्भोपपदात् कृधातोः 'कर्मण्यण्' इत्यणि 'अचो ञ्णिति' इति वृद्धौ रपरे 'कर्तृ कर्मणोः कृतिः' इति कर्मणि षष्ठ्यां 'गति-कारके' ति परिभाषया सुबुत्पत्तेः प्रागेव 'कुम्भ अस् कार' इत्यलौकिकविग्रहे

'उपपदमतिङ्' इति समासे सुब्लुकि एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकत्वेन सौ सस्य रुत्वे विसर्गे 'कुम्भकारः' इति ।

गोदः (ई० ४४, ४७)—गां ददातीति गोदः । दाधातोः 'कर्मण्यण्' इति अणं प्रबाध्य 'आतोऽनुपसर्गे कः' इति कप्रत्यये सुब्लुकि 'आतो लोपः—' इति आलोपे विभक्त्यादिकार्ये 'गोदः' इति ।

द्विपः (ई० ४५)—द्वाभ्यां पिबतीति द्विपः । 'सुपि स्थः' इत्यनेन 'सुपिः' इति योगविभागात् सुप्युपपदे आदन्तात् पाधातोः कप्रत्यये सुब्लुकि 'आतो लोपः' इत्यालोपे विभक्तिकार्ये 'द्विपः' इति ।

तुन्दपरिमृजः (ई० ५०)—तुन्दं परिमृजतीति तुन्दपरिमृजोऽलसः । 'तुन्दशोकयोः परिमृजानुपदोः' इति सूत्रस्य 'आलस्यसुखाहरणयोरिति वाच्यम्' इति वार्तिकेन कप्रत्यये सुब्लुकि विभक्तिकार्ये उक्तं रूपं सिद्धम् ।

पुष्पाहरः (ई० ४०)—पुष्पाण्याहरति तच्छीलः पुष्पाहरः । 'आङि ताच्छील्ये' इत्याङः पूर्वाद्धरतेरचि सुब्लुकि गुणे रपरत्वे विभक्तिकार्ये तत्सिद्धम् ।

स्तम्बेरमः (४८, ५२)—स्तम्बे रमतीति स्तम्बेरमः—हस्ती । स्तम्ब-कर्णयो रमिजपोः' इति सूत्रस्य 'हस्तिसूचकयोरिति वाच्यम्' इति वार्तिकेन अचि 'हलदन्तात् सप्तम्याः संज्ञायाम्' इति सप्तम्याः अलुकि विभक्तिकार्ये तत्सिद्धिः ।

खशयः (ई० ४४, ५३)—खे शेते 'अधिकरणे शेतेः' इति अधिकरणे उपपदे शीङ्धातोरचि सुब्लुकि गुणेऽयादेशे विभक्त्यादिकार्ये 'खशयः' इति ।

कुरुचरः ।५०। कुरुषु चरतीति विग्रहे 'चरेष्टः' इत्यनेन टप्रत्ययेऽनुबन्धलोपे उपपदसमासे कृदन्तत्वात् प्रातिपदिककार्ये कुरुचरः इति सिद्धम् ।

भिक्षाचरः (४७)—भिक्षां चरतीति विग्रहे 'भिक्षासेनादायेषु च' इति टप्रत्यये 'कर्तृकर्मणोः कृति' कर्मणि षष्ठ्याम् 'उपपदमतिङ्' इति समासे विभक्तिकार्ये तत्सिद्धिः ।

यशस्करी (ई० ५१) यशः करोतीति विग्रहे कृधातोः 'कृञो हेतुताच्छील्यानुलोम्येषु' इति टप्रत्यये गुणे रपरे 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठ्यां 'गतिकारके' ति सुबुत्पत्तेः प्रागेव 'यशस् अस् कर' इति स्थिते 'उपपदमतिङ्'

इति समासे सुब्लुकि सस्य रुत्वे विसर्गे 'यश: कर' इति स्थिते 'अतः कृकमि—' इति विसर्गस्य सत्वे स्त्रीत्वविवक्षायां 'टिड्ढाणञ्—' इति टित्वाद् ङीपि भत्वाद् 'यस्येति च' इत्यलोपे ङ्यन्तत्वात् सौ हल्ङ्यादिना सुलोपे उक्तं रूपम् सिद्धम् ।

जनमेजयः (ई० ४६, ४८)–जनमेजयतीति विग्रहे ण्यन्तादेज्धातोः 'एजेः खश्' इति खशि अनुबन्धलोपे शित्वात् सार्वधातुकसंज्ञायां शपि गुणे अयादेशे पूर्वरूपे कर्मणि षष्ठयां 'जन अस् एजय' इत्यलौकिकविग्रहे सुबुत्पत्तेः प्रागेव उपपदसमासे सुब्लुकि 'अरुर्द्विषदजन्तस्य मुम्' इति मुमि विभक्तिकार्ये उक्त रूपं सिद्धम् ।

वशंवदः (ई० ४४, ४७)—वशं वदतीति विग्रहे वद्धातोः, 'प्रियवशे वदः खच्' इति खचि 'कर्तृकर्मणोः कृति' इति कर्मषष्ठयां 'गतिकारके' ति सुबुत्पत्तेः प्रागेव उपपदसमासे सुब्लुकि 'अरुर्द्विषदजन्तस्य मुम्' इति मुमि मस्यानुस्वारे विभक्तिकार्ये उक्तं रूपं सिद्धम् ।

श्राद्धकरः (ई० ४४ , ४९)—श्राद्धं करोति तच्छीलः । कर्मोपपदात् कृधातोः 'कृञो हेतुताच्छील्यानुलोम्येषु' इति सूत्रेण टप्रत्यये सुब्लुकि गुणे रपरत्वे विभक्तिकार्ये 'श्राद्धकरः' इति ।

विभाकरः (ई० ४४, ४६)—विभां करोतीति विभाकरः । 'दिवाविभा-' इत्यादिसूत्रेण 'विभाम्' इति कर्मण्युपपदात् कृधातोः टप्रत्यये सुब्लुकि गुणे रपरत्वे विभक्तिकार्ये 'विभाकरः' इति ।

शुनिन्धयः (ई० ४०) शुनीं धयतीति विग्रहे 'वातशुनीतिलशर्द्धेष्वजधेट्तुदजहातिभ्यः खश्' इति वार्तिकेन खशि सुब्लुकि 'खित्यनव्ययस्य' इति ह्रस्वे 'अरुर्द्विषदजन्तस्य मुम्' इति मुमि मस्यानुस्वारे परसवर्णे एकारस्याऽयादेशे विभक्तिकार्ये उक्तं रूपं सिद्धम् ।

अभ्रंलिहः (ई० ५३)—अभ्रं लेढीति विग्रहे 'वहाभ्रे: लिहः' इति खशि सुब्लुकि मुमि अनुस्वारे विभक्तिकार्ये अभ्रंलिहः' इति ।

विधुन्तुदः (ई० ५२)—विधुं तुदतीति विग्रहे 'विध्वरुषोस्तुदः' इति कर्म-

ण्युपपदे तुदेः खशि सुब्लुकि 'अरुर्द्विषत्—इति मुमि अनुस्वारे परसवर्णे विभक्तिकार्ये 'विधुन्तुदः' इति।

द्विषन्तपः (ई० ४५)—द्विषन्तं तापयतीति विग्रहे 'द्विषत्परयोस्तापे' इति खचि सुब्लुकि 'खचि ह्रस्वः' इति ह्रस्वे 'णेरनिटि' इति णिलोपे 'अरुर्द्विषत्' इति मुमि अनुस्वारे परसवर्णे संयोगान्तलोपे विभक्तिकार्ये तत्सिद्धिः।

वाचंयमः—वाचं यच्छतीति विग्रहे 'वाचि यमो व्रते' इति खचि सुब्लुकि 'वाचंयमपुरन्दरौ च' इत्यनेन 'वाच् यम् अ' इति स्थिते वाचः इत्यस्यामन्तत्वे विभक्तिकार्ये 'वाचंयमः' इति।

पुरन्दरः (ई० ५१)—पुरं दारयतीति विग्रहे 'पूःसर्वयोर्दारिसहोः' इति खचि सुब्लुकि 'खचि ह्रस्वः' इति ह्रस्वे मुमि अनुस्वारे परसवर्णे 'णेरनिटि' इति णिलोपे विभक्तिकार्ये 'पुरन्दरः' इति।

भयङ्करः (ई० ४६)—भयं करोतीति विग्रहे 'मेघर्तिभयेषु कृञः' इति खचि सुब्लुकि 'अरुर्द्विषत्—' इति मुमि गुणे रपरत्वे अनुस्वारे परसवर्णे स्वादिकार्ये तत्सिद्धिः।

विश्वंभरः (ई० ५०)—विश्वं बिभर्तीति विग्रहे 'संज्ञायां भृतॄवृजिधारिसहितपिदमः' इति सूत्रेण कर्मण्युपपदे भृधातोः खचि सुब्लुकि 'अरुर्द्विषत्–' इतिमुमि गुणे रपरत्वे अनुस्वारे परसवर्णे स्वादिकार्ये तत्सिद्धिः।

पन्नगः (ई० ५२) पन्नं+पतितं गच्छतीति विग्रहे 'सर्वत्रपन्नयोरिति वाच्यम्' इति वार्तिकेन डप्रत्यये डित्वात् टेर्लोपे सुब्लुकि विभक्तिकार्ये 'पन्नगः' इति।

क्लेशापहः (ई० ४६)—क्लेशानपहन्तीत्यर्थे 'अपे क्लेशतमसोः' इति डप्रत्यये डित्वात् टेर्लोपे सुब्लुकि सवर्णदीर्घे विभक्तिकार्ये 'क्लेशापहः पुत्रः' इति।

जायाघ्नः (ई० ४४, ४७)—जायां हन्तीति विग्रहे 'लक्षणे जायापत्योष्टक्' इति टकि सुब्लुकि 'जाया हन् अ' इति स्थिते 'गमहन–' इत्युपधालोपे 'हो हन्तेः' इति कुत्वे विभक्तिकार्ये 'जायाघ्नो—ना' इति।

पतिघ्नी (ई० ४०)—पतिं हन्तीति विग्रहे 'लक्षणे जायापत्योष्टक्' इति टकि सुब्लुकि 'गमहन–' इत्युपधालोपे घत्वे स्त्रीत्वविवक्षायां 'टिड्ढाणञ्—' इति

ङीपि विभक्तिकार्ये 'पतिघ्नी—स्त्री' इति ।

शत्रुघ्नः (ई० ४५)—शत्रुं हन्तीति विग्रहे 'मूलविभुजादिभ्यः कः 'इति कप्रत्यये 'यमहन—' इत्युपधालोपे 'हो हन्ते —' इति कुत्वे विभक्तिकार्ये "शत्रुघ्नः' इति ।

अग्रणीः ग्रामणीः (ई० ४६, ५३)—अग्रं नयतीति । ग्रामं नयतीति । कर्मोपपदात् नयतेः 'सत्सूद्विषत्–' इति सूत्रेण क्विपि सर्वापहारे सुब्लुकि 'अग्र-ग्रामाभ्यां नयतेर्णो वाच्यः' इति णत्वे विभक्तिकार्ये अग्रणीः 'ग्रामणीः' इति ।

सुशर्मा (ई० ४१, ५०)—सुष्ठु शृणोतीति विग्रहे सुपूर्वकात् शृधातोः 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्प्रत्यये अनुबन्धलोपे गुणे रपरत्वे 'नेड्वशि कृति' इतीड्निषेधे कृदन्तत्वात् सौ दीर्घे सुलोपे नलोपे 'सुशर्मा' इति निष्पन्नम् ।

अवावा (ई० ४९)—ओण्धातोः 'अन्येभ्योऽपि दृश्यन्ते' इति वनिपि 'विड्वनोः' इत्यात्वे अवादेशे 'अवावन्' इति तस्मात् सौ दीर्घे सुलोपे नलोपे 'अवावा' इति ।

उखास्रत् पर्णध्वत् (ई० २४)—उखायाः (पात्रात्) स्रंसते इति विग्रहे क्विपि 'अनिदिताम्—'इति नलोपे प्रातिपदिकत्वात् सौ पंचमीसमासे सुब्लुकि एकदेशकृतस्याऽनन्यत्वात् सो 'वसुस्रंसु–' इति दत्वे सुलोपे चर्त्वे तत्सिद्धिः । एवं पर्णाद् ध्वंसते इति 'पर्णध्वत्' ।

उष्णभोजी—उष्णं भुङ्क्ते तच्छीलः इति विग्रहे उष्णोपपदाद् भुज्धातोः 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिप्रत्यये लघूपधगुणे कर्मणि षष्ठ्यामुपप-दसमासे कृदन्तत्वात् 'सौ च' इति दीर्घे सुलोपे तत्सिद्धिः ।

दर्शनीयमानी । ४६ । दर्शनीयं मन्यते इति विग्रहे दर्शनीयोपपदात् मन-धातोः 'मनः' इति णिनिप्रत्ययेऽनुबन्धलोपे उपपदसमासे प्रातिपदिकत्वात् सौ उपधावृद्धौ दीर्घे सुलोपे दर्शनीयमानी इति सिद्धम् ।

पारदृश्वा । ५९ । पारं दृष्टवान् इति विग्रहे पारोपपदात् दृश धातोः 'दृशेः क्वनिप्' इत्यनेन क्वनिप् प्रत्यये सर्वापहारलोपे कर्मणि षष्ठ्यामुपपदसमासे सुब्लुकि ततो प्रातिपदिकत्वात् सौ 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घे सुलोपे नलोपे

पारदृश्वा इति सिद्धम् ।

राजयुध्वा । ६० । राजानं योधितवान् इति राजन् शब्दोपपदात् युध् धातोः 'राजनि युधि कृञः' इत्यनेन क्वनिप् प्रत्यये सर्वापहारलोपे उपपदसमासे कृदन्तत्वात्प्रातिपदिकसंज्ञायां सौ दीर्घे सुलोपे नलोपे राजयुध्वा इति सिद्धम् ।

उच्छूनः । ५५ । उत्पूर्वात् श्वि धातोः 'निष्ठा' इत्यनेन क्त प्रत्यये 'श्वीदितोः निष्ठायाम्' इत्यनेन इडभावे यजादित्वात् 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे पूर्वरूपे 'हलः' इति दीर्घे 'ओदितश्च' इत्यनेन निष्ठातकारस्य नत्वे प्रातिपदिककार्ये तकारस्य श्चुत्वे शस्य छत्वे कृते उच्छूनः इति सिद्धम् ।

पण्डितम्मन्यः (ई० ५१, ५३)—पण्डितमात्मानं मन्यते इति विग्रहे मनधातोः 'आत्ममाने खश्च' इति खशि शित्वात् सार्वधातुकसंज्ञायां शपि प्राप्ते तं प्रबाध्य 'दिवादिभ्यः श्यन्' इति श्यनि पररूपे कर्मषष्ठयामुपपदसमासे 'अरुर्द्विषदजन्तस्य मुम्' इति मुमि विभक्तिकार्ये उक्तं रूपं जातम् ।

सरसिजम्—सरसि जातमिति विग्रहे सप्तम्यन्तसरश्शब्दोपपदाज्जनधातोः 'सप्तम्यां जनेर्डः' इति डप्रत्यये डित्वाट्टिलोपे उपपदसमासत्वात् सप्तम्याः लुकि प्राप्ते 'तत्पुरुषे कृति बहुलम्' इति तन्निषेधे कृदन्तत्वात् सौ सोरमि पूर्वरूपे 'सरसिजम्' इति । लुकि तु रुत्वे गुणे 'सरोजम्' इति भवति ।

प्रजाः (ई० ४६)—'उपसर्गे च संज्ञायां' इति डप्रत्यये टिलोपे अदन्तत्वाट्टापि विभक्तिकार्ये 'प्रजाः' इति । 'प्रजा स्यात्सन्ततौ जने' इत्यमरः ।

स्तुतः (ई० ४४, ४७)—स्तुधातोः कर्मणि क्तः 'स्तुतः' इति ।

शीर्णः—शृधातोः कर्मणि 'निष्ठा' इति क्तप्रत्यये 'ॠत इद्धातोः' इति इत्वे रपरत्वे 'हलि च' इति दीर्घे 'रदाभ्याम्' इति नत्वे णत्वे विभक्तिकार्ये तत्सिद्धिः ।

भिन्नः छिन्नः (ई० ४४, ४६)—अभेदि इति भिन्नः । भिद्धातोः कर्मणि 'निष्ठा' इति क्तप्रत्यये कित्वाद् गुणाभावे 'रदाभ्यां' इति तकारस्य दकारस्य च नत्वे विभक्तिकार्ये तत्सिद्धिः । एवं छिद्धातोः 'छिन्नः' इति (ई० ५२) !

भुग्नः (इ० २३)—'भुज' धातोः भावे 'निष्ठा' इति क्तप्रत्यये 'चोः कुः', इति जस्य कुत्वे ततः 'ओदितश्च' इति निष्ठातस्य नत्वे विभक्तिकार्ये तत्सिद्धिः ।

शूनः—'टु ओश्वि धातोः 'निष्ठा' इति क्तप्रत्यये 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे पूर्वरूपे 'श्वीदितो निष्ठायाम्' इतीण्निषेधे 'हलः' इति दीर्घे 'ओदितश्च' इति निष्ठातकारस्य नत्वे श्चुत्वे छत्वे विभक्तिकार्ये तत्सिद्धिः ।

शुष्कः (ई० ४८)—अशुषत् इति 'शुष् धातोः कर्त्तरि क्तः 'शुषः कः' इति निष्ठातस्य कत्वे विभक्तिकार्ये तत्सिद्धिः ।

घ्राणः, ग्लानः (५३)—घ्राधातोः निष्ठायां क्तप्रत्यये 'संयोगादेरातो धातोर्यण्वतः' इति निष्ठातस्य नत्वे णत्वे विभक्तिकार्ये 'घ्राणः' इति । एवं ग्लै धातोः 'आदेच–' इत्यात्वे निष्ठातस्य नत्वे णत्वे स्वादिकार्ये 'ग्लानः' इति ।

जीनः (ई० ४२, ५०)—ज्याधातोः क्तप्रत्यये ज्या त इति स्थिते ,संयोगादेः–' इति प्राप्तनत्वस्याऽसिद्धत्वात् 'ग्रहिज्ये'ति सम्प्रसारणे पूर्वरूपे आतः परत्वाऽभावात् 'संयोगादेः' इत्यस्याप्राप्तया 'ल्वादिभ्यः' इति निष्ठातस्य नत्वे 'हलः' इति दीर्घे विभक्तिकार्ये 'जीनः' इति ।

प्रतिशीनः ई० ५१)—'प्रति' उपसर्गात् श्यैङ् धातोः 'आदेच उपदेशे–' इत्यात्वे क्तप्रत्यये 'प्रतेश्च' इति सम्प्रसारणे 'श्योऽस्पर्शे' इति निष्ठातस्य नत्वे विभक्तिकार्ये 'प्रतिशीन' इति ।

नुन्नः, विन्नः (४४, ४५)—नुद्धातोः नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्' इत्यनेन विभाषया निष्ठातस्य नत्वे नस्यानुस्वारे परसवर्णे विभक्तिकार्ये 'नुन्नः' इति । पक्षे 'नुत्तः' इति ! एवं विद्धातोः 'विन्नः' वित्तः' इति ।

मत्तः (ई० ४५) मदीधातोः क्तप्रत्यये 'श्वीदितो निष्ठायाम्' इतीडभावे चर्त्वे विभक्तिकार्ये 'मत्त' इति ।

मूर्त्तः—मूर्च्छाधातोः क्तप्रत्यये 'आचितश्च' इतीण्निषेधे 'राल्लोपः' इति छलोपे 'हलि च' इति दीर्घे 'रदाभ्याम्–' इति तस्य नत्वे प्राप्ते 'न ध्याख्यापॄमूर्च्छिमदाम्' इति निषेधे विभक्तिकार्ये 'मूर्तः' इति ।

स्फीतः (ई० ५२)—'स्फायी वृद्धौ' इति धातोः क्तप्रत्यये 'स्फायः स्फी निष्ठायाम्' इति 'स्फी' आदेशे विभक्तिकार्ये स्फीतः इति ।

अञ्चितः (ई० ४५)—पूजार्थकात्अञ्च्धातोः क्तप्रत्यये 'अञ्चेः पूजा-

याम्' इति इटि विभक्तिकार्ये 'अञ्चितः' इति। (गतौ तु 'अक्तः' इति।)

पवितः पूतः (ई० ४६)—पूङ्धातोः क्तप्रत्यये 'पूङश्च' इति वेटि इट्-पक्षे 'पूङः क्त्वा च' इति कित्त्वनिषेधे गुणेऽवादेशे विभक्तिकार्ये पवितः' इति इडभावे 'पूतः' इति।

हितम् (ई० ४९)—धाधातोः क्तप्रत्यये 'दधातेर्हिः' इति 'हि' आदेशे विभक्तिकार्ये 'हितम्' इति।

मुकुन्दस्यासितमिदमिदं यातम् रमापतेः।
भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः॥

'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' ध्रौव्यार्थेभ्यः, गत्यर्थेभ्यः प्रत्यवसानार्थेभ्यश्च धातुभ्यः अधिकरणेऽर्थे चकारात् यथाप्राप्त (भावादि) अर्थेऽपि क्तः स्यादित्यर्थः। अत्र ध्रौव्यं यथा—'मुकुन्दस्यासितमिदमिति'। आस्यतेऽस्मिन्निति आसनम्। गत्यर्थे यथा–'इदं यातं रमापतेः' यायते=गम्यते, अस्मिन्निति यातं—मार्गः! प्रत्यवसानार्थे यथा—'भुक्तमेतदनन्तस्य भुज्यतेऽस्मिन्निति भुक्तं भोजनस्थानमित्यर्थः। 'अधिकरणवाचिनश्च' इति त्रिष्वपि कर्तरि षष्ठी।

सुत्वा (ई० ५१)—सूधातोः भूतार्थे 'सुयजोर्ङ्वनिप्' इति ङ्वनिपि 'ह्रस्वस्य पिति–' इति तुकि सौ 'सर्वनामस्थाने–' इति दीर्घे हल्ङ्यादिलोपे 'न लोपः–' इति नलोपे 'सुत्वा' इति।

चक्राणः (ई० ५०)—कृधातोर्लिटि 'लिटः कानज्वा' इति लिटः कानचि द्वित्वेऽभ्यासत्वे उरदत्वे रपरत्वे हलादिशेषे चुत्वे यणि 'रषाभ्याम्–' इति णत्वे विभक्तिकार्ये चक्राणः' इति।

जक्षिवान् (ई० ४०)—अद्धातोर्लिटि 'क्वसुश्च' इति लिटः क्वसुप्रत्यये 'लिटयन्यतरस्याम्' इति अदेर्घस्लादेशे द्वित्वादिकार्ये 'जघस् वस्' इति स्थिते 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्युपधालोपे 'वस्वेकाजाद्घसाम्' इति इटि षस्य चर्त्वे सस्य षत्वे सौ 'उगिदचाम्–' इति नुमि 'सान्तमहत–' इति दीर्घे हल्ङ्यादिलोपे संयोगान्तलोपे 'जक्षिवान्' इति।

पचन्तं, पचमानं वा चैत्रं पश्य—पच्धातोर्लटि 'लटः शतृशानचावि'-ति लटो लः स्थाने शतृप्रत्यये शित्वात् सार्वधातुकसंज्ञायां शपि पररूपे कृदन्तत्वात्प्रातिपदिकसंज्ञायां द्वितीयैकवचने अमि उगित्वान्नुमि नस्यानुस्वारे परसवर्णे 'पचन्तम्' इति। शानच्पक्षे तु 'आनेमुक्' इति मुकि 'पचमानम्' इति।

सन् द्विजः—'वर्तमाने लट्' इत्यतो लडित्यनुवर्तमाने 'लटः शतृशानचावि' ति सूत्रे पुनर्लड्ग्रहणात् प्रथमासमानाधिकरणेऽपि क्वचित् शतृशानचोर्विधानात् अस्धातोर्लटः शतृप्रत्यये शपो लुकि 'श्नसोरल्लोपः' इत्यल्लोपे सौ नुमि सुलोपे संयोगान्तलोपे 'सन्' इति।

आसीनः (ई० ४८)—आङ्पूर्वादस्धातोर्लटि शानचि शपि शपो लुकि सवर्णदीर्घे 'आस् आन' इति जाते 'ईदासः' इति इत्वे विभक्तिकार्ये 'आसीनः' इति।

विद्वान् (ई० २६)—विद्धातो, लः शतरि 'विदेः शतुर्वसुः' इति विभाषया शतुर्वसुरादेशे शपो लुकि 'विद्वस्' इति तस्मात् सौ उगित्वान्नुमि 'सान्तमहतः–' इति दीर्घे हल्ङ्यादिलोपे संयोगान्तलोपे 'विद्वान्' इति। वस्वादेशाभावपक्षे लटः शतरि शपि शपो लुकि 'विद्वन्' इत्यस्मात् सौ नुमि सलोपे संयोगान्तलोपे 'विदन्' इति।

स्पृहयालुः, शयालुः (ई० ४५, ५२)—स्पृहिधातोः 'स्पृहिगृहिपति–' इति आलुचि गुणेऽयादेशे विभक्तिकार्ये 'स्पृहयालुः' इति। एवं शीङ्धातोः'शीङो-वाच्य' इति वार्तिकेन आलुचि गुणेऽयादेशे विभक्तिकार्ये 'शयालुः' इति।

जिष्णुः (ई० ४५)—जेतुं शीलः जिष्णुः। जिधातोः ग्लाजिस्थश्च ग्स्नुः इति ग्स्नुप्रत्यये सस्य षत्वे ष्टुत्वे विभक्तिकार्ये 'जिष्णुः' इति।

त्रस्नुः (ई० ४५)—त्रसितुं शीलः त्रस्नुः। 'त्रसिगृधिधृषिक्षिपेः क्नुः' इति त्रस्धातोः क्नुप्रत्यये विभक्तिकार्ये तत्सिद्धिः।

पातुकः (ई० ४२)—पतितुं शीलः पातुकः। पत्धातोः 'लषपतपद–' इति सूत्रेण उकञ्प्रत्यये 'अत उपधायाः' इति वृद्धौ विभक्तिकार्ये 'पातुकः' इति।

जल्पाकः (ई० ४८)—जल्पितुं शीलः जल्पाकः। जल्पधातोः 'जल्प-

भिक्ष–' इति षाकनि 'ष प्रत्ययस्ये'ति षस्येत्संज्ञायां लोपे च कृते सवर्णदीर्घे स्वादिकार्ये 'जल्पाकः' इति ।

चिकीर्षुः आशंसुः भिक्षुः (ई० ४०, ४९, ५३)—कर्तुमिच्छुः चिकीर्षुः । सन्नन्तात् चिकीर्षधातोः 'सनाशंसभिक्ष उः' इत्युप्रत्यये तस्यार्धधातुकत्वात् अतो लोपे स्वादिकार्ये तत्सिद्धिः ।

वराकः । ५९ ।—वृङ्धातोः 'जल्पभिक्षकुट्टलुण्ठवृङः षाकन्' इति सूत्रेण षाकननुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरे वराक् शब्दात् 'षिद्गौरादिभ्यश्च' इति ङीषि अनुबन्धलोपे भत्वे 'यस्येति, च' इत्यनेन अकारलोपे प्रातिपदिकत्वात् सौ सोर्लुकि वराकी । ङीषोऽभावे सौ रुत्वे विसर्गे वराकः इति सिद्धम् ।

स्थावरः । ५२ ।—स्थातुं शीलः स्थावरः । स्थाधातोः 'स्थेशभासपिसकसो वरच्' इति वरचि विभक्तिकार्ये 'स्थावरः' इति ।

यायावरः—याधातोः 'नित्यं कौटिल्येगतौ' इति यङि 'सन्यङोः' इति द्वित्वे अभ्यासत्वे अभ्यासस्य ह्रस्वे दीर्घादकितः इति अभ्यासस्य दीर्घे 'यश्चयङः' इति वरचि यायात्यवरं इति स्थिते 'अतो लोपः' इत्यल्लोपे यलोपे प्रातिपदिकत्वेन सौ रुत्वे विसर्गे यायावर इति सिद्धम् । न च अल्लोपस्य स्थानिवत्वात् लोपे न स्योदिति वाच्यम् 'न पदान्तेति' तन्निषेधात् । नचाल्लोपस्य स्थानिवत्त्वेन 'आतो लोपः' इति आकारलोपः कुतो नेति वाच्यम् 'वरे लुप्त न स्थानिवत्' इति निषेधेन आलोपाभावात् ।

प्राट्—पृच्छतीति 'प्राट्' । प्रच्छ्धातोः क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च' इति क्विपि दीर्घे सम्प्रसारणाऽभावे च विहिते स्विपो 'च्छ्वोः शूडनुनासिके च' इति छस्य शादेशे कृदन्तत्वात् सौ हल्ङ्यादिना सुलोपे 'व्रश्चभ्रस्ज–' इति षत्वे षस्य जश्त्वे चर्त्वे 'प्राट्' इति ।

दात्रम् (ई० ५०)—दान्त्यनेनेति दात्रम् । 'दाप् लवने' इति धातोः 'दाम्नीशस–' इति करणे ष्ट्रनि 'षप्रत्यस्य' इति षस्य 'हलन्त्यम्' इति नस्य चेत्संज्ञायां लोपे च विहिते विभक्तिकार्ये 'दात्रम्' इति ।

शस्त्रम् (ई० ४६)—शस्धातोः 'दाम्नीशस–' इति ष्ट्रनि अनुबन्धलोपे 'तितुत्रतथ–' इति इण्निषेधे विभक्तिकार्ये 'शस्त्रम्' इति ।

लवित्रं, खनित्रं अरित्रं चरित्रम् । ५२ ।—लुनात्यनेनेति विग्रहे 'लुञ् धातोः' 'अर्तिलूधूसूखनसहचर इत्रः' इति करणेऽर्थ इत्र प्रत्यये गुणेऽवादेशे स्वादि-कार्ये तत्सिद्धिः ।

पवित्रम् (ई० ४५)—पुनाति अनेनेति पवित्रम् । पूधातोः 'अर्तिलूधू' इति इत्र प्रत्यये गुणेऽवादेशे विभक्तिकार्ये 'पवित्रम्' इति ।

इति पूर्वकृदन्तप्रकरणम्

अथ उत्तरकृदन्तप्रकरणम्

संज्ञासु (ई० ४४, ४५)—'उणादयो बहुलम्' इत्युक्त्वा 'केचिदविहिता अप्यूह्याः' इत्युक्तं मूले, तदाह-संज्ञास्विति । संज्ञासु=संज्ञाशब्देषु डित्थ-डवित्था-दिषु धातुरूपाणि ततः परं प्रत्ययाश्च प्रत्ययेष्वपि गुणवृद्ध्यभावादिकार्यं दृष्ट्वा अनुबन्धम् = ञित्–कित्ङिदादि विद्यात्–एतत्–उणादिषु, शास्त्रम् = अनुशासन-मस्तीत्यर्थः । उदाहरणं यथा–'ऋफिड्डः' इति । अत्र ऋधातुः, प्रकृतिः, तस्मात् फिड्डः प्रत्ययः, ततो गुणाऽभावदर्शनात् प्रत्ययस्य कित्वमूह्यते ।

दाशः—दाश्धातोः दाशन्ति अस्मै इति विग्रहे 'दाशगोघ्नौ सम्प्रदाने' इति सूत्रेण निपातनात् क प्रत्यये अनुबन्धलोपे प्रातिपदिककार्ये दाशः इति सिद्धम् ।

द्रष्टुम् (ई० ४५)—दृश्धातोः 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति तुमुनि अनुबन्धलोपे 'सृजिदृशोर्झल्यमकिति' इति अमि 'दृ अ श् तुम्' इति स्थिते यणि षत्वे ष्टुत्वे 'द्रष्टुम्' इति ।

पाकः (ई० ४५, ४९)—पच्धातोः 'भावे' इति घञि अनुबन्धलोपे उप-धावृद्धौ 'चजोः कु घिण्ण्यतोः' इति चस्य कुत्वे विभक्तिकार्ये 'पाकः' इति ।

रागः (ई० ४१, ५०)—रञ्ज्धातोः 'अकर्तरि च कारके संज्ञायाम्' इति घञि अनुबन्धलोपे 'घञि च भावकरणयोः' इति रञ्जेर्नलोपे 'चजोः कु घिण्यतोः' इति जस्य कुत्वे उपधावृद्धौ विभक्तिकार्ये 'रागः' इति ।

निकायः (ई० ५३) – निपूर्वकात् चिधातोः 'निवासचितिशरीरोपसमा'– इति घञि चस्य कत्वे अनुबन्धलोपे वृद्धौ आयादेशे विभक्तिकार्ये 'निकायः' इति ।

पक्त्रिमम् उप्त्रिमम् (ई० ४९) – पाकेन निर्वृत्तं 'डुपचष् पाके' इति धातोः 'पापेन निर्वृत्तम्' डुवप् बीजसन्ताने' इत्यस्माद्धातोः 'ड्वितः क्त्रि' इति क्त्रौ 'क्त्रेर्मम्नित्यम्' इति निवृत्तेर्थे मपि अनुबन्धलोपे विभक्तिकार्ये पक्त्रिमम् इति सिद्धम् । 'वचिस्वपि–' इति सम्प्रसारणे पूर्वरूपे विभक्तिकार्ये उप्त्रिमम् इति ।

वेपथुः (ई० ५२)—'टुवेपृ कम्पने' इति धातोः 'ट्वितोऽथुच्' अनुबन्धलोपे विभक्तिकार्ये तत्सिद्धिः ।

यज्ञः । ४६ ।—यज्धातोः 'यजयाचयतविच्छप्रच्छरक्षो नङ्' इति नङि अनुबन्धलोपे नस्य श्चुत्वेन ञकारे विभक्तिकार्ये 'यज्ञः' इति ।

उपाधिः । ४८ । – उपाधीयतेऽनेनेति 'उपाधिः' । उप-आङ् पूर्वकात् घुसंज्ञकधातोः 'उपसर्गे घोः किः' इति किप्रत्यये कित्वात् 'आतो लोपः' इत्यालोपे विभक्तिकार्ये 'उपाधिः' इति ।

कीर्णिः—कॄधातोः 'स्त्रियां क्तिन्' इति क्तिनि अनुबन्धलोपे 'ॠत इद्धातोः' इतीत्वे रपरत्वे 'हलि चे'ति दीर्घे 'ॠल्वादिभ्यः' क्तिन्निष्ठावद्वाच्यः' इति निष्ठावद्भावात् तस्य नत्वे णत्वे विभक्तिकार्ये 'कीर्णिः' इति ।

लूनिः—लू धातोः 'स्त्रियां क्तिन्' इति क्तिनि 'ॠल्वादिभ्यः' स्त्रियां क्तिन्निष्ठावद् वाच्यः' इति वार्तिकनवलात् निष्ठा तत्वे प्रातिपदिककार्ये लूनिः इति सिद्धम् ।

ऊतियूति—एते स्त्रियां क्तिन्नन्ताः निपात्यन्ते । 'अव रक्षणे' इति धातोः' क्तिनि तस्य निपातनादुदात्तत्वे 'ज्वरत्वर–' इत्यकारवकारयोरूटि 'ऊतिः' इति । युधातोर्जुधातोर्वा क्तिनि निपातनाद्दीर्घे यूतिः' जूतिरिति च । 'षोऽन्तकर्मणि

इत्यस्मात् क्तिनि 'धात्वादेः' इति सत्वे 'आदेच उपदेशेऽशिति' इत्यात्वे 'द्यति-स्यति, इतीत्वे प्राप्ते निपातनात्तदभावे सातिरिति, अथवा सन् धातोः क्तिनि 'जनसन' इत्यात्वम् । हनः क्तिनि नकारस्य निपातनादित्वे 'आद्गुणः' इतिगुणे हेतिरिति । अथवा हिधातोः क्तिनि निपातनाद् गुणः । ण्यन्तकृतधातोः ण्यास-श्रन्थो युच् इति युचं प्रबाध्य निपातनात् क्तिनि इत्वे रपरत्वे दीर्घे 'झरो झरि' इति तलोपे कीर्तिरिति ।

चिकीर्षा (ई० २७)—सन्नन्तात् 'चिकीर्ष' धातोः 'अप्रत्ययात्' इत्यप्रत्यये 'अतो लोपः' इति सनोऽकारलोपे कृदन्तत्वात्प्रातिपदिकत्वेन स्त्रीत्वे टापि सवर्ण-दीर्घे हल्ङ्यादिना सुलोपे उक्तं रूप सिद्धम् ।

कारणा (ई० ४६, ५१)—कृधातोर्णिचि वृद्धौ 'कारि' इत्यस्मात् 'ण्यास-श्रन्थो युच्' इति युचि योरनादेशे णिलोपे णत्वे टापि विभक्तिकार्ये तत्सिद्धिः ।

हसितम् (ई० ४५)—हस्धातोः 'नपुंसके भावे क्तः' इति क्तप्रत्यये इटि स्वादिकार्ये 'हसितम्' इति ।

अवतारः, अवस्तारः (ई० ४९, ५०)—उभयत्र 'अवे तृस्त्रोर्घञ्' इति घञि वृद्धौ रपरत्वे स्वाद्युत्पत्तिः ।

अपामार्गः (ई० ४८, ५२)—अपपूर्वान्मृज्धातोः 'हलश्च' इति घञि 'मृजेर्वृद्धिः' इति वृद्धौ 'चजोः कु—' इति कुत्वे 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घे विभक्तिकार्ये उक्तं रूपं सिद्धम् ।

दुष्करः—दुस्पूर्वात् कृञ् धातोः 'ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इति खलि अनुबन्धलोपे गुणे रपरे 'इदुदुपधस्य चाप्रत्ययस्य' इति सस्य षत्वे कृदन्त-त्वात् सौ सस्य रुत्वे विसर्गे उक्तं रूपं सिद्धम् ।

सुपानः दुष्पानः (ई० ४५, ५१)—सुष्ठु पीयते इति सुपानः । सुपूर्वकात् पाधातोः 'ईषद्दुस्सुषु-' इति प्राप्तं खलं प्रबाध्य 'आतो युक्' इति युकि अनुबन्ध-लोपे 'युवोरनाकौ' इति योरनादेशे सवर्णदीर्घे विभक्तिकार्ये 'सुपानः' इति ।

पीत्वा, खलु (ई० ४६)—पाधातोः 'अलं खल्वोः प्रतिषेधयोः प्राचां

क्त्वा' इति क्त्वाप्रत्यये 'घुमास्था-' इतीत्वे अव्ययत्वात् सुब्लुकि 'पीत्वा' खलु इति।

लिखित्वा—लिख्धातोः क्त्वाप्रत्यये इटि 'रलोव्युपधाद्धलादेः संश्च' इति वैकल्पिके कित्वे गुणनिषेधे लिखित्वा पक्षे गुणे 'लेखित्वा' इति सिद्धम्।

शमित्वा (२५)—शम्धातोः क्त्वाप्रत्यये 'उदितो वा' इति विभाषया इटि प्रातिपदिकत्वात् सौ 'क्त्वातोसुन्-' इत्यव्ययत्वात् सुब्लुकि 'शमित्वा' इति। इडभावपक्षे 'अनुनासिकस्य क्विझलोः क्ङिति' इत्वात्त्वे अनुस्वारे परसवर्णे 'शान्त्वा' इति भवति।

हित्वा (ई० ४५, ५०)—धाधातोः 'समानकर्तृकयोः-' इति क्त्वाप्रत्यये अनुबन्धलोपे 'दधातेर्हिः' इति धास्थाने 'हि' इत्यादेशे प्रातिपदिकत्वात् सौ अव्ययत्वात् सुब्लुकि 'हित्वा' इति। 'ओहाक् त्यागे' इत्यस्य क्त्वायां तु 'जहातेश्च' इत्यनेन हित्वं बोध्यम्। 'ओहाङ् गतौ इति धातोः क्त्वायां तु 'हात्वा' इति भवति। अत्र 'जहातेश्च' इति हित्वं तु न सूत्रे जहातेरिति निर्देशात्।

प्रकृत्य। ४४। प्रपूर्वकात् कृधातोः 'समानकर्तृकयोः-' इति क्त्वा प्रत्यये 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति सूत्रेण क्त्वा इत्यस्य स्थाने ल्यपि अनुबन्धलोपे 'ह्रस्वस्य पिति कृति तुक्' इत्यनेन तुकि प्रातिपदिककार्ये प्रकृत्य इति सिद्धम्।

स्मारं स्मारं नमति शिवम्। ४५। स्मृत्वा स्मृत्वा इति विग्रहे स्मृधातोः 'आभीक्ष्ण्ये णमुल् च' इत्यनेन णमुल् प्रत्ययेऽनुबन्धलोपे 'अचोञ्णिति' इति वृद्धौ 'नित्यवीप्सयोः' इत्यनेन द्वित्वे कृदन्तत्वात् प्रातिदिकत्वेन सौ तस्य 'कृन्मेजन्तः' इति अव्ययत्वेन 'अव्ययादाप् सुपः' इति सोर्लुकि मस्यानुस्वारे स्मारं स्मारं इति।

इत्थङ्कारं भुङ्क्ते। ५६। इत्थं कृत्वा भुङ्क्ते इत्थमित्यस्य योगे 'अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्' इति कृधातोः णमुल् प्रत्ययेऽनुबन्धलोपे वृद्धौ रपरे मस्यानुस्वारे परसवर्णे विभक्तिकार्ये इत्थङ्कारं भुङ्क्ते इति सिद्धम्।

यावज्जीवमधीते (ई० ४०)—'यावति विन्दजीवयोः' इति सूत्रेण

यावच्छब्दे उपपदे जीवधातोर्णमुलि सुब्लुकि विभक्तिकार्ये स्वुत्वे 'यावज्जीवम्' इति।

समूलकाषं कषति (ई० ४२)—'निमूलसमूलयोः कषः' इति सूत्रेण समूलमिति कर्मण्युपपदे कष्धातोर्णमुलि सुब्लुकि वृद्धौ स्वादिकार्ये 'समूलकाषम्' इति।

पादघातं हन्ति (ई० ४१)—पादेन हन्तीत्यर्थे 'करणे हनः' इति हन्धातोर्णमुलि सुब्लुकि 'पन्तोः–' इति तकारान्तादेशे 'हो हन्तेः–' इति ह्रस्य घत्वे उपधावृद्धौ विभक्तिकार्ये उक्तं रूपं जातम्।

धनपोषम् (ई० ४१)—धनेन पुष्णातीत्यर्थे करणोपपदात् पुष्धातोः 'स्वे पुषः' इति णमुलि सुब्लुकि 'पुगन्त-' इति गुणे विभक्तिकार्ये उक्तं रूपं सिद्धम्।

इति उत्तरकृदन्तप्रकरणम्

अथ विभक्त्यर्थप्रकरणम्

प्रातिपदिकार्थेति—प्रातिपदिकार्थश्च लिङ्गञ्च, परिमाणञ्च, वचनञ्च प्रातिपदिकार्थलिङ्गपरिमाणवचनानि तान्येव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रं तस्मिन्। 'द्वन्द्वादौ द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति न्यायात् मात्रपदस्य प्रत्येकं सम्बन्धः। तेन प्रातिपदिकार्थमात्रे, लिङ्गमात्रे इत्याद्यर्थलाभः। जातिद्रव्यलिङ्गसङ्ख्याकारकाणि एतत्पञ्चकं प्रातिपदिकार्थः इति पक्षे लिङ्गग्रहणमैयर्थ्यात्—नियता उपस्थितिः यस्य स नियतोपस्थितिकः। अर्थात् यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेन भानं स प्रातिपदिकार्थः इति तदर्थः।

प्रातिपदिकार्थमात्रे' इत्यस्योदाहरणम् उच्चैः, नीचैः, कृष्णः, श्रीः, ज्ञानम् इत्यादि। अव्यये कस्यापि लिङ्गस्यानुपस्थितिरिति अव्ययम्—'प्रातिपदिकार्थमात्रस्योदाहरणं युक्तम्। एवं वासुदेवनामककृष्णशब्दे पुंस्त्वस्य, श्रीशब्दे स्त्रीत्वस्य ज्ञानशब्दे नपुंसकत्वस्य च नियमेन भानमस्ति, तेषां नियतलिङ्गत्वेन प्रातिपदि-

कार्थान्तर्भावात् 'प्रातिपदिकार्थमात्रे' इत्यस्योदाहरणं निर्बाधमेवेति ।

'लिङ्गमात्राद्याधिक्ये' इत्यस्योदाहरणं तटः, तटी, तटम् इत्यादि । 'तटं त्रिषु' इत्यमरकोशादत्र लिङ्गानामनियतोपस्थितिकतया प्रातिपदिकार्थानन्तर्भावात् लिङ्गमात्राद्याधिक्यस्योदाहरणम् ।

'परिमाणमात्रे' इत्यस्योदाहरणं 'द्रोणो व्रीहिः' इत्यत्र 'द्रोणः' इति । अत्र द्रोणपदात् द्रोणत्वद्रोणपुंस्त्वार्थानां नियमेनोपस्थित्या प्रातिपदिकार्थत्वेऽपि परिमाणत्वेन परिमाणस्य नियमेनानुपस्थितेः प्रातिपदिकार्थत्वाऽभावेन परिमाणरूपेऽर्थे परिमाणग्रहणेन प्रथमा । तथा च द्रोणपदेन द्रोणत्वाच्छिन्नद्रोणस्योपस्थित्या तस्य सुप्रत्ययार्थपरिमाणार्थेन 'सामान्यविशेषयोरभेदेनान्वयः' इति व्युत्पत्त्याऽभेदान्वये सुप्रत्ययार्थपरिमाणस्य व्रीहिपदेनोपस्थितव्रीह्यर्थे इत्यादाविव आकांक्षामत्रास्य परिच्छेद्यपरिच्छेदकभावसम्बन्धेनान्वयः इति 'द्रोणरूपं यत् परिमाणं तत्परिच्छिन्नो व्रीहिः' इत्यर्थः । द्रोणपदात् प्रातिपदिकार्थमात्रे प्रथमा प्रवृत्तौ तु 'नामार्थयोरभेदादतिरिक्तसम्बन्धोऽव्युत्पन्नः' इति व्युत्पत्त्या द्रोणव्रीहिपदार्थयोरभेदेनैवाऽन्वयः स्यादिति द्रोणाऽभिन्नो व्रीहिरित्यनिष्टार्थापत्तिरिति ।

'संख्यामात्रे' इत्यस्योदाहरणम् 'एकः, द्वौ, बहवः' इत्यादि । नन्वत्र एकत्वद्वित्वबहुत्वानां नियमेनोपस्थित्या 'प्रातिपदिकार्थे' इत्येव सिद्धे सूत्रे वचनग्रहणं व्यर्थमिति, चेन्न प्रकृतिभिरेव एकत्वादीनामुक्तत्वात् । 'उक्तार्थानामप्रयोगः' इति न्यायेन प्रथमाविभक्तेरप्राप्तौ तदर्थं वचनग्रहणस्यावश्यकत्वात् । इति प्रथमा ।

कर्तुरीप्सिततमं कर्म (ई० ४८)—अत्र 'कारके' इत्यनुवृत्तं प्रथमया विपरिणम्यते । आप्तुमिष्यमाणम्-ईप्सितम्, अतिशयेन ईप्सितम्-ईप्सिततमम् । धातूपात्तव्यापाराश्रयः कर्ता । केनाप्तुमित्याङ्क्षायां कर्तुर्विशेषणीभूतव्यापारेणेत्यर्थाल्लभ्यते । ततश्च 'कर्तुः क्रिययाऽऽप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्' इति सूत्रार्थः सम्पद्यते । यथा 'हरिं भजति' इति । पूजादिव्यापारेण हरिं तोषयतीत्यर्थः कर्तृनिष्ठपूजनादिव्यापारप्रयोज्यतुष्टिरूपफलाश्रयत्वात् हरिः कर्म ।

गां दोग्धि पयः (ई० ४२, ४९)—'गोः पयो दोग्धि' इति अत्र 'गोः'

अपादानत्वाऽविवक्षया कर्मत्वविवक्षायाम् 'अकथितं च' इति कर्मसंज्ञायां द्वितीया भवति ।

गर्गान् शतं दण्डयति (ई० ५३)—गर्गेभ्यः सुवर्णशतं गृह्णातीत्यर्थः । अत्र गर्गेभ्यः' इत्यत्र अपादानत्वमनादृत्य कर्मत्वविवक्षायाम् 'अकथितं च' इति कर्मसंज्ञायां द्वितीयेति बोध्यम् ।

बलिं भिक्षते वसुधाम्—'अकथितं चे'ति सूत्रे 'अर्थनिबन्धनेयं संज्ञे'ति कैयटादिभिर्व्याख्यातत्वेन दुह्याद्यर्थकधात्वन्तरयोगेऽपि द्विकर्मत्वं लभ्यते, ततश्चात्र याचनार्थक 'भिक्ष' धातुयोगेऽपि बलेरपादानत्वाऽविवक्षया कर्मत्वविवक्षायां कर्मत्वाद् द्वितीया भवति ।

कुरून् स्वपिति, क्रोशमास्ते (ई० ५२)—कुरुषु निद्रां करोतीत्यर्थः । कुर्वादिशब्दा स्वभावान्नित्यबहुवचनान्ताः । अत्र 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' इति वार्तिकेन कर्मत्वात् द्वितीयेति ।

हृक्रोरन्यतरस्याम् (ई० ५१)—हृकोरणौ यः कर्ता, स णौ वा कर्म स्यादिति सूत्रार्थः । 'हारयति कारयति वा भृत्यं भृत्येन वा कटम्' इत्युदाहरणम् । 'हरति, करोति वा कटं भृत्यः, तं हारयति, कारयति वेत्यर्थः । अत्र प्रयोज्यकर्तु-भृत्यस्य कर्मत्वविकल्पः ।

अधिशीङ्स्थासां कर्म (ई० ४७)—'अधिपूर्वाणामेषां (शीङ्,स्था-आस् धातूनाम्) आधारः कर्म स्यात्' इति सूत्रार्थः । 'अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरि' इत्युदाहरणम् । अधिस्त्वत्र सप्तम्यर्थस्याधारस्य द्योतकः । वैकुण्ठे शेते, तिष्ठति, आस्ते वा हरिरित्यर्थः ।

अभिनिविशते सन्मार्गम् (ई० ४९)—अत्र 'अभिनिविशश्च' इत्यनेन अभिनीत्येतत्संघातपूर्वस्य विशतेराधारस्य 'सन्मार्गे' इत्यत्र कर्मत्वात् द्वितीया भवति ।

पापेऽभिनिवेशः (ई० ५२)—'अभिनिविशश्चे'ति सूत्रे 'परिक्रयणे सम्प्र-दानम्' इति सूत्रात् मण्डूकप्लुत्या अन्यतरस्यां ग्रहणानुवर्तनात् अत्र अभिनीत्येत-

त्संघातपूर्वकस्य 'पापे' इत्यस्य कर्मसंज्ञा न भवति ।

उपान्वध्याङ्वसः (ई० ४७, ४८)—उप, अनु, अधि, आङ् पूर्वस्य वसतेराधारः कर्म स्यादिति सूत्रार्थः । 'उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः' इत्युदाहरणम् । अत्रोपसर्गाः आधारद्योतकाः 'वैकुण्ठे वसति' इत्यर्थः ।

उभसर्वतसोः (ई० २६)—उभशब्द—सर्वशब्दप्रकृतिकतसन्तयोः प्रयोगे द्वितीया कार्या, धिक्शब्दस्य प्रयोगे द्वितीया कार्या, आम्रेडितान्तेषु (कृतद्विर्वचनेषु) उपर्यादिषु=उपरि-अधि-अधस्-इत्येषु त्रिषु प्रयुज्यमानेषु द्वितीया कार्या, ततः उक्तप्रदेशेभ्योऽन्यत्रापि=अभितः, परितः, समया निकषा, हा, प्रति, योगेऽपि द्वितीया कार्येत्यर्थः ।

ग्रामं समया, निकषा लङ्काम् (ई० ४८, ४९)—ग्रामस्य समया (समीपे) इत्यर्थः । अत्र 'समया' योगे ग्रामस्येत्यत्र 'अभित-परितः–' इति कर्मत्वाद् द्वितीया भवति । 'निकषा' इत्यस्य अन्तिके इत्यर्थः ।

अन्तरेण हरिं न सुखम् (ई० ४१)—अत्र 'अन्तराऽन्तरेण युक्ते' इति सूत्रेण 'अन्तरेण' इत्यव्यययोगात् हरिशब्दाद् द्वितीया भवति ।

जपमनुप्रावर्षत् (ई० ४०)—कदा पर्जन्योऽवर्षदिति प्रश्ने उत्तरमिदम् । अत्र 'अनुर्लक्षणे' इति सूत्रेण कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' इति द्वितीया भवति । सम्बन्धश्चात्र लक्ष्यलक्षणभावः ।

वृक्षं वृक्षं प्रति, परिअनु वा विद्योतते विद्युत् (ई० ४,)—लक्ष्यलक्षणभावसम्बन्धो द्वितीयार्थः,स च प्रत्ययार्थविद्योत्यः वृक्षेण लक्ष्यमाणा विद्युत् विद्योतते इत्यर्थः । अत्र 'लक्षणेत्थम्भूताख्यान–' इति सूत्रेण लक्षणेऽर्थे कर्मप्रवचनीयसंज्ञायां सत्यां कर्मप्रवचनीययोगे द्वितीया भवति ।

कालाध्वनोरत्यन्तसंयोगे (ई० ४८)—कालाध्वनोः अत्यन्त (अविच्छिन्न) संयोगे गम्ये द्वितीया स्यादित्यर्थः । 'मासं कल्याणी' इत्याद्युदाहरणम् । त्रिंशद्दिनात्मको मासः, तस्मिन्नविच्छिन्नमङ्गलवान् भवतीत्यर्थः ।

मासमधीते (ई० ५३)—त्रिंशद्दिनात्मके प्रतिदिनमुचितकाले निरन्तर-

मधीत इत्यर्थः। अत्र 'कालाध्वनोः—'इति सूत्रेण द्वितीया भवति। इति द्वितीया।

साधकतमं करणम् (ई० ५०)—क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यादित्यर्थः। यथा 'रामेण बाणेन हतो बाली'। रामकर्तृकबाणकरणकहिंसाक्रियाविषयो,वालीत्यर्थः। अत्र हननक्रियायां रामस्य स्वातन्त्र्यविवक्षया 'स्वतन्त्रः कर्ते'ति कर्तृसंज्ञा, बाणस्य च हननक्रियायामत्यन्तोपकारकत्वात् 'साधकतमं करणम्' इत्यनेन करणसंज्ञा। उभयत्र 'कर्तृकरणयोस्तृतीया' इत्यनेन तृतीयायां रूपं सिद्धम्।

गोत्रेण गार्ग्यः (ई० ४८, ५०)—गर्गः गोत्रमस्य अत्र प्रथमा प्राप्ता ताम्प्रबाध्य 'प्रकृत्यादिभ्य उपसंख्यानम्' इति वार्तिकेन तृतीया।

समेनैति (ई० ५२)—समं गमनं करोतीत्यर्थः। क्रियाविशेषणमेतत्। कर्मणि द्वितीया प्राप्ता ताम्प्रबाध्य 'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया भवति।

अक्षैरक्षान् वा दीव्यति (ई० ४०)—अत्र 'दिवः कर्म च' इत्यनेन कर्मसंज्ञा चात् करणसंज्ञा च भवति।

सहयुक्तेऽप्रधाने (ई० ५२)—सहार्थेन युक्तेऽप्रधाने तृतीया स्यादित्यर्थः। 'पुत्रेण सहागतः पिता' इत्युदाहरणम्। पितुरत्रागमनक्रियासम्बन्धः शाब्दः। पुत्रस्य तु तत्सहात्यगम्य आर्थ इति तस्याऽप्राधान्यम्।

येनाङ्गविकारः। ५०।—येनाङ्गेन विकृतेन अङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यादित्यर्थः। 'अक्ष्णा काणः' इत्युदाहरणम्। अक्षिसम्बन्धिकाणत्ववानित्यर्थः।

अपवर्गे तृतीया। ५३।—अपवर्गः=फलप्राप्तिः, तस्या द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यादित्यर्थः। 'अह्ना क्रोशेन वाऽनुवाकोऽधीतः' इत्युदाहरणम्।

इत्थंभूतलक्षणे।५३।—अयं प्रकारः इत्थं, भूतः=प्राप्तः—इत्थंभूतः। लक्षणं ज्ञापकम्। तदाह मूले—कञ्चित् प्रकारं प्राप्तस्य लक्षणे तृतीया स्यादिति-'जटाभिस्तापस' इत्युदाहरणम्। लक्ष्यलक्षणभावोऽत्र तृतीयार्थः। जटाज्ञाप्य-

तापसत्वविशिष्ट इत्यर्थः । इति तृतीया ।

कर्मणा यमभिप्रैति० (ई० ५२)—दानक्रियाकर्मणा कर्त्ता यमभिप्रैति= सम्बध्नाति, सम्बन्धुमीप्सति वा, तत्कारकं सम्प्रदानसंज्ञकमित्यर्थः ।

सम्यक् प्रदीयतेऽस्मै तत् सम्प्रदानम् । स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापारः दाधात्वर्थः । अत एव 'रजकस्य वस्त्रं ददाति' इत्येव ।

विप्राय गां ददाति (ई० ४९)—अत्र देवदत्तादिः कर्त्ता दानस्य कर्मणा गवा विप्रं सम्बन्धुमिच्छतीति 'कर्मणा यमभिप्रैति–' इति सूत्रेण विप्रस्य सम्प्रदानसंज्ञायां 'चतुर्थी सम्प्रदाने' इति चतुर्थी भवति ।

पत्ये शेते (ई० ४२)—पतिः शेतामिति शेते इत्यर्थः । अत्र 'क्रियया यमभिप्रैति–' इति वार्तिकेन सम्प्रदानत्वात् चतुर्थी भवति ।

शताय परिक्रुतः (ई० ४७)—अत्र 'परिक्रयणे सम्प्रदानमन्यतरस्याम्' इति सूत्रेण सम्प्रदानत्वात् चतुर्थी भवति ।

उत्पातेन ज्ञापिते च (ई० ४९, ५२)—आकस्मिकः शुभाशुभसूचको भूतविकारविशेषः उत्पातः, तेन सूचितेऽर्थे विद्यमानाच्चतुर्थीत्यर्थः । यथा 'वाताय कपिला विद्युत्' ।

अग्नये स्वाहा (ई० ५०)—'नमः स्वस्तिस्वाहा' इति सूत्रेणात्र चतुर्थी भवति । इति चतुर्थी ।

ध्रुवमपायेऽपादानम् (ई० ५१)—अपायो विश्लेषः=विभागः तस्मिन् साध्ये ध्रुवमवधिभूतमपादानं स्यादित्यर्थः । ग्रामादायातीत्युदाहरणम् । अत्र कस्मादायातीत्याकांक्षाविषयत्वात् ग्रामोऽवधिरिति अपादानत्वात् पञ्चमी भवति ।

ध्रुवत्वन्तु—'प्रकृतधात्वर्थाऽनाश्रयत्वे सति तज्जन्यविभागाश्रयत्वम्' इति ।

अपादानन्तु–'विभागजनकव्यापारानाश्रयत्वे सति विभागाश्रयत्वम्' इति ।

जनिकर्तुः प्रकृतिः । ४९ ।—जननं जनिः = उत्पत्तिः । जनेः कर्तेति षष्ठ्या समासः । प्रकृतिः हेतुः । जायमानस्य हेतुरपादानं स्यादित्यर्थः । 'ब्रह्मणः प्रजाः प्रजायन्ते' इत्युदाहरणम् ।

आसनात् प्रेक्षते (ई० ४१, ५३)—आसने उपविश्य प्रेक्षते इत्यर्थः ।

अत्र 'ल्यब्लोपे कर्मण्यधिकरणे च' इति वार्तिकेन पञ्चमी भवति ।

धूमादग्निमान् (ई० ४२)—'विभाषा गुणेऽस्त्रियाम्' इति सूत्रे विभाषेति योगविभागसामर्थ्याद् धूमस्य अग्निज्ञानहेतुत्वात्तत्र धूमस्य अगुणत्वेऽपि हेतुत्वात् पञ्चमीति ।

नास्ति घटोऽनुपलब्धेः (ई० ४०)—उपलब्धिः=ज्ञानम्, तस्याः अभावः अनुपलब्धिः, तस्या अनुपलब्धेः नास्ति घटः इति ज्ञायत इति शेषः 'विभाषा गुणेऽस्त्रियाम्'इति सूत्रे विभाषेति योगविभागादत्र स्त्रियां च पञ्चमी सिद्धयति ।

पृथग् रामेण (ई० ५१)—'पृथग्विनानाना–' इति सूत्रेण तृतीया ।

अप हरेः, परि हरेः (ई० ४१, ५२) उभयत्र 'अपपरी वर्जने इति' कर्मप्रवचनीयसंज्ञायां 'पञ्चम्यपाङ्परिभिः इति सूत्रेण पञ्चमी भवति ।

आमुक्तेः संसारः । ५२ ।—अत्र आङ्मर्यादावचने' इत्यनेन कर्मप्रवचनीयसंज्ञायां 'पञ्चम्यपाङ् परिभिः' इति सूत्रेण पञ्चमी भवति ।

तिलेभ्यः प्रतियच्छति माषान् (ई० ४४)—अत्र 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति सूत्रेण कर्मप्रवचनीयत्वे 'प्रतिनिधिप्रतिदाने च यस्मात्'इति पञ्चमी ।

एधो दकस्योपस्कुरुते—एधः = काष्ठं, दकस्य = उदकस्य- उपस्कुरुते = गुणमाधत्ते इत्यर्थः' । 'षष्ठी शेषे' इत्यनेनात्र षष्ठी ।

कर्तृकर्मणोःकृति । ५२ ।—कृद्योगे कर्तरि कर्मणि च षष्ठी स्यादित्यर्थः । कर्तरि यथा 'कृष्णस्य कृतिः' इति । द्वितीयं तु 'जगतः कर्ता कृष्णः' इति ।

उभयप्राप्तौ कर्मणि (ई० ५०, ५३)—उभयोः =कर्तृकर्मणोः, प्राप्तिर्यस्मिन् कृति तत्र कर्मण्येव षष्ठी स्यादित्यर्थः । 'आश्चर्यो गवां दोहोऽगोपेन' इत्युदाहरणम् ।

कृत्यानां कर्त्तरि वा (ई० ४७, ४९, ५१) –कृत्यसंज्ञकप्रयोगे कर्तरि षष्ठी वा स्यादित्यर्थः । 'मया मम वा सेव्यो हरिः' इत्युदाहरणम् ।

राज्ञां मतः । ५३ ।—'न लोके'ति निषेधं प्रबाध्य 'क्तस्य च वर्तमाने' इत्यनेनात्र षष्ठी ।

लक्ष्म्याः कामुकः (ई० ४०)—अत्र 'कमेरनिषेधः' इतिवार्तिकप्रतिप्रस-

वात् 'न लोकाव्यय–' इति षष्ठीनिषेधो न भवति ।

मुरस्य मुरं वा द्विषन् (ई० ५२)—अत्र 'द्विषः शतुर्वा' इति वार्तिकेन विभाषया षष्ठीनिषेधः ।

व्रजंगामी (ई० ५१)—अत्र अकेनोर्भविष्यदाधमर्ण्ययोः इति सूत्रेण षष्ठी निषेधः इति षष्ठी ।

एनपा द्वितीया (ई० ४८, ४९)—एनबन्तेन योगे द्वितीया स्यादित्यर्थः । 'दक्षिणेन ग्रामं ग्रामस्य वा' इत्युदाहरणम् । 'एनपे' ति योगविभागादत्र षष्ठ्यपि । इति षष्ठी ।

आधारोऽधिकरणम् (ई० ५०, ५३)—कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यादित्यर्थः । आध्रियतेऽस्मिन्नित्याधारः । स च औपश्लेषिको वैषयिकोऽभिव्यापकश्चेति त्रिधा । उपसमीपे श्लेषः = सम्बन्धः उपश्लेषः, तत्कृतमौपश्लेषिकम् । तथा 'कटे आस्ते' । विषये भवो वैषयिकः यथा 'मोक्षे इच्छास्ति' इति । अभि = सर्वतो भावेन, व्याप्नोतीति अभिव्यापकः यथा 'सर्वस्मिन्नात्मास्ति' इति । सर्वस्मिन्नभिव्याप्य आत्मा वर्तत इत्यर्थः ।

कटे आस्ते । अत्र कटस्याधिकरण संज्ञायाम् सप्तम्यधिकरणे इति सप्तमी ।

असाधुर्मातुले (ई० ४१)—अत्र शेषे षष्ठीं प्रबाध्य 'साध्वसाधुप्रयोगे च' इतिं वार्तिकेन सप्तमी ।

केशेषु चमरीं हन्ति (ई० ४७)—केशनिमित्तं चमरीं हन्तीत्यर्थः । अत्र 'निमित्तात् कर्मयोगे' इत्यनेन सप्तमी भवति ।

अधीती व्याकरणे—अत्र अधिपूर्वादिङ्धातोः क्ते कृते 'इष्टादिभ्यश्च' इति इनि प्रत्यये कर्मविशेषजिज्ञासायां व्याकरणं कर्मत्वेनान्वेति इति द्वितीयां प्राप्तायां क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् इति सप्तमी ।

यस्य च भावेन भावलक्षणम् । ५२ ।—यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यादित्यर्थः । 'गोषु दुह्यमानासु गतः' इत्युदाहरणम् ।

षष्ठी चानादरे । ५२ ।—चात् सप्तमीत्यनुगृह्यते, अनादरे इति विषयसप्तमी, 'यस्य चे'ति पूर्वसूत्रमनुवर्तते । अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ

स्तः इति वृत्तिः । अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततः षष्ठी सप्तमी चेत्यर्थः । 'रुदति रुदतो वा प्राव्राजीत्' इत्युदाहरणम् ।

यतश्च निर्धारणम् (ई० ४८, ५०, ५२)—जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम्, यतस्ततः षष्ठीसप्तम्यौ स्तः इत्यर्थः । 'गवां गोषु वा कृष्णा गौर्बहुक्षीरा' इत्याद्युदाहरणम् ।

मातरि साधुः (ई० ५१)—अत्र 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' इति सप्तमी ।

अधि भुवि रामः, अधि रामे भूः (ई०, ४३)—यस्मादधिकं यस्य चेश्वरवचं तत्र सप्तमी' इति ऐश्वर्यं स्वस्वामिभ्यां पर्यायेण सप्तमी ।

इति विभक्त्यर्थप्रकरणम् ।

अथ समासप्रकरणम्

तत्रादौ केवलसमासः

समासः कतिविधः—समासः पञ्चधा । तत्र (१) विशेषसंज्ञाविनिर्मुक्तः 'केवलसमासः' यथा 'भूतपूर्वः' इति । (२) प्रायेण पूर्वपदार्थप्रधानः 'अव्ययीभावः' । यथा 'अधिहरि' इति । (३) प्रायेण उत्तरपदार्थप्रधानः 'तत्पुरुषः' । यथा 'राजपुरुषः' इति । (तत्पुरुषभेदः कर्मधारयः, यथा 'नीलोत्पलम्' । कर्मधारयभेदो द्विगुः, यथा 'पञ्चगवम्') । (४) प्रायेण अन्यपदार्थप्रधानो 'बहुव्रीहिः' । यथा 'पीताम्बरः' इति । (५) प्रायेण उभयपदार्थप्रधानो 'द्वन्द्वः' । यथा 'रामकृष्णौ' इति ।

भूतपूर्वः (ई० २६)—पूर्वं भूतः 'भूतपूर्वः' । 'पूर्व अम् भूत सु' इत्यलौकिकविग्रहे 'सह सुपा' इति समासे 'कृत्तद्धितसमासाश्च' इति समासत्वात् प्राति-

पदिकसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इति सुब्लुकि 'पूर्वभूत' इति जाते 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति पूर्व-भूतशब्दयोरुभयोरप्युपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्'इति विनिगमकाऽभावादुभयोरपि पूर्वनिपाते प्राप्ते 'भूतपूर्वे चरट्' इति निर्देशात् भूतशब्दस्य पूर्वनिपाते एकदेशविकृतन्यायेन प्रातिपदिकत्वात् सौ रुत्वे विसर्गे तत्सिद्धिः ।

इति केवलसमासः

अथ अव्ययीभावसमासः

अधिहरि (ई० ४५, ५०)—हरौ इति । हरि ङि अधि इति स्थिते 'अव्ययम्–' इति सूत्रेण समासे 'अधी' त्यस्य 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन उपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इति 'अधि हरि ङि' इति जाते समासत्वात् प्रातिपदिकत्वे 'सुपो धातु' इति सुब्लुकि एकदेशविकृतन्यायेन प्रातिपदिकत्वात् समुदायात् 'अव्ययीभावश्च' इत्यव्ययत्वात् 'अव्ययादाप्सुपः' इति सोर्लुकि 'अधिहरि' इति सिद्धम् ।

अधिगोपम् (ई० ४२, ५३) गां पातीति 'गोपाः' तस्मिन्नित्यधिगोपम् । 'गोपा ङि अधि' इति स्थिते 'अव्ययम्–' इति समासे 'प्रथमानिर्दिष्ट समास उपसर्जनम्' इति अधी' त्यस्योपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इति पूर्वनिपाते समासत्वात्प्रातिपदिकत्वेन सुपो लुकि 'अव्ययीभावश्च' इत्यनेन नपुंसक-संज्ञायाम् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वे 'अधिगोप' इति स्थिते एकदेशविकृतन्यायेन समुदायेन समासत्वात् सोर्लुकि प्राप्ते 'नाऽव्ययीभावादतोऽम्त्वपञ्चम्याः' इति तन्निषेधे सोरमि 'अमि पूर्वः' इति पूर्वरूपे तत्सिद्धिः ।

तृतीयासप्तम्योर्बहुलम् (ई० ४७)—'अदन्तादव्ययीभावात् तृतीयासप्तम्योर्बहुलमम्भावः स्यादित्यर्थः । 'कृष्णस्य समीपमुपकृष्णम्' 'कृष्ण ङस् उप' इत्यलौकिकविग्रहे 'अव्ययम्–' इति सूत्रेण सामीप्यार्थवाचक 'उप' शब्देन सह समासे प्रथमानिर्दिष्टम्-' इति 'उप' इत्यस्योपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्'

इति तस्य पूर्वप्रयोगे समासत्वात् प्रातिपदिकत्वेन सुपां लुकि समुदायात् टाविभक्तौ 'तृतीयासप्तम्योर्बहुलम्' इत्यमादेशे पूर्वरूपे 'उपकृष्णम्' इति। अमादेशाऽभावपक्षे इनादेशे गुणे 'उपकृष्णेन' इति। प्रथमाविभक्तावपि 'अव्ययीभावश्च' त्यव्ययत्वात् सुब्लुकि प्राप्ते 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इति तन्निषेधे सोरमि पूर्वरूपे 'उपकृष्णम्' इति सप्तमीविभक्तौ तु 'उपकृष्णम्--उपकृष्णे' इति बोध्यम्।

अनुरूपम् (ई० ५१)—रूपस्य योग्यमनुरूपम्। 'अव्ययम्--' इति सूत्रेण यथार्थपदेन 'अनु' इत्यव्ययं योग्यतायाम्, अतो यथार्थे वर्तमानात् रूपशब्देन सह समासे सुब्लुकि 'अनु' इत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे समुदायात् सौ 'नाव्ययीभावात्--' इति सोरमिपूर्वरूपे सिद्धम्।

यथाशक्ति (ई० ५२)—शक्तिमनतिक्रम्य इति यथाशक्ति। अत्र यथेत्यव्ययं पदार्थानतिक्रमे 'अव्ययम्--' इत्यनेन समासे सुब्लुकि यथाशब्दस्योपसर्जनसंज्ञायां पूर्वप्रयोगे समुदायात् सौ अव्ययत्वात् सुब्लुकि सिद्धम्।

पारेगङ्गम् (ई० ४८)—गङ्गायाः पारादिति विग्रहे 'पारे मध्ये षष्ठ्या वा' इत्यनेन समासे एदन्तत्वनिपाते च कृते सुब्लुकि ,पारे' इत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे 'अव्ययीभावश्च' इत्यव्ययत्वात् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे 'नाव्ययीभावात्--' इति सोरमि पूर्वरूपे सिद्धम्।

व्याकरणस्य–त्रिमुनि (ई० ५२)—व्याकरणस्य पाणिन्यादयस्त्रयो मुनयो वंश्या इत्यर्थः। अत्र 'संख्या वंश्येन' इत्यनेन समासः। अव्ययत्वात् सुब्लुकि।

पञ्चगङ्गम्—पञ्चानां गङ्गानां समाहारः इति लौकिकविग्रहे पञ्चन्+आम्+गङ्गा+आम् इत्यलौकिकविग्रहे 'समाहारे चायमिष्यते' इति वार्तिकसहकारेण 'नदीभिश्च' इत्यनेन समासे उपसर्जनसंज्ञायां उपसर्जनत्वात पञ्चन् इत्येस्य प्राक्प्रयोगे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि 'नलोपः प्रातिपदिकान्तस्य' इति नकारस्य लोपे 'एकविभक्ति चापूर्वनिपाते' इत्यनेन गङ्गा इत्यस्योपसर्जनत्वात् 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकत्वेन सौ अव्ययत्वात् सुलोपे प्राप्ते 'नाऽव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यनेन लोपनिषेधे सोरमादेशे पूर्वरूपे पञ्चगङ्गम् इति सिद्धम्।

लोहितगङ्गम् (ई० ५३)—लोहिता गङ्गा यस्मिन् देशे स लोहितगङ्गं नाम देशः। अत्र 'अन्यपदार्थे च संज्ञायाम्' इति समासे सुब्लुकि 'अव्ययीभावश्च' इत्यव्ययत्वात् 'ह्रस्वो नपुंसके–' इति ह्रस्वे सोरमि पूर्वरूपे तत्सिद्धिः।

उपशरदम् (ई० २४)—'शरद् ङस् उप' इत्यलौकिकविग्रहे सामीप्यार्थक 'उप' इत्यव्ययेन सह 'अव्ययम्–' इति समासे 'अव्ययीभावे शरत्प्रभृतिभ्यः' इति टचि अनुबन्धलोपे उपेत्यस्योपसर्जनसंज्ञायां पूर्वनिपाते समासत्वात् प्रातिपदिकत्वेन सुपो लुकि समुदायात् सौ अव्ययत्वात् सुब्लुकि प्राप्ते 'नाव्ययीभावात्-' इति तन्निषेधे सोरमि पूर्वरूपे जातम्। तृतीयासप्तमीविभक्तौ तु 'उपशरदम्—उपशरदेन' 'उपशरदम्—उपशरदे' इति रूपाणि भवन्ति।

उपराजम् (ई० २६)—राज्ञः समीपमुपराजमिति लौकिकविग्रहः। 'राजन् ङस् उप' इत्यलौकिकविग्रहे सामीप्यार्थक 'उप' इत्यनेन सह 'अव्ययम्–' इति समासे 'प्रथमानिर्दिष्टम्—' इत्युपसर्जनसंज्ञायां पूर्वप्रयोगे 'अनश्च' इति टचि अनुबन्ध लोपे सुब्लुकि भत्वात् 'नस्तद्धिते' इति टिलोपे समुदायात् सौ अव्ययत्वात् सुब्लुकि प्राप्ते 'नाव्ययीभावादि' ति तन्निषेधे सोरमि पूर्वरूपे 'उपराजम्' इति। तृतीयासप्तमीविभक्तौ तु 'तृतीयासप्तम्योर्बहुलम्' इत्यम्भावे 'उपराजम्'—उपराजेन, उपराजम्-उपराजे' इति रूपाणि भवन्ति।

उपगिरम् (ई० ४१)—गिरेः समीपमिति विग्रहे समासे गिरेश्च सेनकस्य इति समासान्तटच्प्रत्ययेऽत्र प्रातिपदिके कार्ये सिद्धम।

इति अव्ययीभावप्रकरणम्।

अथ तत्पुरुषसमासप्रकरणम्

शङ्कुलाखण्ड (५०)—शङ्कुलया खण्ड इति विग्रशहे ङ्कुला+टा, खण्ड+सु इत्यलौकिकविग्रहे 'तृतीया तत्कृतार्थेन गुणवचनेन' इति सूत्रेण समासे समासत्वात् प्रातिपदिकत्वेन 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि ततः

'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां सौ विभक्तौ सस्य रुत्वे विसर्गे संयोगे शङ्कुलाखण्डः इति सिद्धम् ।

मासपूर्वः (ई० ४१, ५१)—मासेन पूर्वः इति विग्रहे 'पूर्वसदृशमानार्थकलहनिपुणमिश्रश्लक्ष्णैः' इति समासे सुब्लुकि समुदायात् सौ सुत्वे विसर्गे 'मासपूर्वः इति ।

दध्योदनः (ई० २)—दध्ना उपसिक्तः ओदनः इति विग्रहे 'अन्नेन व्यञ्जनम् इति समासे सुब्लुकि यणि समुदायात् सौ रुत्वे विसर्गे तत्सिद्धिः ।

नखनिर्भिन्नः (५१) —नखैर्निभिन्नः इति लौकिकविग्रहे नख+भिस्-निर्भिन्न+सु इत्यलौकिकविग्रहे 'समासप्रत्ययविधौ प्रतिषेधः' इत्यनेन समासे तदन्तविधिनिषेधात् निर्भिन्नस्य कृदन्तत्वाऽभावात्समासाप्राप्तौ 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषा सहकारेण 'कर्तृकरणे कृता बहुलम्' इत्यनेन समासे समासत्वात् प्रातिपदिकत्वेन सुपो लुकि ततः प्रातिपदिकत्वात सौ रुत्वे विसर्गे नखनिर्भिन्नः इति सिद्धम् ।

चतुर्थीतदर्थार्थवलिहितसुखरक्षितैः—चतुर्थ्यन्तपद का जो अर्थ उसके लिए जो तद्वाचक शब्द तत्प्रकृतिक सुबन्त के साथ और अर्थादि प्रकृतिक सुबन्तके साथ चतुर्थ्यन्त का समास होता है। जैसे चतुर्थ्यन्तपद यूपाय उसका अर्थ यूप उसके लिए कौन काष्ठ तद्वाचक शब्द दारु तत्प्रकृतिक सुबन्त दारु सु उसके साथ चतुर्थ्यन्त यूप का समास हुआ। यहाँ तदर्थपदसे प्रकृतिविकृतिभाव ही विवक्षित है। अतः रन्धनाय स्थाली में समास नहीं होता।

चोरभयम् । ४७ । चोराद् भयम् इति चोर+ङसि, भय+सु इत्यलौकिकविग्रहे 'पञ्चमी भयेन' इति सूत्रेण समासे समासत्वात्प्रातिपदिकत्वेन सुपो लुकि पुनः प्रातिपदिकत्वात् सौ सोरमादेशे पूर्वरूपे चोरभयम् इति सिद्धम् ।

राजपुरुषः । ४८ ।—राज्ञः पुरुषः इति लौकिकविग्रहे राजन् + ङस् पुरुष + सु इत्यलौकिकविग्रहे 'षष्ठी' इति सूत्रेण षष्ठी समासे 'सुपो धातुप्रातिपदिकयोः इति सब्लुकि 'नलोपः प्रातिपदिकान्तस्य' इति नकारस्य लोपे

राजपुरुष इत्यस्य समुदायात्प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे राजपुरुषः इति सिद्धम् ।

देवपूजकः (ई० ५२)—देवस्य पूजकः इति विग्रहे 'याजकादिभिश्च' इति समासे सुब्लुकि समुदायात् सौ रुत्वे विसर्गे तत्सिद्धिः ।

सर्वश्वेतः (ई० ६०)—सर्वेषां श्वेततरः इति विग्रहे 'गुणात्तरेण तरलोपश्च' इति समासे तरप्प्रत्ययस्य लोपे च कृते सुब्लुकि समुदायात् सौ रुत्वे विसर्गे तत्सिद्धिः ।

अपरकायः (ई० ४८)-अपरं कायस्येति विग्रहे 'पूर्वापरा–' इति समासे सुब्लुकि समुदायात् सौ रुत्वे विसर्गे तत्सिद्धिः ।

अर्धपिप्पली (ई० ४८)—'अर्ध सु पिप्पली ङस्' इत्यलौकिकविग्रहे 'अर्धं नपुंसकम्' इति समासे समासशास्त्रघटकप्रथमान्तपदनिर्दिष्टस्य 'अर्ध सु' इत्यस्य उपसर्जनसंज्ञायां पूर्वनिपाते सुब्लुकि समुदायात् 'परवल्लिङ्गमि' ति स्त्रीत्वे सौ विभक्तिकार्ये उक्तं रूपं सिद्धम् । अत्र पिप्पलीशब्दस्य नियतविभक्तिकत्वेऽपि 'एकविभक्तावषष्ठ्यन्तवचनम्' इति निषेधादुपसर्जनत्वाद् ह्रस्वो नेति दिक् ।

पौर्वशालः ।५०। पूर्वस्यां शालायां भवः इति पूर्वा+ङि, शाला+ङि इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च'इत्यनेन समासे समासत्वात्प्रातिपदिकत्वेन सुपो लुकि पूर्वा शब्दस्योपसर्जनसंज्ञायां तस्य पूर्वनिपाते 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इत्यनेन पूर्वा इत्यस्य पुंवद्भावे 'दिक्पूर्वपदात् संज्ञायां ञः' इति ञप्रत्यये 'तद्धितेष्वचामादेः' इति आदिवृद्धौ भसंज्ञायां 'यस्येति च इति अकारस्य लोपे ततः पौर्वशाला इत्यस्य तद्धितान्तत्वात्प्रातिपदिकत्वेन सौ तस्य रुत्वे विसर्गे पौर्वशालः इति सिद्धम् ।

षाण्मातुरः (ई० ४१)—षण्णां मातॄणामपत्यमिति विग्रहे 'तद्धितार्थ-' इति समासे सुब्लुकि निष्पन्नात् षण्मातृशब्दात् 'मातुरुत् संख्यासम्भद्रपूर्वायाः' इत्यणि ऋकारस्य उत्वे रपरत्वे 'तद्धितेष्वचामादेः' इत्यादिवृद्धौ विभक्तिकार्ये 'षाण्मातुर' इति ।

पञ्चगवधनः (ई० २७)—पञ्च गावो धनं यस्य स पञ्चन् जस् गो 'जस् धन सु' इति त्रिपदे बहुव्रीहौ 'पञ्चन्-गोशब्दयोः' 'तद्धितार्थे' ति विभाषया समासे प्राप्ते 'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' इति नित्ये समासे सुब्लुकि अन्तर्वर्तिनी विभक्तिमाश्रित्य पदत्वात् पञ्चन्-शब्दस्य नस्य लोपे पञ्चगो' इत्यस्मात् 'गोरतद्धितलुकि' इति टचि अनुबन्धलोपे अवादेशे 'पञ्चगव इति बहुव्रीहावबान्तरे 'तत्पुरुषे' जाते बहुव्रीहिसमासस्यापि प्रातिपदिकत्वात् सुलोपे समुदायात् सौ रुत्वे विसर्गे 'पञ्चगवधनः' इति।

महावैयाकरणः (ई० ५०, ५३)—महांश्चासौ वैयाकरणः इति विग्रहे 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासे सुब्लुकि 'आन्महतः–' इत्यात्वे विभक्ति कार्ये 'महावैयाकरणः' इति।

पुरुषव्याघ्रः (ई० ४७) पुरुष व्याघ्र इव इति विग्रहे 'उपमितं व्याघ्रादिभिः—' इति समासे सुब्लुकि विभक्ति कार्ये तत्सिद्धिः।

चिन्मात्रम् (ई० ५१)–चिदेव-चिन्मात्रम्। 'मयूरव्यंसकादयश्च' इत्यनेन साधु।

अब्राह्मणः (ई० ४८)—न ब्राह्मणः इति विग्रहे 'नञ्' इत्यनेन समासे सुब्लुकि 'नलोपो नञः' इति नञो नस्य लोपे विभक्त्यादिकार्ये तत्सिद्धिः।

अनश्वः (ई० ५०)—न अश्वः इति विग्रहे 'नञ्' इति समासे सुब्लुकि 'नलोपो नञः' इति नलोपे 'तस्मान्नुडचि' इति नुटि अनुबन्धलोपे सौ रुत्वे विसर्गे सिद्धम्।

कुपुरुषः (ई० ५०)—कुत्सितः पुरुषः इति विग्रहे 'कुगतिप्रादयः' इत्यनेन समासें सुब्लुकि विभक्ति कार्ये 'कुपुरुषः' इति।

अतिमालः (ई० २४)—मालामतिक्रान्तः अतिमालः। 'माला अम् अति' इति 'विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासे 'अती' त्यस्योपसर्जनसंज्ञायां पूर्वनिपाते सुब्लुकि 'एकविभक्तिचापूर्वनिपाते' इति नियतविभक्तिकस्योपसर्जनसंज्ञायां 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे समुदायात् सौ रुत्वे विसर्गे अतिमालः' इति।

निष्कौशाम्बिः (ई० ५१)–निष्क्रान्ता कौशाम्ब्याः इतिविग्रहे 'निरादयः क्रांताद्यर्थेपञ्चम्याः' इति समासे सुब्लुकि 'एकविभक्तिचापूर्वनिपाते' इति कौशाम्बीशब्दस्योपसर्जनसंज्ञायां 'गोस्त्रियोः—' इति ह्रस्वे षत्वे विभक्तिकार्ये उक्तं रूपं जातम् ।

कुम्भकारः (ई० ५०, ५३)—कुम्भं करोतीत्यर्थे 'कर्मण्यण्' इत्यणि कुम्भ अस् कृ अण्' इत्यलौकिकविग्रहे 'अचो ञ्णिति' इति वृद्धौ 'तत्रोपपदं सप्तमीस्थम्' इति कुम्भशब्दस्योपपदसंज्ञायाम् 'उपपदमतिङ्' इति समासे सुपो लुकि 'कुम्भकार' इति भूते समासत्वात्सौ रुत्वे विसर्गे उक्तं रूपं सिद्धम् ।

व्याघ्री (ई० २६)—विशेषेण जिघ्रतीति विग्रहः । वि आङ्पूर्वक 'घ्रा' धातोः 'आतश्चोपसर्गे कः' इति कप्रत्यये 'आतो इटि च' इत्यलोपे 'गतिश्च' इति गतिसंज्ञायां 'गतिकारकोपपदानाम्—' इति सुबुत्पत्तेः प्राक् घ्रशब्देन आङः 'कुगतिप्रादयः' इति समासे ततः आघ्रशब्देन वेर्गति समासे यणि 'व्याघ्रः इति । स्त्रीत्वविवक्षायां 'जातेरस्त्रीविषयादयोपधात्' इति ङीषि भत्वादलोपे विभक्तिकार्ये 'व्याघ्री' इति ।

पूर्वरात्रः (ई० ४७, ५०)—रात्रेः पूर्वमिति विग्रहे पूर्वकालैकसर्वजरत्–' इति समासे सुब्लुकि 'अहः सर्वैकदेश—' इत्यचि भत्वात् 'यस्येति च' इतीकार-लोपे 'रात्राह्नाहाः पुंसि' इति पुंस्त्वे प्रातिपदिककार्ये 'पूर्वरात्रः' इति ।

परमराजः (ई० २६)–परमश्चासौ राजा परमराजः । 'परम सु राजन् सु' इत्यलौकिकविग्रहे 'सन्महतपरमोत्तमोत्कृष्टः पूज्यमानः' इति समासे सुब्लुकि 'राजाहः सखिभ्यष्टच्' इति टचि भसंज्ञायां 'नस्तद्धिते' इति टिलोपे विभक्तिकार्ये तत्सिद्धम् ।

द्विनावम् (ई० ५०) द्वयोर्नावोः समाहारः इति विग्रहे समासे सुब्लुकि 'नावो द्विगो' इति टचि आवादेशे विभक्तिकार्ये तत्सिद्धिः ।

अर्धनावम् (ई० ४९)–नावोऽर्धमिति विग्रहे समासे 'अर्धाच्च' इति टचि आवादेशे विभक्तिकार्ये तत्सिद्धिः ।

पञ्चगवम् । ५९ । पञ्चानां गवां समाहार इति विग्रहे पञ्चन्+आम्,

गो+आम् इति अलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति समासे सुपोर्लुकि नकारस्य लोपे 'गोरतद्धितलुकि' इत्यनेन टचि, अनुबन्धलोपे ओकारस्य अवादेशे 'तत्पुरुषः समानाधिकरणः कर्मधारयः' इति कर्मधारयसंज्ञायां 'संख्यापूर्वो द्विगुः' इति द्विगुसंज्ञायां 'द्विगुरेकवचनम्' इति एकवद्भावे 'स नपुंसकम्' इति नपुंसकत्वे ततः प्रातिपदिकत्वेन सौ सोरमादेशे पूर्वरूपे पञ्चगवम् इति सिद्धम्।

अहोरात्रः (२७)-- अहश्च रात्रिश्च इति अहन्+सु रात्रि+सु इत्यलौकिकविग्रहे द्वन्द्वसमासे 'अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः' इत्यनेन अचि अनुबन्धलोपे सुपो लुकि भत्वात् 'यस्येति च' इतीकारलोपे 'रात्राह्नाहाः पुंसि' इत्यनेन पुंस्त्वे 'रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्' इत्यनेन नकारस्य रुत्वे 'हशि च' इत्युत्वे 'आद् गुणः' इति गुणे प्रातिपदिकत्वेन सौ रुत्वे विसर्गे अहोरात्रः इति सिद्धम्।

महाराजः–महांश्चासौ राजा इति महत्+सु, राजन्+सु इत्यलौकिकविग्रहे 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इत्यनेन समासे राजाहःसखिभ्यष्टच्' इत्यनेन टचि अनुबन्धलोपे सुपो लुकि टिलोपे मह+राज इति जाते 'आन्महतः समानाधिकरणजातीययोः' इत्यनेन आत्वे सवर्णदीर्घे प्रातिपदिकत्वात् सौ रुत्वे विसर्गे महाराजः इति सिद्धम्।

अर्धपिप्पली (ई० २६)–अर्धं पिप्पल्याः अर्धपिप्पली। अर्ध सु पिप्पली ङस् इत्यलौकिकविग्रहे 'अर्धं नपुंसकम्' इति समासे सुब्लुकि 'परवल्लिङ्गम्—' इति स्त्रीत्वे विभक्तिकार्ये उक्तं रूपं सिद्धम्।

पञ्चकपालः (ई० ५२)–पञ्चसु कपालेषु संस्कृतः—पञ्चकपालः, पुरोडाशः 'पञ्चन् सुप् कपाल सुप् इत्यलौकिकविग्रहे 'तद्धितार्थ—' इति समासे सुब्लुकि 'संस्कृतं भक्षाः' इत्यणि 'द्विगोर्लुगनपत्ये' इत्यणो लुकि कपालशब्दवत् 'परवल्लिङ्गम्–' इति पञ्चकपालशब्दस्याऽपि नपुंसकत्वे प्राप्ते 'द्विगुप्राप्तापन्न–' इति तन्निषेधे विभक्तिकार्ये तत्सिद्धम्।

अर्धर्चः (ई० ४८)–ऋचोऽर्धमिति विग्रहे 'अर्धं नपुंसकम्' इति समासे

अर्धशब्दस्योपसर्जनसंज्ञायां पूर्वनिपाते सुब्लुकि 'ऋक्पूरब्धूः—' इत्यप्रत्यये गुणे रपरत्वे 'अर्धर्चाः पुंसि च' इति नपुंसकत्वे विभक्तिकार्ये 'अर्धर्चम्' इति। पुंस्त्वे तु 'अर्धर्चः' इति भवति।

इति तत्पुरुषप्रकरणम्।

अथ बहुव्रीहिसमासप्रकरणम्

कण्ठेकालः ।४९। कण्ठे कालो यस्येति लौकिकविग्रहे कण्ठ+ङि काल+सु इति अलौकिकविग्रहे 'सप्तमी विशेषणे बहुव्रीहौ' इत्यनेन ज्ञापकात्समासे सप्तम्यन्तस्य कण्ठशब्दस्य पूर्वनिपाते 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुकि प्राप्ते 'हलदन्तात्सप्तम्याः संज्ञायाम्' इति सूत्रेण सप्तम्या अलुकि ततः प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे संयोगे कण्ठेकालः इति सिद्धम्।

वीरपुरुषकः । । वीराः पुरुषा यस्मिन् ग्रामे स इति लौकिकविग्रहे वीर+जस्, पुरुष+जस् इति अलौकिकविग्रहे 'अनेकमन्यपदार्थे' इत्यनेन समासे 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि कपि प्रत्ययेऽनुबन्धलोपे समासत्वात् प्रातिपदिकसंज्ञायाम् सौ रुत्वे विसर्गे वीरपुरुषकः इति सिद्धम्।

चित्रगुः ।५५। चित्रा गावो यस्य इति विग्रहे, चित्रा+जस् गो+जस्, इति अलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति समासे सुब्लुकि 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियापपूरणीप्रियादिषु' इत्यनेन चित्रा इत्यस्य पुंवद्भावे तेन टापो निवृत्तौ 'एकविभक्ति चापूर्वनिपाते' इति गोशब्दस्य उपसर्जनत्वात् 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे समासत्वात् प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे चित्रगुः इति सिद्धम्।

रूपवद्भार्यः (ई० ५२, ५३)—रूपवती भार्या यस्येति विग्रहे अनेकमन्यपदार्थे इति समासे सुपो लुकि 'स्त्रियाः पुंवत्–' इति पुंवद्भावे ङीपो निवृत्तौ

'एकविभक्ति चापूर्वनिपाते' इत्युपसर्जनसंज्ञायां 'गोस्त्रियोः–' इति भार्याशब्दस्य ह्रस्वे विभक्तिकार्ये तत्सिद्धिः ।

कल्याणीपञ्चमाः (ई० ४७)—'कल्याणी सु पञ्चमी सु' इति विग्रहे समासे सुपो लुकि पञ्चमीशब्दस्य पूरणप्रत्ययान्तत्वेन तस्मिन् परे 'स्त्रियाः पुंवत्' इति पुंवद्भावाऽप्राप्तौ 'अप्पूरणीप्रमाण्योः' इत्यपि भत्वात् 'यस्येति च' इतीकारलोपे विभक्तिकार्ये तत्सिद्धिः ।

दृढभक्तिः (ई० ५२)—ननु भक्तिशब्दस्य प्रियादिषु पाठाद् दृढा भक्तिर्यस्य सः दृढभक्तिरित्यत्र कथं पुंवत्त्वमिति चेन्न, 'सामान्ये नपुंसकम्' इत्याश्रित्य दृढं भक्तिर्यस्येति मूले प्रतिपादितरीत्या निर्वाहात् ।

उपदशाः (ई० ५३)—दशानां समीपे ये सन्तीति विग्रहे समासे सुब्लुकि बहुव्रीहौ संख्येये डजबहुगणात्, इति समासान्तडच्प्रत्यये डित्त्वसामर्थ्यादभस्यापि टेर्लोपे विभक्तिकार्ये 'उपदशाः' इति ।

आसन्नविंशाः (ई० ५२)—आसन्नशब्दस्य विंशतिशब्देन षष्ठ्यन्तेन 'संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये' इति समासे सुब्लुकि 'बहुव्रीहौ संख्येये –' इति डचि अनुबन्धलोपे 'आसन्नविंशति अ' इति स्थिते 'टेः' इति लोपे प्राप्ते तम्प्रबाध्य 'ति विंशतेर्डिति' इति 'ति' शब्दस्य लोपे 'अतो गुणे' इति पररूपे विभक्तिकार्ये 'आसन्नविंशाः' इति विंशतेरासन्ना इत्यर्थः ।

केशाकेशि (ई० ४७, ५२)—केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तमिति विग्रहे 'तत्र तेनेदमिति सरूपे' इति समासे सुब्लुकि 'अन्येषामपि दृश्यते' इति दीर्घे 'इचि कर्मव्यतिहारे' इति इचि अनुबन्धलोपे 'यस्येति च' इत्यकारलोपे समुदायात् सौ इच्प्रत्ययान्तत्वेन अव्ययत्वात् सुब्लुकि 'केशाकेशि' इति ।

कल्याणीप्रियः ।३५। कल्याणी प्रिया यस्य स इति लौकिकविग्रहे कलयणी+सु, प्रिया+सु इति अलौकिकविग्रहे, बहुव्रीहिसमासे सुपो लुकि 'स्त्रियाः पुंवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु' इत्यनेन पुंवद्भावस्य प्रियादिषु पाठात् निषेधे ततो समासत्वात् 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे कल्याणीप्रियः इति सिद्धम् ।

जलजाक्षी ।६५। जलजे इव अक्षिणी यस्या इति विग्रहे अनेकमन्यपदार्थे इत्यनेन समासे सुपो लुकि 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इति सूत्रेण षचि अनुबन्धलोपे 'यचि भम्' इति भसंज्ञायां टिलोपे जलजाक्ष इति स्थिते 'षिद्गौरादिभ्यश्च' इत्यनेन ङीषि अनुबन्धलोपे पुनः भत्वात् अकारलोपे यतः प्रातिपदिकत्वात् सौ तस्य लोपे जलजाक्षी इति सिद्धम् ।

द्विमूर्धः । ६० । द्वौ मूर्धानौ यस्य इति लौकिकविग्रहे द्वि+औ, मूर्धन्+औ इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति सूत्रेण समासे 'सुपो धातुप्रातिपदिकयोः इति सुब्लुकि 'द्वित्रिभ्यां ष मूर्ध्नः' इति सूत्रेण षप्रत्ययेऽनुबन्धलोपे भसंज्ञायां 'नस्तद्धिते' इति टिलोपे समासत्वात् प्रतिपदिकत्वेन सौ रुत्वे विसर्गे द्विमूर्धः इति सिद्धम् ।

अन्तर्लोमः । ४४ । अन्तर्लोमानि यस्येति लौकिकविग्रहे, अन्तर+जस्, लोमन्+जस् इत्यलौकिकविग्रहे अनेकमन्यपदार्थे' इति समासे 'अन्तर्बहिर्भ्यां च लोम्नः' इति सूत्रेण अप् प्रत्ययेऽनुबन्धलोपे समासत्वात्सुलुकि भत्वात् टिलोपे ततः प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे अन्तर्लोमः इति सिद्धम् ।

सुपाद् । ६१ । शोभनौ पादौ यस्य इति विग्रहे, सु, पाद+औ इति अलौकिकविग्रहे 'अनेकमन्यपदार्थे' इति सूत्रेण समासे 'संख्यासुपूर्वस्य' इत्यनेन अलोपे समासत्वात् प्रातिपदिकत्वेन सुब्लुकि प्रातिपदिकत्वात् सौ तस्य लोपे सुपाद् इति सिद्धम् ।

द्रुणसः (ई० ५२)—द्रुरिव नासिका यस्येति विग्रहे समासे सुब्लुकि 'अञ्नासिकायाः संज्ञायां नसं चास्थूलात्' इति णत्वे विभक्तिकार्ये 'द्रुणसः' इति ।

विख्यः (ई० ४१)—विगता नासिका यस्येति विग्रहेसमासे सुब्लुकि 'ख्यश्च' इति नासिकाशब्दस्य ख्यादेशे 'विभक्तिकार्ये' इति ।

युवजानिः (ई० ५१)—यूवतिर्जाया यस्येति विग्रहे समासे सुब्लुकि 'जाया निङ्' इति जायाशब्दे यकारादकारस्य निङि अनुबन्धलोपे 'लोपो व्योर्वलि' इति यलोपे 'स्त्रियाः पुंवत्' इति पुंवत्त्वात् तिप्रत्ययस्य निवृत्तौ विभक्तिकार्ये 'युवजानिः' इति ।

व्यूढोरस्कः । ४० । व्यूढम्+विशालमुरो यस्येति लौकिकविग्रहे व्यूढ+सु, उरस्+सु इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इत्यनेन समासे सुपो लुकि 'उरः प्रभृतिभ्यः कप्' इत्यनेन कप् प्रत्ययेऽनुबन्धलोपे सस्य रुत्वे विसर्गे 'सोऽपदादौ' इति विसर्गस्य सत्त्वे गुणे ततः प्रातिपदिकत्वात् सौ रुत्वे विसर्गे व्यूढोरस्कः इति सिद्धम् ।

महायशस्कः । ५८ । महद् यशो यस्येति लौकिकविग्रहे, महद्+सु यशस्+सु इति इत्यलौकिकविग्रहे 'अनेकमन्यपदार्थे' इत्यनेन समासे सुपो लुकि 'शेषाद्विभाषा' इत्यनेन पाक्षिके कपि अनुबन्धलोपे 'आन्महतः समानाधिकरणजातीययोः' इत्यनेन आत्वे सकारस्य रुत्वे विसर्गे च कृते 'सोपदादौ' इत्यनेन विसर्गस्य सत्वे ततः प्रातिपदिकत्वेन सौ रुत्वे विसर्गे संयोगे महायशस्कः इति रूपम् । कपोऽभावपक्षे—'अत्वसन्तस्य चाधातोः' इत्यनेन दीर्घे महायशा इति सिद्धम् ।

इति बहुव्रीहिसमासप्रकरणम् ।

अथ द्वन्द्वसमासप्रकरणम्

रथिकाश्वारोहम् (ई० ५२)—रथिकाश्च अश्वारोहाश्चेति विग्रहे द्वन्द्वसमासे सुब्लुकि सवर्णदीर्घे 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इत्येकवद्भावे 'स नपुंसकम्' इति नपुंसकसंज्ञायां समुदायात् सौ सोरमि पूर्वरूपे सिद्धम् ।

गोव्याघ्रम् (ई० ५१)—गावश्च व्याघ्राश्चेति विग्रहे द्वन्द्वसमासे सुब्लुकि 'येषां च विरोधः शाश्वतिकः' इत्येकवद्भावे 'स नपुंसकम्' इति नपुंसकत्वे समुदायात् सौ सोरमि पूर्वरूपे गोव्याघ्रमिति ।

गोमहिषम् (इ० ५२)—गावश्च महिषाश्चेति विग्रहे द्वन्द्वसमासे सुब्लुकि 'विभाषा वृक्षमृग–' इति सूत्रेण एकवद्भावे सौ 'स नपुंसकम्' इति नपुंसकात् सोरमि पूर्वरूपे तत्सिद्धिः । पक्षे 'गोमहिषः' इत्यपि भवति ।

मित्रावरुणौ (५३)—मित्रश्च वरुणश्चेति विग्रहे द्वन्द्वसमासे सुब्लुकि 'देवता द्वन्द्वे च' इत्यनेन आनङादेशे पदत्वान्नलोपे विभक्त्यादिकार्ये 'मित्रावरुणौ' इति ।

अग्निष्टुत् (ई० ४२)—अग्निः स्तूयते अत्र इति विग्रहे उपपदसमास कृते सम्पदादित्वात् अधिकरणे क्विप् । क्विपः सर्वापहारे 'ह्रस्वस्य पिति कृति तुक्' इति तुकि अनुबन्धलोपे 'अग्नेः स्तुत्स्तोमसोमाः' इति सस्य षत्वे हल्ङ्या-दिना सुलोपे 'अग्निष्टुत्' इति ।

छत्रोपानहम् (ई० ५१)—छत्रं च उपानहौ चेति विग्रहे समाहारद्वन्द्वे सुब्लुकि 'आद्गुणः' इति गुणे 'द्वन्द्वाच्चुदषहान्तात्समाहारे' इति हान्तत्वाट्टचि 'जातिरप्राणिनाम्' इत्येकवद्भावे सौ 'स नपुंसकम्' इति नपुंसकत्वात् सोरमि पूर्वरूपे सिद्धम् ।

राजदन्तः (४६) दन्तानां राजा इति लौकिकविग्रहे दन्त + आम् राजन् + सु इत्यलौकिकविग्रहे 'षष्ठी' इति सूत्रेण समासे सुपो लुकि 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इति दन्तशब्दस्योपसर्जनसंज्ञायां 'उपसर्जनं पूर्वम्' इति पूर्व-प्रयोगे प्राप्ते 'राजदन्तादिषु परम्' इत्यनेन तस्य परनिपाते नलोपे ततः प्राति-पदिकत्वेन सौ रुत्वे विसर्गे राजदन्तः इति सिद्धम् ।

इति द्वन्द्वसमासप्रकरणम् ।

अथ एकशेषप्रकरणम्

गार्ग्यौ—गार्ग्यश्च गार्ग्यायणश्चेति गार्ग्यौ । अत्र गोत्राऽपत्यगार्ग्यशब्दः युवा-पत्यं 'गार्ग्यायणः' तयोः गोत्रयुवप्रत्ययकृतवैरूप्यात् गोत्रप्रत्ययान्तगार्ग्यशब्दः शिष्यते इति ।

हंसौ (ई० ४२, ४४)—हंसी च हंसश्चेति हंसौ । अत्र पुंस्त्वस्त्रीत्व-मात्रकृतवैरूप्यात् 'पुमान् स्त्रिया' इत्यनेन पुंल्लिङ्गो हंसशब्दः शिष्यते ।

पितरौ—माता च पिता च इति 'पितरौ'। अत्र 'पिता मात्रा' इति सूत्रेण विभाषया पितृशब्दस्यैकशेषे प्रथमाद्विवचने औ 'ऋतो ङि–' इति गुणे रपरत्वे 'पितरौ' इति।

मातापितरौ—'पिता मात्रा' इत्येकशेषाभावपक्षे माता च पिता चेति विग्रहे द्वन्द्वसमासे सुब्लुकि मातुरभ्यर्हितत्वात् 'अभ्यर्हितं च' इति पूर्वनिपाते 'आनङ् ऋतो द्वन्द्वे' इति मातृशब्दस्य आनङादेशे अनुबन्धलोपे पदत्वान्नलोपे 'मातापितृ' शब्दाद् औ 'ऋतो ङि–' इति गुणे रपरत्वे 'मातापितरौ' इति।

श्वशुरौ (ई० ४९)—श्वश्रूश्च श्वशुरश्च इति विग्रहे द्वन्द्वसमासे सुब्लुकि 'श्वशुरः श्वश्र्वा' इति श्वशुरशब्दस्यैकशेषे विभक्तिकार्ये 'श्वशुरौ' इति रूपम् सिद्धम्। पक्षे 'श्वश्रूश्वशुरौ' इति। श्वश्र्वा अपि मातृतुल्यत्वादभ्यर्हितत्वेन पूर्वं प्रयोग इति बोध्यम्।

गावः इमाः—गौश्च गौश्च गौश्च इति 'गावः'। अत्र पुंल्लिङ्गस्त्रिलिङ्गेषु गोशब्देषु सहविवक्षितेषु 'पुमान् स्त्रिया' इत्येतद् बाधित्वा 'ग्राम्यपशुसंघेष्वतरुणेषु स्त्री' इति सूत्रेण स्त्री शिष्यते।

इति एकशेषप्रकरणम्

अथ समासान्तप्रकरणम्

अर्धर्चः—अर्धं ऋचः इति लौकिकविग्रहे अर्ध+सु, ऋच+ङस् इत्यलौकिकविग्रहे 'अर्धं नपुंसकम्' इति समासे अर्धशब्दस्य पूर्वनिपाते 'ऋक्पूरब्धूःपथामानक्षे' इति सूत्रेण अप्रत्यये गुणे रपरे सुपो लुकि 'अर्धर्चाः पुंसि' इत्यनेन पुंस्त्वे प्रातिपदिकत्वात् सौ रुत्वे विसर्गे अर्धर्चः इति सिद्धम्।

सखिपथः—सख्युः पन्था इति सखि+ङस्, पथिन्+सु इत्यलौकिकविग्रहे 'षष्ठी' इति षष्ठीसमासे 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि 'ऋक्पूरब्धूः

पथामानक्षे' इत्यनेन अप्रत्यये टिलोपे नकारस्य लोपे ततः समासत्वात्प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे सखिपथः इति सिद्धम् ।

गवाक्षः (६१) गवामक्षीवेति विग्रहे, गो+आम्, अक्षि+सु इति अलौकिकविग्रहे 'षष्ठी' इत्यनेन षष्ठी समासे सुपो लुकि 'अक्ष्णोऽदर्शनात्' इति सूत्रेण अचि प्रत्ययेऽनुबन्धलोपे 'यस्येति च' इति इकारलोपे 'अवङ् स्फोटायनस्य' इति अवङादेशेऽनुबन्धलोपे सवर्णदीर्घे ततः प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे संयोगे गवाक्षः इति सिद्धम् ।

प्राध्वो रथः (५९) प्रगतोऽध्वानमिति विग्रहे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इत्यनेन समासे सुपो लुकि 'उपसर्गादध्वनः' इति अच् प्रत्ययेऽनुबन्धलोपे 'नस्तद्धिते' इति टिलोपे दीर्घे प्रातिपदिकत्वात् सौ रुत्वे विसर्गे प्राध्वो रथः इति सिद्धम् ।

सुराजा (६४) शोभनो राजा इति लौकिकविग्रहे सु+राजन्+सु इत्यलौकिकविग्रहे 'कुगतिप्रादयः' इति समासे सुपो लुकि 'राजाहः सखिभ्यष्टच्' इत्यनेन टचि प्राप्ते 'न पूजनात्' इति तन्निषेधे समासत्वात्प्रातिपदिकत्वेन सु विभक्तौ तस्य लोपे नलोपे संयोगे सुराजा इति सिद्धम् ।

द्वीपम् (ई० ४६)—द्वयोः पार्श्वयोर्गता आपः यस्मिन्निति विग्रहे समासे 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इति अप्प्रत्यये ईत्वे सवर्णदीर्घे विभक्तिकार्ये 'द्वीपम्' इति ।

प्रतीपम् (ई० ४४)—प्रतिकूला आपः यस्मिन्नितिविग्रहे समासे सुब्लुकि 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इत्यप् प्रत्यये ईत्वे सवर्णदीर्घे विभक्तिकार्ये 'प्रतीपम्' इति सिद्धम् ।

सप्तगोदावरम्—सप्तानां गोदावरीणां समाहारः इति विग्रहे 'नदीभिश्च' इत्यव्ययीभावसमासे सुब्लुकि 'संख्या नदीगोदावरीभ्यां च' इत्यचि 'यस्येति च' इति लोपे विभक्तिकार्ये 'सप्तगोदावरम्' इति ।

अहर्दिवम् । ४४ । —अहनि च दिवा चेति विग्रहे समासे 'रोऽसुपि' इति रत्वे 'अचतुर–' इत्यचि 'यस्येति च' इत्याकारलोपे विभक्तिकार्ये सिद्धम् ।

किंराजा । २६ । कुत्सितो राजा इति विग्रहे 'किं क्षेपे' इति समासे 'राजाहः सखिभ्यष्टच्' इति टचि प्राप्ते 'किमः क्षेपे' इति निषेधे विभक्त्यादिकार्ये 'किंराजा' इति ।

इति समासान्तप्रकरणम् ।

अथ अलुक्समासः

ओजसा कृतम्—अत्र 'कर्तृकरणे कृता बहुलम्' इति समासे 'ओजः सहोऽम्भस्तमसस्तृतीयायाः' इति ओजश्शब्दात् तृतीयायाः अलुकि उक्तं रूपं सिद्धम् ।

आत्मनेपदम्—'तादर्थ्ये चतुर्थी' आत्मार्थमित्यर्थः । चतुर्थी इति योगविभागात् समासः । 'वैयाकरणाख्यायां चतुर्थ्याः' इति चतुर्थ्याः अलुक् ।

परस्मैपदम् (ई० २७)—अत्र 'परस्य च' इत्यनेन वैयाकरणाख्यायां परशब्दात् चतुर्थ्याः अलुक् ।

युधिष्ठिरः (ई० २८)—अत्र 'संज्ञायाम्' इति सप्तमीसमासे कृते 'हलदन्तात् सप्तम्याः संज्ञायाम्' इति सप्तम्याः अलुकि 'गवियुधिभ्यां स्थिरः' इति स्थिरस्य सस्य षत्वे ष्टुत्वे विभक्तिकार्ये 'युधिष्ठिरः' इति ।

ग्रामेवासी (ई० ४१)—अत्र 'शयवासवासिष्वकालात्' इति सप्तम्याः अलुक् ।

पश्यतोहरः—पश्यन्तमनादृत्य हरतीति 'पश्यतोहरः' स्वर्णकारादिः । अत्र 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' इति वार्तिकेन षष्ठ्याः अलुक् ।

मातुःष्वसा (ई० ५२)—अत्र 'विभाषा स्वसृपत्योः' इत्यनेन मातृशब्दात् परस्य षष्ठ्याः अलुकि 'मातृपितृभ्यामन्यतरस्याम्' इत्यनेन स्वसुः सस्य षत्वे अनङादिकार्ये 'मातुःष्वसा' इति । षत्वाऽभावे 'मातुःस्वसा' इति । लुक्पक्षे 'मातृपितृभ्यां स्वसा' इति सूत्रेण स्वसुः सस्य षत्वे 'मातृष्वसा' इति ।

इति अलुक्समासः ।

अथ समासाश्रयप्रकरणम्

ब्राह्मणिचेली (२७) अत्र 'घरूपकल्पचेलड्–' इति ह्रस्वे टित्त्वात् ङीप् ।

विद्वत्तरा (ई० २५)—अत्र 'उगितश्च' इति तरप्प्रत्यये परे ह्रस्वे 'विदुषितरा' इति । ह्रस्वाभावपक्षे 'तसिलादिष्वकृत्वसुचः' इति पुंवत्त्वे ङीपो निवृत्तौ 'विद्वत्तरा' इति ।

पदातिः (ई० २४)—पादाभ्यामततीति 'पदातिः' । अत्र 'पादस्य पदाज्यातिगोपहतेषु' इति पादशब्दस्य पदादेशे विभक्तिकार्ये 'पदातिः' इति ।

उदपेषं पिनष्टि (ई० २६)—उदकेन पिनष्टीत्यर्थः । अत्र 'पेषंवासवाहनधिषु च' इत्यनेन उदकस्य उदादेशः ।

कौमुदगन्धीपुत्रः (ई० २६)—,कौमुदगन्ध्यायाः पुत्रः इति विग्रहे समासे 'ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे' इति ष्यङः सम्प्रसारणेन यकारस्य इकारे पूर्वरूपे 'सम्प्रसारणस्य' इति दीर्घे विभक्तिकार्ये उक्तं रूपं सिद्धम् ।

सतीर्थ्यः (ई० २७)—समाने तीर्थे वसतीति 'सतीर्थ्यः' तीर्थः = गुरुः । अत्र 'तीर्थे ये' इत्यनेन समानस्य सादेशः ।

ईदृक् (ई० २५)—इदमिव दृश्यते 'ईदृक्' । अत्र 'इदं किमोरीश्की' इत्यनेन इदमो इश् 'ईदृक्' इति ।

कत्तृणम् (ई० ५२)—कुत्सितं तृणम् इत्यर्थं 'तृणे च जातौ' इत्यनेनात्र तृणशब्दे उत्तरपदे कोः कदादेशः ।

बलाहकः (ई० २६)—अत्र 'पृषोदरादीनि यथोपदिष्टम्' इत्यनेन पूर्वपदस्य बः उत्तरपदादेश्च लत्वम् वारिवाहको–बलाहकः ।

भवेद्वर्णागमाद्धंस (ई० २७)—'हसे हसने' इत्यतः पचाद्यचि 'वर्णागमात् =अनुस्वारागमात् 'हंसः' इति भवेत्=सिद्धयति । एवं 'हिसि हिंसायाम्' इत्यतः अचाद्यचि नुमि अनुस्वारे सकारहकारयोर्विपर्यये च 'सिंहः' इति रूपम् । एवं गूढ आत्मा यस्येति विग्रहे वर्णविकृतेः=आत्माऽऽकारस्य उकारादेशात् गुणे च

'गूढोत्मा' इति रूपं सिद्धयति। एवं वर्णनाशात् = तकारलोपात् 'पृषोदरम्' इति रूपं सिद्धयतीति भावः।

विश्वामित्रः (ई० २५)—विश्वस्य मित्रम् इति विग्रहः, अत्र 'मित्रे चर्षौ' इत्यनेन विश्वशब्दस्य दीर्घः।

तस्करः (ई० २८)—तत् करोतीति-'तस्करः' चोरः। अत्र 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' इति वार्तिकेन तलोपः सुट् च। बृहत्याः (वाचः) पतिः-'बृहस्पतिः'।

प्रायश्चित्तम् (ई० २९)—प्रायस्य चित्तम् अत्र 'प्रायस्य चितिचित्तयोः' इति गणसूत्रेण सुट्। 'प्रायः पापं चित्तं तस्य विशोधनम्' इति।

इति समासाश्रयप्रकरणम्।

अथ तद्धिताः

(१) सुबन्तात्तद्धितोत्पत्तिरिति पक्षे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लुग्भवति। प्रातिपदिकात् तद्धितोत्पत्तिरिति पक्षे तु न सुब्लुकः आवश्यकतेति सर्वत्र बोध्यम्।

दैत्यः। ६६। दितेरपत्यमिति विग्रहे दितिशब्दात् 'तस्यापत्यम्' इति अणि प्राप्ते तं प्रबाध्य 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति ण्यप्रत्ययेऽनुबन्धलोपे आदिवृद्धौ भत्वेन इकारलोपे प्रातिपदिककार्ये दैत्यः इति रूपं सिद्धम्।

आदित्यः (ई० ५२)—अदितेरपत्यमिति विग्रहे अदितिशब्दात् 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति ण्यप्रत्यये आदिवृद्धौ इलोपे विभक्तिकार्ये तत्सिद्धिः।

बाह्यः, बाहीकः—बहिर्भवः इति विग्रहे बहिष् शब्दात् 'बहिषष्टिलोपो यञ्च' इति वार्तिकेन टिलोपे यञि प्रत्ययेऽनुबन्धलोपे च कृते आदिवृद्धौ सौ रुत्वे विसर्गे बाह्यः इति रूपम्। पक्षे 'ईकक्च' इति वार्तिकेन ईकक्प्रत्यये टिलोपे 'किति च' इत्यनेन आदेरचो वृद्धौ प्रातिपदिकत्वेन सौ रुत्वे विसर्गे बाहीकः इति सिद्धम्।

औत्सः—उत्सस्यापत्यम् इति उत्सशब्दात् 'उत्सादिभ्योऽञ्' इति सूत्रेण अञ् प्रत्ययेऽनुबन्धलोपे 'तद्धितेष्वचामादेः' इति आदिवृद्धौ भत्वेन अकारलोपे 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे औत्सः इति सिद्धम् ।

गव्यम् (ई० ५३)—गोरपत्यादि गव्यम् । 'गोरजादिप्रसङ्गे यत्' इति गोशब्दात् यति 'वान्तो यि –, इति अवादेशे विभक्तिकार्ये 'गव्यम्' इति ।

इति तद्धिते साधारणप्रत्ययप्रकरणम् ।

अथ अपत्याधिकारप्रकरणम्

स्त्रैणः (ई० ४२, ४६)—स्त्रीषु आसक्तः, स्त्रीषु भवः, स्त्रीणां समूहः' स्त्रिया अपत्यम्, इत्याद्यर्थे 'स्त्रीपुंसाभ्याम्—'इति नञ्प्रत्यये अनुबन्धलोपे 'तद्धितेष्वचामादेः' इत्यादिवृद्धौ णत्वे विभक्तिकार्ये तत्सिद्धिः ।

औपगवः (ई० ४८)–उपगोरपत्यमिति विग्रहे उपगुशब्दात् 'तस्यापत्यम्' इत्यणि अनुबन्धलोपे 'तद्धितेष्वचामादेः' इत्यादिवृद्धौ 'औपगु अ' इति स्थिते 'अचो ञ्णिति' इति वृद्धि बाधित्वा 'ओर्गुणः' इति गुणे अवादेशे तद्धितान्तत्वाद् प्रातिपदिकसंज्ञायां सौ सस्य रुत्वे विसर्गे 'औपगवः' इति । उपगोर्गोत्रापत्यमिति विग्रहे तु उपगुशब्दादणि 'औपगव' शब्दात् 'अत इञ्' इति इञि प्राप्ते 'एको गोत्रे' इति सूत्रनियमात् उपगुशब्दादणेव, कृते अणन्तात्तस्मात् पुनरिञपीति बोध्यम् ।

गार्ग्यः,गर्गाः (ई० ४९)--गर्गस्य गोत्रापत्यमिति विग्रहे गर्गशब्दात् 'गर्गादिभ्यः यञ्' इति यञि आदिवृद्धौ भत्वात् 'यस्येति च' इत्यलोपे विभक्तिकार्ये 'गार्ग्यः' इति । बहुत्वे तु गर्गस्य गोत्रापत्यानि इति विग्रहे यञि आदिवृद्धौ यञञोश्च' इति यञो लुकि 'निमित्ताऽपाये नैमित्तिकस्याप्यपाय': इति परिभाषया यञनिमित्तवृद्ध्यभावे विभक्तिकार्ये तत्सिद्धिः ।

वात्स्यः (ई० ५१)–वत्सस्यापत्यमिति विग्रहे 'गर्गादिभ्यो यञ्' इति यञि आदिवृद्धौ अलोपे विभक्तिकार्ये तत्सिद्धिः ।

गार्ग्यायणः--गर्गस्य युवापत्यम् इति गर्गशब्दात् 'जीवति तु वंश्ये युवा' इत्यनेन युवसंज्ञायां 'यञिञोश्च' इति यञि प्रत्ययेऽनुबन्धलोपे आदिवृद्धौ भत्वेन अकारलोपे गार्ग्य इति स्थिते 'यञिञोश्च' इत्यनेन फकि अनुबन्धलोपे 'आयनेयीनीयियः फ ढ ख छ घां प्रत्ययादीनाम्' इत्यनेन फस्य आयनादेशे गार्ग्य + आयन् इति जाते भत्वात् अकारलोपे नस्य णत्वे प्रातिपदिकत्वेन सौ रुत्वे विसर्गे गार्ग्यायणः इति सिद्धम् ।

दाक्षिः ।५८। दक्षस्याऽपत्यम् इति दक्षशब्दात् 'अत इञ्' इति इञि प्रत्ययेऽनुबन्धलोपे भत्वे आकारलोपे 'तद्धितेष्वचामादेः' इति आदिवृद्धौ प्रातिपदिकत्वेन सौ रुत्वे विसर्गे दाक्षिः इति सिद्धम् ।

द्वैमातुरः—द्वयोर्मात्रोरपत्यम् इति द्वि + ओस्, मातृ + ओस् इति अलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति समासे सुपो लुकि द्विमातृ शब्दात् 'मातुरुत्सङ्ख्यासम्भद्रपूर्वायाः' इति अण् प्रत्यये ऋकारस्य उकारे च कृते रपरे आदिवृद्धौ प्रातिपदिकत्वेन सौ रुत्वे विसर्गे द्वैमातुरः इति सिद्धम् । एवं षण्णां मातृणामपत्यम् इति षाण्मातुरः इति सिद्धम् ।

वैनतेयः ।६१। विनताया अपत्यम् इति विनता शब्दात् 'स्त्रीभ्यो ढक्' इति ढकि प्रत्ययेऽनुबन्धलोपे 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति ढस्य एयादेशे भत्वेन अकारलोपे 'किति च' इति आदिवृद्धौ प्रातिपदिकत्वेन सौ रुत्वे विसर्गे वैनतेयः इति सिद्धम् ।

राजन्यः राजनः ।४६। राज्ञोऽपत्यं इति विग्रहे राजन् शब्दात् तस्यापत्यम् इति अण् प्राप्ते तं बाधित्वा 'राजश्वशुराद्यत्' इत्यनेन यत् प्रत्ययेऽनुबन्धलोपे भत्वे 'नस्तद्धिते च' इति टिलोपे प्राप्ते 'ये चाऽभावकर्मणोः' इति प्रकृतिभावात् निषेधे ततः प्रातिपदिकत्वेन सौ रुत्वे विसर्गे राजन्यः इति सिद्धम् । पक्षे अपत्य मात्रे अण् प्रत्यये 'अन्' इति प्रकृतिभावात् टिलोपाभावे तद्धितान्ताद् प्रातिपदिकत्वेन सौ रुत्वे विसर्गे राजनः इति सिद्धम् ।

वामदेव्यम्—वामदेवेन दृष्टं साम इति 'वामदेवाड्ड्यड्ड्यौ' इति सूत्रेण

ड्यत्प्रत्ययेऽनुबन्धलोपे डित्वात् टिलोपे प्रातिपदिकत्वेन सौ सोरमादेशे वामदेव्यम् इति सिद्धम् ।

बाहविः (ई० ४१, ४८)–बाहोरपत्यमिति विग्रहे 'बाह्वादिभ्यश्च' इति इञि 'ओर्गुणः' इति गुणेऽवादेशे विभक्ति कार्यम् ।

वाशिष्ठः (ई० ५०)—वशिष्ठस्यापत्यमिति विग्रहे 'ऋष्यन्धक–' इति अणि वृद्धौ स्वाद्युत्पत्तिः ।

अत्रयः (ई० ४०)—अत्रेः अपत्यानि पुमांसः इति विग्रहे 'इतश्चानिञः' इति ढकि 'अत्रिभृगुकुत्सवशिष्ठगोतमाङ्गिरसोभ्यश्च' इति लुकि तद्धितान्तात् प्रातिपदिकसंज्ञायां जसि गुणे अयादेशे 'अत्रयः' इति ।

गौधेरः (ई० ५१)—गोधाया अपत्यमिति विग्रहे 'गोधाया ढक्' इति ढकि ढस्य एयादेशे 'लोपो व्योर्वलि' इति यलोपे 'यस्येति च' इत्याकारलोपे कित्वादादिवृद्धौ विभक्ति कार्ये 'गौधेरः' इति । पक्षे 'भूभ्रादिभ्यश्च' इति ढकि 'गौधेयः' इति ।

भ्रातृव्यः (ई० ४५)—भ्रातुरपत्यमिति विग्रहे 'भ्रातुर्व्यच्च' इति व्यत्प्रत्यये विभक्तिकार्ये 'भ्रातृव्यः' इति । छे तु छस्य ईयादेशे 'भ्रात्रीयः' इति ।

मागधः (ई० ४१, ५२)—मगधस्यापत्यमित्यर्थे 'द्व्यञ्मगधकलिङ्गसूरमसादण्' इति अणि वृद्धौ विभक्तिकार्ये 'मागधः' इति ,

कौशल्यः (ई० ५१) – कौशलस्यापत्यं राजा वेति विग्रहे 'वृद्धेत्कोशलाऽजादाञ्ञ्यङ्' इति सूत्रेण ञ्यङि वृद्धौ स्वादिकार्ये 'कौशल्यः' इति ।

कौरव्यः (ई० ५०, ५३)–कुरोरपत्यं कुरूणां राजेति वा विग्रहे 'कुरुनादिभ्यो ण्यः' इति ण्यप्रत्यये वृद्धौ विभक्तिकार्ये 'कौरव्यः' इति ।

इति अपत्याधिकारः ।

अथ रक्ताद्यर्थप्रकरणम्

मातुलः (ई० ४६, ५२)—'मातुडु'लच्' इति डुलचि विभक्तिकार्ये 'मातुलः' इति । मातुर्भ्राता मातुलः ।

यौवनम् (ई० २७)—युवतीनां समूहः विग्रहे 'यूनस्तिः' इति तिप्रत्ययनिष्पन्नात् युवति शब्दात् 'भिक्षादिभ्योऽण्' इत्यणि आदिवृद्धौ 'भस्याढे–' इति पुंवद्भावात् तिप्रत्ययनिवृत्तौ 'अन् इति प्रकृतिभावात् टिलोपाभावे विभक्तिकार्ये 'यौवनम्' इति ।

यौवतम्—यु धातोः शतृ प्रत्यये उवङि युवत शब्दात् 'उगितश्च इति ङीपि युवती शब्दात् समूहेऽर्थे 'अनुदात्तेरञ्' इति सूत्रेण अञ् प्रत्यये अनुबन्धलोपे 'भस्याढे तद्धिते' इत्यनेन पुंवद्भावे ङीपो निवृत्तौ आदिवृद्धौ प्रातिपदिककार्ये यौवतम् इति रूपम् ।

वैयाकरणः । ४९ । व्याकरणमधीते वेद वेति विग्रहे व्याकरणशब्दात् 'तदधीते तद्वेद' इति अण् प्रत्ययेऽनुबन्धलोपे 'नय्वाभ्यां पदान्ताभ्यां पूर्वे तु ताभ्यामैच्' इत्यनेन यकारात्पूर्वमैचागमेऽनुबन्धलोपे प्रातिपदिकत्वेन सौ रुत्वे विसर्गे वैयाकरण इति सिद्धम् ।

कैदार्यम् (ई० ५१)—केदाराणां समूहः इति विग्रहे 'केदाराद्यञ्च' इति यञि वृद्धौ 'यस्येति च' इत्यालोपे विभक्तिकार्ये 'कैदार्यम्' इति । वुञ्पक्षे अकादेशे 'कैदारकम्' इति ।

जनता—जनानां समूहः इति विग्रहे 'ग्रामजनबन्धुभ्यस्तल्' इति तलि 'तलन्तं स्त्रियाम्' इति स्त्रीत्वाट्टापि विभक्तिकार्ये 'जनता' इति ।

अहीनः (ई० ४०)–अहन्शब्दात् समूहर्थे 'अहनः खः क्रतौ' इति खप्रत्यये 'आयनेयीनीयियः—' इति खस्य इनादेक्षे 'अहनष्टखोरेव' इति टिलोपे विभक्तिकार्ये 'अहीनः' क्रतुः इति शेषः ।

वात्या (ई० ५३)—वातानां समूहः इति विग्रहे 'पाशादिभ्योः यः' इति यप्रत्यये 'यस्येति च' इत्यलोपे स्त्रीत्वाट्टापि विभक्तिकार्ये 'वात्या' इति ।

शिक्षकः । ई. ४५ ।—शिक्षामधीते वेत्तिवेति विग्रहे शिक्षाशब्दात् 'क्रमादिभ्यो वुञ्' इति वुञि आदेशे 'यस्येति च' इत्यालोपे विभवितकार्ये 'शिक्षकः' इति । (एवं मीमांसामधीते वेद वेति विग्रहे 'मीमांसकः') इति ।

नैयायिकः । ई. ४५ ।—न्यायमधीते वेद वेति विग्रहे 'क्थूक्थादिसूत्रान्ताट्ठक्' इति ठकि ठस्य इकि 'न य्वाभ्याम्–'इति यकारत् पूर्वमैजागमे 'यस्येति च' इति लोपे विभक्तिकार्ये नैयायिकः' इति ।

इति रक्ताद्यर्थप्रकरणम् ।

अथ चातुरर्थिकप्रकरणम्

औदुम्बरः । ५० । उदुम्बराः सन्त्यस्मिन्देशे इति विग्रहे उदुम्बरशब्दात् 'तदस्मिन्नस्तीति देशे तन्नाम्नि' इत्यनेन अणि आदिवृद्धौ अकारलोपे तद्धितान्तत्वात् प्रातिपदिकत्वे सौ रुत्वे विसर्गे औदुम्बरः इति सिद्धम् ।

कौशाम्बी । ४७ । कुशाम्बेन निर्वृत्ता नगरीति विग्रहे कुशाम्बशब्दात् 'तेन निर्वृत्तम्'इत्यनेन अण् प्रत्यये आदिवृद्धौ अणन्तत्वात् 'टिड्ढाणञ्द्वयसज्दध्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' इत्यनेन ङीपि अनुबन्धलोपे भत्वेन अकारलोपे प्रातिपदिकत्वेन सौ हल्ङ्यादिना सुलोपे कौशाम्बी इति सिद्धम् ।

वैदिशम् । ई. ५२ । विदिशाया अदूरभवं नगरमित्यर्थे । 'अदूरभवश्च' इत्यणि आदिवृद्धौ 'यस्येति च' इत्यालोपे विभक्तिकार्ये 'वैदिशम्' इति ।

शार्करम् । ई० ४९ । शर्कराः सन्त्यस्मिन्, शर्कराभिः निर्वृत्तमिति वा विग्रहे शर्कराशब्दात 'शर्करायाा वा' इति वाग्रहणात् पक्षे अणिते नैव तस्य लुकि 'लुपि युक्तवद्व्यक्तिवचने' इति युक्तवद्भावे विभक्तिकार्ये 'शर्करा' इति । लुपः पाक्षिकत्वात् तदभावे अणि वृद्धौ 'यस्येति च' इत्यालोपे 'शार्करम्' इति । अणभावपक्षे 'ठक्छौ च' इति ठकि ठस्य इकि 'किति च' इत्यादिवृद्धौ 'यस्येति च' इत्यालोपे विभक्तिकार्ये 'शार्करिकम्' इति । तेनैव सूत्रेण छप्रत्यये छस्य ईयादेशे 'यस्येति च' इत्यालोपे आदिवृद्धौ विभक्तिकार्ये 'शर्करीयम्' इति । शर्कराशब्दस्य कुमुदादिषु पाठाद् 'वुञ्छण्कठ—' इति सूत्रेण ठकि ठस्य इकादेशे 'यस्येति च'

इत्यालोपे आदिवृद्धौ विभक्तिकार्ये 'शार्करिकम्' इति। वराहादिषु पाठात् 'वुञ्छण्कठ–' इति सूत्रेण कठि कित्त्वादादिवृद्धौ 'यस्येति च' इत्यालोपे विभक्तिकार्ये 'शार्करम् इति।

कुमुद्वान्‌ (ई. ४१)–कुमुदानि सन्त्यस्मिन् देशे–कुमुदशब्दात् 'कुमुदनडवेतसेभ्यो ड्मतुप्' इति सूत्रेण ड्मतुप्प्रत्यये 'झयः' इति मतुपो मस्य वत्वे 'यस्येति च' इत्यालोपे नुमि संयोगान्तलोपे दीर्घे सुलोपे 'कुमुद्वान्' इति। कुमुद्वान् देशः।

शाद्वलः (५३) शादाः सन्त्यस्मिन् इति विग्रहे 'नडशादाड्ड्वलच् इति शादशब्दात् ड्वलचि डित्वाद्लोपे विभक्तिकार्ये 'शाद्वलः' इति।

शिखावलः (ई. ४८)–शिखाः सन्त्यस्मिन् इति शिखावलो देशः। 'शिखाया वलच्' इति शिखाशब्दाद् वलचि विभक्तिकार्ये 'शिखावलः' (मयूरः) इति।

उत्करीयः (५१)—उत्कराः सन्त्यस्मिन् इति विग्रहे उत्करशब्दात् 'उत्करादिभ्यश्च' इति छप्रत्यये छस्य ईयादेशे भत्वादलोपे विभक्तिकार्ये 'उत्करीयः' इति।

इति चातुरर्थिकप्रकरणम्।

अथ शैषिकप्रकरणम्

राष्ट्रियः (ई. ३४)–राष्ट्रे जातः, भवः इत्यादिविग्रहे 'राष्ट्राऽवारपाराद्घखौ' इति घप्रत्यये 'आयनेयीनीयियः-' इति सूत्रेण घस्य इयादेशे भत्वाद् 'यस्येति च' इति टिलोपे विभक्तिकार्ये 'राष्ट्रियः' इति।

पारावारीण :—'राष्ट्राऽवारपाराद्घखौ' इति सूत्रस्य 'अवारपाराद्विगृहीतादपि, विपरीताच्चेति वक्तव्यम्' इति वार्तिकस्याऽयमर्थः—' विगृहीतात्=पृथग्भूतात्' अवारशब्दात्, पारशब्दात् च=पुनः, विपरीतात्='पारावारशब्दादपि

खप्रत्ययो वक्तव्यः' इति ।। ततश्च अवारे जातः 'अवारीणः' पारे जातः 'पारीणः' पारावारे जातः 'पारावारीणः' इति रूपत्रयं सिद्धं भवति । अत्र 'आयनेयी—' इति सूत्रेण खस्य ईनादेशः 'यस्येति च' इति टिलोपः नस्य णत्वं । 'अवारपारीणः' इति तु चतुर्थरूपं बोध्यम् ।

ग्रामीणः, ग्राम्यः-ग्रामे जातादिरिति विग्रहे ग्रामशब्दात् 'ग्रामद्यखञौ' इति खञि 'आयनेयी' इति खस्य ईनादेशे 'यस्येति च' इति टिलोपे णत्वे विभक्तिकार्ये 'ग्रामीणः' इति । यप्रत्यये तु 'ग्राम्यः इति ।

पौरस्त्यः (ई. ५२) पुरसि जातादिरिति विग्रहे 'दक्षिणापश्चात्पुरसस्त्यक्' इति त्यकि 'किति च' इति वृद्धौ विभक्तिकार्ये 'पौरस्त्यः' इति ।

यौष्माकीणः । ई. ५१ । युवयोः युष्माकं वाऽयमिति विग्रहे'युष्मदस्मदोरन्यतरस्यां खञ् च' इति युष्मच्छब्दात् खञि खस्य ईनादेशे 'तस्मिन्नणि च युष्माकास्माकौ' इति युष्माकादेशे 'यस्येति च' इति टिलोपे आदिवृद्धौ णत्वे 'यौष्माकीणः' इति ।

मामकीनः । ई. ५३ । मम अयमिति विग्रहे 'युष्मदस्मदोरन्यतरस्यां खञ् च' इति खञि खस्य ईनादेशे 'तवकममकावेकवचने' इति अस्मच्छब्दस्य ममकादेशे आदिवृद्धौ 'यस्येति च' इति टिलोपे विभक्तिकार्ये 'मामकीनः' इति ।

शौवस्तिकम् । ई. ५० । श्वस् इत्यव्ययात् जाताद्यर्थे 'श्वसस्तुट् च' इति ठञि ठस्य इकादेशे तुडागमे 'द्वारादीनां च' इति वृद्धि प्रबाध्य वकारात्पूर्वमैजागमेन औकारे विभक्तिकार्ये 'शौवस्तिकम्' इति ।

भावत्कः (ई॰ ५२)—भवतामयं इति विग्रहे । 'त्यदादीनि च' इति वृद्धिसंज्ञकात् डवतुप्रत्ययान्तात् भवतशब्दात् 'भवतष्ठक्छसौ'इति ठकि 'इसुसुक्तान्तात् कः' इति ठस्य कादेशे 'किति च' इति आदिवृद्धौ विभक्तिकार्ये 'भावत्कः' इति । छप्रत्ययये तु छस्य इयादेशे तस्य जश्त्वे 'भवदीयः' इति ।

ग्रैष्मम् (ई० ४४, ४७)—ग्रीष्मे भवमिति विग्रहे 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' इत्यणि वृद्धौ विभक्तिकार्ये 'ग्रैष्मम्' इति ।

प्रावृषेण्यः (ई० ४८) प्रावृषि भवः इति विग्रहे 'प्रावृष एण्यः' इति

'प्रावृष' शब्दाद् एण्यप्रत्ययये विभक्तिकार्ये 'प्रावृषेण्यः' इति ।

प्रावृषिकः (ई० ४९)—प्रावृषि जातः इति विग्रहे 'प्रावृष एण्यः' इति सूत्रं प्रबाध्य 'प्रावृष्ठप्' इति ठपि ठस्य इकादेशे विभक्तिकार्ये 'प्रावृषिकः' इति ।

हैमवती (ई० ४२)—हिमवतः प्रभवति इति विग्रहे 'प्रभवति' इति अणि वृद्धौ अण्णन्तत्वाद् ङीपि विभक्तिकार्ये 'हैमवती गङ्गा' इति ।

शारीरकीयः (ई० ५३)—शरीरस्याऽयं शारीरः, (भवार्थे अण्), शरीर एव शारीरकः (स्वार्थे कः) तमधिकृत्य कृतो ग्रन्थः इति विग्रहे । 'अधिकृत्य कृते ग्रन्थे' इति सूत्रेण शारीरकशब्दात् छप्रत्यये छस्य ईयादेशे भत्वादलोपे विभक्ति कार्ये 'शारीरकीयः' इति ।

हालिकम् (ई० ५१)— हलस्य इदमिति विग्रहे 'हलसीराट्ठक्' इति ठकि 'किति च' इत्यादिवृद्धौ इकादेशे भत्वादलोपे विभक्तिकार्ये 'हालिकम्' इति ।

इति शैषिकप्रकरणम् ।

अथ विकारार्थप्रकरणम्

कापित्थम् (ई० ५०)—कपौ तिष्ठतीति कापित्थः, तस्य विकारः अवयवो वेति विग्रहे 'अनुदात्तादेश्च' इति अञि वृद्धौ स्वाद्युत्पत्तिः ।

आश्मनम् (ई०२४) अश्मन् शब्दात् स्वार्थे कप्रत्ययः । तदभावे अश्मेत्यपि नाम । तस्य विकारो अवयवो वेत्यर्थे 'अश्मन्' शब्दात् 'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः' इति मयटि नलोपे विभक्तिकार्ये 'अश्ममयम्' इति । मयडभावे 'तस्य विकारः' इत्यणि 'अन्' इति प्रकृतिभावाट्टिलोपाऽभावे आदिवृद्धौ विभक्तिकार्ये 'आश्मनम्' इति नच विकारार्थकत्वे 'अश्मनो विकारे टिलोपो वक्तव्यः' इति वार्तिकेन टिलोपः कुतो नेति वाच्यम्, पाषाणवाचकत्वेन प्रसिद्धस्याश्मन्शब्दस्यैव

तत्र ग्रहणात् । पाषाणवाचकाद् अश्मन् शब्दात्तु विकारार्थे अणि टिलोपे आदिवृद्धौ विभक्तिकार्ये आश्मः' इति भवति ।

आम्रमयम् (ई० ५१)—आम्रस्य विकारोऽवयवो वेत्यर्थे 'नित्यं वृद्धिशरीरादिभ्यः' इति आम्रशब्दात् मयटि विभक्तिकार्ये 'आम्रमयम्' इति ।

ऐणेयम् (५२)—एण्या अवयवो विकारो वेति विग्रहे 'एण्या ढञ्' इति ढञि ढस्य 'आयनेयी–' इति एयादेशे 'यस्येति च' इति ईकारलोपे विभक्तिकार्ये 'ऐणेयम्' इति ।

गव्यम् (ई० ४८)—गोर्विकारोऽवयवो वेत्यर्थे 'गोपयसोर्यत्' इति गोशब्दात् यत्प्रत्यये 'वान्तो यि–' इत्यवादेशे विभक्तिकार्ये 'गव्यम्' इति ।

आमलकम् (ई० ५३)—आमलक्याः फलमिति विग्रहे मयटि 'फले लुक्' इति तस्य लुकि 'लुक् तद्धितलुकि' इति ङीषो लुकि विभक्तिकार्ये आमलकम्' इति ।

इति विकारार्थप्रकरणम्

अथ ठगधिकारप्रकरणम्

शाब्दिकः (२० ४९)—शब्दं करोतीति विग्रहे शब्ददर्दुरं करोति' इति ठकि ठस्येकादेशे 'किति चे'ति वृद्धौ विभक्तिकार्ये 'शाब्दिकः' इति । प्रकृतिप्रत्ययविभागेन शब्दं व्युत्पादयतीत्यर्थः ।

लावणिकः (५०)—लवणम् (पण्यम्) अस्येति विग्रहे 'लवणाट्ठञ्' इति ठञि ठस्येकादेशे 'किति चे'ति वृद्धौ भत्वादलोपे विभक्तिकार्ये लावणिकः' इति ।

शाक्तीकः (५१)—शक्तिरस्ति अस्येति विग्रहे 'शक्तियष्ट्योरीकक्'

इति प्रथमान्तात् शक्तिशब्दात् ईकक्प्रत्यये 'किति चे' ति वृद्धौ सवर्णदीर्घे विभक्तिकार्ये 'शातीकः' इति ।

आस्तिकः (२०) अस्ति परलोकः इत्येवं मतिर्यस्येति विग्रहे 'अस्तिनास्तिदिष्टं मतिः' इति ठकि ठस्य इकादेशे 'किति च' इत्यादिवृद्धौ विभक्तिकाय 'आस्तिकः' इति ।

मारीचिकम् ।२६। मरीचेन संस्कृतम् इति विग्रहे मरीचशब्दात् 'संस्कृतम्' इति सूत्रेण ठक् प्रत्ययेऽनुबन्धलोपे ठस्येकादेशे भत्वेन अकारलोपे 'किति च' इति आदिवृद्धौ प्रातिपदिकत्वात्सौ सोरमादेशे पूर्वरूपे मारीचिकम् इति सिद्धम् ।

छात्रः (इं. ५२) गुरोर्दोषाणामावरणं छत्रं, तच्छीलमस्येति विग्रहे 'छात्रादिभ्यो णः' इति प्रथमान्तात् छत्रशब्दात् णप्रत्यये वृद्धौ विभक्तिकार्ये 'छात्रः' इति ।

इति ठगधिकारप्रकरणम् ।

अथ प्राग्धितीयप्रकरणम्

युग्यः । ५२ । युगं वहति इति विग्रहे युगशब्दात् 'तद्वहति रथयुगप्रासङ्गम्' इत्यनेन यत् प्रत्ययेऽनुबन्धलोपे भत्वादकारलोपे प्रातिपदिकत्वात्सौ रुत्वे विसर्गे युग्यः इति सिद्धम् ।

धौरेयः—धुरं वहति इति धुर्शब्दात् 'धुरो यड्ढकौ, इत्यनेन ढकि अनुबन्धलोपे आदिवृद्धौ ढस्य 'आयनेयीनीयियः' इत्यादिना एयादेशे प्रातिपदिकत्वात् सौ रुत्वे विसर्गे 'हलि च' इति दीर्घे प्राप्ते तस्य 'न भकुर्छुराम्' इति निषेधे धौरेयः इति सिद्धम् ।

नाव्यम्—नावा तार्यमिति विग्रहे नौ शब्दात् 'नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यमसमितसंमितेषु' इति यति आवादेशेप्रातिपदि-

कार्ये नाव्यम् इति सिद्धम् ।

मूल्यः (ई. ५३)—मूलेन समः इति विग्रहे 'नौवयोधर्मविषमूल इति सूत्रेण मूलशब्दात् यति भत्वादलोपे विभक्तिकार्ये 'मूल्यः' इति ।

सभ्यः (ई. ४०) सभायां साधुरिति विग्रहे 'सभाया यः' इति सभाशब्दात् यप्रत्यये भत्वात् 'यस्येति च' इत्यालोपे विभक्तिकार्ये 'सभ्य.' इति ।

इति प्राग्घितीयप्रकरणम् ।

अथ छयतोरधिकरप्रकरणम्

नभ्यम्—नाभये हितमिति विग्रहे नाभिशब्दात् 'उगवादिभ्यो यत्' इति यत्प्रत्यये 'नाभि नभं च' इति नाभेर्नभादेशे 'यस्येति च' इकारलोपे विभक्तिकार्ये 'नभ्यम् (अञ्जनम्) इति ।

शून्यम् (ई. ४२)–शुने हितमिति विगहे 'उगवादिभ्यो यत्' इति श्वन्शब्दात् यति प्रत्यये 'शुनः सम्प्रसारणं वा च दीर्घत्वम्' इति गणसूत्रेण सम्प्रसारणे पूर्वरूपे विभाषया दीर्घे कृते च विभक्तिकार्ये 'शून्यम्' इति । दीर्घाऽभावे 'शुन्यम्' इति ।

दन्त्यम् ।२७।—दन्ताय हितम् इति दन्तशब्दात् 'शरीरावयवाद्यत्' इति सूत्रेण यत् प्रत्ययेऽनुबन्धलोपे भत्वेन अकारलोपे प्रातिपदिकत्वेन सौ सोरमादेशे पूर्वरूपे दन्त्यम् इति सिद्धम् ।

आत्मनीनम् (ई० ४९, ५२)—आत्मने हितमिति विग्रहे आत्मन्शब्दात् 'आत्माऽध्वानौ खे' इति सूत्रेण खप्रत्यये 'आयनेयी--' इति खस्य ईनादेशे विभक्तिकार्ये 'आत्मनीनम्' इति ।

मातृभोगीण (ई० ५०)—'मातुर्भोगः शरीरम्, तस्मै हितमिति विग्रहे

मातृभोगशब्दाद् 'आत्मन्विश्वजन्भोगोत्तरपदात् खः' इति खप्रत्यये 'आयनेयीनीयि—' इति खस्य ईनादेशे 'यस्येति च' इत्यलोपे 'कुमति च' इति णत्वे विभक्तिकार्ये 'मातृभोगीणः' इति ।

इति छयतोरधिकारप्रकरणम्

अथ ठञधिकारप्रकरणम्

नैष्ककम्—निष्केण क्रीतमिति विग्रहे 'असमासे निष्कादिभ्यः' इति निष्कशब्दात् ठकि ठस्येकादेशे 'किति च' इति वृद्धौ 'भत्वादलोपे विभक्तिकार्ये 'नैष्किकः' इति ।

अर्घ्यः (ई० ५३)—अर्घमर्हतीति विग्रहे 'अर्घशब्दात् 'दण्डादिभ्यो यत्' इति यति भत्वादलोपे विभक्तिकार्ये 'अर्घ्यः' इति ।

वध्यः (ई० ४०)—वधमर्हतीति विग्रहे वधशब्दात् 'दण्डादिभ्यो यत्' इति यति भत्वादलोपे विभक्तिकार्ये 'वध्यः' इति ।

आह्निकम (ई० ४९)—अह्ना निर्वृत्तमिति विग्रहे'तेन निर्वृत्तम्' इति ठकि ठस्य इकादेशे'किति च' इत्यादिवृद्धौ भत्वादलोपे विभक्तिकार्ये 'आह्निकम्' इति ।

सार्वभौमः । ४९ ।—सर्वभूमेरीश्वरः इति विग्रहे सर्वभूमिशब्दात् 'तस्येश्वरः' इत्यनेन अण् प्रत्ययेऽनुबन्धलोपे 'अनुशतिकादीनां च' इत्यनेन उभयपदवृद्धौ भत्वे इकारलोपे तद्धितान्तत्वात्प्रातिपदिकसंज्ञायां सौ रुत्वे विसर्गे सार्वभौमः इति सिद्धम् ।

इति ठञधिकारप्रकरणम् ।

अथ त्वतलोरधिकारप्रकरणम्

गोत्वम्—गोर्भावः इति विग्रहे गो शब्दात् 'तस्य भावस्त्वतलौ' इत्यनेन त्वप्रत्यये प्रातिपदिककार्ये गोत्वम् इति सिद्धम् ।

स्त्रैणम्—स्त्रियाः भावः इति स्त्रीशब्दात् 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इत्यनेन नञ्, प्रत्ययेऽनुबन्धलोपे सुपो लुकि ञित्वात् 'तद्धितेष्वचामादेः' इति आदिवृद्धौ नस्य णत्वे प्रातिपदिककार्ये स्त्रैणम् इति सिद्धम् ।

इति त्वतलोरधिकारप्रकरणम् ।

अथ भावकर्मार्थप्रकरणम्

प्रथिमा—पृथोर्भावः इति विग्रहे पृथुशब्दात् 'पृथ्वादिभ्य इमनिज्वा' इति इमनिचि 'पृथु इमन्' इति स्थिते 'र ऋतो हलादेर्लघोः' इति ऋकारस्य रेफादेशे भत्वे भत्वात् 'टेः' इति थकारोत्तरवर्त्युकारलोपे तद्धितान्तत्वात् प्रातिपदिकत्वे सौ'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घे हल्ङ्याब्भ्यो दीर्घात् लोपे नलोपे 'प्रथिमा' इति । पक्षे 'इगन्ताच्च लघुपूर्वात्' इति अणि वृद्धौ रपरत्वे 'ओर्गुणः' इति गुणे अवादेशे इमनिजभावविभक्तिकार्ये 'पार्थवम्' इति । त्वप्रत्यये 'पृथुत्वम्' इति । तल्प्रत्यये 'पृथुता' इति ।

म्रदिमा (ई० ५२)—मृदोर्भावः—म्रदिमा, मार्दवम्, मृदुत्वम्, मृदुता इति ।

स्तेयम् (ई. ४२)—स्तेनस्य भावः कर्म वेति विग्रहे 'स्तेनाद्यन्नलोपः' इति यति नलोपे विभक्तिकार्ये 'स्तेयम्' इति ।

कापेयम् । ५० । कपेर्भावः कर्म वा इति विग्रहे कपि शब्दात् 'कपिज्ञात्यो-

ढक्' इति सूत्रेण ढकि प्रत्ययेऽनुबन्धलोपे सुब्लुकि 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इत्यनेन ढस्य एयादेशे 'किति च' इति आदिवृद्धौ भत्वे इकारलोपे प्रातिपदिकत्वात् सौ सोरमि पर्वरूपे कापेयम् इति सिद्धम् ।

सैनापत्यम् । ४९ : सेनापतेर्भावः कर्म वा इति विग्रहे सेनापतिशब्दात् 'पत्यन्तपुरोहितादिभ्यो यक्' इत्यनेन यक् प्रत्ययेनुबन्धलोपे 'यचि भम्' भसंज्ञायां 'यस्येति च' इति इकारस्य लोपे 'किति च' इति आदिवृद्धौ प्रातिपदिकत्वात् सौ सोरमादेशे पूर्वरूपे सैनापत्यम् इति सिद्धम् ।

पौरोहित्यम् । ६० । पुरोहितस्य भावः कर्म वा इति विग्रहे पुरोहितशब्दात् 'पत्यन्तपुरोहितादिभ्यो यक्' इति सूत्रेण यक् प्रत्ययेऽनुबन्धलोपे भत्वेन अकारलोपे आदिवृद्धौ प्रातिपदिकत्वेन सौ सोरमादेशे पूर्वरूपे पौरोहित्यम् इति सिद्धम् ।

रामणीयकम् (ई० ४८) रमणीयस्य भावः कर्म वेति विग्रहे रमणीयशब्दात् 'योपधाद् गुरूपोत्तमात् वुञ्' इति वुञि वोरकादेशे आदिवृद्धौ भत्वादलोपे विभक्ति कार्ये 'रामणीयकम्' इति ।

अभिधानीयकम् (ई० ५१)—अभिधानीयस्य भावः कर्म वेति विग्रहे 'योपधात्–' इति अभिधानीयशब्दात वुञि वोरकादेशे ञित्वादादिवृद्धौ भत्वादलोपे विभक्तिकार्ये तत्सिद्धम् ।

मानोज्ञकम् (ई० ५०)—मनोज्ञस्य भावः कर्म वेति विग्रहे 'द्वन्द्वमनोज्ञादिभ्यश्च' इति वुञि वोरकादेशे ञित्वादादिवृद्धौ भत्वादलोपे विभक्तिकार्ये 'मानोज्ञकम्' इति ।

इति भावकर्मार्थप्रकरणम् ।

अथ पांचमिकप्रकरणम्

सर्वाङ्गीणः—सर्वाङ्गं व्याप्नोतीति सर्वाङ्गीणः । सर्वाङ्गशब्दात् 'तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति' इति सूत्रेण खप्रत्यये खस्य ईनादेशे भत्वादलोपे

णत्वे विभक्तिकार्ये 'सर्वाङ्गीणः' इति ।

श्रोत्रियः ।४४। छन्दोऽधीते इति विग्रहे छन्दस् शब्दात् 'श्रोत्रियंश्छन्दोऽधीते' इत्यनेन घन्प्रत्ययेनुबन्धलोपे छन्दसः श्रोत्रादेशे च कृते 'आयनेयीनीयियः' इत्यादिना घस्य इयादेशे भत्वेन अकारलोपे प्रातिपदिकत्वात् सौ रुत्वे विसर्गे संयोगे श्रोत्रियः इति सिद्धम् ।

अविपटः (ई० ४२)—अवीनां विस्तारः इति विग्रहे' विस्तारे पटच्' इति अविशब्दात् पटच्प्रत्यये विभक्तिकार्ये 'अविपटः' इति ।

कर्मठः—कर्मणि घटते इति विग्रहे कर्मणि घटोऽठज्' इति सूत्रेण सप्तम्यन्तात् कर्मन्शब्दात् अठचि 'नस्तद्धिते' इति टिलोपे विभक्तिकार्ये 'कर्मठः' इति । अठचि ठस्य अङ्गात्परत्वाऽभावादिकादेशो न ।

पण्डितः–सदसद्विवेकिनी बुद्धिः पण्डा, पण्डा=बुद्धि : सञ्जाताऽस्येति विग्रहे पण्डाशब्दात् प्रथमान्तात् 'तदस्य सञ्जातं तारकादिभ्यः इतच्' इति इतचि भत्वादलोपे विभक्तिकार्ये 'पण्डित' इति ।

प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम ।
ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात्, संख्या बाह्या तु सर्वतः ॥

प्रथमः=द्वयसच् प्रत्ययः, द्वितीयः=दघ्नच् प्रत्ययः, ऊर्ध्वेति—ऊर्ध्वाः स्थितेन येन मीयते तत् 'ऊर्ध्वमानम्' यथा—ऊर्वादि । ए' त्र मात्रच् प्रत्ययः प्रमाणे =परिच्छेदैकमात्रे भवति । दघ्नच् द्वयसचौ तूर्ध्वमाने एव भवतः इति लब्धम् ।

कियान्–किं परिमाणमस्येति विग्रहे 'किमिदंभ्यां वो घः' इति वतुपि वस्य घत्वे च विहिते 'इदंकिमोरीश्की' इति किमः की इत्यादेशे 'की यत्' इति स्थिते 'आयनेयी--' इति घस्य इयादेशे 'यस्येति च' इति इकारलोपे 'कियत्' इति जाते कृदन्तत्वात् सौ उगित्वान्नुमि उपधादीर्घे संयोगान्तलोपे हल्ङ्यादिलोपे 'कियान्' इति ।

विंशः—विंशतेः पूरणः इति विग्रहे 'विंशतिशब्दात् तस्य पूरणे डट्'

इति डटि 'तिविंशतेर्डिति' इति तिलोपे 'असिद्धवदत्राऽभात्' इति तिलोपस्या-सिद्धत्वात् 'यस्येति च' इत्यलोपस्याप्राप्तया 'अतो गुणे' इति पररूपे विभक्ति-कार्ये 'विंशः' इति ।

गोमान् । ४० ।—गावोऽस्त्यस्मिन् वा सन्ति इति विग्रहे गोशब्दात् 'तदस्याऽस्त्यस्मिन्निति मतुप्' इति सूत्रेण मतुप्प्रत्ययेऽनुबन्धलोपे प्रातिपदिकत्वात् सौ 'उगिदचां सर्वनामस्थानेचाऽधातोः' इति नुमि 'अत्वसन्तस्य चाऽधातोः' इति दीर्घे हल्ङ्यादिना सुलोपे तकारस्य संयोगान्तलोपे कृते गोमान् इति सिद्धम् ।

षष्ठः (ई० ४८)–षण्णां पूरणः इति विग्रहे 'तस्य पूरणे डट्' इति डटि 'षट्कतिकतिपयचतुरां थुक्' इति थुगादेशे ष्टुत्वे विभक्तिकार्ये 'षष्ठः' इति ।

चतुर्थः, तुरीयः, तुर्यः (ई० ४१)–चतुर्णां पूरण इत्यर्थे षष्ठयन्तात् चतुर-शब्दात् 'तस्य पूरणे 'डट्' इति डटि सुब्लुकि 'षट्कति—'इति थुकि विभक्ति-कार्ये 'चतुर्थः' इति । पक्षे चतुर्शब्दात् 'चतुरश्छयतावाद्यक्षरलोपश्च' इति छप्रत्यये चतुरश्चकारस्य लोपे च कृते सुब्लुकि 'आयनेयी-' इति छस्य ईयादेशे विभक्तिकार्ये 'तुरीयः' इति । यत्प्रत्यये तु 'तुर्यः इति ।

अच्छावाकीयम् (ई० ४०) अच्छावाक-शब्दोऽस्त्यस्मिन् इति विग्रहे 'मतौ छः सूक्तसाम्नोः' इति छप्रत्यये छस्य ईयादेशे भत्वादलोपे विभक्तिकार्ये 'अच्छावाकीयम्' इति ।

इष्टी (ई० ४९) इष्टामनेनेति विग्रहे 'इष्टादिभ्यश्च' इति इनिप्रत्यये भत्वादल्लोपे सौ दीर्घे सुलोपे नलोपे 'इष्टी' इति ।

साक्षी (ई० ५०) साक्षाद् द्रष्टा इति विग्रहे । 'साक्षाद् द्रष्टरि संज्ञायाम्' इति सूत्रेण साक्षादित्यव्ययात इनि प्रत्यये 'अव्ययानां भमात्रे टिलोपः' इति टिलोपे सौ दीर्घे सुलोपे नलोपे 'साक्षी' इति ।

इति पाञ्चमिकप्रकरणम् ।

अथ मत्वर्थीयप्रकरणम्

तदस्याऽस्त्यस्मिन्निति मतुप्–तदिति प्रथमान्तादस्य अस्मिन् वा अस्त्यर्थे मतुप् स्यादित्यर्थः। अत्र सूत्रे इतिशब्दात् विषयविशेषो लभ्यते। तथाहि हरिकारिका—

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः॥ इति।

विदुष्मान्—विद्वस्शब्दात् 'तदस्याऽस्त्यस्मिन्' इति मतुपि 'तसौ मत्वर्थे' इति भत्वात् 'वसोः सम्प्रसारणम्' इति सम्प्रसारणे पूर्वरूपे सस्य षत्वे 'विदुष्मत्' इति, तस्मात् सौ उगित्वान्नुमि 'अत्वसन्तस्य-' इति दीर्घे सुलोपे संयोगान्तलोपे 'विदुष्मान्' इति।

फेनिलः (ई० ४८)—फेनशब्दात् 'फेनादिलच्च' इति इलच् प्रत्यये भत्वादलोपे विभक्तिकार्ये 'फेनिलः'। चकारात् लच्प्रत्यये 'फेनलः' इति। पक्षे-मतुपि 'फेनवान्' इति।

द्रुमः (ई० ४४, ४५)--द्रुः (शाखा) अस्यास्तीति विग्रहे 'द्युद्रुभ्यां मः' इति द्रुशब्दात् मप्रत्यये विभक्तिकार्ये 'द्रुमः' (वृक्षः)। मतुपि तु 'द्रुवान्' इति।

केशवः (ई० ५१)--केशोऽस्यास्तीति विग्रहे केशशब्दात् 'केशाद्वोऽन्यतरस्याम्' इति वप्रत्यये स्वादिकार्ये 'केशवः' इति। सूत्रस्थाऽन्यतरस्याङ्ग्रहणेनैव पक्षे मतुप्सिद्धे वाग्रहणमिनिठनोः समावेशार्थम्। तेन पक्षे केशी, केशिकः, केशवान् इति च सिद्धम्।

दन्तावलो हस्ती (ई. ५०)—दन्ताः सन्ति अस्येति विग्रहे 'दन्तशिखात् संज्ञायाम्' इति वलचि'वले' इति सूत्रेण दीर्घे विभक्तिकार्ये 'दन्तावलः' इति।

तुन्दिलः (ई. ४९)–तुन्दशब्दाद् 'तुन्दादिभ्य इलच्' इति सूत्रेण इलचि भत्वादलोपे विभक्तिकार्ये 'तुन्दिलः' इति।

इति मत्वर्थीयप्रकरणम्।

अथ प्राग्दिशीय प्रकरणम्

क्व, कुत्र, कस्मिन् (ई० ४२, ४४) सप्तम्यन्तात् किम्शब्दात् 'किमोऽत्' इत्यति सुब्लुकि 'क्वाति' इति किमः क्वादेशे पररूपं तद्धितान्तत्वात् सौ तसिलन्तस्याव्ययत्वेन सुब्लुकि 'क्व' इति। पक्षे 'सप्तम्यास्त्रल्' इति त्रलि 'कुत्र' इति। तदभावे 'कस्मिन्' इति।

कदा—कस्मिन् काले कदा। सप्तम्यन्तात् किम्शब्दात् 'सर्वैकान्य-' इति दाप्रत्यये सुब्लुकि 'प्राग्दिशो विभक्तिः' इति विभक्तिसंज्ञायाम् 'किमः कः' इति कादेशे अव्ययत्वात् सोर्लुकि 'कदा' इति।

एतर्हि (ई. ५२) अस्मिन् काले एतर्हि। इदम्शब्दात् सप्तम्यन्तात् 'इदमो र्हिल्' इति र्हिलप्रत्यये सुब्लुकि 'एतेतौ रथोः' इति इदमः एतादेशे सौ तसिलादिषु पाठात् अव्ययत्वात् सोर्लुकि 'एतर्हि' इति।

तर्हि—सप्तम्यन्तात् तत्शब्दात् 'अनद्यतने र्हिलन्यतरस्याम्' इति र्हिलि प्रत्यये अत्वे पररूपे सौ अव्ययत्वात् सोर्लुकि 'तर्हि' इति। पक्षे दाप्रत्यये सति 'तदा' इति।

इत्थम्–अनेन एतेन वा प्रकारेण इति विग्रहे इदम्, शब्दात्, एतद् शब्दात् वा 'प्रकारवचने थाल्' इति थालि प्राप्ते तं प्रबाध्य 'इदमस्थमुः इत्यनेन थमु प्रत्ययेऽनुबन्धलोपे 'एतेतौ रथोः' इति इदमः स्थाने इत् इत्यादेशे प्रातिपदिककार्ये इत्थम् इति सिद्धम्।

इति प्राग्दिशीयप्रकरणम्।

अथ प्रागिवीयप्रकरणम्

चतुर्धा (ई. ५०) चतुर्शब्दात् 'संख्याया विधार्थे धा' इति स्वार्थे धाप्रत्यये सोर्लुकि 'चतुर्धा' इति।

लघीयान् (ई. ३०) अयमेषामतिशयेन लघुरिति विग्रहे 'द्विवचनविभज्योपपदे तरबीयसुनोः' इति ईयसुनि अनुबन्धलोपे भसंज्ञायां 'टेः' इति घकारोत्तरवर्त्युकारस्य लोपे 'लघीयस्' शब्दात् प्रातिपदिकत्वेन सौ 'उगिदचाम्' इति नुमि 'सान्तमहतः' इति दीर्घे सुलोपे संयोगान्तलोपे तत्सिद्धिः ।

श्रेष्ठः (ई. ४८) अयमेषामतिशयेन प्रशस्यः इति विग्रहे प्रशस्यशब्दात् 'अतिशायने तमबिष्ठनौ' इति इष्ठनि प्रत्यये अनुबन्धलोपे 'प्रशस्यस्य श्रः' इति श्रादेशे 'प्रकृत्यैकाच्' इति प्रकृतिभावे 'टेः' इति टिलोपाभावे गुणे विभक्तिकार्ये तत्सिद्धिः ।

श्रेयान् (ई. ३४) अयमनयोरतिशयेन प्रशस्यः इति विग्रहे प्रशस्यशब्दात् 'द्विवचनविभज्योपपदे' इतीयसुनि अनुबन्धलोपे 'प्रशस्यस्य श्रः' इति श्रादेशे 'प्रकृत्यैकाच्' इति प्रकृतिभावेन टिलोपाभावे गुणे प्रातिपदिकत्वात् सौ उगित्त्वान्नुमि 'सान्तमहतः' इति दीर्घे सुलोपे तत्सिद्धिः !

ज्यायान् (ई. ४८) द्वयोर्मध्येऽतिशयेन प्रशस्यः इति विग्रहे प्रशस्यशब्दात् 'द्विवचनविभज्योपपदे तरबीयसुनौ' इतीयसुनि अनुबन्धलोपे 'ज्य च' इति ज्यादेशे 'प्रकृत्यैकाच्' इति प्रकृतिभावाट्टिलोपाभावे 'ज्यादादीयसः' इत्यनेन 'आदेः परस्ये'ति सहकारात् प्रत्ययस्यादेरीकारस्याऽऽकारादेशे सवर्णदीर्घे 'ज्यायस्' शब्दात् प्रातिपदिकसंज्ञायां सौ उगित्त्वान्नुमि अनुबन्धलोपे उपधादीर्घे सुलोपे संयोगान्तलोपे तत्सिद्धिः ।

स्थविष्ठः (ई. ४९) अयमनयोरतिशयेन स्थूलः इति विग्रहे 'अतिशायने तमबिष्ठनौ' इतीष्ठनि 'स्थूलदूरयुवह्रस्व ' इति सूत्रेण इष्ठनि प्रत्यये परे 'ल' इत्यस्य लोपे ऊकारस्य गुणे च कृतेऽवादेशे 'विभक्तिकार्ये स्थविष्ठः' इति । 'ओर्गुणः' इति गुणादेशस्तु न, लोपस्याभीयत्वेन असिद्धत्वात् ।

प्रेष्ठः (ई. ५१) अयमनयोरतिशयेन प्रियः इति विग्रहे 'अतिशायने तमबिष्ठनौ' इतीष्ठनि 'प्रियस्थिर ' इति सूत्रेण प्रियस्य प्रादेशे 'आद्गुणः' इति गुणे विभक्तिकार्ये 'प्रेष्ठः' इति । अकारोच्चारणसामर्थ्यात् 'यस्येति च' इति अलोपो न ।

विद्वद्देशीयः (ई. ५२) ईषदूनो विद्वान्-विद्वद्देशीयः । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति विद्वदिति प्रातिपदिकात् देशीयर्प्रत्यये जश्त्वे सुलोपे रेफस्य विसर्गे 'विद्वद्देशीयः' इति ।

कुटीरः (४२ ४८) 'कुटीशब्दात् कुटीशमीशुण्डाभ्यो रः इति रप्रत्यये विभक्ति कार्ये 'कुटीरः' इति । ह्रस्वा कुटी-इत्यर्थः ।

भूयिष्ठः । ५७ । अयमनयोरतिशयेन बहुरिति विग्रहे बहुशब्दात् 'इष्ठस्य यिट् च' इत्यनेन इष्ठनि प्रत्ययेऽनुबन्धलोपे यिडागमेऽनुबन्धलोपे च कृते 'बहोर्लोप भू च बहोः' इत्यनेन बहोः स्थाने भू इत्यादेशे प्रातिपदिकत्वात् सौ रुत्वे विसर्गे संयोगे भूयिष्ठः इति सिद्धम् ।

इति प्राग्िवीयप्रकरणम

अथ स्वार्थिकप्रकरणम्

बहुशः । ५० । बहूनि ददाति इति विग्रहे बहुशब्दात् 'बह्वल्पार्थाच्छस्कारकादयन्तरस्याम्' इत्यनेन शस् प्रत्यये प्रातिपदिकत्वात् सौ सुलोपे सकारस्य 'ससजुषो रुः' इति रुत्वे 'खरवसानयोर्विसर्जनीयः' इति विसर्गे बहुशः इति सिद्धम् ।

पटपटा करोति । ५९। पटत् पटदिति सम्पद्यते तं करोति विग्रहे पटत शब्दात् 'डाचि विवक्षिते द्वे बहुलम्' इति सूत्रेण द्वित्वं 'अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्' इत्यनेन डाचि प्रत्ययेऽनुबन्धलोपे टिलोपे 'तस्य परमाम्रेडितम्, इत्यनेन आम्रेडितसंज्ञायां 'नित्यमाम्रेडिते डाचीति वक्तव्यम्' इति तकार-पकारयोः पकारे कृते प्रातिपदिकत्वात् सौ अव्ययत्वात् सुलोपे पटपटाकरोति इति सिद्धम् ।

आतिथ्यम् (ई० ५१)—अतिथये इदमिति विग्रहे 'अतिथेर्ञ्यः' इति

चतुर्थ्यन्तात् अतिथिशब्दात् ञ्यप्रत्यये सुब्लुकि 'तद्धितेष्वचामादेः' इत्यादिवृद्धौ 'यस्येति च' इति इलोपे विभक्तिकार्ये 'आतिथ्यम्' इति ।

मृत्स्ना (ई० ५२)—प्रशस्ता मृत् इति विग्रहे 'प्रशंसायां रूपप्' इति सूत्रं प्रबाध्य 'सस्नौ प्रशंसायाम्' इति सूत्रेण मृत्शब्दात् स्वार्थे स्नाप्रत्यये विभक्त्यादिकार्ये 'मृत्स्ना' इति ।

दुःखाकरोति (ई० ४०)-'दुःखात् प्रातिलोम्ये' इति सूत्रेण प्रातिकूल्येऽर्थे दुःखशब्दात् डाच्प्रत्यये विभक्तिकार्ये 'दुःखाकरोति' इति । पीडयतीत्यर्थः ।

इति स्वार्थिकप्रकरणम् ।

अथ द्विरुक्तप्रकरणम्

एकैकयाहुत्या-एकेत्यस्य 'नित्यवीप्सयोः' इति द्विर्वचने सति एकया एकया इति स्थिते 'एकं बहुव्रीहिवत्' इति बहुव्रीहिवत्त्वेन समुदायस्य प्रातिपदिकत्वात् सुपो लुकि पूर्वखण्डस्य पुंवत्वे कृते वृद्धौ समुदायात् पुनस्तृतीयोत्पत्तौ 'एकैकयेति' सिद्धम् ।

गतगतः (ई० ४१, ४२)—विरहात् पीड्यमानस्येयं मुक्तिः । 'अच'वाधे इत्यनेन पीडायां द्वित्वे बहुव्रीहिवद्भावे च कृते सुब्लुकि विभक्तिकार्ये गतगतः इति ।

कर्मव्यतिहारे सर्वनाम्नः :- इत्यत्र बहुलग्रहणस्य प्रयोजनं—लिखत ।

दलद्वये टाबभावः, क्लीबे चादड्विरहः स्वमोः ।
समासे सोरलुक् चेति, सिद्धं बाहुलकात्त्रयम् ॥

अयमर्थ :-—स्त्रीलिङ्गेषु 'अन्य-पर-इतरशब्देषु' कर्मव्यतिहारे द्वित्व सति 'अन्योन्यम्' इत्यादौ पूर्वोत्तरखण्डयोः टाब्निवृत्तिर्बहुलग्रहणस्य प्रथमं प्रयोजनम् । क्लीबे (नपुंसके) च 'अन्योन्यम्' 'इतरेतम्' इत्यादौ 'अद्ड्डतरादिभ्यः-'स्वमोः

प्राप्तोऽद्ड् बाहुलकात् न भवतीति तस्य द्वितीयं प्रयोजनम् । अन्येन आश्रयः= अन्याश्रयः इत्यादौ सोर्लुक् प्राप्तः बाहुलकात् न भवतीति सोरलुक् चेति तृतीयं प्रयोजनम् ।

इति द्विरुक्तप्रकरणम् । [इति तद्धिताः]

अथ स्त्रीप्रत्ययप्रकरणम्

अजा । ६० । अजत्वजातिविशिष्टा स्त्री इति विग्रहे अजशब्दात् 'जातेरस्त्रीविषयादयोपधात्' इत्यनेन ङीषि प्राप्ते तं बाधित्वा 'अजाद्यतष्टाप्' इति सूत्रेण टापि अनुबन्धलोपे 'अकः सवर्णे दीर्घः' इति दीर्घे प्रातिपदिकसंज्ञायां सौ 'हल्ङ्याब्भ्यः' इत्यादिना सुलोपे संयोगे अजा इति सिद्धम् ।

पञ्चाजी (ई० ४२) पञ्चानामजानां समाहारः इति विग्रहे 'तद्धितार्थ' इति द्विगुसमासे सुब्लुकि 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति स्त्रीत्वे 'द्विगोः' इति ङीपि 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'पञ्चाजी' इति । अत्र समासार्थभूतो यः समाहारः तन्निष्ठं स्त्रीत्वं पञ्चाजेति समुदायसत्वेन 'अजाद्यतष्टाप्' इत्यत्र 'अजाद्यतः' इति षष्ठीमाश्रित्य अजादीनाम् अजन्तस्य च वाच्ये स्त्रीत्वे टाप् इत्येवम् अजादिभिः स्त्रीत्वस्य विशेषणादत्र न टाप् ।

अतिधीवरी (ई० ५०)—धीवानमतिक्रान्ता-अतिधीवरी । 'अन्येभ्योऽपि दृश्यते' इति क्वनिप् प्रत्यये 'घुमास्थे' तीत्वे 'वनो र च' इति वन्नन्तात् अतिधीवनशब्दात् स्त्रियां ङीपि रश्चान्तादेशे 'यस्येति च' इत्यालोपे विभक्तिकार्ये 'अतिधीवरी' इति ।

शूद्रा चामहत्पूर्वा जातिः । अस्यार्थः-शूद्रशब्दष्टापं लभते जातिश्चेद् वाच्या, महत्पूर्वकः शूद्रशब्दष्टापं न लभते जातिश्चेद् वाच्या । ततश्च शूद्रत्वजातिविशिष्टा स्त्री इति विग्रहे शूद्रशब्दात् टापि सवर्णदीर्घे शूद्रा इति । पुंयोगे

शूद्रस्य स्त्री इति विग्रहे शूद्री इति प्रयोगादाख्यायामिति ङीप् भवति । महाशूद्र-शब्दे महत्पूर्वकत्वेन टापोऽप्राप्त्या 'पुयोगादाख्यायाम्' इति ङीषि महाशूद्री इति सिद्धयति । 'आभीरी तु महाशूद्री जातिपुंयोगयोः समा' इति कोषबलात् जातौ पुंयोगेऽपि महाशूद्री इत्येव भवति ।

शर्वरी (ई० ५१)—शृधातोः 'अन्येभ्योऽपि दृश्यते' इति वनिपि गुणे रपरत्वे 'वनो र च' इति स्त्रियाँ ङीपि रश्चान्तादेशे भत्वादलोपे विभक्तिकार्ये 'शर्वरी' इति ।

सर्विका (ई० ४८)—सर्वशब्दात् स्त्रीत्वविवक्षायां टापि सवर्णदीर्घे 'सर्वा इति । ततः सर्वाशब्दात् एकादेशस्य पूर्वान्तत्वेन ग्रहणात् 'अव्ययसर्वनाम्नामकच् प्राक् टेः' इति टेः प्रागकचि सर्वकाशब्देऽस्मिन् 'प्रत्ययस्थात् कात् पूर्वस्यात् इदाप्यसुपः' इति ककारात् पूर्वस्य अत इत्वे विभक्तिकार्ये 'सर्विका' इति ।

कारिका (ई० ५२)—कृञो ण्वुचि अकादेशे वृद्धौ रपरत्वे 'कारक' इति । तस्मात् कारकशब्दात् टापि सवर्णदीर्घे 'प्रत्ययस्थादि' ति कात्पूर्वस्य रेफादकारस्य इत्वे विभक्तिकार्ये 'कारिका' इति ।

देवी (ई० ४५)—'टिड्ढाणञ् —' इति सूत्रे टित्वन्तु प्रातिपदिकस्य क्वचित् प्रत्ययकृतं, क्वचिच्च प्रकृतिकृतम् । तत्र प्रकृतिकृतम् यथा नदट् नदी। देवट्-देवी' इति । पचादिषु 'नदट्देवट्' इत्यनयोः पाठात् स्वत एव टित्वमिति ताभ्यां ङीपि 'यस्येति च' इत्यलोपे विभक्तिकार्ये 'नदी' 'देवी' इत्युभयं सिद्धं भवति ।

सौपर्णेयी (ई० ५१)—सुपर्णाया अपत्यं स्त्री इति विग्रहे सुपर्णाशब्दात् ढकि एयादेशे 'किति च' इति वृद्धौ 'सौपर्णेय' इत्यस्मात् 'टिड्ढाऽणञ्—' इति ङीपि 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'सौपर्णेयी' इति ।

ऐन्द्री (ई० ४६)—इन्द्रो देवताऽस्येति विग्रहे 'साऽस्य देवता' इत्यणि वृद्धौ 'टिड्ढाणञ् —' इति ङीपि भत्वादलोपे विभक्तिकार्ये 'ऐन्द्री' इति ।

गार्गी (ई० ४९)—गर्गस्याऽपत्यं स्त्रीति विग्रहे यञि 'गार्ग्य' इत्यस्मात् स्त्रीत्वबिवक्षायां 'यञश्च' इति ङीपि भत्वादलोपे 'हलस्तद्धितस्य' इति यलोपे

विभक्त्यादिकार्ये तत्सिद्धिः ।

कुमारी (ई० २७) वयोवाचकात् कुमारशब्दात् स्त्रीत्वविवक्षायां 'वयसि प्रथमे' इति ङीपि अनुबन्धलोपे भसंज्ञायां 'यस्येति च' इत्यलोपे प्रातिपदिकत्वात् सौ 'हलङ्याब्भ्यः' इति सुलोपे तत्सिद्धिः ।

एनी (ई० ३०)—एतशब्दात् स्त्रीत्वविवक्षायां 'वर्णादनुदात्तात्तोपधात्तो नः' इति ङीपि तकारस्य नकारे च कृते भत्वाद् 'यस्येति च' इत्यलोपे विभक्ति-कार्ये 'एनी' इति। पक्षे टापि 'एता'। ङीपभावे नत्वमपि न भवति, ङीपः सन्नियोगशिष्टत्वादिति भावः ।

इन्द्राणी—इन्द्रस्य स्त्रीति विग्रहे 'इन्द्रवरुण—' इत्यादिसूत्रेण ङीष्सन्नि-योगेन आनुगागमे च जाते अनुबन्धलोपे च कृते सवर्णदीर्घे णत्वे विभक्तिकार्ये तत्सिद्धम् ।

हिमानी—महद्धिममिति विग्रहे हिमशब्दात् 'हिमारण्ययोर्महत्त्वे' इति वार्तिकेन ङीपि आनुगागमे च जाते अनुबन्धलोपे सवर्णदीर्घे विभक्तिकार्ये सिद्धम् ।

अर्याणी (ई० २८) अर्यशब्दात् स्त्रीत्वे 'अर्यक्षत्रियाभ्यां वा स्वार्थे' इति वार्तिकेन ङीषि आनुकि च कृते भत्वादलोपे णत्वे विभक्तिकार्ये 'अर्याणी' इति । पक्षे टापि 'अर्या' इति । स्वामिनी वैश्या वेत्यर्थः । पुंयोगे 'अर्यी' इति ।

द्विबिस्ता (ई० ४२) द्वौ बिस्तौ पचतीति विग्रहे 'तद्धितार्थे' ति द्विगु-समासे ठकि 'अध्यर्ध' इति ठगो लुकि 'अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि' इति ङीपि प्राप्ते 'द्विगोः' इति ङीपि प्रतिषिद्धे अदन्तत्वात् टापि विभक्त्यादिकार्ये 'द्विबिस्ता' इति ।

कुण्डोध्नी (ई० ५२) कुण्डमिव ऊधो यस्याः इति विग्रहे समासे सुब्लुकि गुणे 'ऊधसोऽनङ्' इत्यनङि 'बहुव्रीहेरूधसो ङीष्' इति ङीषि 'अल्लोपो नः' इत्यलोपे विभक्तिकार्ये 'कुण्डोध्नी' इति ।

मनावी (ई० ४६) मनोः स्त्री=मनावी, मनायी, मनुः । 'मनोरौ वा' इति सूत्रेण ङीप्सन्नियोगशिष्टेन औकारान्तादेशे आवि विभक्तिकार्ये 'मनावी' इति

ङीप्सन्नियोगशिष्टेनैकारादेशे आयादेशे विभक्तिकार्ये 'मनायी' इति। पक्षे 'मनुः' इति भवति।

मातुलानी, उपाध्यायानी (ई० ४५, ४६) मातुलस्य स्त्री-मातुलानी-मातुली। एवम्-उपाध्यायस्य स्त्री-उपाध्यायानी-उपाध्यायी। इति। उभयत्र 'मातुलोपाध्याययोरानुग्वा' इति वार्तिकेन विभाषया ङीप् आनुक् च भवति।

अतिकेशी (ई० ४६)—केशानतिक्रान्तेति विग्रहे समासे सुब्लुकि 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति ङपि टिलोपे विभक्तिकार्ये 'अतिकेशी' इति।

स्वाङ्गाच्चोपसर्जनात्। ४ः। अयम्भावः—'स्वाङ्गाच्चोपसर्जनात्' इति सूत्रे स्वाङ्गपदेन स्वस्य=अवयवीभूतस्य, अङ्गंस्वाङ्गम इति कथने सुमुखा शाला' इत्यत्राऽपि ङीष् स्यात्, मुखस्य शालाङ्गत्वात्। किञ्च 'सुकेशी रथ्या' इत्यत्र ङीप् न स्यात् केशानां प्राण्यङ्गत्वाऽभावात्। तस्मादव्याप्त्यतिव्याप्ति-वारणाय उक्तसूत्रे 'अद्रवमित्यादिना त्रिविधं स्वाङ्गं गृह्यते।

(१) 'अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम्' न विद्यते द्रवो यस्य तद् अद्रवम्, अतः सु=शोभनः, स्वेदः=धर्मजः—उदकप्रस्रवो यस्याः सा'सुस्वेदा' इत्यत्र ङीष् न। मूर्तिमत=स्पर्शवद् द्रव्यपरिमाणं मूर्तिस्तद्वत्। अत एव ,सुज्ञाना इत्यत्र ङीष् न। प्राणिस्थम्–प्राणिनि–प्राणवति जन्तौ विद्यमानम्। अतः'सुमुखा शाला' इत्यत्र ङीष् न। अविकारजम्=रोगादिविकाराजन्यम्। अतः सु= अधिकः, शोफः=श्वयथुः, यस्याः सा 'सुशोफा' इत्यत्र ङीष् न।

(२) अतत्स्थं तत्र दृष्टं च=अतत्स्थं=सम्प्रति अप्राणिस्थमपि, च= किन्तु, तत्र=प्राणिनि, दृष्टं=दृश्यमानं, यत्तदपि स्वाङ्गमित्यर्थः। अतः सुकेशी रथ्या' (ई० ४२) इत्यत्र ङीष् सिद्धः। रथ्यां=वीथ्यां, विकीर्णः केशः सम्प्रति अप्राणिस्थत्वेऽपि कदाचित् प्राणिस्थत्वादिति भावः।

(३) तेन चेत्तत्तथा युतम्=येनाङ्गेन प्राणिरूपं वस्तु यथा युतं, तेन तत्सदृशेन अङ्गेन तद्=अप्राणिरूपं वस्तु, तथा प्राणिवत्' युतं=युक्तं चेत्=स्यात्, तदपि पाणिनि दृष्टं स्वाङ्गमित्यर्थः। अत एव 'सुस्तनी प्रतिमा' इत्यत्र

ङीष् सिद्धिः ।

कबरपुच्छी (ई० ४४)—कबर इव पुच्छो यस्याः सा कबरपुच्छी' । 'कबरमणिविषशरेभ्यो नित्यम्' इति वार्तिकेन नित्यं ङीष् ।

शूर्पणखा—(ई० ५०)—शूर्पाणीव नखाः यस्या इति विग्रहे । संज्ञात्वेन नित्यसमासत्वात् 'नखमुखात् संज्ञायाम्' इति ङीष्निषेधे सति 'पूर्वपदात् संज्ञायामगः' इति णत्वे सुबाद्युत्पत्तिः । यदा तु शूर्पवन्नखानि यस्या इति योगमात्रं विवक्ष्यते, न तु संज्ञा, तदा असंज्ञात्वात् न ङीब्निषेधो न वा णत्वं भवति ।

आकृतिग्रहणा जातिरिति । गृह्यते इति ग्रहणम् आकृतिः ग्रहणं यस्याः सा 'आकृतिग्रहणा=जातिः'अनुगतसंस्थानव्यङ्ग्येत्यर्थः । यथा तटी, घटी इत्यादि । जलसमीपप्रदेशः आकृतिविशेषविशिष्टस्तरः, अतस्तटत्वमाकृतिव्यङ्ग्यत्वाज्जातिः, तेन तटशब्दस्य जातिवाचकत्वाद् अनियतस्त्रीलिङ्गत्वाद् अयोपधत्वाच्च 'जातेरस्त्रीति' ङीष् ।

नन्वेवं प्रथमलक्षणस्वीकारे वृषलत्वादीनां जातित्वं न स्यात् तदवयवसन्निवेशस्य ब्राह्मणादिसाधारण्येन वृषलत्वादीनां तद्व्यङ्ग्यत्वादिति चेन्न 'लिङ्गानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या' इति । असर्वलिङ्गत्वे सति एकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिरित्यर्थः । यथा 'वृषली' इति । वृषलो हि असर्वलिङ्गं, नपुंसकत्वाऽभावात् । एकस्यां व्यक्तौ वृषलत्वे उपदिष्टे सति यदपत्यसोदरादिषु तदुपदेशं विना तस्य सुग्रहत्वात् 'जातेरस्त्रीति ङीष् ।

नन्वेवमपि औपगवी, कठी इत्यादौ औपगवादेरनुगतसंस्थानव्यङ्ग्यत्वाभावात् सर्वलिङ्गत्वाच्चेत्युभयविधजातित्वात् ङीष् न स्यादिति चेन्न—'गोत्रं च चरणैः सह' इति । अत्र लक्षणे गोत्रशब्देन अपत्यं विवक्षितम्, नतु पारिभाषिकम् । पौत्रप्रभृतीति, चरणशब्दस्तु शाखाध्येतरि प्रसिद्धः । तथा च अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः । तत्र प्रथमं उपगोरपत्यं स्त्रीति विग्रहे 'तस्यापत्यमि'त्यणि वृद्धौ गुणेऽवादेशे 'जातेरस्त्री' ति ङीष् 'औपगवी' इति द्वितीयं कठेन प्रोक्तमधीयाना 'कठी' इति ।

तुमर्थे निपातनात् इष्यै प्रत्यये णे 'रोहिष्यै' इति ।

अन्वेतवै (ई० ४०) अत्र 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति सूत्रेण तवैप्रत्ययः । अन्वेतव्यमिति लोके ।

कर्त्वम् (ई० ४२)—अत्र 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति त्वन्प्रत्ययः । कृत्यमिति लोके ।

विसृपः (ई० ४९)—'सृप्लृ गतौ' इत्यस्माद्धातोरत्र 'सृपि तृदोः कसुन्' इत्यनेन कसुन्प्रत्ययः ।

ऋजव, सन्तु पन्थाः (ई० ४०)—अत्र पन्थानः इति प्राप्ते 'सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः' इत्यनेन सुः ।

धीत्या, मत्या, सुष्टुत्या (ई० ४५, ४६)—अत्र सर्वत्र 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' इति सूत्रेण धीति-मती सुष्टुतीशब्देभ्यस्तृतीयैकवचनस्य पूर्वसवर्णे दीर्घे कृते 'धीती, मती, सुष्टुती, इति भवन्ति । (प्रमाणतः आन्तर्यात् सवर्णदीर्घत्वं बोध्यम्) ।

ब्राह्मणासः (५२)-ब्राह्मणशब्दाज्जसि 'आज्जसेरसुक्' इत्यसुकि पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे 'ब्राह्मणासः' इति । लोके तु 'ब्राह्मणाः' इति भवति ।

तन्वं पुषेम, तनुवं पुषेम (ई० ४०)-अत्र 'तन्वादीनां छन्दसि बहुलम्' इत्यनेन बाहुलकात् अधातुत्वादप्राप्ते उवङ् विधीयते, तेन उवङ्पक्षे 'तनुवम्' इति । तदभावे 'वा छन्दसि' इत्यामि यणि 'तन्वम्' इति भवति ।

माद्भिः (ई० ४८)-'मास् भिस्' इति स्थिते 'मासश्छन्दसीति वक्तव्यम्' इति वार्तिकेन मासः सस्य तकारादेशे जश्त्वे सस्य रुत्वे विसर्गे 'माद्भिः' इति ।

प्रप्रायमग्निः (ई० ४१)—अत्र 'प्रसमुपोदः पादपूरणे' इति सूत्रेण प्रशब्दस्य द्वित्वमिति ।

वाचस्पतिम्, दिवस्पुत्राय, दिवस्पृष्ठम् (५१)—अत्र सर्वत्र 'षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु' इति सूत्रेण षष्ठ्याः विसर्गस्य सत्वमिति ।

इति वैदिकप्रकरणम्

अथस्वरप्रकरणम्

गोपायतं नः (५२)—'धातोः' इत्यनेन 'गुप्' इत्यस्यान्तोदात्ते ततः आयप्रत्यये 'आदयुदात्ताश्च' इति प्रत्ययस्वरेण आद्युदात्ते 'सनाद्यन्ताः—' इति धातुसंज्ञायां 'धातोः' इति यकाराकारस्योदात्ते, प्रागुक्तयोरुदात्तयोः सतोः पश्चात् प्रवृत्तत्वात् इति शिष्टः स यकाराकार एक उदात्तः, अतोऽयमेव बलवान् । तस्य 'अनुदात्तौ सुप्पितौ' इति सूत्रेण कृतानुदात्तेन शबकारेण सह 'अतो गुणे इति पररूपे 'एकादेश उदात्तेनोदात्तः' इत्युदात्ते थसस्तमादेशे तस्य 'तास्यनुदात्तेन्-ङिदुपदेशात्' इत्यनेनादुपदेशात् परत्वादनुदात्तत्वम् तस्य च 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरिते 'स्वरितात् संहितायाम्' इति नकारस्य एकश्रुतौ गोपायतं नः' इति सिद्धम् ।

देवीं वाचम् (४८)—देवशब्दस्य अच्प्रत्ययान्तत्वात् 'चितः' इति अन्तोदात्तत्वे पचादिषु 'देवट्' इति पाठात् 'टिड्ढाणञ् इति ङीपि तस्य 'अनुदात्तौ सुप्पितौ' इति अनुदात्तत्वे 'यस्येति च' इति टिलोपे'अनुदात्तस्य च यत्रोदात्तलोपः' इति ङीपः उदात्तत्वे उक्तं रूपं सिद्धम् ।

कर्तव्यम् (४६)—अत्र तव्यप्रत्ययस्यादेः 'आद्युदात्तश्च' इत्युदात्तः इति ।

यज्ञस्य, युच्छति (ई० ४८, ५०)–'अनुदात्तौ सुप्पितौ' इत्यनेन 'यज्ञस्य' इत्यत्र सुपः, 'युच्छति' इत्यत्र तु पित्प्रत्ययस्य उदात्तः इति ।

क्व (ई० ४७)—किम्शब्दात् 'किमोऽत्' इत्यति 'तित्स्वरितम्' इति स्वरितत्वे 'क्वाति' इति किमः क्वादेशे उक्तं रूपं सिद्धम् ।

कौञ्जायनाः (४०, ५१)—कोञ्जस्यापत्यानि बहूनि इति विग्रहे 'गोत्रे कुञ्जादिभ्यश्च्फञ्' इति च्फञ् प्रत्यये सुब्लुकि फस्यायनादेशे वृद्धौ 'व्रातच्फञो स्त्रियाम्' इति ञ्यप्रत्यये 'ञ्यादयस्तद्राजा' इति तद्राजसंज्ञायां 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति लुकि विभक्तिकार्ये 'तद्धितस्य' इति अन्तोदात्ते 'कौञ्जायनाः' इति ,नच 'चितः सप्रकृतेर्बह्वकजर्थम्' इति वार्तिकेन अन्तोदा-

तत्वे सिद्धे 'तद्धितस्ये' ति सूत्रं व्यर्थमिति वाच्यम्, ञित्स्वरबाधनार्थमस्यावश्यकत्वात् ।

पौंस्याः (५०)—यस्मिन् विश्वानि पौंस्याः । पुंसः कर्मणि ब्राह्मणादित्वात् ष्यङि आदिवृद्धौ विभक्तिकार्ये 'ञ्नित्यादेर्नित्यम्' इति आद्युदात्तत्वे रूपं सिद्धम् ।

चिकीर्षकः (४९)—सन्नन्तात् चिकीर्षशब्दात् ण्वुलि वोरकादेशे अलोपे 'लिति' इति सूत्रेण लित्प्रत्ययात् पूर्वस्येकारस्य उदात्तत्वे विभक्तिकार्ये 'चिकीर्षकः' इति । उदात्ते कर्तव्ये अलोपस्य स्थानिवत्त्वं तु न, स्वरविधौ तन्निषेधात् ।

इति स्वरप्रकरणम्

प्रश्नपत्राणि

मध्यकौमुद्या भ्वादिगणान्तविभक्त्यर्थसमासभागेषु प्रश्नाः ।

१. अमी ईशाः, उ उमेशः, चक्रिण्ढौकसे, चिद्रूपम्, एतन्मुरारिः, अश्चितः, सञ्छम्भुः, पुंस्कोकिलः, सर्पिष्कल्पम्, कस्कः, लक्ष्मीच्छाया, हरिः शेते, हरिःस्फुरति, देवा इह, अहर्गणः, पुनारमते, एष विष्णुः, रामेषु, सर्वेषाम्, विश्वपः, क्रोष्टा, स्त्रियै, वृत्रघ्नः, अस्माभिः, असकौ, तुदन्ती, सुपुमांसि, एषु केषाञ्चन दशानां विशेषसूत्रनिर्देशपूर्वकं साधुत्वप्रकारः प्रदर्शनीयः । १५

२. भवति, बभूवतुः, आतीत्, न्यषेधत्, जगाद, नेदतुः, आनर्च गोपायाञ्चकार, क्षीयात्, पपतुः, अदधत्, उवोढ, गाधते, एधेत, शृणुयुः, एतेषु केचिदष्टौ प्रयोगा एव विशेषसूत्रोल्लेखपुरःसरं साधु साधनीयाः । १२

३. लेखिष्यमाणेषु सूत्रेषु चतुर्णां सूत्राणां प्रत्येकं सोदाहरणमर्थं विशदयत । ८
येनाङ्गविकारः, इत्थंभूतलक्षणे, कर्तृकर्मणोः कृति, यस्य च भावेन

भावलक्षणम्, यतश्चनिर्धारणम् उभयप्राप्तौ कर्मणि, साधकतमं करणम् ।

४. गोत्रेण गार्ग्यः । जटाभिस्तापसः । अग्नये स्वाहा । कटे आस्ते ।
पापात् बिभेति । रेखाङ्कितपदेषु विभक्तिविधायकसूत्राणि लिखत । ५

५. अधिहरि, पञ्चाङ्गम्, शङ्कुलाखण्डः, महावैयाकरणः, कुपुरुषः,
अनश्वः, प्राचार्यः, कुम्भकारः, पूर्वरात्रः, द्विनावम्, चित्रगुः, एषु
पञ्चानां प्रयोगाणां समासनामोल्लेखपूर्वकं साधुत्वं दर्शयत । १०

मध्यसिद्धान्तकौमुद्या नियतभागे प्रश्नाः ।

सूचना—सर्वे प्रश्नाः समानाङ्काः । यथेच्छं पञ्च समाधेयाः ।

१. जघसिथ, एधि, अभीयात्, अचकात्, अख्यत्, अवोचत्, अपिपरुः,
जहाहि, अदित, नेनिजानि—एषु यथेच्छं पञ्च साधनीयाः ।

२. अशात्, दिदीये, दुधुविव, आनशे, वव्रश्च, उपचस्कार, आञ्जीत्,
कुर्यात्, स्तभान, शश्रतुः–एषु पञ्च प्रयोगान् सुष्ठु साधयत ।

३. अलुलोकत्, औननत्, अबीभवत्, घातयति, जिघृक्षति, ईप्सति, शाश-
य्यते, अवर्वाः, राजानति, हलयति–एषु पञ्च रूपाणि साधनीयानि ।

४. विजयते, संगच्छते, चलयति, अभाजि, तप्यते तपस्तापसः–पुरा भुङ्क्ते,
देयम्, मार्ग्यः, शिष्यः, कृत्यम्–एतेषु यथासम्भवं सविग्रहवाक्यप्रदर्शनं
ससूत्रनिर्देशञ्च पञ्चानां विशेषकार्याणि प्रदर्शयत ।

५. प्रज्ञः, श्राद्धकरः, प्रियंवदः, अवावा, ग्लानः, हितम्, आशंसुः, पाकः,
पक्त्रिमम्, अवस्तारः एषु पंच प्रयोगा विग्रहप्रदर्शनपुरस्सरं साधनीयाः ।

६. औत्सः, गार्ग्यः षाण्मातुरः,वामदेव्यम्,शाकंभरम्, प्रावृषिकः, शाब्दिकः,
आत्मनीनम् आह्निकम्, पौरोहित्यम्–एतेषु सूत्रोपन्यासप्रदर्शनपूर्वकं
विशेषकार्याणि दर्शयत ।

७. इष्टी-तुन्दिलः, स्थविष्ठः, गार्गीः, श्वश्रूः, युवतिः, विसृपः, ब्राह्मणासः,
गोपायतं नः, चिकीर्षकः–एषु ससूत्रोपन्यासं विशेषकार्याणि प्रदर्शयत ।

मध्यसिद्धान्तकौमुद्या नियतभागे प्रश्नाः ।

सूचना :—सर्वे प्रश्नाः समानाङ्का । एषु यथेच्छं केचन पञ्चैव समाधेयाः ।

१. आदत्, जघनिथ, अयुः, निरियात्, मृड्ढि, सुषुपतुः, अजुहवुः, पिपूर्तः अपारिष्ठाम्,ऐयरुः,एषु यथेच्छं पञ्च प्रयोगाः ससूत्रनिर्देशं साधनीयाः ।१०

२. त्रेसतुः, ननंष्ठ, अदीपि, आसीवत्, ववरिथ, अलिवत्,अतृणेट्, अक्षत, ब्रूयात्, गृहाण–एषु पञ्च प्रयोगान् सुष्ठु साधयत। १०

३. अपीपिडत्, अचीकृतत्, अपीपवत्, वाजयति, दुद्यूषति, ईर्त्सति, चञ्चूर्यते, समिधिता, कलयति—एतेषु पञ्च सूत्रनिर्देशपुरस्सरं साधयत । १०

४. व्यतिलुनीते, आयच्छते, अध्यापयति, तायते, उदुम्बरः फलम्पच्यते, वसन् ददर्श, प्रयाणीयम्, शक्यम्, वृत्यः, आर्यगृह्य–एतेषु यथासम्भवं विग्रहवाक्यप्रदर्शनपुरस्सरं ससूत्रनिर्देशञ्च पञ्चानां साधनं विधेयम् । १०

५. नन्दनः, तुन्नपरिमृजः, विश्वम्भरः, सुशर्मा, जीनः, चक्राणः, दात्रम्, रागः, अवतारः, हित्वा–एतेषु पञ्च रूपाणि साधनीयानि। १०

६. दैव्यम्, वशिष्ठः, कौरव्यः, शाद्वलः, पौरस्त्यः, शौवस्तिकम्, कापित्थम्, लावणिकः, मातृभोगीणः, कापेयम्—एषु विग्रहवाक्यप्रदर्शनपुरस्सरं ससूत्रनिर्देशञ्च पञ्च रूपाणि साधु साधनीयानि । १०

७. मानोज्ञकम्, साक्षी, दन्तावलः, चतुर्धा, अतिधीवरी, शार्ङ्गरवी 'उक्थशा., दिवस्पुत्राय, यज्ञस्य, पौंस्याः—एतेषु पञ्चानां रूपाणां सविग्रहं सूत्रोपन्यासपूर्वकञ्च विशेषकार्याणि प्रदर्शयत । १०

मध्यकौमुद्यां भ्वादिगणान्तभागे विभक्त्यर्थसमासप्रकरणयोश्च प्रश्नाः ।

१. हरये । उपैति । शिवेहि । गवेन्द्रः । चक्रि अत्र । तट्टीका । उत्थानम् । सन्नच्युतः । पयस्पाशम् । भो देवाः, गीर्पतिः-शम्भू राजते । एषां केषुचित् षट्सु प्रयोगेषु सूत्रप्रदर्शनपूर्वकं सन्धिकार्यं निर्दिशत । ९

२. रामाय । पूर्वे । सखा । सर्वस्याः । श्रीपाय । युष्मान् । अमुना । पचन्ती । एषु चत्वारः प्रयोगाः सूत्रनिर्देशपूर्वकं साधनीयाः । ६

२. अभूत् ।निषेधति । आनर्च । गोपायाञ्चकार । क्षीयात् । पिबति । जग्मतुः । एधते । वर्त्स्यति । त्रेपे । अवोढाम् । निनाय । एषु अष्टानां प्रयोगाणां विशेषसूत्रोल्लेखपुरस्सरं साधुत्वप्रकारं प्रदर्शयत । १२